296

111/1941

अथपदार्थप्रकाशिकापूर्वखंडप्रारंभोयं ४२५० प० ८३

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

श्रीगणेशायनमः॥ श्रीगुरुभ्योनमः॥ श्रीसूर्यायनमः॥ यत्स्मरणाभीष्टकार्यस्यनिर्विघ्नांसंतिमेघ्नति॥ नरस्तंबुस्थितंवंदेवक्रतुंडं
शिवोद्भवं॥१॥ पितरौगोजिवल्लांजयतींबाशिवात्मकौ॥ याभ्यांपंचकनाआनाजाति:संसारहेतवः॥२॥ सार्वभौमनहागीरवि
भासास्पदभाषण॥ यस्यतंभ्रातरंकृष्णधंवंदेजगद्गुरुं॥३॥ नानाग्रंथान्समालोच्यसूर्यसिद्धांतभाषणं॥ करोमिरंगनाथोहं
नतत्पदार्थप्रकाशिकं॥४॥ अथग्रहादिचरितजिज्ञासुस्तु मुनींस्तत्प्रभकारकान्प्रतिस्वविदितंयथार्थतत्वंतत्संशयुरुषमयो
सुरसंवादंचकुकामःकश्चिदृषिःप्रथममारंभणीयतत्कर्मनिर्विघ्नसमाप्त्यर्थंकृतंग्रंथप्रणाममंगलंशिष्यशिक्षार्थंनिबध्नाति॥
अचिंत्याव्यक्तरूपायनिर्गुणायगुणात्मने॥ समस्तजगदाधारमूर्तयेब्रह्मणेनमइति॥ ॥ब्रह्मणेबृहत्वादपरिछिन्नत्वाज्जगद्व्यापकाय
परायः॥ तस्माद्वाएतस्मादात्मनआकाशःसंभूतइत्यादिश्रुतिप्रतिपाद्यायेत्यर्थः॥ नमःकायवाक्चेष्टोपलक्षितेमानसेंद्रियवृत्तिवि
शेषेणमत्तस्त्वमुत्कृष्टस्त्वत्तोहमपकृष्टइत्यादिरूपेणनतोस्मीत्यर्थः॥ ननुव्यापकत्वेनाकाशस्यैवसिद्धत्वंआह॥ समस्तजगदाधारम
र्तयेइति॥ समस्तस्यस्थावरस्यजंगमात्मकस्यजगतउत्पत्तिस्थितिविनाशावत्आधाराश्रयभूता:ब्रह्मविष्णुशिवरूपा:मूर्तय:स्वरू
पाणियस्यतस्मैब्रह्मविष्णुशिवात्मकायेत्यर्थः॥ आकाशस्यतदात्मकत्वाभावान्नसिद्धिरितिभावः॥ नन्वेतादृशस्यस्वरूपध्यानंक
र्तुंसमुचितमित्यतआह॥ अचिंत्याव्यक्तरूपायेति॥ अचिंत्यश्चासावव्यक्तरूपस्तस्मै अचिंत्योध्यानाविषयः अत्रहेतु:अव्यक्तरूपः॥ नव्य
क्तंप्रकटंरूपंयस्य॥ तथाचस्वरूपध्यानासंभवान्नमस्कारएवसमुचितइतिभावः॥ नन्वव्यक्तरूपःकथमित्यतआह॥ निर्गुणायेति निर्ग
तागुणाःसत्वरजस्तमोरूपायस्मात्तस्मैगुणातीतायेत्यर्थः॥ तथाचगुणात्मकस्यव्यक्तरूपत्वेनायंतरभावादव्यक्तरूपइतिभावः॥
नन्वेवमस्यारूपित्वमेवफलितंनाव्यक्तरूपित्वमित्यतआहगुणात्मनइति गुणाःनित्यज्ञानसुखादयआत्मगुणाःआत्मास्वरूपंयस्यत
स्मैनित्यज्ञानसुखात्मकाय॥ सत्यंज्ञानमनंतंब्रह्मेतिश्रुतेरित्यर्थः॥ तथाचास्यारूपित्वमसिद्धमितिभावः॥ साक्षान्निर्गुणायपरंपरया
गुणात्मने॥ कथमन्यथाजगत्कर्तृत्वंसंभवति॥ प्रकृतिंस्वामवष्टभ्यविसृजामिपुनःपुनः॥ भूतग्राममिमंकृत्स्नमवशःप्रकृतेर्वशादिति

भगवदुक्तेरित्यन्ये॥१॥ अथस्वोक्तस्यसकल्पितत्वशंकावारणायतत्संवादोपक्रमंविविक्षुः प्रथमंमयासुरेणतपस्तप्तमितिश्लोकत्र
यमाह॥ अल्पावशिष्टेतुकृतेमयनामामहासुरः॥ रहस्यंपरमंपुण्यंजिज्ञासुर्ज्ञानमुत्तमं॥२॥ वेदांगमग्र्यमखिलंज्योतिषांगतिकार
णं॥ आराधयन्विवस्वंतंतपस्तेपेसुदुश्चरम्मिति॥३॥ मयेतिनामयस्यासौमयाख्यःमहादैत्यःकश्चितपःअभिमतदेवताप्रीतिक
रजपहोमध्यानादिनास्वशरीरस्यक्लेशरूपंनियमंतपःकृतवान्॥ दैत्यानांतपश्चरणंपुराणेषुप्रतिपदंस्फुप्रसिद्धं॥ ननुतत्रतेषांतपश्च
रणस्यदेवताविशेषमभिमतमुद्दिश्यप्रसिद्धत्वेनकंदेवमुद्दिश्यतपस्तप्तमित्यतआह॥ आराधयन्निति विवस्वंतंसवितृमंडलाधिष्ठि
तारंनारायणंसेवयन्॥ ननुदैत्यारिमेतंस्वशत्रुंज्ञात्वापयंकथंस्वाभिमतसिध्यर्थमाराधनंहिशत्रुतःस्वहितसिद्धिरन्यथाशत्रुत्वव्या
घातइत्यतस्तपोविशेषणमाह॥ सुदुश्चरमिति स्फुतरांदुःखेनचरितुंकर्तुंशक्यमित्यर्थः॥ तथाचभक्तजनेकवत्सलतयास्तु
दुश्चरतपश्चरणस्फुप्रसन्नोदैत्यानामप्यभिमतंप्रयच्छतीतिपुराणेषुशतशःप्रसिद्धमतस्तत्प्रीत्याराधनंभितिभावः॥ ननुपुराणेषुदै
त्यानांतपश्चरणोक्तिप्रसंगेकचिदप्यस्याउक्तेस्तत्तपश्चरणंकथंप्रमाणंज्ञेयंइत्यतआह॥ अल्पावशिष्टेकृते॥ कृतेकृताख्येयुगचरणेतु
र्यांशसंध्यासंध्याशसहितेइत्यर्थः॥ तेनसंध्यासंध्यांशसमेतकेवलकृतकपाभिमतकृतचरणे॥ नग्रंथांतरोक्तकेवलकृतेइतिपर्यवसन्नं॥
अल्पकालेनसंध्यांशांतरगतेसमाप्त्यासन्नाभिमतेकृतेयुगेमयासुरेणतपस्तप्तमित्यर्थः॥ तथाचसांप्रतमेवमयासुरेणतपस्तप्तमिति
सर्वजनानागतप्रत्यक्षप्रमाणसिद्धं॥ नागमांतरप्रामाण्यमपेक्षितमितिभावः॥ ननुमयासुरेणकिमर्थंतेनतपस्तप्तंनहिप्रयोजनमनुद्दिश्यमं
दोपिप्रवर्तते॥ इत्यतोमयासुरविशेषणमाह॥ जिज्ञासुरिति ज्ञायतेअनेनेतिज्ञानंशास्त्रंज्ञातुमिच्छुःतथाचशास्त्रज्ञाननिमित्तंतेनतप
स्तप्तमितिभावः॥ किंतच्छास्त्रमित्यतोज्ञानविशेषणमाह॥ ज्योतिषामिति॥ प्रवहवायुस्थानांग्रहनक्षत्राणांगतिकारणंवेगत्यर्थास्ते
ज्ञानार्थाइतिगतेःसंस्थानचलनमादिज्ञानस्यकारणंप्रतिपादकंज्योतिःशास्त्रंजिज्ञासुरितिफलितं॥ ननुज्योतिःशास्त्रज्ञानार्थ
मायमायासोनयुक्तस्तस्यसर्वत्रपंडितैर्वेनादुरूहत्वादित्यतआह॥ अखिलमितिसंमयंज्योतिःशास्त्रमित्यर्थः॥ तथाचनाधोणां

113/1941

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

सू० प्र०
२

मानुपत्वेनैत्थीमज्ञानमत्यंयथार्थवानभवतीतिदैत्यबुद्धिनामत्वान्निःशेषस्यज्योतिःशास्त्रस्यदुःकहस्यविदितत्वंभवतंअत्र
नारकंसर्वज्ञंमहागुरुंसेवयामासेतिभावः॥ननुतस्यास्करस्यज्योतिःशास्त्रेप्रवृत्तिर्नयुक्ता॥फलाभावादित्यतआह॥वेदांगमिति
वेदस्यांगंतथाचांगिनोयत्फलंतदेवांगस्येतिमोक्षरूपफलसद्भावात्तत्रप्रवृत्तिर्युक्तेतिभावःअतएवपुण्यंपुण्यजनकं॥पुराणं
आद्यंत्वादिचतुर्दशविद्यांतर्गत्वात्ननुविदवेदांगंकुतइत्यतआह॥परममिति॥कालोयंभगवान्विष्णुरनंतःपरमेश्वरः॥तदेवा
त्र्यतेसम्यक्प्रत्यःक्रीयतमीमतइत्युक्तेःकालप्रतिपादकत्वेनोत्कृष्टमतोवेदांगंएतेनपुराणादीनांनिरासइतिभावः॥ननुव्या
व्याकरणादीनांषण्णांवेदांगत्वादस्मिन्नेवप्रीतिःकथमित्यतआह अग्र्यमिति षण्णांवेदांगानांमध्येश्रेष्ठंकुतइत्यतआह॥उत्तम
मितिमुख्यांगंनेत्रमित्यर्थः॥तथाचनेत्ररहितस्याकिंचित्करत्वादिदंज्योतिःशास्त्रंवेदांगेषुश्रेष्ठमितिभावः॥ननुतथाप्येत
स्यज्ञानार्थमेतावानायासोनयुक्तइत्यतआह॥रहस्यमिति॥विद्याहवैब्राह्मणमाजगामगोपायमात्रेवधिष्टेहमस्मि॥असूय
कायानृजवेयतायनमांब्रूयादवतीर्यवतीतथास्यामितिश्रुत्युक्तेर्गोप्यमित्यर्थः॥तथाचास्यशास्त्रदेयत्वेननिश्चितत्वादनेनत
त्प्राप्त्यर्थंएतावानथायासःकृतइतिभावः॥२॥ततस्तुष्टोकौमयायेदंदत्तवानित्याह॥ तोषितस्तपसातेनप्रीतस्तस्मैवरार्थिने॥
ग्रहाणांचरितंप्रादान्मयायसवितास्वयंइति॥४॥स्वयंस्वतःप्रीतःसुखरूपःयद्वाशीनोयंप्रत्यक्षःप्रीतःसंतुष्टोपिसन्सविताकवि
त्समंडलमध्यवर्तीतेनसूर्यस्वरेणतपसाआराधनेनतोषितःअत्यंतंसंतुष्टःतस्मैअसुरायमयनाम्नेवरार्थिनेवरंस्वाभिमतंज्योतिः
शास्त्रंअर्थयतिज्ञातुमिच्छतितस्मैज्योतिःशास्त्रजिज्ञासवेग्रहाणांप्रवहवायुस्थग्रहताराणांचरितंज्ञानंप्रादात्सकृपेणसाकल्येन
यथार्थतत्वेनआदात्दत्तवान्॥४॥नन्वेवंसत्पस्यकार्यार्थंशरणागतस्यापिस्वस्वशत्रुंप्रतिकथमिदंमुक्तवानित्यतोमयंप्रति
साक्षात्स्वरूपेणोक्तस्यवचनस्यानुवादार्थमुद्यतःप्रथमंतत्संगतिप्रदर्शकमेतदाह॥ श्रीसूर्यउवाचेति॥ सम्यक्हैदीप्यमानोर्कौ
मयास्करंप्रत्यवददित्यर्थः॥ अन्यथातुर्थपंचमश्लोकयोःसंगत्यनुपपत्तेःकिमिवाचेत्यतस्तद्वचनमनुवदति॥विदितस्तेम

श्रीः
२

याभावात्तोषितस्तपसाह्यहं॥दद्यांकालाश्रयंज्ञानंग्रहाणांचरितंमहदिति॥५॥हेमयास्करत्वेतभावःमानोरथोज्योतिःशा
स्त्रजिज्ञासारूपःमयासूर्येणविदितःत्वदकथितोपिस्वतोज्ञातःततःकिन्त्वेतावताममतत्रस्थिरतआह अहमिति॥तेइस्मा
दुत्तिस्तेतुभ्यंज्ञानंशास्त्रंकाश्रयंकाप्रधानंग्रहाणांप्रवहवायुस्थानांमहत्अपरिमेयंचरितंमहात्म्यंग्रहस्थितिचलनादिप्रतिपा
दकज्योतिःशास्त्रमितिफलितार्थः॥अहंसूर्यमंडलस्थःदद्यांदास्यामि॥ननुमांदैत्यंप्रतिदुर्दवाक्यप्रतारकंभवेत्वियथतीत्यतःस्ववि
शेषेणमप्रतारणापूर्वकत्वकथनेहेतुभूतमाह॥तोषितइति॥हियतःतपसात्वत्कृताराधनेनअत्यंतंसंतुष्टोतोदद्यामित्यर्थः॥त
थाचत्वत्कर्मवश्येनमयाभक्तजनवत्सलत्वाज्जातिवैरमुपेक्ष्यानुकंपितप्रह्लादवत्त्वमप्रतार्योनुकंपितइतिभावः॥ ५॥ ननुस
र्यस्यतथाज्ञात्वस्मिन्तयातत्संनिधौश्रवणकालपर्यंतंमयस्थातुंकथंशक्तःकथंवाननिरतभ्रमस्यतस्यमयसंवादार्थंभ्रमण
विच्छेदःसंभवस्यतोदानासंभवात्कथंदद्यादित्युक्तंइत्यतस्तद्वचनांतरमनुप्रवदति॥नमेतेजःसहःकश्चिदाख्यातुंनास्तिमेक्षणः॥
मदंशःपुरुषोयंतेनिःशेषंकथयिष्यतीति॥७॥हेमयतेतुभ्यंअयमग्रस्थःपुरुषःनिःशेषंसंपूर्णंज्योतिःशास्त्रंवदिष्यति॥न
न्वयंतथ्यंनवदिष्यतीत्यतआह॥मदंशइति॥ममसूर्यस्यांशःसंबंधीमत्तुल्यइत्यर्थः तथाचमदनुकंपितंत्वांप्रत्ययंतथ्यमेववदि
ष्यतीतिभावः॥एतेनाहंस्वांशद्वारादास्यामीत्यर्थोदद्यामितिपूर्वपद्योक्तस्यप्रकटीकृतः॥ननुत्वयैववक्तव्यमित्यतआह॥नेतिक
श्चिदपिजीवःमेसूर्यमंडलस्थस्यतेजःसहस्तेजोधारकःन॥तथाचबहुकालंमत्समीपेस्थातुमशक्तस्त्वंकथंमत्तःश्रोष्यसीति
भावः॥ननुस्वतपःसामर्थ्येनाहंत्वत्समीपेबहुकालंस्थातुंशक्तोत्वत्तःश्रोष्यामीत्यतआह॥आख्यातुमाह॥मेसूर्यमंडलस्थस्य
प्रवहवायुनानवरतंभ्रममाणस्यस्वशक्त्याकदाचस्थिरस्यकथयितुंक्षणःकालःनास्ति॥भ्रमणावसानासंभवेनैकत्रस्
थित्यसंभवात्॥तथाचस्थिरस्यतबहुकालंमत्संगासंभवान्मत्तःश्रवणमसंभावितं॥नहित्वमपिमत्स्थानमधिष्ठातुंश
क्तोयेनमत्तःश्रवणंतवसंभवति ईश्वरनियोगाभावादितिभावः॥६॥ अथसूर्यवचनानुवादमुपसंहरन्सूर्यांशपुरुष

115/1941

सू॰ टी॰
२

मयासुरसंवादोपक्रममाह ॥ इत्युक्त्वांतर्दधे देवः समादिश्यांशमात्मनः ॥ स पुमान्मयमाहेदं प्रणतं प्रांजलिस्थितं ॥ ७ ॥ देवः सू
र्यमंडलस्थ इति पूर्वोक्तं ॥ उक्त्वा कथयित्वा आत्मनः स्वस्य अंशं अंशरूपमंशपुरुषं समादिश्य त्वं मयं प्रति सकलं ग्रहमाहात्म्यं कथ
येत्याज्ञाप्य विनाज्ञां समयं प्रति कथं कथयेत् ॥ समुच्चयार्थश्चकारोनुसंधेयः अंतर्दधे अंतर्ध्यानं स सूर्यांशपुरुषमयनेत्रागोचर
त्वांप्रामवान् ॥ प्रकृतमाह स इति ॥ सूर्यांशमः सूर्यांशपुरुषः मयासुरं प्रति इदं वक्ष्यमाणं अवदत् ॥ ननु नापृष्टो वदेदित्युक्तेर्मय
पृष्टोयं कथं मयं प्रत्यवददित्यतो मयविशेषणद्वयमाह ॥ प्रणतं प्रांजलिस्थितमिति ॥ प्रकर्षेण भक्तिश्रद्धातिशयेन नतं नम्रं स्व
नमस्कारकारकं प्रकृष्टो मानसे चेष्टो मंमयं प्रत्यवददिति भावः ॥ ७ ॥ अथ प्रतिज्ञानं तत्संवादे मयं प्रतिज्ञानं कर्तुकामः सूर्यांशपु
रुषः सावधानतया मदुक्तं शृणु त्वमित्याह ॥ शृण्वैकमनाः पूर्वं यदुक्तं ज्ञानमुत्तमं ॥ युगे युगे महर्षीणां स्वयमेव विवस्वतेति ॥
हे मय, एकस्मिन्नेव मनो यस्यासौ अन्यविषयेभ्यो नमः समाहृत्य मदुक्ते मनो ददानस्त्वं तज्ज्योतिःशास्त्रं शृणु श्रवणस्रोत्रद्वारात्म
मनःसंयोगेन प्रत्यक्षं कुर्वित्यर्थः ॥ ननु त्वं स्वकल्पितं वदिष्यसीत्यतस्तद्बद्धसंबंधमाह ॥ पूर्वमित्यादि ॥ यत् उत्तमं नेत्र
रूपं ज्ञानं शास्त्रं ज्योतिःशास्त्रमित्यर्थः ॥ बहुकालांतरेण पूर्वकालिके देत्यत आह ॥ युगे युगे इति प्रतिमहायुगे महामुनीनां तान्प्रत्युक्त
म्यतीतानामित्यर्थः ॥ सूर्येण स्वयं अद्वारकेण साक्षादित्यर्थः ॥ एवकारोन्यत्वांशत्यद्वारं साक्षात् कथनासंभवात्तथा तान्प्रत्येत्य
मन्योपाहारमित्यस्य वारणार्थकः तेषां स्वतपः समाजवशीकृतेश्वराणां तत्प्रसादाधिगमाप्रतिहतेच्छानां सूर्यमंडलाधिगमनसंभवात्
उक्तं उपदिष्टं तथा च स्वकार्यो वा प्रतिकथ्यते न स्वकल्पितमिति भावः ॥ ८ ॥ ननु प्रतियुगं सूर्योक्तस्यैक्याभावात्त्वया किंयुगीयशास्त्र
मुपदिश्यते ऽन्यथैकदा त्वया युगे युगे इत्यस्यानुपपत्तिरित्यत आह ॥ शास्त्रमाद्यं तदेवेदं यत्पूर्वं प्राह भास्करः ॥ युगानां परिवर्तेन काल
भेदोत्र केवलमिति ॥ इदं मया तुभ्यं वक्ष्यमाणं ज्योतिःशास्त्रं तत्सूर्योक्तं ॥ एवकारात्सूर्योक्ताभिन्नत्वेन त्वा प्रत्यनुवादीनकविस्तरक
थनांतरेणेत्यर्थः ॥ आद्यं प्राक्काले सूर्येणोक्तं ॥ नन्वासन्नयुगीयसूर्योक्तस्यापि पूर्वकालोक्तत्वादसंभव इत्यतस्तत्पदापेक्षितं

श्रीः
२

117
1941

माद्यपदविवरणरूपमाह ॥ यदिति शास्त्रं सूर्यः पूर्वं प्रथमं यस्मात्पूर्वमनुक्तमित्यर्थः ॥ प्राह प्रकर्षेण विस्तरेण मुनीन्प्रत्युक्तवान् ॥ तथा च
प्रथमातिरेके कारणाभावात्प्रथमस्य विस्तरत्वात् शास्त्रं तेरोक्तं पूर्वोक्तेर्गतार्थत्वात् संक्षिप्तमपि स्वप्रकरणयमयुगीयशास्त्रमुपदिश्य
तेद्विति भावः ॥ ननु तर्हि यंनंतरयुगीयशास्त्राणां सूर्योक्तानां वैयर्थ्यप्रसंग इत्यत आह ॥ युगानामिति महायुगानां परिवर्तेन पुनःपुन
रावृत्त्या अत्र सूर्योक्तशास्त्रेषु केवलं स्वभिन्नाभावस्तन्मात्रयोगमित्यर्थः ॥ कालभेदः कालकृतमंतरं ॥ पूर्वशास्त्रकालादनंतरं शास्त्रकालो
भिन्न इत्युक्तेषु शास्त्रेषु भेदेन शास्त्रोक्तरीतिभेद इत्यर्थः ॥ तथा च कालवशेन ग्रहचारे किंचिद्वैलक्षण्यं भवतीति युगांतरे तत्तदंतरं ग्रह
चारेषु प्रसाध्य तत्कालस्थितलोकव्यवहारार्थं शास्त्रांतरमिव कृपाकुरुकृवानिति नानंतरशास्त्राणां वैयर्थ्यमेव च मयो वर्तमानयुगीय
सूर्योक्तशास्त्रसिद्धग्रहचारमंगीकृत्याद्यसूर्योक्तशास्त्रसिद्धग्रहचारस्वरूपयोजनाभावादुपेक्ष्यत इत्युक्तमेव त्वां प्रत्युपदिश्यत इति भावः
एवं युगमध्ये पवांतरकाले ग्रहचारे यंतरदर्शनेन तत्काले यदंतरं प्रसाध्य ग्रंथांस्तत्कालवर्तमाना अभियुक्ताः कुर्वंति ॥ तदिदमंतरं पूर्वग्रं
थे बीजमित्यामनंति पूर्वग्रंथानां लुप्तत्वात् तत्सूर्यर्षिसंवादोपीदानीं न दृश्यत इति न तत्प्रसिद्धिरागमप्रामाण्यासंभवनाशंका ॥ ९ ॥ अथ
कालभेदेनोपस्थितं कालं प्रथमं निरूपयिषुस्तावत्कालं विभजते ॥ लोकानामंतकृत्कालः कालोन्यः कलनात्मकः ॥ स द्विधा स्थूल
सूक्ष्मत्वान्मूर्तश्चामूर्त उच्यते ॥ ॥ कालो द्विधा एकः कालो खंडदंडायमानः शास्त्रांतरप्रमाणसिद्धः लोकानां जीवानामुपल
क्षणाच्चेतनानामपि अंतकृत् विनाशकः यद्यपि कालस्तेषां उत्पत्तिस्थितिकारकस्तथापि विनाशस्यानंतत्वात्कालत्वप्रतिपादनाय
चांतकृदित्युक्तं ॥ अन्यथा नाशासंभवात् अतएव कालः सृजति भूतानि कालः संहरति प्रजा इत्याद्युक्तं ग्रंथांतरे ॥ अन्यो द्वितीयः काल
खंडकालः कलनात्मकः ज्ञानविषयस्वरूपः ज्ञातुं शक्य इत्यर्थः ॥ स द्वितीयः कलनात्मकः कल्पेपि द्विधा भेदद्वयात्मकः तदाह स्थूल
सूक्ष्मत्वादिति महत्वाणुत्वाभ्यां ॥ मूर्तः इयत्तावच्छिन्नपरिमाणः अमूर्तस्तद्भिन्नः कालतत्वविद्भिः कथ्यते चकारो हेतुक्रमेण मूर्तामू
र्तक्रमार्थकः तेन महान्मूर्तः कालः अणुरमूर्तः काल इत्यर्थः ॥ १० ॥ यथोक्तं भेदद्वयं स्वरूपेण प्रदर्शयन् प्रथमभेदं प्रतिपादयिषु

सू०टी०
४

द्यमाह॥ प्राणादिः कथितो मूर्तस्त्रुट्याद्योऽमूर्तसंज्ञकः॥ षड्भिः प्राणैर्विनाडी स्यात्तत्षष्ट्या नाडिका स्मृतेति॥११॥ प्राणस्त्वस्सुखवासी
नस्यश्वासोच्छ्वासांतर्वर्ती कालो दशगुर्वक्षरोच्चारणमाणः आदिर्यस्येतादृशः प्राणान्तर्गतः कालः मूर्तसंज्ञकः त्रुटिराद्यो यस्येतादृशः
कालः एकप्राणांतर्गतस्त्रुटितत्परादिकः अमूर्तसंज्ञः अथामूर्तो दिव्यत्वस्य व्यवहारायोग्यत्वेनाप्राधान्यतयानंतरोद्दिष्टस्य भेदप्रति
पादनमुपेक्ष्य मूर्तकालस्य व्यवहारयोग्यत्वे प्रधानतया प्रथमोद्दिष्टस्य भेदान्विवक्षुः प्रथमं फलं घट्या चाह षड्भिरिति॥ षट्प्रमाणैरस्त
भिः पानीयफलं भवति॥ पलानां षष्ट्या घटिका काकालतत्त्वज्ञैः॥११॥ ॥अथ दिनमासावाह॥ नाडीषष्ट्या तु नाक्षत्रमहोरात्रं प्रकी
र्तितं॥ तत्त्रिंशता भवेन्मासः सावनोऽर्कोदयैस्तथेति॥१२॥ घटीनां षष्ट्या अहोरात्रं नाक्षत्रमुक्तं तु कारोदस्तैरात्रस्य नाक्षत्रत्वोक्त्यो
घस्त्रा अपि नाक्षत्रत्वमुक्तं॥ एतत्त्वपि घटीभिर्भचक्रपरिवर्तनात्॥ नाक्षत्रदिनानां त्रिंशत्संख्यया मासो नाक्षत्रः मानानामनेकत्वेन
सावनमासस्य स्वरूपमाह॥ सावन इति तथा त्रिंशदहोरात्रैः सूर्योदयसंबंधेन दवधिकैः सूर्योदयादिसूर्योदयांतकालरूपैकाहोरा
त्रमानमापितैरित्यर्थः सावनो मासः॥१२॥ ॥अथ चांद्रसौरमासनिरूपणपूर्वकं वर्षं वदन्दिव्यदिनमाह॥ एदवस्तिथिभिस्तद्वत्
संक्रांत्या सौर उच्यते॥ मासैर्द्वादशभिर्वर्षं दिव्यं तदह उच्यतेऽइति॥१३॥ तद्वत्त्रिंशता तिथिभिश्चांद्रो मासस्तत्र दर्शांतावधिकः पूर्णि
मांतावधिकश्च शास्त्रे मुख्यतया प्रतिपादितः अत्र शास्त्रे तु दर्शांतावधिक एव मुख्य इष्टतिथ्यवधिकस्तु मासो गौणः संक्रांत्या सं-
क्रांत्यवधिकेन कालेन सौरो मानज्ञैः कथ्यते॥ संक्रांतिस्तु सूर्यमंडलकेंद्रस्य राश्यादिप्रदेशासंचरणकालः॥ द्वादशभिर्मासैर्वर्षोय
न्मानेन मासास्तन्मानेन वर्षं ज्ञेयं॥ तद्वर्षं सौरमासस्यासन्नत्वात्सौरं आह॥ अहोरात्रं दिव्यं दिवि भवं सौरवर्षे देवानामहोरात्रमानं
मानतत्त्वज्ञैः कथ्यत इत्यर्थः॥१३॥ ननु देवानां यथाहोरात्रमुक्तं तथा दैत्यानामहोरात्रं कथं नोक्तमित्यत तदुत्तरं वदन्देवासुरयोर्वर्णमाह॥
सुरासुराणामन्योन्यमहोरात्रं विपर्ययात्॥ तत्षष्टिगुणा दिव्यं वर्षमासुरमेव चेति॥१४॥ ॥देवदैत्यानां बहुत्वाद्बहुवचनं॥ अन्यो
न्यं परस्परं विपर्ययात् व्यत्यासात्॥ अहोरात्रं अयमर्थः देवानां यद्दिनं तदसुराणां रात्रिः देवानां या रात्रिस्तद्दैत्यानां दिनं॥ दैत्यानां श्रीः
४

यद्दिनं तद्देवानां रात्रिः॥ दैत्यानां या रात्रिस्तद्देवानां दिनमिति॥ तथा च देवदैत्ययोः दिनरात्र्योरेवं व्यत्यासाद्देवोनमानेनेति॥ तयोरहो
रात्रस्यैक्याद्देवाहोरात्रमानकथनेनैव दैत्याहोरात्रमानमुक्तमिति भावः॥ युगकथनार्थं दिव्यवर्षपरिभाषयासुरगममपि विशेषद्योतना
र्थं प्रकारांतरेणाह॥ तत्त्विति॥ दिव्याहोरात्रं षष्टिः देवतु रूपावर्षं तु भिः षड्भिः गुणिना दिव्यं आसुरं दैत्यसंबंधि च समुच्चयेन न
द्ययोरित्यर्थः॥ वर्षं एव कालस्तयोर्दिनरात्रीभेदेन वर्षभेदस्यादिति संशयं कावारणार्थः॥१४॥ ॥अथ कल्पमानं विवक्षुः प्रथमं युगमान
मन्वर्पिश्लोकाभ्यामाह॥ तद्द्वादशसहस्राणि चातुर्युगमुदाहृतं॥ सूर्याब्दसंख्यया द्वित्रिसागरैरयुताहतैः॥१५॥ संध्यासंध्यांशसहि
तं विज्ञेयं तच्चतुर्युगं॥ कृतादीनां व्यवस्थेयं धर्मपादव्यवस्थयेति॥१६॥ ॥तेषां दिव्यवर्षाणां द्वादशसहस्राणि चातुर्युगं चतुर्णां युगानां कृ
तत्रेताद्वापरकल्याख्यानां समाहारो योगस्तदात्मकं महायुगमित्यर्थः॥ एतद्द्योतनार्थं चातुर्युगमित्युक्तिरन्यथा युगमित्युक्त्या तद्दे
व्यर्थ्योपत्तेः मानाभिज्ञैरुक्तं॥ अथ सौरमानेन तत्संख्याविशेषं चाह॥ सूर्याब्दसंख्ययेति॥ तद्देवासुरवर्षमानेनोक्तं चतुर्युगं द्वा
दशसहस्रवर्षात्मकं महायुगं संध्यांशसहितं युगचरणस्याद्यंतयोः क्रमेण प्रत्येकं संध्यासंध्यांशाभ्यां युक्तं सदेव संध्यासंध्या
शावंतर्गतौ नरपृथक्यत्रेत्येतादृशः सौरवर्षप्रमाणेन॥ द्वित्रिसागरैः अंकानां वामतो गतिरित्यनेन द्वात्रिंशदधिकैश्चतुःशतमितैः
अयुतेन दशसहस्रेण गुणितैः खलु कद्वात्रिंशच्चतुर्भिः परिमितं ज्ञेयमित्यर्थः॥ अथ चतुर्युगांतर्गतयुगांघ्रीणां विशेषतो मानार्थव
णात्ममंस्यादश्रुतत्वादितिन्यायेन प्रत्येकं महायुगचतुर्थांशो मानमिति चातुर्युगमित्यनेन फलितं निषेधति॥ कृतादीनामिति॥
कृतत्रेताद्वापरकलियुगानां धर्मपादव्यवस्थया धर्मचरणानां स्थित्या॥ इयं वक्ष्यमाणव्यवस्था स्थितिर्ज्ञेया॥ न तु समकलप्रमाणा स्थि
स्थितिः॥ अयमर्थः कृतयुगे चतुश्चरणो धर्म इति तस्य मानमधिकं॥ ततस्त्रेतायां धर्मस्य त्रिपादत्वात्तदनुरोधेन त्रेतामानं न्यूनं॥ ए
वं द्वापरकल्योर्धर्मस्य क्रमेण द्व्येकचरणवत्वात्त्रेताद्वापरमानाभ्यां क्रमेणोक्तानुरोधान्न्यूनमानं न सममानमिति॥१६॥ ॥अ
थ सर्वधर्मचरणयोगेन दशमितेन महायुगं भवति॥ तर्हि स्वस्वधर्मचरणैः किमित्यनुपातेन पूर्वोक्तफलितेन कृतादियुगानां मानज्ञा

119/1941

सू०टी०
५

नंसविशेषमाह॥युगस्यदशमोभागश्चतुस्त्रिद्व्येकसंगुणः॥क्रमात्कृतयुगादीनांषष्ठोंशः संध्ययोःस्वकः इति॥१७॥प्रागुक्तदिव्यवर्षद
शसहस्रमितस्ययुगस्यदशमोभागः दशांशइत्यर्थः॥चतुर्भिःक्रमेणचतुस्त्रिद्व्येकैर्गुणितः गुणक्रमात्॥कृतयुगादीनांकृतत्रे
तद्वापारकलियुगानांमानंस्यादितिशेषः॥ननुमनुग्रंथेकृतादिमानंदिव्यवर्षप्रमाणेन ४०००।३०००।२०००।१००० अत्रतुतत्तन्मा
नंतद्वर्षप्रमाणेन ४८०००।३६००।२४००।१२०० विरोधइत्यतआह षष्ठइतिस्वकः स्वसंबंधीषष्ठोविभागः संध्ययोः आद्यंत
संध्ययोरैक्यकालइतिशेषः॥तथाचमनूक्तमानानि ४८००।३६००।२४००।१२०० एषांषडंशाः ८००।६००।४००।२०० एतेह्य
स्वयुगानामाद्यंतयोः संध्योर्योगादेषामर्धंसंधिकालः प्रत्येकमाद्यंतयोःसंधिकालः ४००।३००।२००।१०० अनेनप्रत्येकमद
क्रमानंस्वनोक्तेतेयथांतरोक्तेकेनलेमानभवंति॥तत्स्वसंधिभ्यांरहितंयथाकृतादिसंधिः ४००। कृतमानं ४०० कृतांतसंधिः ४००
त्रेतादिसंधिः ३०० त्रेतामानं ३००० त्रेतांतसंधिः ३०० द्वापारादिसंधिः २०० द्वापारमानं २००० द्वापारांतसंधिः २०० कल्यादिसं
धिः १०० कलिमानं १००० कल्यंतसंधिः १०० एवंचस्वसंधिभ्यांसहितंमयोक्तं॥स्वसंबंधात्संध्ययोस्तदंतर्गतत्वाच्चतेनविरोधइति
भावः॥१७॥ ॥अथकल्पमानार्थं अनुमानंतत्संधिमानंचाह॥युगानांसप्ततिः सैकामन्वंतरमिहोच्यते॥कृताब्दसंख्यातस्यांते
संधिः प्रोक्तोजलप्लवइति॥युगानांसैकासप्ततिः एकसप्ततिः महायुगमित्यर्थः इहमतेकालेमन्वंतरंतत्समाप्तिकालयोरंतरकालमान
मित्यर्थः॥मतंकालमानभेदाभिज्ञैः कथ्यते॥तस्यमनोः अंतेचविरामेजातेसतिकृताब्दसंख्यामद्युक्तकृतयुगवर्षमितिः संधिःकाल
विशेषः॥प्रकर्षेणद्वितीयमन्वारंभपर्यंतंभूतभाविमन्वंतरंतिमादिसंधिरूपेककालेनकथितः॥तत्स्वरूपमाहजलप्लवइति॥जलपूर्णास
कलापृथ्वीतस्मिँल्लोकसंहारकालेभवति॥१८॥ अथकल्पमानंविशेषमाह॥ससंधयस्तेमनवः कल्पेज्ञेयाश्चतुर्दश॥कृतःप्रमा
णः कल्पादौसंधिः पंचदशस्मृतइति॥१९॥ तएवसप्तभिकुगरूपाः मनवः स्वायंभुवाद्याः ससंधयः स्वस्वसंधिसहिताः॥चतुर्दशसं
ख्याकाः कल्पकालेज्ञातव्याः ससंधियुक्तचतुर्दशमनुभिः कल्पस्यादित्यर्थः॥ननुग्रंथांतरेकल्पमानंयुगसहस्रं॥तेषांतुयुगमान

श्रीः
५

121/1941

मेकसप्ततिगुणंमनुमानं ३०६७२०००० कृताब्दयुक्तं १७२८००० ससंधिमनुमानं ३०८४४८००० इदंचतुर्दशगुणंकल्पप्रमाणंकृतो
नंयुगसहस्रमित्यत आह॥कृतप्रमाणइति॥कल्पादौप्रथममन्वारंभेकृतयुगवर्षमितः मनोश्चितुर्दशत्वेपाद्यःपंचदशकःसंधिःका
लविशेषकः॥तथाचकृतवर्षानंतरंप्रथममन्वारंभइति॥तद्वर्षयोजनेनाविरोधइतिभावः॥१९॥ अथब्रह्मणोदिनरात्र्योः प्रमाणमाह
इत्थंयुगसहस्रेणभूतसंहारकारकः॥कल्पोब्राह्ममहः प्रोक्तं शर्वरीतस्यतावतीति॥२०॥इत्थंपूर्वोक्तप्रकारसिद्धेनयुगसहस्रेणभूतसंहा
रकारकः॥ब्राह्मलयात्मकः कल्पकालः ब्राह्मंब्रह्मणः संबंधिनंअहोदिनंकालज्ञैरुक्तं॥तस्यब्रह्मणः तावतीदिनप्रमितिशर्वरीरा
त्रिः कल्पद्वयंतदहोरात्रमितिफलितार्थः॥२०॥ ॥अथब्रह्मणः आयुःप्रमाणमतीतवयःप्रमाणंचाह॥परमायुःशतंतस्यतयाऽ
होरात्रसंख्यया॥आयुषोर्धमितंतस्यशेषकल्पोयमादिमइति॥२१॥ परंअपरत्वंशृणु॥पूर्वोक्तंत्वयाश्रुतंअपरंवक्ष्यमाणंशृणुत्वं॥य
द्वापरमेतिदैत्यवरार्थकंसंबोधनंत्वंतस्यब्रह्मणः तथापूर्वोक्तयाअहोरात्रमित्यादिकल्पद्वयरूपयाशतंशतवर्षपरिमितंआयुःशरीर
धारणकालं जानीहि एतदुक्तंभवति॥अहोरात्रमासात्मकंवर्षपरिभाषयामासनामानंतस्मात्पूर्वोक्तपरिभाषयाब्रह्मणोवर्षमानमेतच्छ
तसंख्ययाब्रह्मायुरिति॥नतुश्रुतार्थेनकल्पशतद्वयमायुः॥कीटादीनामपिदिनसंख्ययायुषोनुक्तेः सततरांब्रह्मणः शतदिनात्मका
युषः संभवात्॥निर्जरैरनुमानेन आयुर्वर्षशतंस्मृतमितिविष्णुपुराणोक्तेश्चशतेनपरमायुरितिनिरस्तंब्रह्मणोनियुतायुर्दीयासंभ
वात्तस्यब्रह्मणः आयुषः शतवर्षरूपस्यअर्धपंचाशद्वर्षपरिमितंइतंगतं अयंवर्तमानः आदिमः प्रथमः शेषकल्पः शेषायुर्दाय
स्यप्रदिवसः उत्तरार्धउत्तरार्धस्यप्रथमदिवसोवर्तमानइतिफलितार्थः॥२१॥ अथवर्तमानेस्मिन्दिवसेयेतद्गतमित्याह॥कल्पाद
स्मात्प्रमनवः षड्व्यतीताः ससंधयः॥वैवस्वतस्यचमनोर्युगानांत्रिघनोगतइति २२॥ अस्माद्वर्तमानात्कल्पाद्ब्रह्मदिवसात्षट्
संख्याकाः मनवः एकसप्ततियुगरूपाः ससंधयः सप्तभिः संधिभिः कृतयुगप्रमाणैः सहिताः अतीताः गताः चकारः आयुषोर्धमि
तमितिप्रागुक्तेनसमुच्चयार्थकः॥वर्तमानस्यसप्तमस्यमनोर्वैवस्वताख्यस्ययुगानांत्रिघनस्थानस्थितैत्रैपतुल्यकानांघातः सप्तवि

शतिसंख्यात्मकः सप्तविंशतियुगानिगतानीत्यर्थः वसमुच्चये ॥ २२ ॥ अथवर्त्तमानयुगस्यापिगतमेतदितिवदन्नाभिमतकालेय
तोवर्षगणःकार्यइत्याह ॥ अष्टाविंशाद्युगात्स्मादयातमेतत्कृतंयुगं ॥ अतःकालंप्रसंख्यायसंख्यामेकत्रपिंडयोदिति ॥ २३ ॥ अ
ष्टाविंशतिमाद्वर्तमानान्महायुगादेतत् अस्मत्कालेनपूर्वकालेसांप्रतंस्थितंकृतयुगंगतंअतः कृतयुगानंतरंअभिमतकालेकाल
वर्षात्मकंप्रसंख्यायगणयित्वासंख्यांपंचस्थानस्थितांभिन्नांएकत्रएकस्थानेपिंडयेत् ॥ संकलनविषयांकुर्यात् ॥ सर्वेषांगतानां
योगंकुर्यादित्यर्थः ॥ २३ ॥ अथकल्पादितोग्रहादिभचक्रनियोजनंकालग्रहगतिप्रारंभरूपमाह ॥ ग्रहर्क्षदेववेदेत्यादिसृजतोस्य
चराचरं ॥ कृताद्रिवेदादिव्याब्दाःशतघ्नावेधसोगताइति ॥ २४ ॥ अस्यवर्त्तमानस्यब्रह्मणःग्रहनक्षत्रदेवदैत्यमानवराक्ष
सपर्वतवृक्षादिकंचराचरंजंगमस्थावरात्मकंजगतस्सृजतःसृजतीतिसृजन्तस्यजगन्निर्मापकस्यशतसंख्यागुणिताःचतुःस
प्तत्यधिकचतुःशतसंख्यादिव्याब्दाःगताःएभिर्दिव्यवर्षैग्रहस्पष्टादिप्रवहवायुनियोजनांतंकर्मब्रह्मणाकृतमितिफलितार्थः
॥ २४ ॥ ॥ अथग्रहपूर्वगत्युत्पत्तौकारणमाह ॥ पश्चाद्व्रजंतोतिजवान्नक्षत्रैःसततंग्रहाः ॥ जीयमानास्तुलंबंतेतुल्यमेवस्वमार्गे
गाइति ॥ २५ ॥ ॥ पश्चादनंतरंपुनरावृत्यापश्चात्पश्चिमदिगभिमुखंनक्षत्रैःतारकाभिःसहग्रहाःसूर्यादयःअतिजवात्प्रवह
वायुसत्वरगतिवशात्सततंनिरंतरंव्रजंतःगच्छंतःस्वमार्गगाःस्वकक्षावृत्तस्थाःजीयमानानक्षत्रैःपराजिताःनक्षत्राणांमध्येगम
नात्अतएवलज्जायेवगुरुभूतादृतितासयोर्थः ॥ तुल्यंसमंएवकारादधिकन्यूनंव्यवच्छेदःलंबंतेःस्वस्थानात्पूर्वस्मिन्लंबायमाना
भवंति ॥ यथालज्जितःपश्चाद्भवंतिनाग्रेतुकारादधोपः ॥ कक्षाक्रमानुरोधेनशन्यादिग्रहाणांचंद्रांतानांगुरुतापचयःशनिरिति
गुरुस्तस्माल्लिंचिन्न्यूनोगुरुस्तस्मादितिभौमइत्यादियथोत्तरं ॥ यस्यकक्षामहतीतस्यगुरुत्वाधिक्यंयस्यलघ्वीतस्यतदनुरोधेनगु
रुतास्वत्वमिति ॥ एतदुक्तंभवतिब्रह्मणाप्रवहवायौनक्षत्राधिष्ठितोमूर्तोगोलस्थापितंसदंतर्गताःस्वस्वाकाशगोलस्थाःश
न्यादयोनक्षत्राधिष्ठितमूर्तगोलस्थक्रांतिवृत्तस्थरेवतीयोगतारासन्नरूपमेषादिप्रदेशासमसूत्रस्थाःस्थापिताःक्रांतिवृत्तंतु

123
1941

मेषतुलास्थानेविषुवद्वृत्तसंपातात्त्रिभांतरितस्थक्रांतिवृत्तप्रदेशौतत्सन्नविषुवद्वृत्तप्रदेशाभ्यांचतुर्विंशत्यंशांतरेणदक्षिणोत्तरौसक
र्ककर्कादिरूपौतदेवद्वादशराश्यात्मकवृत्तंमहद्वात्मलभ्मलंविषुवद्वृत्तंतुध्रुवमध्यस्थंनिरक्षदेशोपरिगं ॥ तत्रप्रवहवायुनास्वाघातेनभ
मतोनक्षत्रगोलोनाक्षत्रषष्टिघटीभिःपरिवर्त्तते ॥ तदंतर्गतवायुभिस्तदाघातेनवाग्रहाःभ्रमंत्यपिनक्षत्रगोलस्थितक्रांतिवृत्तीयमेषा
दिप्रदेशेनसमंनगच्छंति ॥ वायुनास्वस्थंतानदाघातस्याप्यल्पत्वाद्विंबानांगुरुत्वाव अतस्तत्स्थानात्ग्रहाणांलंबनंदृश्यतेअतएव
नक्षत्रोदयकालोतेषांद्वितीयदिनेनोदयःकिंतुग्रहोलंबितप्रदेशेवायुनातदनंतरमूर्ध्वमागच्छतीत्यनंतरमुदयः ॥ लंबनंतुशन्यादीनां
कक्षानुरोधेनगुरुत्वादास्वल्पानंतरप्रधानानांवाकक्षानुरोधेनवक्ष्यत्वाच्चतुल्यंयद्यपिवायोर्ध्रुवानुरोधेनसत्वाद्ग्रहालंबनंविषुवद्वृत्तेभवितु
मुचितंनक्रांतिवृत्ते ॥ तथाचवक्ष्यमाणक्रांत्यनुपपत्तिःक्रांतिवृत्तस्थद्वादशराशिभागेनवक्ष्यमाणानांभगणानामुपपत्तिश्चतथापिवा
युनाविलंबितोग्रहोविषुवन्मार्गगोपितद्विषुवप्रदेशासन्नक्रांतिवृत्तप्रदेशेग्रहाकाशगोलएवस्वसमसूत्रेणकृष्यतेइतिनानुपपत्तिरतए
वस्वमार्गगाइतिक्रांतिवृत्तानुस्तनस्वाकाशगोलस्थकक्षामार्गगत्यर्थकमुक्तमितिसंक्षेपः ॥ २५ ॥ ॥ अथातएवग्रहाणांलोके
प्राग्गतिस्तांसिद्धमित्याह ॥ प्राग्गतिस्त्वमतस्तेषांभगणैःप्रत्यहंगतिः ॥ परिणाहवशाद्भिन्नातद्वशाद्भाभिभुंजतेइति ॥ २६ ॥ ॥
अतअवलंबनोदेवतेषांग्रहाणांप्राग्गतिकरणानभिज्ञैःप्रत्यक्षावगततपातच्छक्तिजनितालकल्पितेत्यर्थः ॥ साकियतीत्यतआह ॥
भगणैरितिवक्ष्यमाणभगणैःप्रत्यहंप्रतिदिनंगतिःप्रागमनरूपा ॥ भगणानांभत्वपसन्नत्वाद्गणसंबंधिवक्ष्यमाणदिनैःसूर्यसा
वनैःग्रहभगणाःलभ्यंते ॥ तदेकेनदिनेनकेइत्यनुपाताज्ज्ञेयाः ॥ ननुग्रहभगणानांतुल्यात्वाभावात्प्रतिदिनंग्रहगतिर्भिन्नेतिपूर्वलं
बनंरूपाग्रहगतिरयुक्तोक्ताग्रहलंबनस्योभिन्नत्वादित्यतआहपरिणाहवशादितिपरिहःणोकक्षापरिधिःतद्वशात्तदनुरोधात्
इयंग्रहगतिर्भिन्नांअतुल्याअयमभिप्रायः ॥ ग्रहाणांलंबनंतत्तत्प्रदेशेनपरंतुस्वस्वकक्षायांतत्प्रदेशेतुल्येयाःकलास्तागति
कलास्तास्तकमहतिकक्षावृत्तेऽल्पाःलघुकक्षावृत्तेबह्व्यः ॥ सर्वकक्षापरिधीनांचक्रकलांकितत्वात् ॥ भगणास्तुगतिवशादेव ॥ य

सू०टी०
७

स्यकक्षावृत्तंमहत्तस्याल्पाः यस्यचलघुकक्षावृत्तंबहवस्तदुसन्नागतिरितितथंनिरुक्तविरोधः॥ नन्वेकरूपगतिंविहायभिन्नरूपगतिः
कथमंगीकृतेत्यतआह॥ तद्वशादितिभिन्नगतिवशात्भानिराश्यात्मकनक्षत्राणिभुंजतेग्रहाभुंजतीत्यर्थः तथाचग्रहराश्यादिभोग
ज्ञानार्थमित्यमेवगतिरूपयुक्तानिकरूपेतिभावः॥ २५॥ ॥अथभभोगेनविशेषंवदन्वक्ष्यमाणभगणंस्वरूपमाह॥ शीघ्रगस्ता
न्यथाल्पेनकालेनमहताल्पगः॥ तेषांतुपरिवर्तेनपौष्णांतेभगणः स्मृतइति॥ २७॥ ॥अथशब्दः पूर्वोक्तेविशेषसूचकः शीघ्रग
तिर्ग्रहः तानिभानिअल्पेनकालेनभुनक्ति॥ अल्पगतिर्ग्रहोबहुनाकालेनभानिभुनक्ति॥ तुल्यराश्यादिभोगेमंदशीघ्रगतिग्रह
योस्तुल्यकालेनभवतीतिविशेषार्थः॥ तेषांराशीनांपरिवर्तेनभ्रमणेनचक्राकारेणद्वादशराशिभोगजनितेनभगणाः शास्त्रोक्ताः क्रांति
वृत्तेद्वादशराशीनांसत्वात्तद्भोगेनचक्रभोगसमाप्तियत्स्थानमारभ्यचलितोग्रहः पुनस्तत्स्थानमायातिसचक्रभोगः परिवर्तसंज्ञोपिद्वा
दशराशिभोगात्मभगणइत्यर्थः॥ ननुक्रांतिवृत्तेसर्वप्रदेशेभ्यः परिवर्तसंभवः तत्कः परिवर्तोदिभूतः प्रदेशइत्यतआह॥ पौष्णांते
इति॥ रेवत्यादेर्वृत्तेनक्रांतिवृत्तेरेवतीयोगतारासन्नप्रदेशेसर्वग्रहाणांनिवेशात्तदवधित्वात्तदवधिर्तोग्रहचलनात्पौष्णस्यरेवतीयोग
तारायाः अंतेनिकटप्रदेशेतथारेवतीयोगतारासन्नाग्निमस्थानमेवावधिंताविधिभूतमितिभावः॥ २७॥ ॥ ननुपरिवर्तस्यभग
णसंज्ञात्वयुक्ताराश्यादिराशीनामपिभगत्वादित्यतः परिभाषाकथनछलेनभगणस्वरूपमाह॥ विकलानांकलाषष्ट्यातत्षष्ट्याभागउ
च्यते॥ तत्त्रिंशताभवेद्राशिर्भगणोद्वादशैवते॥ २८॥ ॥ यथामूर्तंकालेप्राणकालआदिभूतस्तथाक्षेत्रपरिभाषायांविकला
सूक्ष्मादिभूतातासांषष्ट्याकलाकलानांषष्ट्याभागोंशः क्षेत्रपरिभाषाभिज्ञैः कथ्यते॥ भागत्रिंशताराशिः स्यात्तेराशयः सकला
द्वादशएवकारस्त्रिचतुरादीनांनिरासार्थं॥ तथाचसाकल्येगणपदप्रयोगाद्भगणस्यभोगेपिभगणव्यवहाराच्चपूर्वोक्तंयुक्तमिति
भावः॥ २८॥ ॥अथभगणान्विवक्षुः प्रथमंसूर्यबुधशुक्राणांभौमगुरुशनिशीघ्रोच्चानांचभगणानाह॥ युगेसूर्यज्ञशुक्राणां
खचतुष्करदार्णवाः॥ कुजार्किगुरुशीघ्राणांभगणाः पूर्वयायिनां॥ २९॥ ॥ महायुगेसूर्यबुधशुक्राणांखानांचतुष्कं॥ एकस्थाना

श्री:
७

दिसहस्रस्थानांतचतुः स्थानस्थितानिशून्यानि॥ ततोयुनादिप्रयुतस्थानपर्यंतंदंतसमुद्राः॥ तथाचयुगसौरवर्षाण्येवखाभ्रखाभ्रद्विरा
मवेदमितानिभगणाः द्वादशराशिभोगात्मकापरिवर्तानांसंख्याः भवंतीतिशेषः॥ भौमशनिबृहस्पतीनांयानिशीघ्राणिशीघ्रोच्चानि
तेषांएतन्मिताः भगणाः चकारः समुच्चयार्थकोनुसंधेयः॥ अत्रकक्षाक्रमेणचारक्रमेणवागुरोः खलुमध्यगत्याभवतीतिनतथोद्दे
शः स्वंतंत्रेछस्यानियोगानहंत्वाद्य॥ नन्वाकाशेरवांबिंबाभावादसतासंभवेनगत्यभावात्कथंभगणाउक्तं इत्यतआह॥ पूर्वयायिनोमि
ति॥ पूर्वगामिनांतथाच॥ तेषामदृश्यरूपाणांपूर्वगतिसद्भावाद्भगणोक्तौनक्षतिः॥ एषांस्वरूपादिनिर्णयस्तुस्पष्टाधिकारेप्रतिपाद=
यिष्यते॥ २९॥ ॥ अथचंद्रभौमयोर्भगणानाह॥ चंद्रेरसाग्निश्रीवेदाः पुसप्तभूधरमार्गणाः॥ दस्त्रत्र्यष्टरसांकाक्षिलोचनानिकुजस्य
तु॥ ३०॥ ॥ पूर्वश्लोकोक्तभगणाइत्यत्राग्निमश्लोकेप्यन्वेति॥ भूधराः समसप्तपर्वतस्यधराभिधानत्वादेकसप्ततिः॥ मार्गणाः श
राः॥ तथाचचंद्रस्यभगणाः षडग्निवेदपंचसप्तसप्तपंचमिताः॥ भौमस्यतुकारादाकाशस्थबिंबात्मकस्येतिपुनरुक्तिभ्रमवारणार्थं
द्वंनाष्टषडंकाक्षेनमिताः॥ ३०॥ ॥ अथबुधशीघ्रोच्चगुर्वोर्भगणानाह॥ बुधशीघ्रस्यशून्यर्तुखाद्रित्र्यंकनगेंदवः॥ बृहस्पतेरवदस्रा
क्षिवेदषड्वह्नयस्तथा॥ ३१॥ ॥बुधशीघ्रोच्चस्यादृश्यरूपस्यपूर्वगतेर्भगणाः षष्टिसप्ततित्र्यंकात्यष्टिमिताः॥ बृहस्पतेस्तथाबिंबा
त्मकस्येतिपुनरुक्तिभ्रमवारणाय॥ नखद्विवेदषड्रामप्रमिताः॥ ३१॥ अथशुक्रशीघ्रोच्चशन्योर्भगणानाह॥ सितशीघ्रस्यषट्सप्तत्रियमा
श्विखभूधराः॥ शनेर्भुजंगषट्पंचरसवेदनिशाकराः॥ ३२॥ ॥शुक्रशीघ्रोच्चस्यादृश्यरूपस्यपूर्वगतेर्भगणाः षट्सप्तत्रिद्विद्विख
सप्त॥ एतेनभूधराइत्यस्यैकसप्ततिरेकादशवार्थोनिरस्तः॥ शनेर्बिंबात्मकस्याष्टषट्पंचरसेंद्रमिताः॥ ३२॥ ॥अथचंद्रस्योच्चपा
तयोर्भगणानाह॥ चंद्रोच्चस्याग्निशून्याश्विवसुसर्पार्णवायुगे॥ वामंपातस्यवस्वग्नियमाश्विशिखिदस्रकाः॥ ३३॥ ॥चंद्रमंदोच्चस्य
पूर्वदृश्यरूपस्यभगणाः महायुगेरामनखाष्टाष्टवेदमिताः॥ पातस्यचंद्रशब्दस्यसन्निहितत्वाच्चंद्रपातस्यादृश्यरूपस्यवामंपश्चिमगत्या
द्वादशराशिभोगात्मकपरिवर्तरूपभगणाः महायुगेअष्टरामाकृतिरामद्विमिताः॥ अत्रकुग्रहाणांवक्ष्यमाणग्रहोच्चपातभगणसंबंधि

125
1941

सू०टी०
८

कल्पकालवारणार्थं ॥ ग्रहाः पातभगणास्तु योगे नोक्ता इत्यस्मिन्युगसंबंधप्रसंगेनोक्ताः ॥ मंदोच्चपातस्वरूपादिनिर्णयं स्पष्टा
धिकारे व्यक्तीभविष्यति ॥ ३३ ॥ ॥ अथ युगे नाक्षत्रदिवसांस्तत्स्वरूपावगमाय ग्रहसावनदिनस्वरूपं स्वसंख्याज्ञानहेतुकं चाह ॥ भा
नामष्टाशिवसुद्व्यद्रिद्विद्व्यष्टशरेंदवः ॥ भोदया भगणैः स्वैः स्वैरूनाः स्वस्वोदया युगे ॥ ३४ ॥ ॥ भानां नक्षत्राणां स्वतो गत्यभावेपि
प्रवहवायुना पश्चिमभ्रमणात्संख्याभगणाः स्वदिनतुल्याः अतएवात्र वाममिति पूर्वोक्तस्य युक्तोन्वयः ॥ अष्टद्व्यष्टनगाग्निजातिग
जदिनमिताः ॥ ननु ग्रहाणामपि प्रवहवायुना पश्चिमभ्रमणे नोदयसद्भावात्तेषां दिवसाः कथं ज्ञेया इत्यत आह ॥ भोदया इति उदयो यस्मि
न्नहनि स्वाधनावधिरूपे इति व्युत्पत्त्योदयशब्देन दिनं तथा च भोदयाः नाक्षत्रदिवसाः एते उक्ताः स्वैः स्वैः स्वकीयैर्भगणैः प्रागुक्तैर्वर्जि
ताः संतः स्वस्वोदयाः निजनिजसावनदिवसाः युगे भवंति युग इत्यनेनाभीष्टकाले नाक्षत्रदिवसाः ग्रहगतभोगादिस्थानेर्हीनं कार्य
मन्यथा विज्ञानीयं देवांतरानपपत्तेरिति सूचितं ॥ अत्रोपपत्तिः ॥ यदि ग्रहाणां प्राग्गमनावलंबनं न स्यात्तर्हि ग्रहोदयनक्षत्रोदय
योरेकहेतुत्वान्नाक्षत्रसावनदिनसंख्ययोरभेदः स्यात्ततो ग्रहाणां लंबनेन नक्षत्रलंबनेभ्यः सावनदिवसानामंतरितत्वादवलंबनज
भगणांतरेण युगे नाक्षत्रदिवसेभ्यो ग्रहसावनदिवसाः न्यूना भवंति ॥ प्रवर्णोहं भगणतुल्यादिपश्चिमग्रहपरिवर्तनानामकरणादित्युप
न्नं भोदया इत्यादि अनेनैव भगणसावनयोगो नाक्षत्रदिवसा इत्यप्यर्थं सिद्धं ॥ ३४ ॥ ॥ अथ वक्ष्यमाणचांद्रमासाधिमासयोः सं
ख्याज्ञानहेतुकं स्वरूपमाह ॥ भवंति शशिनो मासाः सूर्येंदुभगणांतरं ॥ रविमासोनितास्ते तु शेषाः स्युरधिमासकाः ॥ ३५ ॥ ॥
सूर्यचंद्रभगणयोरंतरं चंद्रस्य मासा भवंति ॥ ते चांद्रमासाः रविमासोनिताः ॥ अत्र प्रथमं तु क्रांत्यन्वयात् द्वादशगुणितरविभगणरू
पवक्ष्यमाणार्कमासैरूनाः संतः शेषा अवशिष्टा ये चांद्रमासास्ते अधिमासा एव भवंति नान्ये अनेन चांद्रत्वमधिमासानां स्पष्टीकृतं ॥
अत्रोपपत्तिः ॥ त्रिंशत्तिथ्यात्मकस्य रवींदुयुतिकालरूपदर्शावधेश्चांद्रमासस्य द्वादशराशिमितेस्वर्मणंतरेणैव सिद्धिः ॥ कथमन्यथ
दर्शांते ज्ञानस्य मंदशीघ्रयोः सूर्येंदुयोगस्य पुनर्दर्शांते संभवः ॥ द्वादशराश्यंतरत्वेकं भगणांतरमतो भगणांतरेण ॥ चांद्रो मासः सिद्धः ॥ श्रीः ८

127/1941

सौरमासापेक्षया यदंतरेण चांद्रमासानामधिकत्वं ते चाधिमासा इति स्वरूपमेव वक्ष्यमाणोपयोगात्परिभाषितं ॥ ३५ ॥ ॥ अथ वक्ष्यमाणाव
मस्सूर्यसावनयोः स्वरूपमाह ॥ सावनाहानि चांद्रेभ्यो द्युभ्यः प्रोह्य तिथिक्षयाः ॥ उदयादुदयं भानोर्भूमिसावनवासराः ॥ ३६ ॥ ॥ चांद्रेभ्यो
द्युभ्यः वक्ष्यमाणचांद्रदिनेभ्यः सकाशादित्यर्थः ॥ सावनाहानि सावनदिनानि प्रोह्य त्यक्त्वा अवशेषं तिथिक्षयाः ॥ तिथिषु चांद्रदिनेषु
सावनदिनानामवशेषतुल्यो क्षयेन्यूनत्वं ॥ यद्वा तिथिशब्देन सावनो दिवसस्तस्य चांद्रदिवसात्क्षय इति स्वरूपमेव वक्ष्यमाणोपयो
गात्परिभाषितं ॥ ननु भोदया भगणैरित्यादिना पूर्वं सर्वेषां सावनदिवसा उक्ता इत्यत्र कस्य ग्राह्या इत्यतः सूर्यसावनस्वरूपकथनच्छलेन
स्माह ॥ उदयादिति सूर्यस्योदयकालमारभ्याव्यवहिततदुदयकालपर्यंतं यः कालः नारायण एकैको दिवस इति ये दिवसास्ते भूमिशब्दे
भ्यांसूर्यस्य वासरा एव नान्येषां सोपपदत्वादिति भावः ॥ ३६ ॥ ॥ ते कियंत इत्यत स्तत्प्रमाणं चांद्रदिनप्रमाणं चाह ॥ वसुद्व्यष्टाद्रिरूपांकस
प्ताद्रितिथयो युगे ॥ चांद्राः खाष्टखखव्योमखाग्निखर्तुनिशाकराः ॥ ३७ ॥ ॥ अष्टाग्निगजसप्तभगोनगसप्तपंचभूमिताः युगे सूर्य
सावनदिवसाः ॥ चांद्रदिवसाः युगतिथय इत्यर्थः ॥ आशीतिभ्यश्चतुष्कत्रिखनृपाः एते त्रिंशद्गुक्ताः चांद्रमासाः उक्तप्रायाः ॥ अनेनैव चां
द्रदिवसानामुपपत्तिः सूर्यचंद्रयोर्भगणयोरंतररूपचांद्रमासास्त्रिंशद्गुणिता इति स्पष्टीकृता ॥ ३७ ॥ ॥ अथ राश्विन इति ॥ अधिमास
काः प्रागुक्तस्वरूपाः वकाराकगोषड्देवरामगोद्वारेंदुमिताः तिथिक्षयाः दिनक्षया अवमानीत्यर्थः ॥ पंचरवंद्विशराकृत्यष्टरवनेत्राणि ॥ २८
र्नुने सूर्यमासानुक्तेरधिमाससंख्या कथं ज्ञातेत्यतो रविमाससंख्या स्वरूपेण कुहांश्चाह ॥ खचतुष्कसमुद्राष्टकुपंचरविमासकाः ॥ भवंति
भोदया भानुभगणैः रूनिताः कुहाः ॥ ३९ ॥ ॥ सूर्यमासाः द्वादशगुणितरविभगणरूपाः शून्यचतुष्कवेदाष्टतिशरमिताः ॥ ननु सावनदिन
संख्या प्रागुक्ता कथमवगतेत्यत आह ॥ भवंतीति भोदयाः नाक्षत्रदिवसाः प्रागुक्ताः सूर्यभगणैः प्रागुक्तैर्वर्जिताः संतः कुहाः भूवासराः भ
वंति ॥ भोदया इत्यादि प्रागुक्तेः ॥ ३९ ॥ ॥ ननु सूर्यादिमंदोच्चभौमादिपातानां युगे भगणानुक्तेः कल्पभगणकथनमावश्यकमतः स्व
यं द्रुक्तां प्रागुक्ता एते भगणादयः ॥ कल्प एव कथं नोक्ता इत्यत आह ॥ अधिमासोनरात्र्यक्षचांद्रसावनवासराः ॥ एते सहस्रगुणिताः क

मेस्युर्भगणादयः॥ ४०॥ ॥एते प्रागुक्ताः भगणादयः भगणा आदिर्येषां ते भगणादयः॥ अधिमासोनरात्र्यर्क्षचांद्रसावनवासराः॥ अ
धिमासा षड्वह्नि इत्यादि॥ तिथिक्षया इत्याद्यूनरात्रयो नाक्षत्रचांद्रसावनानां प्रत्येकं वासरसंबंधः॥ नाक्षत्रभानामित्यादि॥ चांद्र
दिवसाश्चांद्राः खाष्टेत्यादि॥ सावनदिवसा वसुद्व्यष्टा इत्यादि अत्र सौरमासा अपि रवचतुष्केत्यादि ग्राह्याः सहस्रगुणिताः कल्पे
भगणादय उक्ता भवंति युगसहस्रस्य कल्पत्वात्॥ तथा च लाघवार्थं युगे उक्ता इति भावः॥ ४०॥ ॥अथ श्लोकाभ्यां रविचंद्रस्पष्टग्र
हाणां मंदोच्चभगणान् तदन्यान् भगणांश्चातिजानीते॥ प्राग्गतेः सूर्यमंदस्य कल्पे सप्ताष्टवह्नयः॥ कौजस्य वेदखयमा बौधस्याष्टर्तुव
ह्नयः॥ ४१॥ ॥खखरंध्राणि जैवस्य शौक्रस्यार्थगुणेषवः॥ गोग्नयः शनिमंदस्य पातानामथ वामतः॥ ४२॥ ॥प्राग्गतेः कल्पे इत्यन
यीः शनिमंदांतं प्रत्येकं संबंधः॥ पूर्वगतेः सूर्यमंदोच्चस्य कल्पे सप्ताष्टरामसिताः शनिपातस्य भगणैर्णाति वक्ष्यमाणस्य भगणा इति
पदमत्र प्रत्येकमन्वेति॥ कौजस्य कुजसंबंधिनः सूर्यमंदस्येति यस्यैकदेशो मंदस्येति मंदोच्चस्येत्यर्थे कमन्वेत्रांति॥ तथा च भौममंदोच्च
स्य चतुरधिकशतद्वयं॥ बौधस्य बुधमंदोच्चस्याष्टषट्त्रिमिताः जैवस्य गुरुसंबंधिनः॥ अत्र शनिमंदस्येति वक्ष्यमाणस्यैकदेशो मं
दस्येति मंदोच्चस्येत्यर्थकमत्रान्वेत्यैकवचनत्वात् यद्वा आद्यंतयोर्मंदस्येत्युक्त्यैव मध्यस्थानामन्वयः॥ स्वयमुपपन्न इति॥ तथा च
गुरुमंदोच्चस्य नवशतं॥ शौक्रस्य शुक्रमंदोच्चस्य पंचाशीतिशतादधिकं पंचशतं॥ शनिमंदोच्चस्यैकोनचत्वारिंशत्॥ अथानंतरं पातानां
भौमादीनां वामतः॥ पश्चिमगत्या भगणा उच्यंत इति शेषः॥ ४२॥ ॥तान् श्लोकाभ्यामाह॥ मनुदस्रास्तु कौजस्य बौधस्याष्ट
ष्टसागराः॥ कृताद्रिचंद्रा जैवस्य त्रिखांकाश्च भृगोस्तथा॥ ४३॥ ॥शनिपातस्य भगणाः कल्पे यमरसर्तवः॥ भगणाः पूर्वमेवात्र
प्रोक्ताश्चंद्रोच्चपातयोः॥ ४४॥ ॥कुजसंबंधिनः तु कारात्पातस्य भौमपातस्य कल्पे भगणाश्चतुर्दशाधिकं शतद्वयं॥ बौधस्य बुधसं
बंधिनः शनिपातस्येत्यस्यैकदेशः पातस्येत्यत्रान्वेति॥ बुधपातस्य द्वादशोना पंचशती॥ जैवस्य गुरुपातस्य चतुःसप्तत्यधिकशतं॥
बुधोशुक्रस्य तथा तत्संबंधिनः॥ चकारात्पातस्य शुक्रशुक्रपातस्येत्यर्थः॥ अधिकानवशती॥ शनिपातस्य द्विरसषड्गुः भगणाः॥

कल्पे भवंति॥ ननु अस्मिन् प्रसंगे चंद्रस्योच्चपातयोर्भगणाः कथं नोक्ताः इति मंदाशंकां प्राकरणायपूर्वोक्तं स्मारयति॥ भगणा इति चंद्रोच्चपा
तयोः चंद्रस्य मंदोच्चपातयोर्भगणाः॥ अत्रास्मिन्नधिकारे पूर्वं ग्रहयुगभगणाकथने॥ एवकारो विस्मरणनिरासार्थकः॥ प्रोक्ताः चंद्रो
च्चस्येत्यादिश्लोके नोक्ताः॥ ४४॥ ॥ अथाभीष्टकाले ग्रहगतभोगानं विवक्षुस्तदुपजीव्याहर्गणसाधनार्थं प्रवृत्त ग्रहचारकालाद्गताब्द
ज्ञानोपजीव्यं कृतयुगातीतगताब्दज्ञानं श्लोकत्रयेणाह॥ षण्मनूनां तु संपिंड्य कालं तत्संधिभिः सह॥ कल्पादिसंधिना सार्धं वैवस्वतम
नोस्तथा॥ ४५॥ ॥युगानां त्रिघनं यातं तथा कृतयुगं त्विदं॥ प्रोह्य सृष्टेस्ततः कालं पूर्वोक्तं दिव्यसंख्यया॥ ४६॥ ॥सूर्याब्दसंख्यया
ज्ञेयाः कृतस्यांते गता अमी॥ खचतुष्कयमाद्र्यग्निशररंध्रनिशाकराः॥ ४७॥ ॥षण्मनूनां कालं सौरवर्षात्मकं तत्संधिभिः षण्मनूनां
कृतयुगप्रमाणाभिः षड्भिः संधिभिः सह सार्धं कल्पादिसंधिना कृतप्रमाणः कल्पादावित्यनेन कल्पारंभसंबद्धकृतयुगमितसंधि
ना सार्धं सार्थं संपिंड्य एकीकृत्य॥ इदमष्टाविंशति॥ तुकारादायुषोर्धमितं तस्येत्यस्य निरासः वैवस्वतमनोः वर्तमानसप्तमवैवस्वताख्य
मनोर्युगानां त्रिघनं यातं॥ युगसप्तविंशतिगतां तथा एकीकृत्य॥ इदमष्टाविंशतियुगांतर्गतं तु कारात्सांप्रतं स्थितं कृतयुगं तथा गततैरे
कीकृत्य ततः सिद्धांतात्सृष्टेः कालं सृष्टिकरणार्थं यः कालो वर्षात्मकस्तं दिव्यसंख्यया दिव्यमानेन पूर्वोक्तं कुनागाद्रिवेदा दिव्याब्दाः शत
घ्ना इत्यनेनोक्तं सूर्याब्दसंख्यया सौरवर्षमानेन षष्ट्यधिकशतत्रयगुणितं कृत्वेति तात्पर्यार्थः॥ एतेन प्रागुक्तेकीरणं सौरवर्षप्रमाणेन
न दिव्यवर्षप्रमाणेनेति व्यक्तीकृतं प्रोह्य न्यूनीकृत्य चः समुच्चयार्थोनुसंधेयः॥ अमी अवशिष्टाब्दाः॥ खाभ्रखाभ्रद्विसप्तत्रिशरातिथ
यः कृतयुगचरणस्यावसाने गताः अतीताः ज्ञातव्याः ननु कस्मादस्मान्मनवइत्यादि पूर्वोक्तसंपीडितकालीत्यत्र पुनः षण्मनूनामित्या
दि पुनरुक्तमाभाति॥ न च पूर्वं ब्रह्मगतवयः प्रमाणज्ञानार्थमिदानीं च ग्रहसाधनार्थं अन्यथा गतब्रह्मवयःप्रमाणेन ग्रहसाधनाप
त्तेरिति वाच्यं ब्रह्मगतवयः प्रमाणादेव ग्रहसाधनस्य युक्तत्वादिष्टापत्तेः अर्थोन्मेग्रहचक्रादेर्ब्रह्मोत्पत्तितस्तदवसानपर्यंतं सत्वाद्ब्रह्मादि
नाधिककाले गताब्दज्ञानाभावाद्ग्रहसाधनानुपपत्तिरिति चेन्न॥ इत्थं युगसहस्रेण भूतसंहारकारकः॥ कल्प इत्यनेन ब्रह्मदिनांते ग्रहच

129
1941

140762

कादिनाशोके सादिनादौ चक्रोस्त्येव अस्य दिन एव तदादिगताब्दा ग्रहचारोपजीव्या अस्य दिवसे साधिताः परंतु अस्य दिनादितो ग्रहचार प्रवृत्ति कालपर्यंतं यः सृष्टिविलंबित कालस्तद्धीनाः अस्मदिनागताब्दाः ग्रहसाधनोपजीव्याः इति तथोक्तमन्यथा सर्वांतर्गतकाले ग्रहचारासत्वेन तत्साधना पत्तेः सृष्टेः कालकथनानुपपत्तेश्चेति दिक् तथा दिव्याब्दस्य सौरवर्षाणि ३६० द्वादशसहस्रगुणितानि महायुग ४३२०००० मिदमेकसप्ततिगुणं मनुमानं ३०६७२०००० इदं षड्गुणितं षट्मनुमानं १८४०३२०० इदं स्वसंधिभिः कृतप्रमाणैः सप्तभिरेभि १२०९६००० र्युतं १८५२४१६००० मेतत्सप्तविंशतियुगं ११६६४०००० सहितं १९६९०५६००० कृतयुग १७२८००० युक्तं जातानि ॥ कल्यगतवर्षाणि १९७०७८४००० सृष्टिदिव्याब्दैः ४७४०० खषडग्निगुणितैरेभिः १७०६४००० हीनं सृष्टिगताब्दा ग्रहचारोपजीव्याः कृतयुगांते खचतुष्केत्याद्युपपन्नाः १९५३७२००००॥ ॥४७॥ ॥अथाभीष्टकालेऽहर्गणसाधनं ततो दिनमासाब्दपप्रतिज्ञानं वासरेश्वरज्ञानं च श्लोकचतुष्टयेनाह ॥ अतऊर्ध्वममी युक्ता गतकालाब्दसंख्यया ॥ मासीकृता युता मासैर्मधुशुक्लादिभिर्गतैः ॥४८॥ ॥पृथक् स्थास्तेऽधिमासघ्नाः सूर्यमासविभाजिताः ॥ लब्धाधिमासकैर्युक्ता दिनीकृत्या दिनान्विताः ॥४९॥ ॥ द्विष्ठास्तिथिक्षयाभ्यस्ताश्चांद्रवासरभाजिताः ॥ लब्धोनरात्रिरहिताः लंकायामार्धरात्रिकः ॥५०॥ ॥ सावनो द्युगणः सूर्याद्दिनमासाब्दपास्ततः ॥ सप्तभिः क्षयितः शेषः सूर्याद्यो वासरेश्वरः ॥५१॥ ॥अंतः कृतायुगांतात् ऊर्ध्व उपरि अनंतमित्यर्थः ॥ अभीष्टकाले यो गतकालस्तस्य सौरवर्षसंख्यया अमी कृतयुगांतीयसृष्ट्यब्दाः खचतुष्केत्यादि पूर्वोक्ताः युक्ताः अभीष्टकाले सौरगताब्दा भवंति ॥ एते मासीकृताः द्वादशगुणिता इत्यर्थः ॥ अभीष्टकाले मधुशुक्लादिभिः ॥ चैत्रशुक्लाद्यवधिभिर्गतैः गतैर्मासैर्युताः ॥ अत्र गतमासांतर्गतोऽधिमासश्चेन्न ग्राह्यः ॥ तस्योत्तरमासाह्वयत्वेन तदंतर्गतत्वात् तन्मासस्य षष्टिदिनात्मकत्वाच्चैते सिद्धाः पृथक्स्थाः युगाधिमासगुणिताः युगसूर्यमासभक्ताः प्राप्ताधिमासकैर्निरग्रैः सिद्धा युक्ताः अत्र यदा स्पष्टोऽधिमासः पतितः आनयनेन लब्धस्तदानयनप्राप्ताधिमासकैः सैकैर्युक्ताः यदा तु स्पष्टोऽधिमासो न पतित आनयने प्राप्तो यदानयनप्राप्ताधिमासैर्निरेकैर्युक्ताः अन्य श्रीः १०

थाभीष्टकाले साधिताहर्गणस्य त्रिंशद्दिनांतरितत्वापत्तेरिति ध्येयं ॥ एते सिद्धाः दिनीकृत्य त्रिंशतासंगुण्येत्यर्थः ॥ दिनान्विताः वर्तमानमासस्य शुक्लप्रतिपदादिभिर्गततिथिभिर्युक्ता इत्यर्थः ॥ एते द्विस्थाः स्थानद्वये स्थाप्याः एकत्र युगावमैर्गुणिताः युगचांद्रदिनैर्भक्ताश्च प्राप्तावमैर्निरग्रैरपरत्र हीनाः संतः लंकादेशे अर्धरात्रकालिकः सावनाहर्गणः स्यात् ॥ ततः साधिताहर्गणात्सकाशात् ॥ सूर्यात्सूर्यमारभ्य दिनमासाब्दपाः वारेश्वरमासेश्वरवर्षेश्वराः भवंति ॥ तत्र वासरेश्वरज्ञानमाह ॥ सप्तभिरिति ॥ अयमहर्गणः सप्तभिः क्षयितः भक्तः शेषितः कार्यः सशेषो वा शिष्टः सूर्याद्यः सूर्यवारादिकः वासरेश्वरः वारस्वामी गतो भवति ॥ तदग्रिमो वर्तमानो वार इत्यर्थः सिद्धं ॥ अत्रोपपत्तिः ॥ सौरवर्षाणां मासकरणे सस्पष्टाद्यधिमासांतकालसंबंधिसावयवसौरमासाः ॥ अव्यवहितपूर्वपतिताधिमासांतकालादिस्वाभीष्टचैत्राद्यंतकालसंबंधिसावयवचांद्रमासात्यो योगश्चैत्रादौ द्वादशगुणितसौरवर्षाणि जातानि ॥ कुत इति चेच्छृणु ॥ द्वादशगुणितसौरवर्षा दौ सौरमासादौ इति तु निर्विवादं ॥ तेस्वानीताधिमासैः सावयवैर्युताश्चांद्राः सावयवाः सौरवर्षादौ ॥ एते वयवहीनाश्चैत्रादौ निरवयवाश्चांद्रमासाः अवयवस्य चैत्रादौ सौरवर्षाद्यंतरकालरूपाधिशेषत्वात् ॥ तेनिरग्राधिमासोनाश्चैत्रादावधिमासोन चांद्रा द्वादशगुणितसौरवर्षाब्दरूपा उक्तयोगस्वरूपाः सिद्धाः कथमन्यथा निरग्राधिमासयोजनेनैषां चैत्रादौ चांद्रमासमानसंभवः ॥ एते स्वाभीष्टमासादिकालसिध्यर्थं ॥ चैत्रशुक्लादिगतमासैर्युक्ताः एतेन द्वादशगुणितसौरवर्षमितसौरमासानां चैत्रादिगतचांद्रमासाः कथं योजिता एकजातित्वाभावादिति दूषणांगीकारेनिरस्तः उक्तरीत्या तत्र चांद्रमासानामपि सत्वादेकजातीयत्वेन योगसंभवात् ॥ नहि पूर्वं योगोस्माभिः स्वीयेन विजातीययोगो दूषणं ॥ तस्य द्वादशगुणितसौरवर्षरूपत्वेन स्वतः सिद्धत्वात् ॥ अथैषां निरग्राधिमासा योज्या इति स्पष्टादि पूर्वपतिताधिमासांतकालावधि ये सौरमासाः सावयवास्तेभ्यो युगसौरमासैर्युगाधिमासास्तदैभिः सौरमासैः के इत्यनुपातेन निरग्राधिमासाश्चांद्रा भवंति सौरेभ्यः साधितत्वात् ॥ अथाभीष्टकालेऽधिमासावयवज्ञानार्थं युगचांद्रमासैर्युगाधिमासास्तदा पूर्वपतिताधिमासांतकालाभीष्टांतसौंतरस्थितचांद्रमासैः सावयवैरेभिः के इत्यनुपातेनाधिमासाभावात्तदवयवः सौर आयाति ॥ चांद्रात्साधितत्वात् ॥ परं त्ववयवावयवयोरेकजातित्वाभिद्धिरतस्तत्संपादनार्थं अधिमासावयवस्योक्तसौरस्य युगसौरमासैर्युगचांद्रमासास्तदोक्तसौराधिमासा

वयत्वेन किमित्यनुपातेन युग चांद्रमासागुणो युगसौरमासाहरइतितुल्ययोर्गुणहरयोर्युगचांद्रमासयोर्नाशादिष्टचांद्रमासानांयुगाधि
मासागुणो युगसौरमासाहरं इति फलमधिमासावयवश्चांद्रः अथवा इष्टसौरचांद्रमासयोः पृथग्ज्ञानादधिमासतदवयवयोर्ज्ञान
मत्राकथमपैकोहरश्चद्वेगुणकौ विभिन्नाविल्यादिरीत्येष्टतादृशसौरचांद्रमासयोर्यएवायंज्ञातौ युगाधिमासगुणितौ युगसौरमासभ
क्तः फलमधिमासाः शेषात्तदवयवोहर्गणानयनेनुपयुक्तः॥तत्रकेवलाधिमासानेवन्यूनत्वेनतेषामेवयोजनावश्यकत्वात् अयंसृष्ट्यादि
तइष्टमासादिपर्यंतंचांद्रमासगणः सिद्धः यद्वस्वुद्धादश्गुणितसौरवर्षरूपसौरमासानांसौरवर्षादितोभीष्टकालपर्यंतंसौरमाना
मज्ञानात्॥चैत्रादिगतचांद्रमासाएवयोजिताः परमिष्टसौरमासेषधिमासमधिकं॥नत्वाधिमासानयनेधिशेषत्यागेनकेवलाधिमास
योजनेनिरंतरंभवति॥अधिमासानयनंचचांद्रमिष्टसौमासत्वेनेधिशेषाधिकेष्टसौरमासानामंगीकारादित्याकुलत्वमित्युक्तं॥केवलेष्टसौ
रमासानि नाधिमासानांनिरयाणांमधिशेषाधिकसौरेष्टमासेषुयोजनेनैवनिरंतरत्वेरं सिद्धे॥अन्यथाधिशेषगुणितयुगाधिमा
सेभ्योयुगार्कमासभक्तात्फलेनाधिशेषमधिकमायातीतिपरमासन्नाधिशेषस्याधिकत्वेभवतीत्यनुपातानयनेनैकाधिकाधिक
मासलब्ध्यायोजितेनचांद्रमासगणएकाधिकःस्यादिति॥अथाभीष्टमासादिसिद्धचांद्रमासाश्चांद्रादिनकरणार्थंत्रिंशद्गुणिताः अभीष्ट
दिनेनतिथ्यर्थंशुक्लादिगततिथयोन्वयोजिताअभीष्टतिथ्यादौचांद्राहर्गणः॥युगचांद्रैर्युगावमनिनदानेनकिमित्यनुपातागतावमैः सा
यंवहीनश्चांद्राहर्गणस्तिथ्यंते॥सावनोहर्गणः॥यमकोटिदेशेसूर्योदयकालेग्रहचारस्यप्रवृत्तेस्तदादितोनिवयवाहर्गणसिध्यर्थंतिथ्यंत
तत्कालयोरंतरमवमावयवरूपंयोज्यमतः शर्वमेवावमावयवोनुपयुक्तत्वेनगृहीतः॥अतश्चांद्राहर्गणः स्वानीतावमैर्निरग्रैर्हीनोहर्गणः सा
वनोभिरवयवोयमकोटिदेशीयसूर्योदयकाले॥तत्तद्देशस्याप्रसिद्धतयाप्रसिद्धलंकादेशस्यार्धरात्रस्यतद्रूपस्योक्तिः कृता॥सृष्ट्याद्या
र्कवेवासरसद्भावात्तदाद्यादिनमासवर्षेश्वराः॥ग्रहाणांसप्तसंख्यात्वात्सप्ततष्टोहर्गणः शेषंगतवारः॥५१॥ ॥अथगतिज्ञानयोर्वर्षमा
सेश्वरयोरानयनमाह॥मासाब्ददिनसंख्याप्तंमंद्वित्रिघ्नरूपसंयुतं॥सप्तोध्दृतावशेषौतुविज्ञेयौमासवर्षपौ॥५२॥ ॥अहर्गणादि

133
1941

ष्टादेकाद्रमासदिनानांसंख्यया त्रिंशता भक्तादाप्तफलं॥अपरस्थत्ववर्षदिनानांसंख्यया षष्ट्याधिकशतत्रयेणभक्तादाप्तंफलंशेषयोरुपयो
गात्यागः॥क्रमेणफलद्वयंद्वाभ्यांत्रिभिर्गुणितउभयत्रएकसंख्ययायुक्तंसप्तभागहरिणाप्तकालफलत्यागेनावशिष्टौक्रमेणमासस्वामिवर्ष
स्वामिनौज्ञातव्यौ॥तकाराद्यक्रमेणवासरेश्वरगणनातक्रमेणानयोर्गणनापरमत्रवर्तमानेत्यर्थकः॥अत्रोपपत्तिः सृष्ट्यादित्रिंशद्दहो
रात्राणामेकः सौरस्तत्रसूर्योधिपतिः मासादिदिने ऽर्कस्याधिपतित्वात्॥एवंद्वितीयमासादौभौमस्यदिनाधिपतित्वाद्भौमोद्वितीयमासे
श्वरइतिप्रतिमासंमासेश्वरयोरंतरंद्वयंत्रिंशद्दिनानांसप्ततष्टतयाद्व्यवशेषात्॥एवंषष्ट्यधिकशतत्रयाहोरात्राणामेकंसौरसावनव
र्षंतस्याधिपोर्कः वर्षादिदिनेर्कस्याधिपतित्वात्॥एवंद्वितीयसावनवर्षादौबुधस्यदिनाधिपतित्वात् बुधोद्वितीयवर्षेश्वर इतिप्रतिवर्षंवर्षे
श्वरयोरंतरंत्रयं॥षष्ट्यधिकशतत्रयदिनानांसप्ततष्टत्र्यवशेषात्॥तथाचवर्तमानकालेतदूणनयाकियंतोमासगताः कियंतिच
वर्षाणिगतानीतिज्ञानार्थमहर्गणस्त्रिंशद्भक्तः फलंगतवर्षाणि॥एकमासेद्वौवारौतदागतमासैः केइतिगतमासवाराः वर्तमानार्थंसै
काः वाराणांसप्तसंख्यात्वात्सप्ततष्टौशेषौसूर्यादिकौमासवर्षेश्वरौ॥५२॥ ॥अथग्रहानयनमाह॥यथास्वभगणाभ्यस्तोदि
नराशिःकुवासरैः॥विभाजितोमध्यगत्याभगणादिर्ग्रहोभवेदिति॥५२॥ ॥दिनराशिरहर्गणः यथास्वभगणाभ्यस्तः यत्कालिका
निजोक्तभगणैर्गुणितः युगभगणैः कल्पभगणैर्वेत्यर्थः॥तथाकुवासरैः तात्कालिकसावनदिनैः युगसावनैः कल्पसावनैर्वेतियथा
योग्यमित्यर्थः॥भक्तः फलंयस्ययहस्यभगणागुणनार्थंगृहीताः॥सग्रहोभगणादिः भगणराशिभागकलाविकलात्मकभोगात्मकः॥
मध्यगत्यामध्यमगतिमानेनग्रहस्यदिनद्विलक्षणस्फुटगतिप्रमाणेन॥अयेतत्प्रमाणेनग्रहभोगज्ञानस्योक्तेः मध्यमोग्रहः स्यादित्यर्थः
अत्रोपपत्तिः॥युगादिसावनैर्युगादिभगणास्तदैकेनदिनेनकेइतिप्राप्तामध्यमगतिः॥ततएकेनदिनेनेयंगतिस्तदेष्टाहर्गणेनकेति
रूपयोस्तुल्यविकाराजनकत्वाच्चमात्राद्युपपंनमानयनं॥यद्यपियुगादिसावनैर्युगभगणास्तदेष्टाहर्गणेनकेमित्येकानुपातेनानय
नमुपपन्नंलाघवात्तथापिमध्यगत्येत्यस्यप्रदर्शनार्थमनुपातद्वयंगुरुभूतमपिप्रदर्शितं॥५३॥ ॥अथामुंप्रकारमुपपातयो

स०टी० १२

रानयनानियोदिशति॥ एवंस्वशीघ्रमंदोच्चायेप्रोक्ताः पूर्वयायिनः ॥ विलोमगतयः पातास्तद्वच्चक्राद्विशोधिताः ॥५४॥ ॥ येपूर्वया
यिनः पूर्वदिग्गतयः स्वशीघ्रमंदोच्चाः स्वानांग्रहाणांशीघ्रोच्चमंदोच्चाः ग्रहवदुक्तेन शीघ्रोच्चमंदोच्चयोबहुत्वाद्बहुवचनंप्रोक्ताः पूर्वभगणो
संख्याकथिताः तेपिएवग्रहानयनरीत्यासाध्याः ॥ ननुपूर्वयायिनएवंसाध्यास्तर्हि पश्चिमगतयः पा ताः कथंसाध्याइत्यत आह ॥ विलो
मगतयइति ॥ पश्चिमगतयः पाताअपितद्वद्ग्रहानयनरीत्या अत्रचंद्रोच्चपातौग्रहनयनवद्युगकल्पभगणसावनाभ्यांसिद्धौभवतो
न्येषांमुच्चपातौतुकल्पसावनाद्दिनहरेतिर्णेध्येयं ॥ ननुतर्हिपूर्वपश्चिमगत्योः कोविशेष आनयनेइत्यत आह ॥ चक्रादिति ॥ आगताराश्यादिपाताः द्वादशराशिभ्यः शोध्याः पाताः भवंतिएतावानेवविशेषइतिभावः ॥ अत्रोपपत्तिः ॥ पूर्वयायिनोमेषवृषमिथुनादिक्रमे
णागच्छंति ॥ पश्चिमगतयस्तुमेषमीनकुंभेत्याद्युत्क्रमेणागच्छंति ॥ ततोत्क्रमगणनेनायालोकेऽनभ्यासाद्राशिक्रमेणतज्ज्ञानार्थं
द्वादशराशिभ्यः शोधिताः पूर्वगतिप्रक्रियः भवंति ॥५४॥ ॥ अथसंवत्सरानयनमाह ॥ द्वादशघ्नागुरोर्याताभगणावर्त्तमानकैः
॥ राशिभिः सहिताः शुध्याः षष्ट्यास्युर्विजयादयः ॥५५॥ ॥ अथहर्गणानीतस्यभगणादिकस्यबृहस्पतेः याताः गताः भगणाः उ
परिस्थाः द्वादशगुणिताः वर्त्तमानकैः यस्मिन्नधिष्ठितः सवर्त्तमानस्तत्सहितैः एकयुक्तैरित्यर्थः ॥ राशिभिः गणितागताभीष्टराशि
भ्यः यद्राशौगतिष्ठतितस्यमेषादिसंख्ययेतिफलितार्थाः युताः षष्ट्याः शुध्याः भागावशेषिताः फलंभागादिकंचानुपयोगात्साद्यंविज
यादयः संवत्सरावर्त्तमानसहिताः भवंति ॥ अत्रोपपत्तिः ॥ मध्यगत्याभभोगेनगुरोर्गोरिवत्सराइतिलघुवसिष्ठसिद्धांतोक्तेः गुरुम
ध्यमराशिभोगकालः एकः संवत्सरइति ॥ स्वस्याद्या नीतभगणादिगुरोः संपूर्णराशिज्ञानार्थंभगणाद्वादशगुणवर्त्तमानराशि
संख्यायुताः षष्टितष्टाः शेषंविजयादिकः संवत्सरोवर्त्तमानोभवति ॥ संवत्सराणांषष्टिसंख्यात्वात् ॥ सृष्ट्यादौविजयसंवत्सरस
द्भावाच्चेति ॥५५॥ ॥ अथोक्तमुपसंहरन्लाघवेनग्रहानयनमाह ॥ विस्तरेणैवदुदितंसंक्षेपाद्व्यावहारिकं ॥ मध्यमानयनंका
र्यंग्रहाणामिष्टतोयुगात् ॥५६॥ ॥ एतत्पण्मन्वंतांतुसंपिंड्येत्यादिविस्तरेणगणितक्रियाबाहुल्ये नउदितमुक्तं ॥ व्याव

श्रीः
१२

135
1941

हारिकं लोकव्यवहारोपयुक्तमिदंग्रहानयनंसंक्षेपात् अल्पगणितप्रयासात् तत्रैवतदाह ॥ मध्यमानयनमिति ॥ ग्रहाणांमध्यमानयनंम
ध्यममानेनगणितद्वारतः वर्त्तमानात्रेतारव्यात्युगात्महायुगस्यचरणात् ॥ त्रेतायुगादितोगताब्दैरल्पभूतैरेवोक्तरीत्याहर्गणमानीयोक्तरी
त्यामध्यग्रहाः कार्याइत्यर्थः ॥५६॥ ॥ ननुसृष्ट्यादितोग्रहचारप्रवृत्तेस्तदादितआनीतस्यग्रहस्यवास्तवत्वेनतत्तुल्योयंग्रहः कथमवग
तइत्यत आह ॥ अस्मिन्कृतयुगस्यांतेसर्वेमध्यगताग्रहाः ॥ विनातुपातमंदोच्चान्मेषादौतुल्यतामिताइति ॥५७॥ ॥ अस्मिन्निदानींतने
कृतयुगस्यावसानसमयेसर्वेसप्तग्रहाः सूर्यादयः मध्यगताः मेषादौमेषादिप्रदेशेतुल्यतांसमतांगणितागतराश्यादिभोगेनइताः प्राप्ताः
पातमंदोच्चान्विनापातमंदोच्चाश्चनतुल्याः नवामेषादौ ॥ तथाचग्रहाणांशीघ्रोच्चानांचभगणपूर्त्तेस्तत्त्रेतादिसमयावगतगतकालादागतरा
श्यादयः सृष्ट्यादिगतकालावगतराश्यादिभिस्तुल्याः भगणानांच प्रयोजनाभावइतिभावः ॥५७॥ ॥ अथोच्चपातयोर्विशेषमाह ॥ मकरादौश
शांकोच्चंतस्यपातस्तुतुलादिगः ॥ निरंशत्वंगताश्चान्येनोक्तास्तेमंदचारिणः ॥५८॥ ॥ चंद्रस्यमंदोच्चंतदानींमकरादावस्ति ॥ तत्पातश्चंद्रपा
तः तुलादिस्थोस्तितुकारादनस्तयोस्त्रैतादितआनयनंनषड्राशियोगविशेषेणसुगमभित्यर्थः ॥ नन्वेवमन्येषामपियद्राश्यादिस्थत्वंतत्क
थनेनतेषामथनयनंसुगमंभवष्यतीत्यत आह ॥ निरंशत्वमिति ॥ अन्येअवशिष्टाः मंदोच्चपाताः येमंदचारिणः अल्पगतयः उक्ताः पूर्वभग
णोत्त्याकथिताः तेचक्रारादस्मिन्कृतयुगांतेनिरंशत्वंअंशाभावतांनप्राप्ताः ॥ तथाचतेषांराश्यादिकथनगौरवंमंदगतित्वात् एकरा
शौताः सहस्रवर्षपर्यंतमुपयुक्ताभवंतीति निरंतरंतत्साधनावश्यकताभावात्तेषामानयनंत्रेतादिगताब्देभ्यउपेक्षितमितिभावः ॥ यदि
चतेतआनीयंतेतदास्वस्वक्षेपयुताः कार्याः क्षेपकास्तुरविमंदोच्चंराश्यादिकं ७।२८।१२ भौमस्य ३३।१४।२४ बुधस्य ५।४।४।४८
गुरोः ०।९।०।० शुक्रस्य ११।१२।२१।० शनेः ४।२०।१३।१२ भौमपातस्य ९।११।२०।१२ बुधस्य ८।११।१६।४८ गुरोः ८।८।५६।२४
शुक्रस्य ४।१७।२५।४८। शनिपातस्य ४।२०।१३।१२ एवमिष्टकालादपिग्रहाः साध्याः स्वेस्वक्षेपयोजपूर्वं ॥५८॥ ॥ अथग्रहा
णांदेशांतरफलानयनार्थंभूपरिधिंस्वोपजीव्यभूव्यासकथनपूर्वकमाह ॥ योजनानिशतान्यष्टौभूकर्णोद्विगुणानितु ॥ तद्वर्गतो

स॰ टी॰
१२

दशगुणात्पदं भूपरिधिर्भवेत्॥ ५९॥ ॥अष्टौ शतानि द्विगुणानि षोडश शतं योजनानि भूकर्णः ध्रुवो भूगोलस्य कर्णः स च परिधिमध्य
भागसूत्रं॥ परिध्यर्धमितचापस्य ज्यारूपं द्विगुण इत्यनेन शतान्यष्टौ केंद्रात् परिधिपर्यंतमृजुसूत्रस्य मानमिति सूचितं॥ कक्षाव्यासा
र्धस्य कर्णव्यवहारवदस्यापि भूकर्णव्यवहारः॥ तु कारात्पुराण विरुद्धोपि प्रत्यक्षसहकृतागमप्रमाण सिद्ध॥ अस्मात्परिधिज्ञानमा
ह॥ तद्वर्गतइति भूव्यासवर्गात्तुल्ययोर्घातरूपात् दशगुणान्मूलं कस्यापि समद्विघातइति तन्मूलं॥ तत्प्रकारश्च ग्रंथांतरे प्रसिद्धः भूपरि
धिः स्यात्॥ अत्रोपपत्तिः गजाग्निवेदराम ३४३८ मितत्रिज्यायाः कक्षाव्यासार्धत्वात् द्विगुणत्रिज्यारूपव्यासे चक्रकलातुल्यः परिधिः
२१६०० तदेष्टव्यासे क इति गुण १६०० हरौ ६८७५ हरेणापि वर्जितौ हरस्थाने रूपं गुणस्थाने सार्धोऽशावयवयुतास्त्रयः तथा च व्यासो
नेन गुणितः परिधिर्भवति॥ तत्र भगवता गुणस्यैकस्थानकरणार्थं वर्गः कृतः ९।५२।१२ अत्र स्वल्पांतरत्वाद्दश गृहीताः वर्गेण वर्ग
गुणयेदित्युक्तत्वाद्व्यासवर्गो दशगुणितस्तन्मूलं व्यासो मूलरूपगुणगुणितः सिद्धो भवति यद्यपि वर्गस्थाने दशग्रहणेन स्थूल मिदमा
नयनं तथापि परम कारुणिकेन भगवता लोकानुग्रहार्थं गणितलाघवायांगीकृतं॥ वस्तुतो भगवता विद्मंगलविश्वरूपमितव्यासस्य॥
११३४ परिधिर्गुणितः प्रत्यक्षेण खखखरसराममितः ३६००० अत्र पूर्वोक्तरीत्यापवर्तनेन गुणः ३।९।४४ पादोनदशावयवयुतं त्रयं
अस्य वर्गो दशप्रायः ९।५९।५९ इत्युपपन्नामुक्तं॥ ५९॥ ॥ अथ स्फुटपरिध्यानयनं तत्संस्कारं च श्लोकाभ्यामाह॥ लंबज्याघ्नस्त्रि
जीवाप्तः स्फुटो भूपरिधिः स्वकः॥ तेन देशांतराभ्यस्ता ग्रहभुक्तिर्विभाजिता॥ ६०॥ ॥ कलादि तत्फलं प्राच्यां ग्रहेभ्यः परिशोधयेत्॥
रेखाप्रतीचीसंस्थाने प्रक्षिपेत्स्युः स्वदेशजाइति॥ ६१॥ ॥ द्वादशाग्रफलभयोर्वर्गयोगमूलमक्षकर्णः अनेन द्वादशगुणिता त्रिज्याभ
क्ता फलं लंबज्या॥ अनया गुणितो भूपरिधिस्त्रिज्यया गजाग्निवेदराममितया भक्तः फलं स्वकः स्वदेशसंबंधी स्पष्टो भूपरिधिः स्या
त्॥ ग्रहस्य गतिः देशांतराभ्यस्ता स्वरेखादेशस्वदेशयोरंतरयोजनानि देशांतरपदवाच्यानि तैर्गुणिता तेन स्पष्टेन भूपरिधिना भ
क्ता फलं कलादिकं प्राच्यां स्वरेखादेशात्स्वस्य देशस्य पूर्वदिग्भागस्थितत्वे ग्रहेभ्यः कलादिस्थाने परिशोधयेत् वर्जयेत्॥ हीनं कुर्या

श्रीः
१२

137
1941

दित्यर्थः॥ रेखाप्रतीचीसंस्थाने स्वरेखादेशात्पश्चिमदिग्भागस्थिते स्वदेशे ग्रहेभ्यः कलादिस्थाने प्रक्षिपेद्योजयेत्। धनं कुर्यात् गणक
इतिशेषः॥ ते सिद्धाः ग्रहाः स्वदेशजाः स्वदेशीया भवंति। पूर्वमहर्गणस्य लंकादेशीयत्वेन तदुत्पन्नानां ग्रहाणां लंकादेशीयत्वात्॥ अ
अत्रोपपत्तिः॥ यद्यपि भूमेः करंडाकारत्वेन सर्वत्राभिन्नः परिधिरिति स्फुटपरिध्यसंभवस्तथापि निरक्षदेशस्य मध्यत्वकल्पनेनोक्तो
भूपरिधिस्तद्देशीयानामेव॥ तदन्यत्र तदनुरोधेन वृत्तानां लघुत्वसंभवेनोत्तरोत्तरं स्वल्पो परिधिः स्वदेशे स्फुटसंज्ञः॥ एवं च त्र्यक्षांशे मे
रुस्थाने वडवास्थाने च परिध्यभावः॥ निरक्षदेशे परमउक्तः परिधिरतो यत्राक्षांशाः नवतिः परमास्तत्र लंबांशाभावः॥ यत्राक्षांशाभावस्त
त्र लंबांशाः परमा नवतिः॥ लंबांशाक्षांशौ तु वक्ष्यमाणस्वरूपौ॥ तथा च लंबांशह्रासानुरोधेन परिधेरपि ह्रास इति परमलंबांशैर्नव
तिमितैरुक्तोम्लपरिधिस्तदा स्वदेशीयलंबांशैः क इत्यनुपात उपपन्नोपि वृत्ताश्रितांशोभ्योनुपातानानुसंभवेन सर्वैरुपेक्षितत्वाद्य
ज्यानुपातस्य सर्वैरंगीकृत्वात्प्रमाणस्थाने प्रमाणांशज्या परमा त्रिज्या इच्छास्थाने इच्छांशानां ज्या लंबज्येति युक्तमुक्तमुपपन्नं स्पष्टप
रिध्यानयनं॥ देशांतरोपपत्तिस्तु लंकादेशीयो ग्रहः स्वदेशतः समसूत्रेण यो दक्षिणोत्तरस्थो निरक्षदेश आसन्नस्तत्र कार्यः॥ तदर्थं
लंकादेशस्वनिरक्षदेशयोरंतरयोजनज्ञानमावश्यकं॥ एतत्स्मादक्षांशाकस्मितिपरिध्यपवयवतदंतरतोपचितलंकोत्तरदक्षिण
सूत्रस्थरेखादेशस्वदेशयोरंतरं स्वपरिधिस्थं गणनया ज्ञातमस्मात्स्वपरिधिनैतदंतरं योजनात्मकं तदोक्तपरिधिना किमित्यनुपातेन
लंकास्वनिरक्षदेशयोरंतरं उक्तपरिधिस्थं ज्ञातं॥ ततोर्कोदयद्वयांतरकालेनार्को भूपरिधिं क्रामतीति ग्रहाः स्वां स्वां गतिं कलाभिः क्रा
मंति कामं त्यत उक्तपरिधिना ग्रहगतिकला तदा प्रसिद्धलंकास्वरेखनिरक्षदेशांतरयोजनैः क इत्यनुपातेनोक्तपरिध्योर्गुणहरयोस्तुल्य
त्वेन नाशात्स्वरेखादेशस्वदेशयोरंतरयोजनानि ग्रहगतिगुणानि स्वपरिधिभक्तानि फलं ग्रहस्यांतरकालाः यद्यपि परिधिना गतिक
लास्तदा स्वरेखादेशस्वदेशयोरंतरयोजनैः का इत्येकानुपातेनैव देशांतरमुत्पलमुपपन्नं भवति तथापि निरक्षदेशपदार्थसंबोधा
दिदमुपपन्नं फलं निरक्षदेशीयं कथमित्याग्रहनिरवाति मंदस्य बोधार्थं गुरुभूतमप्यनुपातद्वयमु क्तं॥ तत्स्वनर्णोपपत्तिस्तु लंकादे

स०टी०
१४

शात्स्वनिरक्षदेशस्य पूर्वभागस्थितत्वेलंकादेशार्धरात्रात्स्वनिरक्षदेशार्धरात्रमर्वाग्भवति ॥ ननुदयकालात्प्रवहानिलवेगेन पूर्वभा
गे पूर्वमेवोदयात् ॥ अतोग्निमकालीनग्रहस्य पूर्वकालिकत्वसिध्यर्थं तत्फलं न्यूनं कार्यं ॥ एवं निरक्षदेशस्य लंकातः पश्चिमस्थत्वे लंको
दयानंतरोदयसंद्भावात्लं कार्धरात्रादग्निमकालार्धरात्रमतः पूर्वकालिकग्रहस्याग्निमकालिकत्वसिध्यर्थं तत्फलं योज्यं ॥ चक्रशोधित
पातस्यायं संस्कारविपरीत इति ज्ञेयं ॥ स्वनिरक्षदेशस्य लंकातः पूर्वापरभागस्थत्वं स्वरेखादेशात्स्वदेशस्य पूर्वापरभागस्थत्वानुरो
धेनेति स्वनिरक्षदेशस्वयोर्याम्योत्तरैक्यात दर्धरात्रयोरभिन्नत्वात्स्वदेशार्धरात्रेपि स्वनिरक्षदेशार्धरात्रकालिका एव ग्रहा अविकृता
इति सर्वमुक्तमुपपन्नं ॥ ६१ ॥ ॥ अथ रेखास्वरूपं तद्देशांश्च कांश्चिदाह ॥ राक्षसालयदेवौक शैलयोर्मध्यसूत्रगाः ॥ रोहीतकमवंती
चयथा सन्निहितं सरः ॥ ६२ ॥ ॥ राक्षसालयं लंका देवानां गृहरूपः पर्वतो मेरुः ॥ अनयोर्मध्ये ऋजुसूत्रं तत्र स्थिता देशाः रेखाः लं
कादक्षिणसूत्रस्थास्त्वनुपयुक्तास्तत्र मनुष्यागोचरत्वादिति तेनोक्ताः ॥ ज्ञानार्थमुदाहरति रोहीतकमिति ॥ यथा रोहितकं नगरं ॥ अवं
ती उज्जयिनी सन्निहितं सरः कुरुक्षेत्रं चकारस्त्वयेत्यर्थवपरः तथान्यानि परस्परसन्निहिततया ज्ञेयानि ॥ ६२ ॥ ॥ ननु येन स्व
स्थानं रेखातः पूर्वतोपरत्र वा कियद्योजनांतरेणास्तीति न ज्ञायते तेन देशांतरफलादि कं कथं कार्यमित्यतः श्लोकत्रयेणाह ॥ अतीत्यो
न्मील इंदोः पश्चात्तद्गणितागतात् ॥ यदा भवेत्तदा प्राच्यां स्वस्थानं मध्यतो भवेत् ॥ ६३ ॥ ॥ अप्राप्य चाभवेत्पश्चादेवं चापि नि
मीलनात् ॥ तयोरंतरनाडीभिर्हन्याद्भूपरिधिं स्फुटं ॥ ६४ ॥ ॥ षष्ट्या विभज्य लब्धैस्तु योजनैः प्रागथापरैः ॥ स्वदेशपरिधिर्ज्ञेयः कु
र्याद्देशांतरं हि तैः ॥ ६५ ॥ ॥ चंद्रस्य सर्वग्रहणांतर्गतोन्मीलनकालात् ॥ विना देशांतरं गणितागतात् चंद्रग्रहणोक्तप्रकारगणित
ज्ञानात् ॥ अतीत्य तत्कालस्यातिक्रमणं कृत्वा पश्चादनंतरकाले मंदबोधार्थमिदं अन्यथातीत्य पश्चादित्यनयोरेकतरस्य वैयर्थ्याप
त्तेः ॥ तच्चंद्रबिंबस्योन्मीलनं यदा यदीत्यर्थः स्यात् तदा तर्हीत्यर्थः स्वाभिमतस्थानं मध्यरेखादेशात्पूर्वदिशि भवेत्तिष्ठतीत्यर्थः ॥
अप्राप्य तदतिक्रमणमकृत्वा पूर्वकाल एव चकाराच्चंद्रोन्मीलनं यदि स्यात्तर्हि मध्यरेखातः स्वस्थानमित्यर्थः ॥ पाश्चात्पश्चिमदि

श्रीः
१४

139
1341

ग्भागे भवेत्तिष्ठतीत्यर्थः ॥ ननु चंद्रस्य स्पर्शमोक्षसंमीलनोन्मीलनकालेषून्मीलनकाल एव कथं गृहीत इत्यत आह ॥ एवमिति वा प्रकारां
तरेण निमीलनात् ॥ चंद्रसंमीलनकालात् एवं चंद्रग्रहणाधिकारोक्तगणितप्रकारज्ञातादनंतरकाले संमीलनं यदि तर्हि मध्यरेखादेशा
त्स्वस्थानं पूर्वदिग्भागे तिष्ठति ॥ पूर्वकाले संमीलनं यदि तर्हि मध्यरेखादेशात्स्वस्थानं पश्चाद्भागे तिष्ठतीत्यर्थः ॥ अपिशब्दो निश्चयार्थे ते
नोन्मीलनसंमीलनकालयोर्भिन्नरीतिव्युदासः ॥ तथा चोन्मीलनग्रहणमुपलक्षणार्थं ॥ तत्रापि शब्दस्पर्शमोक्षयोग्रहणाद्यंतरूपयो
रनिश्चयत्वसंभावनेयोक्तिमुख्यग्रहाणां मध्यस्थयोः संमीलनोन्मीलनयोर्निश्चयत्वेनोक्तिः कृतेति भावः ॥ अथ देशांतरयोजनपुरः
सरं देशांतरफलं सिद्धमित्याह ॥ तयोरिति प्रत्यक्षोन्मीलनकालगणितागतोन्मीलनकालयोः संमीलनकालयोस्तादृशयोर्वा अंत
रघटीभिः भूपरिधिं स्पष्टस्वदेशभूपरिधिं लंबज्याघ्न इत्याद्यवगतं हन्यात् गुणयेत् ॥ तादृशं गुणितं स्पष्टपरिधिं षष्ट्या भक्त्या लब्धैः
प्राग्भिः प्राजेभ्यो नैः पूर्वविभागयोजनैः अथ अथवा अपरैः पश्चिमविभागास्थितैर्योजनैः स्वदेशपरिधिः स्वदेशस्य परिधिरवधिः स्वदे
शस्थानमंडलरूपः तुकाराद्रेखादेशादंतरित इत्यर्थः ज्ञेयः कणकेनेति शेषः स्वरेखास्वदेशयोरंतरयोजनानि फलमिति फलितार्थः ॥
तैरंतरयोजनैर्देशांतरं तेन देशांतरा भ्यस्तेत्यादि प्रागुक्तप्रकारेण ग्रहाणां देशांतरफलं कलात्मकं कुर्यात् ॥ गणक इति शेषः ॥ हिकारा
त्तत्संस्कारोप्यभिन्नप्रकारत्वादभिन्न इत्यर्थः ॥ अत्रोपपत्तिः विना देशांतरसंस्कारं ग्रहगणितं स्वरेखादेशीयं भवति अतो गणितागत
साधितोन्मीलनसंमीलनादिकालाः स्वरेखादेशे सिध्यंति ॥ स्वदेपूर्वविभागस्थे प्रथमं स्वस्य सूर्योदयादिकालास्तदनंतरं रेखायाइ
ति चंद्रग्रहस्यैण सर्वदेशे युगपत्संभवात् गणितागतकालाद्रेखादेशस्थादनंतरं स्पर्शादिकालो भवति ॥ एवं स्वदेशे पश्चिमभागस्थे
प्रथमं रेखादेर्कोदयादिकालास्तदनंतरं स्वदेशे इति रेखास्थगणितागतस्पर्शादिकालात् प्रत्यात्मकाल्पूर्वमेव स्पर्शादिकालो भव
त्यतः सम्यगुपपन्नमतीत्यादि सार्धश्लोकोक्तं ॥ स्वदेशरेखादेशास्सूर्योदयाद्यवधिकघट्यात्मककालयोरंतरं देशांतरघटिका
सिस्याः सूर्योदयद्वयांतरकाले नाकों भूपरिधिमतिक्रामतीति षष्टिसावनघटीभिर्भूपरिधियोजनानि स्वदेशीयानि तदा तत्का

स० टी० १५

ांतररूपदेशांतरघटीभिः कानीत्यनुपातेन रेखातो देशास्वदेशायांतरंतरवी जनानि॥ ज्ञातेभ्य एभ्यः पूर्वदिश्येव देशांतरं भवति॥ सर्वत्र
हणस्य सर्वदेशेषु युगपत्संभवात्तदुन्मीलनकालादिनोक्तदिशानेतज्ज्ञानमित्यनुक्तिरिति ध्येयं॥ ६५॥ ॥ अथवारप्रवृत्तिकाल
ज्ञानमाह॥ कालप्रवृत्तिः प्राग्देशेक्षपार्धेभ्यधिके भवेत्॥ तद्देशांतरनाडीभिः पश्चाद्धीने विनिर्दिशेत्॥ ६६॥ ॥ पूर्वभागस्थितस्वा
भिमतदेशे तद्देशांतरनाडीभिः पूर्वप्रकारज्ञातदेशांतरघटीभिः अभ्यधिके अर्धरात्रे युक्तार्धरात्रसमये अर्धरात्रादनंतरं देशांत
रघटीकाले इत्यर्थः॥ वारप्रवृत्तिः वारः स्यादिष्टतकालः स्यात् रेखातः पश्चिमभागस्थदेशे पूर्वप्रकारज्ञातदेशांतरघटीभिः ऊनेऽर्ध
र्धरात्रे अर्धरात्रात्पूर्वमेव देशांतरघटीकाले वारप्रवृत्तिं विनिर्दिशेत्॥ गणकः कथयेत्॥ अत्रोपपत्तिः॥ यमकोटिसूर्योदयकालो
लंकार्धरात्रसमयरूपो ग्रहचारप्रवृत्तिरूपः स्वदेशोक्तदेशेरेखातः पूर्वापरभागयोः स्वार्धरात्रकालादनंतरं पूर्वं क्रमेण तदर्धरात्रं देशां
तरघटीभिर्भवति॥ स्वनिरक्षदेशास्वदेशार्धरात्रयोर्युगपत्संभवात् अत उपपन्नं वारप्रवृत्तिरित्यादि॥ नन्वेतत्कालज्ञानं किमर्थं
उक्तं प्रयोजनाभावादिति चेन्न॥ अहर्गणोत्पन्नग्रहस्य तात्कालिकत्वात् तत्कालज्ञानेन स्वार्धरात्रसमस्य तत्कालस्य चयदंतरं तेन ता
त्कालिकग्रहस्य चालनेकृते सति स्वार्धरात्रसमयग्रहः पूर्वं साधित एव भवतीति मंदप्रत्ययस्यैव प्रयोजनत्वात्॥ तात्कालज्ञानेन
ग्रहस्य देशांतरसंस्कारकारणमिति लाघवाच्च॥ अत एव समनंतर एव ग्रहस्येष्टकालिकत्वसिद्ध्यर्थं चालनोक्तिः संगच्छते॥ एतेन
नत्तनः अर्धरात्रमितरक्षरात्र्यर्धे पंचदशघटिकात्मककाले उत्तरगोले ऽर्कोदयाच्चरघटीमितान्निमकाले॥ दक्षिणगोले ऽ
र्कोदयाच्चरघटीमितपूर्वकाले इति फलितं॥ पूर्वपश्चिमदेशयोर्देशांतरघटीभिरधिकोनेकालेक्रमेण वारप्रवृत्तिरिति व्याख्यानं लं
कासूर्योदयकालरूपं वारप्रवृत्तिबोधकमपास्तं तच्छब्दस्य पूर्वपरामर्शोदर्धरात्रादित्यर्थस्यानुपपत्तेः पंचदशघटिकाकालस्य
क्षपार्धशब्देनासिद्धेश्च श्रीभगवताहर्गणस्य लंकायामर्धरात्रिक इत्यनेन लंकार्धरात्रकालिकत्वोक्तेः॥ स्वदेशे तात्कालरूपवार
प्रवृत्तिकालज्ञानस्योक्तस्य संगत्युपपत्तेर्व्यवहारयोग्यलंकासूर्योदकालवारप्रवृत्तेरत्रे संगत्यभावाच्च॥ ६६॥ ॥ अथग्रह

श्रीः
१५

स्य तात्कालिकीकरणमाह॥ इष्टनाडीगुणा भुक्तिः षष्ट्या भक्त्या कलादिकं॥ गते शोध्यं युतं गम्ये कृत्वा तात्कालिको भवेत्॥ ६७॥ ॥
तत्कालिको ग्रहस्तत्कालात्पूर्वमपरत्राभीष्टकाले या इष्टघट्यस्ताभिर्गुणिता ग्रहमध्यगतिः षष्ट्याभक्त्या फलं कलादिकं गते गताभीष्टका
ले पूर्वकाले भीष्टे सतीत्यर्थः॥ शोध्यं ग्रहे हीनं॥ ग्रहे अग्निमाभीष्टकाले सति ग्रहे युक्तं कृत्वा गणकेन विभाव्यता तात्कालिकः स्वाभीष्टसमयि
को ग्रहः भवेत्॥ गणकेन ज्ञातो भवेत्॥ अत्रोपपत्तिः षष्टिसावनघटीभिर्गतिकलास्तदाभीष्टगतैष्यघटीभिः का इत्यनुपातेनावगतकाला
त्मकचालनेन ग्रहः क्रमेण युतोनस्तात्कालिको ग्रहो भवति॥ वक्रे शोधितपातस्य विपरीतमिति ज्ञेयं॥ चालितस्पष्टग्रहापेक्षया चालि
तमध्यग्रहः स्पष्टः कुतश्चेत्सूक्ष्मः इति सूचनार्थमत्र ग्रहचालनमुक्तं॥ ६७॥ ॥ अथचंद्रस्य परमविक्षेपज्ञानमाह॥ भचक्रलि
प्ताशीत्यंशः परमं दक्षिणोत्तरं॥ विक्षिप्यते स्वपातेन स्वक्रांत्यंतादनुष्णगुः॥ ६८॥ ॥ अनुष्णगुश्चंद्रः स्वक्रांत्यंतात्॥ विषुव
द्वृत्तानुसारेण वलंबितश्चंद्रः स्वासन्नक्रांतिवृत्तप्रदेशो नाकृष्यते॥ तथात्यासन्नस्वभोगमितरेखासन्नाद्यावधिकाभीष्टस्थान
स्थतक्रांतिप्रवृत्तप्रदेशाद्पि स्वपातेन चंद्रपातेन दक्षिणोत्तरं दक्षिणस्यामुत्तरस्यां वा तत्सूत्रेणा विक्षिप्यते त्यज्यते॥ स्वभोगस्थाने
क्रांतिवृत्तप्रदेशो चंद्रबिंबस्थानं पातेन दीयते॥ ततो पि चंद्रबिंबस्थक्रांतेर दक्षिणोत्तरसूत्रेण किंचिदंतरेण त्यज्यते इत्यर्थः॥ एतेनैत
र्थस्य पाताभावात्स्वभोगस्थानीयक्रांतिवृत्तप्रदेशो बिंबं भवति॥ न विक्षिप्तमित्यनुष्णगुरित्यनेनापि सूचितं॥ परमं विक्षेपं दक्षिणो
त्तरमित्यस्य विशेषेनाह॥ भचक्रेति॥ द्वादशराशिकलानां षट्कला चालाधिकैकविंशतिसहस्रमितानां २१६०० मशीतिभागः
खसप्तयमकलामितः परमं यस्य तद् दक्षिणोत्तरमित्यर्थः॥ चंद्रस्य परमो विक्षेपो खभ इति फलितं॥ केचित्त्र सूर्यस्य शाभावा
त् तत्कक्षातो भचक्रस्य पंचमकक्षात्वात्ततोपि चंद्रकक्षायाः अष्टमत्वात्तत्र दक्षिणोत्तररूपदिग्द्वये चंद्रस्य परमविक्षेपणा पंचा
ष्टद्विघातरूपाशीत्यंशो भचक्रलिप्तानां परमचंद्रविक्षेप इत्युपपत्तिमाहुः॥ ६८॥ ॥ अथैवं भौमादयोपि स्वपातैर्विक्षिप्यं

141
1941

सू०टी०
१६

तेऽल्पेषामपि परमविक्षेपानाह॥ नखवांशा द्विगुणितं जीवस्त्रिगुणितं कुजः॥ बुधशुक्रार्कजाः पातैर्विक्षिप्यंते चतुर्गुणमिति॥६९॥
नखांशाः तस्य चंद्रपरमविक्षेपस्य नवमभागः। त्रिंशत्तं द्विगुणितं त्रिंशत्तं नवतिकलामितपरमांतरेण विक्षिप्यते॥ चतुर्गुणं त्रिंशत्तं
त्रिंशत्याधिकशतंकलामितपरमांतरेण विक्षिप्यते॥ चतुर्गुणं त्रिंशत्तं विंशत्याधिकशतकलामितपरमांतरेण बुधशुक्रशनैश्चराः
स्वस्वपातैः प्रत्येकं विक्षिप्यंते॥ स्वभोगक्रांतिप्रदेशात्यज्यंते॥ केचित्तु चापि त्र्यस्त्रिंशत्कलाविंबाच्चंद्रनवांशाद्द्विगुणेन सत्र्यं
शकलासमकस्य गुरुविंबस्य तद्रूपं विक्षेपणं युक्तमस्माद्भौमस्याधःस्थत्वात्त्रिगुणं परमविक्षेपणमस्माद्बुधशुक्रयोर्लघुपृथविंब
योरधःस्थत्वाच्चतुर्गुणं परमविक्षेपणं तुल्यं नात्याधिकं॥ एवं शनेरुच्चकक्षास्थत्वेपि मंदत्वाद्बुधशुक्रविक्षेपणं तुल्यं परमविक्षेपणं यु
क्तमित्युपपत्तिमाहुः॥ ६९॥ ॥ नन्वेषामत्र कथने का संगतिरित्यत उक्तमुपसंहरन्नाह॥ एवं त्रिघनरंध्रार्करसार्कार्कदशाह
ताः॥ चंद्रादीनां क्रमादुक्ता मध्या विक्षेपलिप्तिकाः इति॥७०॥ ॥ एवं पूर्वश्लोकाभ्यां त्रिघनः सप्तविंशतिः रंध्राणि नव॥ द्वादश॥
षट्॥ द्वादश॥ द्वादश॥ एते दशगुणिताः क्रमादुक्तांकक्रमात्॥ चंद्रादीनां वारक्रमात् चंद्रभौमबुधगुरुशुक्रशनीनां विक्षेपकलाः
मध्याः अपि परमशरकलानामनियतत्वेनोक्ताः कथिताः तथा च मध्यत्वेनैषामत्र प्रसंगसंगत्या कथनमिति भावः॥ ७०॥ अथ पू
र्वापरग्रंथयोरसंगतिनिवारणायाधिकारसमाप्तिफक्किकयाह॥ ॥इतीश्रीसूर्यसिद्धांते मध्यमाधिकार इति मयं प्रति सूर्यां
शपुरुषेण सूर्योक्तस्यैव कथनादेतदुक्तस्यापि सूर्यसिद्धांतत्वं॥ तत्र मध्यममानेन गणितमाधिक्रियते यस्मिन्नेतादृशो यं ग्रंथैक
देशः परिच्छिन्निमाप इत्यर्थः॥ ॥ रंगनाथेन रचिते सूर्यसिद्धांतटिप्पणे॥ मध्याधिकारः पूर्णोयं तद्गूढार्थप्रकाशके॥१॥ ॥
इति श्रीसकलगणकसार्वभौमबल्लालदैवज्ञात्मजरंगनाथगणकविरचिते गूढार्थप्रकाशके मध्याधिकारः पूर्णः॥ ॥अथ
स्पष्टाधिकारो व्याख्यायते॥ तत्र ग्रहाणां मध्यमातिरिक्तस्पष्टक्रियायां कारणमाह॥ अदृश्यरूपाः कालस्य मूर्तयो भगणाश्रिताः श्रीः १६

143
194

शीघ्रोच्चमंदपाताख्या ग्रहाणां गतिहेतवः॥१॥ ॥शीघ्रोच्चमंदोच्चपातसंज्ञकाः पूर्वोक्तपदार्थाः जीवविशेषाः सूर्यादिग्रहाणां गति
कारणभूताः संति॥ ननु कालेनैव ग्रहचलनं भवतीति कालो गतिहेतुर्नैते इत्यत आह॥ कालस्येति॥ पूर्वप्रतिपादितकालस्य स्वरूपाणि
तथा चैषां कालमूर्तित्वेन ग्रहगतिहेतुत्वं नासंभवतीति भावः॥ ननु कालस्य घस्रादिमूर्तित्वादेषां तदात्मकत्वाभावात्कथं कालमूर्तित्व
मित्यत आह॥ भगणाश्रिता इति॥ भगोलस्थक्रांतिवृत्तानुसृतग्रहगोलस्थक्रांतिवृत्तप्रदेशाश्रिताराश्यात्मकादूरित्यर्थः॥ तथा च ग्रह
राश्यादिभोगानां कालवशेनैव संपन्नत्वात्तदात्मकानां कालमूर्तित्वमिति भावः॥ ननु दृश्यं तत्कुतो नेत्यत आह अदृश्यरूपा इति वायवी
यशरीरा अव्यक्तरूपत्वादप्रत्यक्षा इति भावः॥ एवं च ग्रहाणामुच्चादिसद्भावात्स्पष्टक्रियोत्पन्नेति तात्पर्यं॥ १॥ ॥ अथानयोरुच्चपा
तयोर्मध्ये उच्चयोर्गतिहेतुत्वं प्रतिपादयति॥ तद्वारश्मिभिर्बद्धास्ते सव्येतरपाणिभिः॥ प्राक्पश्चादपकृष्यंते यथासन्नं स्वदिङ्मुखं
॥२॥ ॥ तेषामुच्चसंज्ञकजीवानां वायुरूपा ये रज्जवस्ताभिर्बद्धाः विंबात्मकग्रहाः तैः उच्चसंज्ञकजीवैः सव्यवामहस्तैः उच्चबद्धत्वे
न हस्तबाहुल्यादङ्कुवचनं हस्ताभ्यामित्यर्थः॥ स्वादिङ्मुखं स्वाभिमुखं यथा आसन्नं ग्रहविंबं भवति॥ तथा प्राक्पश्चात्पूर्वपश्चि
ममार्गाभ्यामित्यर्थः॥ अपकृष्यते अयमभिप्रायः॥ भचक्रगोलस्थक्रांतिवृत्तानुसृतग्रहाकाशगोलांतर्गतक्रांतिवृत्ते कक्षारूपे स्वस्व
प्रदेशीयशीघ्रपाताः स्तिष्ठंति॥ तत्र विंबव्यासो नकक्षाकारस्तत्र प्रवहवायुव्यतिरिक्तवायुरूपं स्वतो गतिस्वरूपेनैकं पतनं ग्रहविंबव्या
सेन पूर्वापरप्रोतगुजीवहस्तद्वयांतर्गतमस्ति॥ अथ ग्रहविंबमुच्चस्थानात्पूर्वस्मिन्स्वशक्त्या गच्छदपि वामहस्तास्थितरज्ज्वा तेनोच्चस्थाना
त्पूर्वरूपेण ग्रहस्थानात्पश्चिमरूपेण वहत्स्वशाखा यवात्मकेन स्वस्थानात्पश्चात्स्वाभिमुखमपकृष्यते निरंतरमुच्चदेवतेः स्वशक्त्याया
वत्तद्भांतरं तयोरंतरं तन्मार्गेणाकर्षणासंभवात् पूर्वस्मिन्गच्छमानं ग्रहविंबस्य वहत्स्थितरज्ज्वा तेनोच्चस्थानात्पश्चिमरूपेण ग्रह
स्थानात्पूर्वरूपेण वहत्स्वशाखा यवात्मकेन स्वस्थानात्पूर्वस्मिन्स्वाभिमुखमाकृष्यते स्वशक्त्या निरंतरं यावदंतराभावस्तयोरिति॥
॥२॥ ॥अथातएवैकरूपां पूर्वाधिकारावगतां गतिं त्यक्त्वा प्रत्यहं विलक्षणां गतिं प्राप्ता ग्रहा इत्याह॥ प्रवहाख्यो मरुत्तांस्तु स्वोच्चा

सू० टी०
१०

भिमुखमीरयेत्॥ पूर्वापरापकृष्टास्ते गतिं यान्ति पृथग्विधाम्॥ २॥ ॥ प्रवहाख्यः प्रवहसंज्ञकः मरुद्वायुः पश्चिमाभिमुखभ्रमः तान्ग्र
हान् तुकारादुच्चानि स्वोच्चाभिमुखं स्वस्य प्रवहभ्रमेणोच्चगमनदर्शनात् तत्संमुखं प्रेरयेदिशायां नयतीति तात्पर्यार्थः॥ अतः कारणात्ते ग्र
हाः पूर्वापरापकृष्टाः उच्चदेवतैः पूर्वपश्चिमदिशोराकृष्टाः पृथग्विधां प्रथमावगतैकरूपभिन्नप्रकारावगतां प्रतिक्षणविलक्षणां ग
तिं गमनक्रियां यान्ति प्राप्नुवन्ति॥ अवलंबनाकर्षणाभ्यां प्रतिदिनं ग्रहाणां गतेरन्यादृशत्वं तदनुसारेण ग्रहचारज्ञानं युक्तमिति ग्रहणां
स्पष्टक्रियोपपन्नेति भावः॥ यद्वा ननु वायुरज्जुभिः कथं ग्रहाणामाकर्षणं संभवति॥ तद्रज्जूनां विरलतया घनीभूतत्वाभावेनाकर्ष
णायोग्यत्वादित्यत आह॥ प्रवहाख्य इति॥ उच्चदेवताहस्तद्वयस्थितकक्षाकाररज्जुवायुः प्रवहवायुसंबंधात् प्रवहसंज्ञेन पश्चिमाभि
मुखभ्रमप्रवहात्मकः॥ तान्ग्रहान् स्वोच्चाभिमुखं स्वोच्चदेवतास्थमसंमुखं ईरयेत् प्रेरयेत् प्रेरयन्ति॥ तुकारादुच्चस्थानात् पूर्वस्मिन्
ग्रहे वायुः पश्चिमगत्या ग्रहं चालयति॥ पश्चिमस्थे वायुः पूर्वगत्या ग्रहं चालयतीत्यर्थः॥ तथा च कक्षाकाररज्जुत्वं तदा तदा तथा भ्रम
तीति दैवतैराकृष्यन्त इत्युपचारादुच्यत इति भावः॥ अथ तत एव ग्रहाणां स्पष्टक्रियोपपन्नेत्याह॥ पूर्वापरापकृष्टा इति उच्चदेवतैः पू
र्वापरदिशायोराकृष्टा ग्रहाः पृथग्विधां मध्यमातिरिक्तप्रकारां गतिं गमनक्रियां यान्ति अतो न केवलं मध्यक्रियया निर्वाहः॥ ३॥
अथ प्राक्पश्चादपकृष्यन्त इत्युक्तं तद्विशदयति॥ ग्रहात्प्राग्भगणार्धस्थः प्राङ्मुखं कर्षति ग्रहम्॥ उच्चसंज्ञोऽपरार्धस्थस्तद्वत्पश्चा
न्मुखं ग्रहम्॥ ४॥ ॥ ग्रहस्थानात्पूर्वभागस्थराशिषट्कस्थितः उच्चसंज्ञो जीवः ग्रहबिंबं पूर्वदिगभिमुखं स्वाभिमुखं कर्षतीति॥ अपरार्ध
स्थः ग्रहस्थानात्पश्चिमभागस्थराशिषट्कस्थितउच्चसंज्ञो जीव इत्यर्थः॥ ग्रहबिंबं पश्चान्मुखं पश्चिमदिगभिमुखं स्वाभिमुखं तद्व
त् आकर्षतीत्यर्थः॥ ४॥ ॥ अथ पूर्वोक्तसिद्धं फलितमाह॥ स्वोच्चापकृष्टा भगणैः प्राग्यहं यान्ति यद्ग्रहाः॥ तत्तेषु धनमित्युक्त
मृणं पश्चान्मुखेषु तु॥ ५॥ ॥ स्वोच्चजीवाकर्षिताः ग्रहाः पूर्वाभिमुखं भगणैः राशिभिः भगोलस्थक्रान्तिवृत्तानुसरणस्थाकाशगो पं० ११
लान्तर्गतक्रान्तिवृत्ते द्वादशराश्यात्मके अंकिते यद्राशिविभागैरित्यर्थः॥ यत्संख्यामितं गच्छन्ति तत्तत्संख्यामितं भागादिकं फलरूपं

145
1941

तेषु पूर्वागतग्रहराश्यादिभोगेषु धनं योज्यं॥ पश्चान्मुखेषु पश्चिमाकर्षितग्रहपूर्वागतराश्यादिभोगेषु धनं योज्यं॥ तुकाराद्यत्संख्या
मितं फलरूपं पश्चिमगतो गच्छति तत्तदित्यर्थः ऋणं हीनमिति एतत्पूर्वैः कथितं॥ ५॥ ॥ अथ पातानां ग्रहविक्षेपरूपगतिहेतुत्वं प्रतिपादय
ति॥ दक्षिणोत्तरतोप्येवं पातो राहुः स्वरंहसा॥ विक्षिपत्येष विक्षेपं चंद्रादीनामपक्रमात्॥ ६॥ ॥ चंद्रादीनां रविव्यतिरिक्तग्रहाणां अपक्र
मात् क्रांतिवृत्तस्थस्पष्टग्रहभोगस्थानात् दक्षिणोत्तरतः दक्षिणस्यामुत्तरस्यां वा दिशि अपिशब्दः पूर्वापराभ्यां समुच्चयार्थकः एषः
गणितागतपातः पातराश्यादिभोगस्थानं अत्राप्यपिशब्दः उच्चेन समुच्चयार्थकोन्वेति॥ एवं उच्चेन पूर्वापरयोः फलान्तरं भवतीति
थेत्यर्थः विक्षेपणं स्वरंहसा आत्मवेगेन विक्षिपति करोति॥ विशिष्टवाचकानां पदानां विशेषणवाचकपदसमवधाने विशेष्यमात्रा
र्थकत्वात्॥ चंद्रादीन्विक्षिपतीति तात्पर्यार्थः॥ ननु उच्चेन स्वाधिष्ठितजीवद्वारा ग्रहाकर्षणं क्रियते॥ तथा पातेनाचेतनत्वाद्भाग
वेन ग्रहविक्षेपणं कर्तुमशक्यमित्यत आह॥ राहुरिति॥ पातस्थानाधिष्ठात्री देवता राहुजीवविशेषः॥ चंद्रपातस्तु दैत्यविशेषो राहुः
रहतीत्यजति ग्रहमिति राहुरिति व्युत्पत्तेः॥ ६॥ ॥ अथैतद्विशदयति॥ उत्तराभिमुखं पातो विक्षिपत्यपरार्धगः॥ ग्रहं प्राग्भगणार्ध
स्थो याम्यायामपकर्षति॥ ७॥ ॥ अपरार्धगः ग्रहस्थानात्पश्चिमविभागस्थितभगणोत्तमार्धो राशिषट्कस्थितो राहुः ग्रहबिंबं स्वराश्या
दिभोगस्थानीयप्रदेशात्॥ उत्तरदिगभिमुखं विक्षिपति विक्षेपान्तरेण त्यजति॥ प्राग्भगणार्धस्थः ग्रहस्थानात्पूर्वविभागस्थितराशि
षट्कमध्यस्थितः दक्षिणस्यां दिशि अपकर्षति विक्षिपति॥ ७॥ ॥ अथ बुधशुक्रयोर्विशेषमाह॥ बुधभार्गवयोः शीघ्रात्तद्वत्पा
तो यदा स्थितः॥ तच्छीघ्राकर्षणात्तौ तु विक्षिप्येते यथोक्तवत्॥ ८॥ ॥ बुधशुक्रयोः शीघ्रोच्चात् जात्यभिप्रायेणैकवचनं॥ तथा च
तदुच्चाभ्यां तादृशावस्थितपातौ तदुच्चतो वा दक्षिणोत्तरयोस्त्यजत इति पूर्वोक्तरीत्या न्यायसिद्धमतस्तदुच्चस्थत्वबलाद्बुधशुक्र
योस्तथा विक्षेपणं न्यायसिद्धमेवेति भावः॥ ननु भौमगुरुशनीनां एवं कथं नोक्तमनयोर्वा कथमेतदुक्तं सर्वेषामेकरीतिकथनस्य
समुचितत्वात्॥ किं च भौमगुरुशनीनामुच्चदेवतास्वकक्षास्थ इति फलमुपपन्नं भवति॥ बुधशुक्रयोरुच्चदेवतयोः कक्षातो दक्षि

सू०टी०
१८

णोत्तरयोः स्थितत्वेनप्रवेशीकरीत्याफलानुपपत्तिः विलक्षणप्रवहवायुसत्त्वस्य देवतासंबंधस्य स्वरूपपरिध्याकारत्वेन कक्षाकारत्वाभा
वात्॥ विनाकक्षाकारतांफलोत्पादनस्यप्रश्नाकपत्वाच्च॥ नचविलक्षणप्रवहवायुसत्त्वंदेवतासंबंधंयदाकाशगोलेकक्षाकारत्वाभा
वेपिकभानुत्वंस्थानांतरेइतिफलोत्पत्तियोग्योत्तरोत्तरसत्त्वेनापिकल्पनयेतिवाच्यं॥ उच्चदेवतास्थानस्थकक्षातोदक्षिणत्वेतस्य
दूरांतरप्रदेशस्योत्तरत्वावश्यंभावेनोच्चबुधशुक्रयोरेकदिग्विक्षेपतुल्यनियमानुपपत्तेः॥ तत्कथमिदंसंगतंभवदुक्तमितिचेत्अ
त्रोच्यते॥ स्वरूपासंगीकृत्यतद्दूषणोद्घाटनेनभवदुपालंभनकर्तुरसनाछेदस्तत्तत्वार्थप्रकाशेनावश्यंकरणीयस्तथाहि॥ स्वशी
घ्रोच्चाद्बुधशुक्रयोः यदंतरंराश्यात्मकंतद्वशात्॥ तेनांतरेणयुक्ताः॥ स्वानीतपातइत्यर्थः॥ यथाबुधशुक्रयोरपरपूर्वाधक्रमेणआ
स्थितोवस्थितःतुकारात्तथेत्यर्थः॥ तच्छीघ्राकर्षणात्तादृशपाताभ्यांशीघ्रवेगेनाकर्षणंतस्मात्तास्थानाधिष्ठातृदेवताभ्यांस्वहस्त
स्थितग्रहसंबंधवायुसत्त्वस्यातिवेगाकर्षणरचनादित्यर्थः॥ तौबुधशुक्रौउक्तवत्उत्तरदक्षिणक्रमेणविक्षिप्यते॥ तथाचसर्वग्र
हसाधारणविक्षेपकथनंपातभेददर्शनार्थंबुधशुक्रयोः पृथगुक्तं॥ नत्वस्मिन्न थैउच्चयोर्विक्षेपणंप्रतीयते॥ येनप्रागुक्तसर्ववि
लोपत्राकनंशाकनीयं॥ पातभेदोक्तिकारणंचयेवात्रपातभगणाः कथिताश्चभ्यंस्वेशीघ्रकेंद्रभगणेरधिकास्य
त्तःस्युः॥ स्वल्पाः सुखाश्रमुदिताश्चलकेंद्रयुक्तोपातौतयोः पठितश्चक्रपातौविधेयाविनिभास्कराचार्योक्तमितिदिक्॥ ८॥ ॥
स्यादेतत्परमुच्चदेवतयोरविशेषत्सूर्यचंद्रयोः समंफलंकुतोनभवतीत्यत आह॥ महत्त्वान्मंडलःस्यार्कः स्वल्पमेवापकृष्यते॥ मंड
लाल्पतयाचंद्रस्ततोबह्वपकृष्यते॥ ९॥ ॥ सूर्यःमंडलस्यबिंबस्यमहत्वात्गुरुत्ववत्त्वात् स्वल्पमितरग्रहापेक्षयाअल्पंपरम
फलं॥ एवकारोनिर्धारणे॥ अपकृष्यतेउच्चजीवेनाकृते॥ चंद्रःमंडलाल्पतयाबिंबस्यलघुत्वेन॥ ततःसूर्यफलात्बह्वधिकंप
रमंफलमुच्चजीवेनाकृते॥ ९॥ ॥ अथातएवभौमादीनामल्पमूर्तित्वादाभ्यांफलाधिकत्वंसंभवतीत्याह॥ भौमाद्योल्पमू
र्तित्वाच्छीघ्रमंदोच्चसंज्ञकैः॥ दैवतैरपकृष्यंतेसुदूरमतिवेगिताः॥ १०॥ ॥ भौदमाद्याः पंचग्रहाः अतएवातिवेगिताः अत्यंतवेग

श्रीः
१८

147
1941

संजातायेषांते॥ बिंबलघुत्वेनोच्चद्वयाकर्षणेनबहुपरमफलाइत्यर्थः॥ ननुसूर्यचंद्रयोः कक्षाकारविलक्षणप्रवहवायुचलत्वेनफलोत्पादनंयुक्तं
भौमादीनांतुप्रत्येकमुच्चसद्भावादाचार्यरश्म्याकर्षणासंभवेनकक्षाकारप्रवहविलक्षणवायुचलनेनफलोत्पादनार्थमंगीकृतंकथंसंभवति॥
उच्चद्वयस्थानस्यैकत्वाभावात्॥ नह्येकमेववायुमंडलंयुगपद्विरुद्धगत्योराश्रयंस्वतोभवितुमर्हतीतिचेन्न॥ भौमादीनांशीघ्रमंदोच्चदेव
ताद्वयेनतत्कक्षामार्गेणग्रहबिंबकर्षस्यैवस्वशास्त्रवचनात्नवायुमंडलचलनकल्पनंसूर्यचंद्रयोरप्येवमेवांगीकारेबाधकाभावाच्च॥ वायुमं
डलकल्पनंतुतद्वारश्मीत्युक्तानुपपत्त्यनभिप्रयोजनं॥ तद्वारश्मिभिर्बद्धावृत्तस्यपश्चिमभ्रमात्मकप्रवहवायोस्वस्वाकाशगोलेसमस्तत्रसं
बंधनाश्चितादूतिग्रहस्थितिसरूपीत्यासमर्थनात्॥ नहितदत्रहेतुगर्भत्वेनानुपपत्तिः शंकनीया॥ उक्तदेवताकल्पनेनाकाशस्थग्रहाणांतथा
तथास्वशास्त्रात्तदाकर्षणात्फलद्वयसंस्काररूपैकफलोत्पादनसंगच्छते॥ अतएवस्वतंत्रग्रहबिंबभ्रांतकक्षाकारमितिकल्पनमितिनिरस्तं॥
उच्चद्वयतुल्यकर्षणोनाविरुद्धकर्षणोनचसत्वमंगलभंगापत्तेरिति॥ १०॥ ॥ अथैतदुपसंहरति॥ अतोधनर्णंसुमहत्तेषांगतिवशाद्भवे
त्॥ आकृष्यमाणास्तैरेवंव्योम्नियांत्यानिलाहताः॥ ११॥ ॥ अतः पूर्वोक्तसुदूराकर्षणप्रतिपादनात्तेषांभौमादीनांगतिवशात्आक
र्षणात्पन्नचलनवशात् सुमहत् अत्यधिकंफलंधनर्णंस्वोच्चापकृष्टत्वादिनाभवति॥ नत्वाकर्षणोत्पन्नचलनंकथंनप्रत्यक्षमित्य
तआह॥ आकृष्यमाणाइति॥ तैरुच्चपातैर्देवतैः एवमुक्तप्रकारेणआकृष्यमाणाः आकर्षिताः एतेभौमादयः व्योम्निस्वस्वाकाशगोले
अनिलाहाहताः पश्चिमाभिमुखाः नवरतप्रवहवाय्वाहताः यांतिगच्छंति॥ तथाचावलंबनोत्पन्नपूर्वगतिर्यथानप्रत्यक्षा॥ तथापूर्व
गतिविरुद्धात्मकमंतदाकर्षणचलनमानियतंप्रवहवायुभ्रमणशालत्वादप्रत्यक्षमितिभावः॥ ११॥ अथैवंगतिकारणाचंसर्वग्र
हाणांभौमादीनांतैकागतिरष्टभेदात्मकेनाह॥ वक्रानुवक्राकुटिलामंदामंदतरासमा॥ तथाशीघ्रतराशीघ्राग्रहाणामष्टधागतिः
॥ १२॥ ॥ भौमादिग्रहाणांअष्टप्रकारागतिः कलिता॥ नत्ववक्रेत्यादिनसमेत्यंतंषट्प्रकारागतिः॥ तत्रातिशीघ्राशीघ्रास्यामंदामं
दतरासमाः॥ ऋज्वीपंचविधाज्ञेयायावक्रासानुवक्रगाः॥ शीघ्रतराशीघ्रेतिगतिद्वयं॥ तथानुच्चयं॥ आसांस्वरूपज्ञानमग्रेस्फुटं॥

स०टी० १९

१२॥ ॥अथैतामष्टधागतिभेदद्वयेन कोडयति॥ तत्रातिशीघ्रेत्यादिसमेत्यंताइत्येवंपंचधागतिः ऋज्वीमार्गीगतिःज्ञेया॥ यासावक्रा
सानुवक्रेगेति॥ तथाष्टविधगतिषु अतिशीघ्रेत्यादि॥ समेत्यंताः इत्येवंपंचधागतिः॥ अनुवक्रगमनेनसह वर्तमाना॥ पूर्वश्लोकेनुवक्रग
नेवंक्राकुटिलमध्याभिधानाउभयथासन्नेत्या वक्रानुवक्राकुटिलाइतिगतिर्वक्राज्ञेया॥ तथा च ग्रहाणांमार्गवक्रेतिगतिद्वयं॥१३॥
अथग्रहाणांस्पष्टक्रियांप्रतिजानीते॥ तत्तद्गतिवशान्नित्यंयथादृक्तुल्यतांग्रहाः॥ प्रयांतितत्प्रवक्ष्यामिस्फुटीकरणमादरात्॥ ॥
१४॥ ॥ नित्यंप्रत्यहं॥ तत्तद्गतिवशात्॥ तास्वाद्गतयएकस्मिन्दिनेशीघ्रापरदिनेतिशीघ्रेत्यादिनापस्मिन्दिनेयागतिस्तत्संबंधा
दित्यर्थः॥ ग्रहाः सर्वोदयः॥ यथायेनप्रकारेणदृक्तुल्यतांवेधितग्रहसमतांगच्छंति॥ तत्ताद्वशांस्फुटीकरणंस्पष्टक्रियांगणितप्रकारंस्फु
आदरात्॥ अत्यंताभिनिवेशात् एतेनासंगतत्वनिरासः॥ प्रवक्ष्यामिसूक्ष्मत्वेनकथयामि॥ १४॥ ॥अथतत्रप्रथमंज्यासाधनार्थ
ज्यापिंडानिवक्ष्यत्तदानयनंश्लोकाभ्यामाह॥ राशिलिप्ताष्टमोभागः प्रथमंज्यार्धमुच्यते॥ तत्तद्विभक्तलब्धोनमिश्रितंतद्वितीयकं॥
१५॥ ॥ आद्येनैवंक्रमात्पिंडान्भक्त्वालब्धोनसंयुता॥ खंडकाःस्युश्चतुर्विंशज्ज्यार्धपिंडाः क्रमादमी॥१६॥ ॥एकराशिकला
नामष्टाद्यात्तानामष्टमोंशस्तत्वाश्विमितःप्रथममाद्यंज्यार्धंसंपूर्णजीवार्धपिंडकःकथ्यते॥ तदभिन्नैः ततःप्रथमज्यार्धात्
तेनप्रथमज्यार्धेनभक्तालब्धेनहीनं॥ अन्यस्यासंसंगात्प्रथमज्यार्धेअनेनयुक्तंतत्प्रथमज्यार्धंद्वितीयकंज्यार्धंभवति॥ द्विगुणप्रथ
ममेकोनं॥ तृतीयादीनामानयनप्रकारमतिदिशति॥ आद्येनेति॥ प्रथमज्यार्धपिंडेनएवमुक्तरीत्याक्रमात्॥ सिद्धपिंडा
न्भक्त्वालब्धेनोनमाद्यखंडं अनंतुनैताःखंडकाः असिद्धाव्यवहितसिद्धज्यार्धपिंडाःअसिद्धपिंडाः भवंति॥ यथाप्रथमं
खंडं २२५ प्रथमभक्तफलं १ द्वितीयखंडं ४४९ प्रथमभक्तंफलं २ अर्धाधिकावयवस्यैकाधिकत्वेनग्रहस्यसांप्रदायिकत्वात्फलेक्यो श्री: १९
२नंप्रथमं २२२ अनेनद्वितीयखंडो ४४९ युतस्तृतीयं ६७१ एवमिदंप्रथमखंडभक्तफलं ३५ अनेनपूर्वफलैक्यं ३युतं ६ जातंसर्व
फलैक्यं १।२।३ अनेनप्रथमखंडंहीनं ४२१९ अनेनतृतीयं ६७१ युतंजातंचतुर्थं ८९० एवमिदंप्रथमखंडभक्तफलं ४ पूर्वैक

149
1941

र्धैक्येनप्रथमखंडरूपं २१९ ज्यांतररूपखंडकमनेन ४ हीनं २१५ अनेनचतुर्थंयुतंजातंपंचमं ११०५ एवमग्रेपिअथोक्तरीत्या ३ संख्य
खंडानासंभवात्॥ खंडनियममाह॥ स्युरिति। एवंचतुर्विंशत्संख्याकाः ज्यार्धपिंडाः कार्याः॥ ननु अधिकाः अत्र एकविंशाद्वाविंशा
पञ्चाशत्स्वदशादपि॥ सममाददशासपदशानुराधोनरंतमेमितिभ्रत्यसिद्धांतोक्तखले धिकावयवस्यैकाधिकत्वेनग्रहइतिध्येयं॥
गणितस्याविरुतत्वात्सिद्धाः॥ पिंडाःकथंनोक्ताइत्यत आह॥ क्रमादिति॥ सिद्धाः पिंडाः क्रमात्समनंतरमेवोच्यतेअत्रोपपत्तिः॥ स
मायांभूमौवृत्तंभगणकलांकितंतिर्यगूर्ध्वाधरव्याससमिलरेखाभ्यांचतुर्भागंकार्यं॥ तत्रोर्ध्वरेखासक्तपरिधिप्रदेशादुभयत्रसमंयत्रसम
विभागंविगणव्यतदग्रयोर्बध्वसत्रंवृत्तेद्विगुणविभागमितसंपूर्णचापस्यसंपूर्णज्या अत्रगणितेऊर्ध्वरेखातोर्धज्ययाएवप्रयोजनात्तदर्ध
चापस्यतदर्धंमर्धज्याएवंवृत्तचतुर्थांशाऊर्ध्वरेखातोभीष्टांशानांचापार्धकारणामर्धज्या अभीष्टाः गण्याः तत्रभगवतास्वेच्छयावृत्तच
तुर्थांशेत्रिराशिमितेचतुर्विंज्याः शकल्पिताः॥ तद्गीनंवृत्तेचक्रकलानांमांकितत्वात्तत्परिधिव्यासार्धेत्रिराशिज्यांतिमाः भनंदाग्नि
मितपरिधौखबाणसूर्यैमितोव्यासस्तदाचक्रकलापरिधौकइत्यनुपातेनव्यासानयनं॥ यथा० चक्रकला: २१६०० खबाणसूर्य
गुणा: २१०००००० भनंदाग्निभक्तःव्यासः ६८७६ एतदर्धंमंतिमाज्या ३४३८ अथवृत्तेचापज्ययोविवेकेतयोरतुल्यत्वमपिभ
गवताकोपितत्भागः समोस्त्यन्यथामलकादौसर्षपाद्यवस्थानंनस्यादितिमत्वाल्पभागस्यज्यानतुल्यैवेतिवृत्तस्यपणवत्यंशोदंडवद्
ऋजुत्वेनतु सद्गतिसाक्त्योक्तेः प्रथमोज्याचक्रकलादशदशांशरूपैकराशिकलानामष्टभागस्तत्वाश्विमितः॥ एतन्मितेमेवप्रथमचापमतए
तदंतरेणाभीष्टाज्याश्चतुर्विंशत्॥ अथचतुर्विंशतिजीवानांयथोक्तनदभुपपत्त्यानदंतररूपखंडानांयथोक्तरमपचयस्यवृत्तेज्यांकृते
नप्रत्यक्षत्वात् ज्यांतररूपखंडानामंतरंयथोत्तरमुपचितमितिद्वाविंशतिचतुर्विंशतिज्यानामंतरयोरंतरंभिदंपरमंखंडांतरंसूक्ष्मज्योत
त्तिप्रकारेणावगतं॥ ७५।७६।४८ अतोस्मिन्प्रथमेदंखंडकांतरंतदाप्रथमज्यायाकिमित्यनुपातेनफलप्रमाणयोः फलेनायवर्क्षप्रमा
णस्यानतत्वाश्विनः॥ अनेनभक्ताप्रथमज्याफलंपूर्वद्वितीयखंडयोरंतरं॥ अनेनपूर्वखंडंहीनंद्वितीयखंडंभवति॥ तेचपूर्वखंडंप्रथमा

स०टी०
२०

ज्यातुल्यमेव॰द्वितीयखंडं प्रथमज्यायांयुतंयज्ज्या॰एवमस्यास्तत्वाश्विभागलब्धाद्वितीयजी॰तत्रपूर्वखंडंप्रथमज्यातुल्यमेव॰द्वितीय
खंडंप्रथमज्यायांयुतंद्वितीयज्या॰एवमस्यस्तत्वाश्विभागलब्धंद्वितीयजीतृतीयखंडकयोरंतरं॥अनेनद्वितीयखंडमनंतरतृतीयखंडमि
लनेनद्वितीज्याप्तात्तृतीज्या॰एवंचतुर्थाद्याः॥तत्रपूर्वमधाभ्याधिकग्रहणेनोत्तरत्राधिकांतरयातसंभावनयाकाचित्कचिदर्ल्पाभ्याधि
कावयवस्यैकाधिकत्वेनाग्रहइत्यु पत्रंश्लोकद्वयं॥१६॥ ॥अथैताःसिद्धाः॥श्लोकषट्केनपनुक्रमाज्यार्धपिंडज्ञानमाह॥तत्वाश्विनो
काब्धिकृतास्तर्वमिधरत्तवः॥स्वांकाष्टौपंचशून्येशाबाणरूपगुणेंदवः॥१७॥ ॥शून्यलोचनपंचैकाछिद्ररूपमुनींदवः॥वियच्चं
द्रातिधृतयोगुणरंध्रांबराश्विनः॥१८॥ ॥मुनिषड्यमनेत्राणिचंद्राग्निकृतदस्रकाः॥पंचाष्टविषयाक्षीणिकुंजराश्विनगाश्विनः॥
॥१९॥ ॥रंध्रपंचाष्टकयमावस्वद्यंकयमास्तथा॥कृताष्टशून्यज्वलनानागाद्रिशशिवह्नयः॥२०॥ ॥षट्पंचलोचनगुणाश्चंद्रनेत्राः
ग्निवह्नयः॥यमाद्रिवह्निज्वलनारंध्रशून्यार्णवाग्नयः॥२१॥ ॥रूपाग्निसागरगुणावस्वग्निकृतवह्नयः॥प्रोक्ताक्रमेणव्यासार्धा
दुत्क्रमज्यार्धपिंडकाइति॥२२॥ ॥तथासत्ततत्वैश्वेतानुत्क्रमज्यार्धपिंडान्॰उत्क्रमेण॰उपांत्यपिंडादिप्रथमपिंडांतंप्रत्येक॰व्यासा
र्धात्॥त्रिज्यारूपपरमापिंडप्रोद्य॥न्यूनीकृत्य॰क्रमेण॰उत्क्रमज्यार्धपिंडाःभवंति॥यथात्रयोविंशतिमंज्यार्धमुक्तंरूपाग्निसाग
रगुणाइतिवस्वग्निकृतवह्नयइतिचरमापिंडान्हीनंसत्प्रथमउत्क्रमज्यार्धपिंडः॥एवंद्वाविंशतिमंचरमाद्युक्तंद्वितीयउत्क्रमज्यार्ध
पिंडः एवमग्रेपीतिचतुर्विंशतिउत्क्रमज्यार्धपिंडः॥अत्रोपपत्तिः॥ज्याचापयोर्बाणरूपमंतरमुत्क्रमज्या॰यद्यपिशरोर्धज्याव
द्वारास्यंनसंभवति॥उत्क्रमज्यापिंडाइतिवक्तुमुचितंनोत्क्रमज्यार्धपिंडाइति॥तथापिभगवत्परिभाषार्थंचापबाह्यद्वारायाभा
वेनोत्क्रमज्यायाः पूर्णाद्धारांशत्वादुत्क्रमज्यार्धमित्युक्तंतुज्यार्धं॥अथरततचतुर्थांशेसर्वज्यांकनेनयदंशानांज्यात्रिज्यातोहीनातत्का
यंशानामुत्क्रमज्येतिस्फुटंदृश्यते॥अतउक्तज्यार्धक्रमेणोत्क्रमज्याज्ञानार्थंव्युत्क्रमेणत्रिज्याशुद्धाउक्तपिंडाउत्क्रमज्यापिंडाइत्यु
पपन्नंप्रोद्येत्यादि॥२३॥ ॥अथश्लोकपंचकेनोत्क्रमज्यापिंडान्पूर्वोक्तसिद्धान्विवक्षातिमुनयोरंध्रयमलारसषट्काभुनीश्वराः॥ श्रीः २०

151
1941

षष्टैकारूपषड्दस्रासागरर्थंकृताशनाः॥२३॥ ॥खतुर्वेदानवाद्यर्थादिक्षगास्त्र्यर्थकुंजराः॥नगांबरवियच्चंद्रारूपभूध
रशंकराः॥२४॥ ॥शरार्णवकृतांशैकाभुजंगाक्षिशरेंदवः॥नवरूपमहीध्रैकागजैकांकनिशाकराः॥२५॥ ॥गुणाश्विरू
पनेत्राणिपावकाग्निगुणाश्विनः॥वस्वर्णवार्थयमलास्तुरंगर्तुयमाश्विनः॥२६॥ ॥नवाष्टनवनेत्राणिपावकैकयमाग्नयः
॥गजाग्निसागरगुणाउत्क्रमज्यार्धपिंडकाइति॥एतेउत्क्रमज्यापिंडाःपूर्वसिद्धाःमहीध्रःपूर्वैः॥भुजज्याभावेकोद्युत्क्रमज्या
याःपरमत्वाद्यज्ज्योनात्रिज्यापरमोत्क्रमज्यापिंडः॥त्रिज्ययाउभयत्रपरमत्वेनार्थसिद्धमंत्यपिंडत्वेतिध्येयं॥२७॥ ॥अथप्र
संगात्परमक्रांतिज्यांवक्ष्यमाणानयनमाह॥परमापक्रमज्यातुसप्तरंध्रगुणेंदवः॥तद्गुणाज्यात्रिजीवाप्तात्तच्चापंक्रांतिरुच्यते
इतिस्थूनंचतुर्दशशतं॥१३९७परमक्रांतिज्याःचुकाराच्चतुर्विंशत्यंशानांवक्ष्यमाण॥ज्यानयनप्रकारेनतद्वेःकथ्यते॥अत्रोपपत्तिः
विषुवद्वृत्तक्रांतिवृत्तभागास्ययाम्योत्तरस्यांतरंध्रुवाभिमुखंरेखाकारस्तत्रैक्रांतिः॥तत्रसायनमेषतुलादिस्थानेतयोरंतराभावात्कर्कमक
रादौतयोःपरमांतरत्वादर्भाष्टभुजज्यावशात्क्रांतिरुपपन्नेति॥त्रिज्यातुल्यभुजज्ययापरमक्रांतिश्चातदेष्टभुजज्ययाकेत्यनुपातेनप्र
लंध्रुवाभिमुखंसत्रैतदंतररूपार्धचापास्यार्धज्याविषुवद्वृत्तोर्धाधरमध्यस्थत्वात्॥तच्चापंतदंतरकालात्मिकाक्रांति॥२८॥ ॥अथ
फलानयनार्थंकेंद्रपदाद्भुजकोटिशिंकायाइत्याह॥संशोध्यमंदोच्चात्तथाशीघ्राद्विशोध्यच॥शेषकेंद्रंतदंतस्माद्भुजज्याकोटिरेवचे
ति॥ग्रहंराश्यादिकं॥मंदोच्चात्॥भागानीतस्वकीयराश्यादिकंमंदोच्चभोगात्॥संशोध्य॥न्यूनीकृत्य॰भागानीतराश्यादिशी॰घ्रोच्चा
त्॥चःसमुच्चयेअन्यूनीकृत्यशेषंराश्यात्मकं॥तथाउच्चसंबंधेन॰केंद्रंमंदोच्चाधीनोग्रहमंदकेंद्रंशीघ्रोच्चाधीनोग्रहःशीघ्रकेंद्रंभवती
त्यर्थः॥तस्मात्केंद्रात्सदंराशित्रयात्मकं॥विषमंपदंसमभ्रेयंत्रिराश्यंतर्गतंचे॥प्रथमंविषमंपदं॥ततोनवोनंचतुर्थपदंसममि
त्यर्थः॥अत्रोपपत्तिः॥उच्चस्थानाभिमुखंउच्चंदेवतैर्ग्रहणोकेरुच्चाद्ग्रहः किंपदंतरेणेतिज्ञानार्थमुच्चहीनोग्रहःकेंद्रमुच्चग्रहणव
शात्तदारब्धंतत्रभवेगता स्वेच्छयाग्रहाउच्चयदंतरेणातत्केंद्रंकृतंउभयथाभुजज्योस्तुल्यत्वात्॥द्वादशराश्यंकितेवृत्तेउच्चस्थाना

चतुर्विभागात्मनेएकैकोभागोराशित्रयात्मकःपादसंज्ञः॥अथोच्चस्थानात्ग्रहःकस्मिन्पदेस्तीतिज्ञप्त्यर्थंत्रिपणावेतंकेंद्रंकृतं॰
ज्यानांपदांतर्गतत्वात्॥ग्रहाधिष्ठितपदाद्भुजज्याकोटिज्ययोर्ज्ञानं॥२९॥ ॥ननुपदेग्रहस्यराशिविभागात्मकेतेकत्वाद्भुजको
टिज्ययोस्तुल्ययोःसाधनंकथमित्यतआह॥गताद्भुजज्याविषमेपगम्यात्कोटिःपदेभवेत्॥युग्मेतुगम्याबाहुज्याकोटिज्यातुग
ताद्भवेत्॥विषमेपदेगताभुज्यास्यात्॥गम्याकोटिज्यास्यात्समेगताकोटिज्यास्यात्॥गम्यादित्यर्थःभुजज्यास्यात्॥गम्या
त्॥गतोनंत्रिभं॥ग्रहस्यपदांदितोयहतामधिकमेष्यं॥तस्मात्कोटिःकोटिःस्यात्॥युग्मे॰समे॰तुकारात्पदे॰एष्याभुज
ज्या॰गतोत्कोटिज्यास्यात्॥तुकारोविशेषद्योतकःएकस्मादेवोक्तरीत्य॥द्वयंसाधितमित्यर्थः॥अत्रोपपत्तिःविषमपदेग्र
हो॰धोधरएवांतरानुसारेणाफलमुत्पद्यतेतोऽनंतस्तदंतरमर्धज्याभुजरूपाःतदर्धचापंतदंतराशांशतभागरूपाःग
ताःऊर्ध्वाधररेखामत्स्यसंपन्नातिर्यग्रेखायहयोरंतरस्त्वमर्धज्यापदांतःकोटिज्याःभुजोत्क्रमज्जोनव्यासार्धरेखारूपको
टितुल्यत्वात्॥ततदर्धचापंभुजांशोनंत्रिभमितिगम्यात्कोटिज्या॰समपदेग्रहार्धाधररेखांतरंतिर्यगर्धज्याभुजंज्येति
तदर्धचापंपदेथंतिर्यग्रेखायहांतरंतिर्यगर्धज्याकोटितुल्यत्वात्कोटिस्त्वचापंपदगतमित्युपपन्नंगतादित्यादि॥३०॥ ॥
अथाभीष्टकलानांज्यासाधनंश्लोकाभ्यामाह॥लिप्तास्तत्त्वयमैर्भक्तालब्धज्यापिंडकंगतं॥गतगम्यांतराभ्यस्तंविभजेत्तत्त्व
लोचनैः॥३१॥ ॥तदवाप्तफलंयोज्यंज्यापिंडेगतसंज्ञके॥स्याद्भुजज्याविधिरयमुत्क्रमज्यास्वपिस्मृतइतियस्यराश्या
त्मकस्यपदांतर्गतस्यज्याकर्तुमिष्टातस्यकलाःकार्याःतत्वाश्विभिर्भक्ताः॥लब्धंचतुर्विंशज्यापिंडेषुपूर्वोक्तेषुलब्धसंख्या
कःपिंडोगतोभवति॰तदग्रिमपिंडएष्यः॥पूर्वंतुस्वरूपोक्तार्धपिंडानांज्यार्धेत्युक्तिरिदांनीतुतेषामेवार्धत्यागेनज्यापिंडत्वो
क्तिः॥अर्धग्रहणात्गणितक्रियायांवाकुलातापत्तेः॥ननुपूर्वंपिंडाद्विगुणागणितक्रियायांयाद्यादृत्याशयेनार्धानु
क्तिः॥गौरवात्॥भागेवशिष्टंतत्गतैष्यपिंडयोरंतरेणगुणितंतत्वाश्विभिर्भजेत्॥तस्मात्यदाप्तंकलादिकंफलंतत्॥ श्लो॰ २१

153
1941

गतेज्यापिंडेयुक्तंकार्यं॰भुजज्याअभीष्टांशकलानामर्धज्यारूपाक्रमज्याःभवति॥अयमुक्तःप्रकारउत्क्रमज्यापिंडेषुकथितः॥अभी
ष्टांशकलानामुत्क्रमज्यापिंडैरुक्तविधिनोत्क्रमज्यास्यादित्यर्थः॥अत्रोपपत्तिः॥तत्वाश्विकलाभिरेकाज्यातदाभीष्टकलाभिःकेत्यनु
पातेनगतज्या॰ततस्तत्वाश्विकलाभिर्गतागमज्यांतरंलभ्यतेतदाशेषकलाभिःकिमित्यनुपातागतलब्धेनयुक्ताभीष्टज्या॥
॥३२॥अथज्यातोधनुरानयनमाह॥ज्यांप्रोह्यशेषंतत्वाश्विहतंतद्विवरोद्धृतं॥संख्यातत्वाश्विसंवर्गेसंयोज्यंधनुरुच्यतेइति॥य
स्यधनुकर्तुमिष्टंतस्मिन्शुद्धपूर्वंस्वाज्यापिंडन्यूनीकृत्यःशेषंपंचाकृतिगुणाःतद्विवरोद्धृतं॰तयोःशुद्धाशुद्धपिंडयोरंतरेणभक्तं
फलं॰शुद्धाज्यायनमाततमसंख्यातत्वाश्विनोःसंवर्गेःघाते॰संयोज्यसिद्धंधनुःकथ्यतेःअत्रोपपत्तिः॥ज्यायतमाश्यतितता
यास्वायकलास्तनमसंख्यागुणिततत्वाश्विनः॥ज्यांतरेणतत्वाश्विकलास्तदाशेषज्ययाकाइत्यनुपातागतफलयुताइतिपरीत्येनसु
गमता॥३३॥ ॥अथग्रहाणांमंदपरिध्यंशान्विवक्षुःप्रथमंसूर्यचंद्रयोराहरवेर्मंदपरिध्यंशामनवःशीतगोरदाः॥युग्मांतेविषमां
त्येचनखलिप्ताग्नितास्तयोरिति॥सूर्यस्ययस्मात्कर्षणोत्यत्रपरमफलोपरगमगभरूपपरममंदफलांशानांज्यायफलस्मफलज्याःतत्तु
त्रःतद्राविंशत्॰केंद्रविषमपदांते॰नीचोच्चाभ्यांत्रिभांतरिते॰नकाराद्युत्क्रमंदपरिध्यंशाभवंति॥३४॥ ॥अथभौमादिनामा
स्यात्रिंशातिगुरोश्चयस्त्रिंशत्॥शुक्रस्यद्वादशाःशनेरेकोनपंचाशत्॥पूर्वोक्तमंदपरिध्यंशाइतिवक्ष्यमाणाकुजाजादिना
मितिचान्वेति॥एते॰युग्मपदांतेओजे॰विषमपदांते॰भौमस्यादिसप्तति।बुधस्याष्टाविंशति॰।गुरोर्द्वात्रिंशत्॥शुक्रस्यैका
थाग्निदस्रकाः॥गुणाग्निचंद्राखनगाद्रिरसाक्षीणिगोग्नयइति॥भौमादीनांअतः॥मंदपरिध्यंशकथनानंतरं॰शीघ्राः

स०टी० २२

शीघ्रपरिध्यंशाः युग्मपदांते भौमस्य पंचत्रिंशदधिकं शतद्वयं बुधस्य त्रयस्त्रिंशदधिकं शतं गुरोः सप्ततिः ॥ शुक्रस्याद्विच
त्वारिंशदधिकं शतद्वयं शनेरेकोनचत्वारिंशत् ॥ ३५ ॥ ॥ अथ तेषां विषमपदांते शीघ्रपरिध्यंशानाह ॥ ओजांते द्वित्रियमलाद्रि
विश्वेयमपर्वताः ॥ खर्तुदस्रा वियद्वेदाः शीघ्रकर्मणि कीर्तिताः इति विषमपदांते शीघ्रकर्मणि शीघ्रफलसाधनार्थं परिधय उ
क्ताः ॥ एते शीघ्रपरिधयः ॥ कुजादीनामिति पूर्वोक्तमत्रान्वेति ॥ भौमस्य दंताश्विनः ॥ बुधस्य दंतेंदवः ॥ गुरोर्द्विसप्ततिः ॥ शु
क्रस्य षष्ट्यधिकं शतद्वयं ॥ शनेश्चत्वारिंशत् ॥ अत्र कीर्तिता इत्यनेन युग्मांते फलाभावादेव परिधयः कथं संभवंति ॥ अतो विषम
पदांते परमफलस्य सत्वात् तत्रैव युक्ताः परिधयः ॥ शनिमंदशीघ्रपरिध्योः क्रमेणाधिकन्यूनत्वं च संज्ञान्याघातादयुक्तमित्याश
नाशंकनीयं ॥ आगमप्रामाण्यात् ॥ श्रुतिस्तंत्र प्रमाणं स्याद्युक्तिः कात्र नारदेति ब्रह्मसिद्धांतोक्तेश्चेति सर्वं चतुरं ॥ ३७ ॥ ॥
अथाभीष्टकेंद्रसंबंधेन परिधिभागानयनमाह ॥ ओजयुग्मांतरगुणा भुजज्या त्रिज्ययोद्धृता ॥ युग्मवृत्ते धनर्णं स्याद्दोजादूनाधि
केस्फुटमिति ॥ भुजज्याः परिधिः स्फुरीकर्तुमिष्यते ॥ तत्केंद्रस्य मंदशीघ्रान्यतरस्य भुजज्याः ॥ ओजयुग्मांतरगुणा विषमसमप
दांतीयकेंद्र य विषमपदांतीयपरिधेः सकाशात् ऊनाधिके क्रमेण धनर्णं हीनेयुक्तमधिके हीनं स्फु
टं परिधिमानं स्यात् ॥ अत्रोपपत्तिः ॥ युग्मपदांतीयस्थानपरिधिं विषमपदांतीयपरिधिर्यावतान्यूनाधिकस्तदंतरं विषमपदत्वाद्भुज
ज्ययोपचितमनस्त्रिज्यातुल्यभुजज्ययेदमंतरं तदेष्टभुजज्यया किमिति फलं युग्मपरिधेः ओजपरिधेन्यूनत्वेक्रमेण माधिकत्वे
धर्मेनेति विषमपदपरिधेरधिकन्यूनयुग्मपरिधावृणधनं कृतमित्युपपन्नं ॥ ३८ ॥ ॥ अथ भुजकोटिफलानयनमंदफ
लानयनं चाह ॥ तद्गुणो भुजकोटिज्ये भगणांशविभाजिते ॥ तद्भुजज्याफलधनुर्मांदं लिप्तादिकं फलमिति भुजकोटिज्ये ॥ मंदशी
घ्रान्यतरसंबंधेन केंद्रभुजकोटिज्ये तद्गुणाः स्वीयस्फुटपरिधिना गुणिते ॥ भगणांशैः षष्ट्यधिकशतत्रयेण भक्ते भुजफल
लकोटिफले स्तः ॥ मंदकेंद्रभुजज्येत्यत्र फलस्य धनुः कलादिकं मांदफलं भवति ॥ अत्रोपपत्तिः ॥ कक्षास्थं ग्रहस्थाने स्थितं देवत

शी० २२

155/1941

यास्वहस्तस्थितसूत्रप्रांतं ग्रहबिंबस्याभिमुखकर्षणेन कक्षास्थानात्परमफलज्यांतरितस्थाने आकर्षणसूत्रमार्गरूपतिर्यक्कर्णमार्गेणाक
र्षतं ॥ तेन मध्यग्रहस्थाने येरेखा सक्ता तद्वृत्तप्रदेशरूपोच्चनीचकक्षाप्रदेशाद्दंत्यफलज्याव्यासार्धेनोत्पन्नवृत्ते भगणांशांकिते भमध्यग्र
हस्याग्रे रेखासक्तवृत्तप्रदेशरूपोच्चस्थानात्केंद्रांतरेण कक्षाविपरीतमार्गेण तद्वृत्तपरिधौ ग्रहो भवति ॥ अस्मिन्नीचोच्चवृत्ते तदूर्ध्वरेखाग्र
हयोस्तिर्यगंतरसूत्रं मंदज्याकारं फलं ज्यानुरूपं भुजफलं ॥ तस्मिन्नेव वृत्ते व्यासमितितिर्यग्रेखाग्रहयोरंतरसूत्रं ग्रहमध्यज्याकारं परम
फलज्यानुरूपं कोटिफलं ॥ एतेन कक्षास्थभुजज्याकोटिज्यावद्वृत्तकोटिरूपे इति कक्षास्थभगणांशप्रमाणेनैव भुजज्याकोटिज्यारूपे भु
जकोटी तदा कक्षास्थभागप्रमाणं नुरूपभागुक्तनीचोच्चपरिधिभागैः केंद्रस्यानुपातेन फलवृत्तस्थ भुजत्वकोटीफले ॥ तत्र नीचोच्चपरि
धिवृत्तस्थग्रहभ्रममध्यसूत्रं कर्णरूपं कक्षावृत्ते यत्र लग्नं तत्र स्पष्टो ग्रहभोगः ॥ नीचोच्चवृत्तमध्यस्पष्टग्रहभोगस्थानयोः कक्षावृत्ते परांतरांश
मानं फलं ॥ तदर्धज्यातिर्यक्सूत्रं मध्यग्रहस्थेर्ध्वाधररेखारूपमध्यसूत्रात्स्पष्टग्रहभोगस्थानस्य फलज्या ॥ कर्णाग्रे भुजफलं तदा त्रि
ज्याग्रे मित्येतदनुपातात्प्रगतास्याधार्यं फलं ॥ तत्र मंदफलज्या भुजफलरूपा कर्णानुपाताऽपेक्षया भगवतांगीकृताः ॥ मंदकर्णस्य त्रिज्या
सन्नत्वेन स्वल्पांतरेण त्रिज्यातुल्यत्वेनांगीकारात् ॥ तच्चापं मंदफलं इत्युपपन्नं सर्वमुक्तं ॥ बोधार्थं छेद्यकं न्यास्यं यथा ॥ ३९ ॥ ॥
अथ शीघ्रफलं श्लोकत्रयेणाह ॥ शैघ्र्यं कोटिफलं केंद्रे मकरादौ धनं स्मृतं ॥ संशोध्यं तु त्रिजीवायां कर्क्यादौ कोटिजं फलं ॥ ४० ॥ ॥ तद्दो
र्फलवर्गैक्यान्मूलं कर्णश्चलाभिधः ॥ त्रिज्याभ्यस्तं भुजफलं चलकर्णविभाजितं ॥ ४१ ॥ ॥ लब्धस्य चापं लिप्तादि फलं शैघ्र्यमि
दं स्मृतं ॥ एतदारोकुजादीनां चतुर्थे चैव कर्मणीति शीघ्रसंबंधि ॥ कोटिफलं मकरादिषट्के शीघ्रकेंद्रे कोट्युत्पन्नं फलं त्रिज्यायां यो
ज्यमुक्तं ॥ कर्क्यादिषट्के शीघ्रकेंद्रे कोट्युत्पन्नं फलं त्रिज्यायां हीनं कार्यं ॥ तुर्विशेषे ॥ तेन मंदकर्मण्येतत्क्रियानिरासः कोटिफलसंस्कृत
त्रिज्याभुजफलयोर्वर्गयोर्योगात् ॥ मूलं ॥ सिद्धं ॥ शीघ्रसंबंधिफलं ॥ कथितं ॥ भौमादीनां एतत् ॥ शीघ्रफलं अर्धे ॥ प्रथमे कर्मणि ॥
चतुर्थे कर्मणि च ॥ समुच्चये ॥ कार्यं ॥ एवकाराद्द्वितीयतृतीयकर्मणोर्नेत्यर्थः ॥ अर्थात्तत्र मंदफलं सत्कार्यमिति सिद्धं ॥ अत्रोपप

ति ॥ मंदस्पष्टभोगस्थानीयकक्षावृत्तप्रदेशाद्ग्रहबिंबं शीघ्रोच्चस्थानात्कृतं तत्र बलवाद्ग्रहस्तस्थितसूत्रेण स्वाभिमुखं शीघ्रांत्यफलज्यां
तरेण कर्षति तेन मंदस्पष्टस्थानाच्छीघ्रांत्यफलज्यया वृत्ते भांशांकिते शीघ्रनीचोच्चसंज्ञे शीघ्रवृत्ते स्याच्छीघ्रोच्चस्थानाच्छीघ्रकेंद्रांतरेण कक्षामा
र्गे पराल्येन ग्रहबिंबं भवति ॥ तत्र पूर्ववत्कोटिफलभुजफले कोटिभुजौ ॥ कक्षास्थतिर्यग्रेखातः शीघ्रनीचोच्चवृत्ते तिर्यग्व्याससूत्रा
त्रिज्याकोटिफलयोर्योगो मकरादौ ॥ कर्कादौ कोटिफलेनात्र त्रिज्या शीघ्रनीचोच्चपरिधिस्थग्रहकक्षातिर्यग्रेखयोरंतरं तत्सूत्ररूपा कोटिः ॥
कोटिफलभमध्ययोरंतरं कक्षातिर्यग्रेखांतर्गतं भुजफलतुल्यं भुजः ॥ ग्रहभमध्यसूत्रं तिर्यक्कर्णः कोटिभुजफलयोर्वर्गयोगमूलं ततः
कक्षायां कर्णसूत्रं यत्र लग्नं तत्र स्पष्टो ग्रहभोगः ॥ कक्षामध्यसूत्राद्ग्रहसक्तात्स्पष्टभोगस्थानपर्यंतमर्धज्याकारं सूत्रं शीघ्रफलज्या
शीघ्रकर्णाग्रे भुजफलं तदा त्रिज्याग्रे किमित्यनुपातज्ञाता ॥ अस्याश्चापं मंदस्पष्टग्रहभोगस्थानयोरंतररूपं शीघ्रफलं ॥ अथ शीघ्र
नीचोच्चमध्यज्ञानाय मंदस्पष्टज्ञानमावश्यकं ॥ ततः शीघ्रफलसंस्कारेण स्पष्टज्ञानं ॥ तत्र स्फुटसाधितमंदफलसंस्कृतमध्यग्र
हो मंदस्फुटः सूक्ष्म इति पूर्वं मध्यग्रहस्यासन्नस्फुटत्वसिध्यर्थं फलयोः संस्कारस्य आवश्यकत्वात्प्रथमं मंदफलं शीघ्रफलसं
स्कृतान्मध्यग्रहसाधितं मंदफलापेक्षया सूक्ष्ममिति प्रथमं शीघ्रफलासंस्कृतमध्यग्रहान्मंदफलं शीघ्रफलसंस्कृतमध्यग्रहे सं
स्कार्यं स्फुटासन्नो भवति ॥ ४२ ॥ ॥ ननु सूर्येंद्वोः शीघ्रफलाभावात्कथं स्पष्टत्वं भवतीत्यत स्तदुत्तरं वदन्नेतस्मादाद्येकुजादीनामि
त्यर्थं स्फुटयति ॥ मांदं कर्मैकमर्केंद्वोर्भौमादीनामथोच्यते ॥ शैघ्र्यं मांदं पुनर्मांदं शैघ्र्यं चत्वार्यनुक्रमादिति ॥ सूर्यचंद्रयोर्मांदं कर्मै
कं ॥ तथा दानयोः शीघ्रफलाभावात्केवलेन मंदफलेनैव स्पष्टत्वं ॥ एकमित्यनेन सकृन्मंदफलं साध्यं ॥ मध्यग्रहणेनैव मंदनीचोच्च
मंडलमध्यज्ञानात्कर्मांतरापेक्षेत्युपपत्तिः स्पष्टा । अथानंतरं ॥ भौमादीनां उच्यते ॥ प्रागुक्तं स्फुटतया कथ्यते ॥ तदाह शैघ्र्यमिति ॥
प्रथमतो मध्यमग्रहात्साधितशीघ्रफलं मध्यग्रहे संस्कार्यं मंदस्पष्टो भवति ॥ अस्मादपरिशीघ्रफलं साधितमस्यैव संस्कार्यमेवम
नुक्रमात् ॥ चत्वारि कर्माणि भवंतीति प्रागुक्ततात्पर्यार्थः ॥ ४३ ॥ ॥ अत्रापि विशेषमाह ॥ मध्ये शीघ्रफलस्यार्धं मांदमर्धफलं

था ॥ मध्यग्रहे मंदफलं सकलं शैघ्र्यमेव चेति ॥ मध्यग्रहे स्वसाधितशीघ्रफलस्यार्धं संस्कार्यं ॥ अस्मात्साधितं मंदसंबंधि अर्धफलं ॥
साधितमंदफलस्यार्धमित्यर्थः ॥ तथा यस्मात्साधितं तस्यैव संस्कार्यं शीघ्रफलार्धसंस्कृते संस्कार्यमिति फलितार्थः ॥ अस्मात्सा
धितं मंदफलं संपूर्णं मध्यग्रहे संस्कार्यं मंदस्पष्टो भवत्यस्मात्साधितं शीघ्रफलं संपूर्णं च समुच्चये ॥ तेन मंदस्पष्टे संस्कार्यं ॥ एवकारादुक्त
रीत्या सिद्धो ग्रहः स्पष्टो नान्यथेति ॥ अत्रोपपत्तिः ॥ मंदफलं स्फुटसाधितं वास्तवं स्फुटस्तु मंदफलं ॥ सापेक्षत्वन्योन्याश्रयात्सूक्ष्ममंदफलं
साधनमशक्यमपि भगवता तदासन्नसाधनार्थं मंदस्फुटादेव मंदफलं साधितं मध्यग्रहसाध्यग्रहसाधितं ॥ मंदफलापेक्षयासू
क्ष्मं अर्धस्फुटस्फुटफलद्वयार्धसंस्कृतो मध्यग्रहः अत्रापि मंदफलस्यार्धं शीघ्रफलार्धसंस्कृतात् किंचित्सूक्ष्मत्वार्थं साधितमित्युपप
न्नं मध्ये शीघ्रफलस्येत्यादि ॥ ४४ ॥ ॥ ननु फलयोः संस्कारः कथं कार्य इत्यत आह ॥ अजादिकेंद्रे सर्वेषां शैघ्र्ये मांदे च कर्मणि ॥
धनं ग्रहाणां लिप्तादि तुलादावृणमेव च ॥ सर्वेषां ग्रहाणां ॥ शैघ्र्ये कर्मणि ॥ मांदे कर्मणि चकारः समुच्चये ॥ फलात्मकं फलं ॥ मे
षादिषड्भांतर्गतकेंद्रे तु तत्कार्ये च कार्ये व्यवस्थार्थकः एवकारः फलयोरानयनप्रकारभेदेपि धनर्णराशिभेदव्यवच्छेदार्थकः ॥ अत्रो
पपत्तिः ॥ पूर्वाकर्षण्ये ग्रहस्य फलं धनं ॥ यथा दाकर्षणे ऋणमिति प्रागुक्तं ॥ तत्र ग्रहादुच्चपर्यंतकेंद्रे गृहीतं पूर्वाकर्षणं मेषादिकेंद्रे भ
वति ॥ पश्चादाकर्षणं तुलादिकेंद्रे भवतीति तथोक्तमुपपन्नं ॥ ४५ ॥ ॥ अथ ग्रहाणां भुजांतरफलमाह ॥ अर्कबाहुफलाभ्य
स्ता ग्रहभुक्तिर्विभाजिता ॥ भचक्रकलिकाभिस्तु लिप्ताः कार्या ग्रहेर्कवदिति ॥ स्पष्टास्सूर्यादिग्रहगति सूर्यस्य भुजफलेन कला
त्मकेन गुणिता ॥ द्वादशराशिकलाभिः षट्शतैकविंशतिसहस्रमिताभिर्भक्ताः प्राप्तफलकलाः ग्रहे सूर्यादिग्रहे अर्कवत् ॥
सूर्यमंदफलधनर्णवशादित्यर्थः ॥ कार्यास्तु कारा धनर्णसंस्कार्याः ॥ अत्रोपपत्तिः ॥ अहर्गणस्यैकरूपमध्यममानेन सत्वात्तदुत्प
न्नग्रहाणां मध्यममानेन यदर्धरात्रं तत्सूर्यमितं तात्कालिकं सिद्धं ॥ मध्यममानार्धरात्रे तु मध्यसूर्यमितक्रांतिप्रदेशाद्ध्येयाम्योत्त
रवृत्तं भवति ॥ अस्मात्कालात्स्पष्टार्धरात्रं स्पष्टसूर्यमितक्रांतिवृत्तप्रदेशाद्ध्येयाम्योत्तरवृत्तसंयोगरूपं मंदफलधनर्णक्रमेणानं

152
1941

नरपूर्वकालेभवति॥ एतेनानेनकर्मणास्फुटार्धरात्रकालीनग्रहाः मध्यार्धरात्रेसूर्यस्फुटधराद्यत्राहर्गणोत्पन्नत्वेनसर्वेषामेककालि
कत्वमिष्टमेवेत्यनाबाधितिं॥ तत्रमंदफलकलानांकस्तुएकराशिकलाभिः सायनस्पष्टार्कोकांतरात उदयासवोलभ्यंतेतदामंदफलक
लाभिः केइत्यनुपातेन॥ ततोहोरात्रासुभिर्गतिकलास्तदामंदफलकलासुभिः काइतिफलकलाग्रहेधनर्णमंदफलवच्चाधनर्णका
यादृतिमिष्टं॥ तत्राभिभगवतालोकानुकंपयास्वल्पांतरेणनाक्षत्रदिनेग्रहगतिभोगमंगीकृत्यचक्रकलापरिमितात्मकनाक्षत्राहोरात्रे
णगतिकलास्तदास्वयंमंदफलकलाभ्रमणेनकाइत्यंकानुपाताद्भाघवादीनिनाक्षालवकलाइत्युपपन्नं॥४६॥ ॥ अथस्पष्टग
तिंविवक्षश्चंद्रस्यप्रथमंविशेषमाह॥ स्वमंदभुक्तिसंशुध्यामध्यभुक्तिर्निशापतेः॥ दोर्ज्यांतरादिकंकृत्वाभुक्तावृणधनंभवेदिति॥
ग्रहगतिसाधनेवक्ष्यमाणेगतिफलंग्रहगतेः साधितंतथाचंद्रगतिफलंनसाध्यं॥ किंतुचंद्रस्यमध्यमगतिः॥ स्वस्य॥ चंद्रस्य॥
मंदःमंदोच्चः॥ तस्यदिनगत्याहीनाकार्याः तादृशगतेः सकाशात॥ दोर्ज्यांतरादिकंदोर्ज्यांतरमादिभूतंयस्यैतादृशंगतिफलं॥
वक्ष्यमाणप्रकारेदोर्ज्यांतरगुणाभुक्तिइत्यादौदोर्ज्यांतरादेवगतिफलत्वात॥ सिधंकृत्वा॥ चंद्रमगतौकृणधनंवक्ष्यमाणरीत्याभवति
अत्रोपपत्तिः॥ वक्ष्यमाणंगतिफलंकेंद्रगत्योपपन्नमित्यादित्येसूर्यादिग्रहाणांविचंद्राणांमंदोच्चगतेरत्यल्पत्वात्स्वगत्यैवगतिफल
मुक्तं॥ तत्रचंद्रस्यतथासाधनेऽहतरपातात्स्यमंदोच्चगत्यनस्वगतिरूपकेंद्रगतेः फलंसाधितं॥ गतिफलंग्रहगतेः साध्यंतद्भ्रामे
वसंस्कार्यमितिवक्ष्यमाणरीतिस्फुटासायचंद्रभुक्तावित्युक्तमन्यथाकेंद्रगतेरेवस्फुटत्वंस्यान्नचंद्रगतेरिति॥ ४७॥ ॥
अथग्रहाणांमंदस्पष्टगतिवासनासाचिनपूर्वगतिफलानयनप्रकारंश्लोकाभ्यामाह॥ ग्रहभुक्तेः फलंकार्यंग्रहवन्मंदकर्मणि॥
दोर्ज्यांतरगुणाभुक्तिस्तत्वनेत्रोद्धृतापुनः॥ ४८॥ ॥ स्वमंदपरिधिक्षुण्णाभगणांशोद्धृताकलाः॥ कर्क्यादौतुधनंतत्रमकरादव
णंस्मृतमिति॥ मंदकर्मणिगतिमंदफलक्रियानिमित्तमित्यर्थः ग्रहवत॥ ग्रहमंदफलानयनरीत्यापरिधिगुणनभगणांशभज
नामचापमित्यात्मकया॥ ग्रहगतेः सकाशात॥ फलंग्रहं॥ मंदगतिफलंसाध्यं॥ यथाग्रहमंदफलंकेंद्रभुजज्यातः साधितंतद श्लो॰ २४

159
1941

वदंगतिफलंग्रहगतेः साध्यमित्यर्थः॥ यथाहिग्रहमंदफलांतरंएकदिनांतरीयस्यग्रहगतिमंदफलत्वाद्भुजज्यायोरेकदिनांतयोरंतरा
त्फलंमंदगतिफलंपर्यवसितं॥ तत्रकेंद्रदोर्ज्यांतरगुणेति॥ ग्रहमध्यगतिःकेंद्रगतिरूपा॥ उच्चगतेरत्यल्पत्वात॥ दोर्ज्यांतरगुणाःभुज
ज्यानयानावसरेयः ज्यापिंडांत रंतेनगुणितापंचाग्निभिर्भक्ताः पुनः अनंतरमित्यर्थः॥ ग्रहमंदपरिधिनास्फुटेनगुणिताः षष्टिगुन
शतत्रयेणभक्ताफलंगतिमंदफलकलाः॥ यद्यपिगतिज्यातः फलज्यानयनंकृत्वातच्चापंगतिफलंसमुचितंतथापिग्रहगतेस्तत्वाश्चिपो
त्पन्नत्वाज्ज्याचापयोस्तुल्यत्वेनतदुक्तावभ्रांतिश्चंद्रस्यतुस्वल्पांतरकत्वत्करणमुपेक्षितं॥ मंदस्पष्टगतिसिध्यर्थंमध्यगतौफलसंस्कारमाह॥
कर्कादौतुधनंकार्यंमकरादावृणंस्मृतं॥ कर्कादाविति॥ तत्रग्रहमध्यगतौ॥ पूर्वानीतफलंकर्कादिषड्भागतकेंद्रेधनंमकरादिषड्भांतकेंद्रेण
मुक्तं॥ तुकारान्मंदस्पष्टागतिःसिध्याभवतीत्यर्थः॥ अत्रोपपत्तिः॥ कृणफलोपचयेपूर्वफलादग्निमफलमधिकंहीनमितिफलांतरगता
वृणांकृणफलापचयेपूर्वफलादग्निमफलंन्यूनंहीनमितिफलांतरंगतौधनं॥ धनफलोपचयेपूर्वफलादग्निमफलमधिकंयुतमितिफलां
तरंगतौधनंकृणफलापचयेस्तमकरादितःभाकत्रिभि॥ धनफलोपचयस्तुतुल्यादितः भाकत्रिभेद्वति॥ कर्कादिकेंद्रेगतिफलंधनंधन
फलापचयेपूर्वफलादग्निमंदफलन्यूनंयुतमितिफलांतरंगतावृणं॥ धनफलापचयस्तुकर्कादितः भाकत्रिभेः कृणफलोपचयस्तुमेषादि
तः भाकत्रिभेद्वतिकर्मरादिकेंद्रेगतिफलमृणंसिध्यमिति॥ ४९॥ ॥ अथश्लोकाभ्यांस्पष्टगतिसाधनमाह॥ मंदस्फुटीकृतांभुक्तिंप्रोह्य
शीघ्रोच्चभुक्तितः॥ तच्छेषंविवरेणाथहन्यात्रिज्यांत्यकर्णयोः॥ ५०॥ ॥ चलकर्णहृतंभुक्तौकर्णेत्रिज्याधिकेधनं॥ कृणमूनेऽधिके
प्रोह्यभुक्तिवक्रगतिर्भवेदिति॥ मंदस्पष्टांगतिः॥ प्राक्सिध्यांशीघ्रोच्चगतेःपातयित्वा॥ तत्रावशिष्टंत्रिज्यांत्यकर्णयोः त्रिराशिज्या
द्वितीयशीघ्रकर्णयोः ग्रंथांतरेकवाक्यतार्थंद्वितीयशीघ्रफलकोटिज्यायाह्येतिध्येयं॥ अंतरेणगुणयेत॥ तत्रासिध्यंतच्छीघ्रकर्णेद्विती
येनभक्तं॥ फलंमंदस्पष्टगतौ॥ द्वितीयशीघ्रकर्णः त्रिज्याधिकेग्रहीतफलकोटिज्यातोऽधिकेसति॥ हीनेचसति॥ धनमृणंक्रमेणका
र्यस्पष्टगतिः स्यात॥ तुनैयदामंदस्पष्टागतितोगतिशीघ्रफलमधिकंतदामंदस्पष्टगतौफलमूनंनस्यादितितत्स्पष्टंगतिज्ञानं

कथंचैतदसंभवइतिवाच्यं नीचासन्नेग्रहे फलकोटिज्याशीघ्रकर्णांतरशीघ्रकर्णस्यन्यूनत्वात्फलस्याभ्यधिकमंदस्पष्टगत्यधिकत्वसंभवादित्यत
आह॥ अधिकेइतिमंदस्पष्टगतिः॥ अधिकेफले॥पातनिता॥ शेषंवक्रगति॥ पश्चिमगतिः स्यात्॥ तथाचनक्षति॥ अत्रोपपत्तिः॥ फलांशार
वांकांतरमिंजिनीशीघ्रद्राक्केंद्रभुक्तिः श्रुतिहृद्विशोध्याः स्वशीघ्रभुक्तेः स्फुटखेटभुक्तिः शेषंचवक्राविपरीतशुध्याविति॥ सिध्दांतशिरो
मणौहृध्रवासिद्धसिध्दांतोक्तेः॥सूक्ष्मः प्रकारस्तस्योपपत्तिस्तदीयटीकायांव्यक्तातत्रद्राक्केंद्रभुक्त्यर्थंप्रथमार्धमुक्तं॥ इयंगतिः फल
कोटिज्यागुण्या॥ कर्णेनभक्ताफलंस्वशीघ्रोच्चगतेःशोध्यं॥तत्रप्रथममेवसमच्छेदपूर्वकंशोधनार्थंशीघ्रोच्चगतेः कर्णोगुणः॥तत्रापि
शीघ्रोच्चगतेः केंद्रग्रहगतियोगरूपत्वात्खंडद्वयं॥केंद्रगतावेवफलंहीनंकृतमितिकर्णगुणितकेंद्रगतिः॥ फलकोटिज्यागुणितकेंद्रग
त्योरंतरंतत्रापिगुणितयोरंतरेवागुणितेसमत्वाद्याधवाधःफलकोटिज्याकर्णांतरेणकेंद्रगतिगुणिताकर्णभक्तेतितत्शेषमित्यादिहृतं
मित्यंतमुपपन्नं॥ अथफलकोटिज्यातुल्यकर्णेमुख्यप्रकारेणगतेमंदस्पष्टगतितुल्यतयासिद्धत्वात्फलाभावः॥ कर्णस्यन्यूनत्वेफल
स्यशीघ्रकेंद्रगात्यधिकत्वानदनेशीघ्रोच्चगतौशीघ्रकेंद्रगतिनाशादधिकस्यगतिफलरूपस्यमंदस्पष्टगतौहीनत्वंयथेवसन्नं॥क
र्णस्याधिकत्वेपूर्वप्रकारफलस्यशीघ्रकेंद्रगतितोन्यूनत्वाद्दनेशीघ्रोच्चगतौयन्न्यूनंतदधिकपदेस्पष्टगति॥ स्पष्टगतिरितिपर्यवस
न्नंतदत्रशीघ्रोच्चगतिस्थानेशीघ्रकेंद्रगतिग्रहणेनफलंगतिफलमेवोत्पन्नं॥ तन्मंदस्पष्टगतौफलकोटिज्यातः कर्णस्याधिकन्यूनत्वक
मेणधनमृणमित्युपपन्नंकर्णेइत्याद्यनेइत्यंतं॥ ऋणफलस्यमंदस्पष्टगतितोधिकत्वेविपरीतशोधनाच्छेषंपश्चिमगतिरेवस्पष्टेति
सर्वमनवद्यं॥५१॥ ॥ अथवक्रत्वोपपत्तिमाह॥ दूरस्थितः स्वशीघ्रोच्चात्ग्रहः शिथिलरश्मिभिः॥सव्येतराकृष्टतनुर्भवेद्वक्र
गतिस्तदेति॥ स्वशीघ्रोच्चात्॥ दूरस्थितः॥ग्रहोभौमादिकः शिथिलरश्मिभिः॥शीघ्रोच्चदेवताहस्तस्थितग्रहबिंबप्रोतरज्जुभिः॥स
व्यतराकृष्टतनुः देवतयाः सव्यवामभागेआकर्षितं॥तनुः शरीरं॥बिंबरूपंयस्यासौयदातदावक्रगतिः स्यात्॥ अयंभावः॥ त्रिभाद् श्रीः २५
नांतरितौग्रहौदृढाकारस्तैरशिथिलैर्देवतेयथाआकर्षितुंशक्यंतथात्रिभाधिकांतरितोग्रहोदेवतेदृढाकारस्तैरशिथिलैराकर्ष

161
1941

तुंनशक्यतेतोस्यधनर्णफलस्थानेग्रहोवक्रोभवति॥आकर्षणोकर्षाभावेनदृक्समार्गेवास्तुतोनीचगामित्वसंभवादिति॥ ५२॥ ॥अथवाके
द्रांशोषुगतिफलमृणंमंदस्पष्टगतिल्यंतुभवतितान्वक्रारंभभागास्तदंभागांविनागतिसाधनप्रकारंग्रह वक्रदतज्ञानार्थंश्लोकाभ्यामाह॥
कृतर्तुचंद्रैर्वेदद्रैः शून्यत्र्यैकैर्गुणाष्टिभिः॥शररुद्रैश्चतुर्थेषुकेंद्रांशैर्भूसुतादयः॥५३॥ ॥भवंतिवक्रिणस्तैस्तुस्वैःस्वैश्चक्राद्विशोधि
तैः॥अवशिष्टांशतुल्यैःस्वैःकेंद्रैरुज्झंतिवक्रतामिति॥भौमाद्याः॥ग्रहाश्चतुर्थकर्मस्थकेंद्रांशैः कृतर्तुचंद्रैरित्याद्युक्तरूपैः क्रमेणवक्रि
णोभवंति॥ स्वकीयै॥तैः॥केंद्रांशैरुक्ततुल्यैः॥चक्रात्॥द्वादशराशिभागेभ्यः विशोधितैर्हीनैः॥अवशेषसमानैःस्वकीयैश्चतुर्थकें
द्रांशैःतुकारः क्रमार्थे॥भौमाद्योवक्रत्वंत्यजंति॥परिवर्तेवारद्वयंभुजतुल्यत्वेननीचासन्नेमंदस्पष्टगतितुल्यगतिफलस्यसंभवादि
ति॥५४॥ ॥ अथवक्रभागानामतुल्यत्वेकारणांतरमप्याह॥ महत्वाच्छीघ्रपरिधेः सप्तमेभृगुभूसुतौ॥अष्टमेजीवराशिज्ञौनवमेतुशनै
श्चरइति॥ शीघ्रकेंद्रस्यसप्तमेराशौभृगुभौमौवक्रत्वंत्यजतः॥अष्टमेराशिगुरुबुधौवक्रंत्यजनाहौ॥अत्रशुक्रगुर्वोः पूर्वोद्देशइतरा
पेक्षयाभ्यर्हितत्वज्ञापकः॥नवमेराशौशनिर्वक्रत्वंत्यजति॥तुरेवार्थे॥तेनशनिरेवतत्रवक्रत्वंत्यजतिनान्ये॥अत्रकारणमाहमहत्वा
दिति॥अन्येषांशीघ्रपरिधेः प्रागुक्तस्यमहत्वात्॥ शनिशीघ्रपरिधेरधिकत्वात्॥तथापरिध्यधिकत्वेनपूर्वमेववक्रत्यजनमतएव
भौमशुक्रयोर्बुधगुरुभ्यांप्रथमोद्देशः॥ शनेस्तुस्वतरांबुधगुर्वोशनितः पूर्वोद्देशः॥भृगुभूसुतौजीवशशिनावित्यत्रपरिध्याधिकत्वे
नशुक्रगुर्वोः प्रथमकेवलमुद्देशः॥ नभागानामल्पत्वक्रमइतिभावः॥नतुपरिध्याधिकत्वेपूर्वंगर्वराशौवक्रत्यजनेकोत्पत्तिरितिचेच्छृ
णु॥ स्पष्टगतिसंबंधशीघ्रकर्णासत्वांशारवांकांतरेत्यादेर्विलोमविधिनाशीघ्रोच्चगतेः फलकोटिज्या॥अस्याः फलज्याअस्यास्त्रि
ज्याभ्यस्तंभुजफलंचलकर्णविभाजितमित्यस्माद्विलोमविधिनाभुजफलं॥अस्मात्रज्जुणेभुजकोटिज्येभगणांशविभाजितेइत्यस्यविलोमप्र
कारेणभुजांशज्ञानार्थंभौमादीनांभुजज्याउत्तरोत्तरमधिकाः॥शीघ्रपरिधिभ्योयथोत्तरमधिकयवशोहरेभ्योलत्वात्॥हराधिकन्यूनत्वा
भ्यांफलयोन्यूनाधिकत्वनिश्चयात्॥ तासांचापानिभुजभागायथोत्तरमधिकाचक्रारंभेतदंतेचतुल्याः॥अतस्ततीययदवक्रांतत्वा

स०टी०
२६

दुजभागाः षड्गुणाय्योनरमधिकं शीघ्रकेंद्रं तेषांवक्रांते भवंति॥वक्रारंभस्यद्वितीयपदे संभवात्भुजभागहीनाः षड्राशयस्तेषांवक्रारंभे
यथावस्थितंकेंद्रं भवति॥तस्करोत्याभौमशुक्रयोः षष्टराशौ॥बुधगुर्वोः पंचमराशौशनेश्चतुर्थराशाविति ज्ञेयं॥इदंभगवताभि
नावक्रशोधनमायातनः शीघ्रकेंद्राशिज्ञानादक्रांतज्ञानंलोकावबुधार्थमनतिप्रयोजनमुक्तमितिध्येयं॥५५॥ ॥अथचंद्रा
दिग्रहाणांविक्षेपसाधनंश्लोकाभ्यामाह॥कुजार्किगुरुपातानांग्रहवच्छीघ्रजंफलं॥वामंतृतीयकंमांदं बुधभार्गवयोः फलं॥५६॥ ॥
स्पष्टोनात्ग्रहाच्छीघ्राच्छीघ्राच्छुजसौम्ययोः॥विक्षेपश्चांत्यकर्णाप्ताविक्षेपास्त्रिज्ययाविधोरिति॥भौमशनिगुरूणांयेपाताःमध्या
धिकारावगतास्तेषांशीघ्रजंफलं॥स्वग्रहसंबंधिचतुर्थकर्मस्थशीघ्रफलंपूर्वंसिद्धं॥ ग्रहवत्स्वग्रहेयथासंस्कृतंतथासंस्कार्यं॥
ग्रहाशीघ्रफलंग्रहेचकृतंतदातत्पातेतदेवफलंयोज्यं॥वेद्वनंतदाहीनमित्यर्थः बुधशुक्रयोः॥तृतीयकं॥तृतीयकर्मसंबंधि॥मांद
फलं॥तत्पातयोर्विपरीतंसंस्कार्यंबुधशुक्रयोःमंदफलंधनकृणंचेत्तत्पातयोस्तदेवफलंकृणधनंक्रमेणकार्यमित्यर्थः॥अनुक्तत्वाच्चं
द्रस्ययथागतएवपातोज्ञेयं॥स्पष्टग्रहात्॥स्वस्वफलसंस्कृतात्पातस्तेनहीनाद्भुजज्याबुधशुक्रयोर्विशेषमाह॥शीघ्रादिति॥बुध
शुक्रयोः॥शीघ्रोच्चात्पातेनहीनाभुजज्या॥नपातोनबुधशुक्राभ्यांभुजज्या॥विशेषस्यसामान्यबाधकत्वात्॥अर्थात्पूर्वोक्तंचंद्रभौ
मगुरुशनीनांसिद्धं॥मध्याधिकारोक्तस्वमध्यमविक्षेपकलाभिर्गुण्याःचतुर्थकर्मणियःशीघ्रकर्णस्तेनभक्ताः फलंग्रहाणांवि
क्षेपकलाःस्फुटाःभवंति॥ननुचंद्रस्यशीघ्रकर्णासंभवात्तत्पातोनतद्भुजज्यावभगुणिताकेनभज्येत्यतआह॥त्रीज्ययेति॥चं
द्रस्यविक्षेपसाधनेतादृशीभुजज्यात्रिज्ययाभाज्येत्यर्थः॥अत्रोपपत्तिः॥यथाविषुवद्वृत्ताक्रांतिवृत्तयाम्योत्तरभागेोपदंतरे
णयाम्योत्तरस्तत्रेसाध्रुवाभिमुखीक्रांतिस्तथाक्रांतिवृत्ताद्विक्षेपवृत्तभागोयत्तरेणयाम्योत्तरस्तत्रेसाविक्षेपःकदंवाभिमुखः॥
तथाहि॥विक्षेपवृत्तानिग्रहबिंबाधिष्ठितानिसूर्यव्यतिरिक्तग्रहाणांषण्णांस्वस्वगोलेभिन्नानि॥सूर्यस्यभित्यंक्रांतिवृत्तस्थत्वमेव
तानिक्रांति॥वृत्तेस्वस्वगत्याप्रीतान्येवगच्छंति॥तत्रविक्षेपक्रांतिवृत्तसंपातेपातस्थानेतत्षड्भांतरप्रदेशेचस्थितेग्रहबिंबतभेदे सो:
२६

163
1941

शैक्यातदंतराभावेनग्रहविक्षेपाभावः॥यदातस्मातग्रहबिंबंगच्छति तथाग्रहबिंबंक्रांतिवृत्तात्किंचिद्दक्षिणोत्तरंवांतरंक्रांतिवृत्तात्ग्रहस्यभ
वति॥तदेवविक्षेपसंज्ञं॥सचपातात्रिभांतरेग्रहेमध्याधिकारोक्तअंतरालेपातस्थानात्ग्रहबिंबंक्रांतिवृत्तेपदंतरेणतदंतरंराश्याद्यात्म
कंपातोग्रहकृतंतवभुजज्यपातः॥त्रिज्याभुजज्ययापरमविक्षेपस्तदेष्टयाभुजज्ययाकइति॥एवंचंद्रस्यैवत्रिज्याव्यासार्धगोलेपरमशर
स्यगणितागतत्वानस्यचलसिनत्वात्॥अन्येषांतुपरमशराःशीघ्रोच्चदेवताकृष्टग्रहबिंबाधिष्ठितकल्पितवृत्तेशीघ्रकर्णव्यासा
र्धलक्षिताः॥कथमन्यथाशीघ्रफलसंस्कारेणग्रहस्यस्पष्टत्वंयुक्तंग्रहबिंबस्यतत्स्थत्वेतत्तस्यापितत्स्थत्वंयुक्तंग्रहबिंबाधिष्ठितवृत्ते
ग्रहभोगस्यमंदस्पष्टत्वेनगणितापातोनमंदस्पष्टशरसाधनमुपपन्नं॥तदुक्तंसिद्धांतशिरोमणौ॥मंदस्फुटोद्राक्मंडलेग्रहयहोभ्र
मतश्चतस्यपातःपातेनयुक्तादगणितागतेनमंदस्फुटात्खेचरतःशरोस्मादिति॥तत्रस्पष्टशरसाधनार्थंशीघ्रफलंपातेसंस्कृ
तःशीघ्रफलव्यस्तसंस्कृतस्पष्टग्रहस्यमंदस्पष्टत्वाद्यथोक्तसंस्कृतपातोनेस्पष्टग्रहेपातोनमंदस्फुटाग्रहस्यसिद्धेः॥अथबुधशुक्रपा
तौभगणैर्वास्तवौनोक्तौ॥तौतुशीघ्रकेंद्रभगाधिष्ठौकावतौगणितागतपातयोःमध्यग्रहोनशीघ्रोच्चरूपशीघ्रकेंद्रयुतयोर्द्वादशरा
शिशुद्धयोःपातत्वं॥तत्रत्वपातस्यद्वादशशुद्धत्वाच्छीघ्रकेंद्रचक्रशुद्धंयोज्यमतोलाघवाद्गणितागतपातस्य॥पातोमंदस्पष्टेमंदफ
लसंस्कृतमध्यरूपेहीनइतिग्रहयोर्मध्ययोर्नाशाद्यथागतमंदफलसंस्कृतंशीघ्रोच्चंपातोनमितिसिद्धं॥तत्रापिमंदफलंपातेव्यस्तंकृत
त्वदृतंशीघ्रोच्चकृतं॥संस्कृतपातपंक्तुस्तासंस्कृतपातयोर्युक्तत्वात्॥अथैतदानीतविक्षेपेणकर्णव्यासार्धवृत्तेनत्रिज्यावृत्तेस्फुटग्रहस्था
ने॥अंतःकर्णाग्नेयंप्रवानुपातानीतविक्षेपस्तदात्रिज्याग्रेकइत्यनुपातेनत्रिज्यागुणःकर्णोहरःप्रवंत्रिज्याहरइतित्रिज्ययोर्नाशात्अ
भुज्यापरमविक्षेपगुणिताशीघ्रकर्णाभक्तेतिसर्वमुपपन्नं॥५७॥ ॥अथदिनरात्रिज्ञानार्थंचरानयनंविवक्षुःप्रथमंतदुपयु
क्तांस्पष्टक्रांतिमाह॥विक्षेपापक्रमैकत्वेक्रांतिर्विक्षेपसंयुता॥दिङ्भेदेवियुतास्पष्टाभास्करस्ययथागतेतिपस्यग्रहस्यस्पष्टक्रांतिर
भिष्टातस्यग्रहस्यायनांशसंस्कृतस्यभुजज्यातःपरमापक्रमज्येत्यादिनाक्रांतिरयनांशसंस्कृतगोलदिक्काज्ञेयातस्यविक्षेपोपि

स०टी० २७

मेषादि पूर्वोक्तप्रकारेण पातेन गोलदिक् ज्ञेयः ॥ गोलस्तु षट्कमुत्तरस्तुलादिषट्कं दक्षिणः ॥ अथ शरक्रांत्योरेकदिक्त्वे क्रांतिः कलाद्या कलात्म
कविक्षेपेण युताः ॥ तयोर्दिगन्यत्वे क्रांतिर्विक्षेपेण वियुताः अंतरिताः शेषदिक्का स्पष्टा क्रांतिः स्यात् ॥ ननु सर्वस्या विक्षेपेण युतायास्तयो
र्दिगन्यत्वेऽभावात् कथं स्पष्टा क्रांतिर्ज्ञेयेत्यत आह भास्करस्येति ॥ सर्वस्याप्यथागता पूर्वागता क्रांतिरेव स्पष्टा क्रांतिः ॥ अत्रोपपत्तिः ॥
विषुवद्वृत्ताद्ग्रहबिंबकेंद्रपर्यंतं याम्योत्तरं सांतरं स्पष्टक्रांतिरिति तयोरेकदिक्त्वे तद्योगतुल्यमंतरं भिन्नदिक्त्वे तदंतरमितमंतरमिति ॥ अत्र
शरस्य क्रांतिसंस्कारयोग्यत्वसंपादिका क्रिया लोकअन्यभयात् स्वल्पांतरत्वाच्चोपेक्षिता भगवता कृपावता अन्यथा शरस्य ध्रुवाभिमुखत्वे
भगवदुक्तमायनदृक्कर्म कथमव्यवहृतं स्यादित्यलं ॥ ५८ ॥ ॥ अथ दिनरात्रिमानज्ञानार्थमहोरात्रासून् साधयति ग्रहोदयप्राणाहता
खखाष्टैः ॥ कोह्ट ताँगतिः चक्रासवो लब्धयुताः स्वाहोरात्रासवः स्मृता इति ॥ ग्रहस्येयेयेनाम ज्ञासंस्कृत ॥ राशिर्वक्ष्यमाणा निरक्षोदयास
वस्तैर्गुणिता निजस्फुटगतिः कलाद्याष्टादशशतभक्ताफलेन युक्ताश्चक्रासवः षष्टिघटी कोटिनामवेर्षे ॥ षट्भानयुतैकविंशतिसह
स्त्रमिताः स्वस्य ग्रहस्य ॥ अहोरात्रासवः कालतत्त्वज्ञैः कथिताः ॥ अत्रोपपत्तिः ॥ ग्रहः शर्वगत्यालंबितः प्रवहेण गतिभोगकालेन भ
चक्रपरिवर्त्तानंतरमुदेत्यतो भचक्रपरिवर्तिकालः षष्टिघटिकासुमितो ग्रहगतिकलासंबंधास्वात्मककालेनाधिको ग्रहाहोरात्रम
स्वात्मकं नाक्षत्रप्रमाणेन भवति ॥ तत्रैकराशिकलाभिर्ग्रहसंबंधराश्युदयप्राणास्तदागतिकलाभिः क इत्यनुपातेन गत्यसवइत्युपप
न्नं ग्रहोदयेत्यादि ॥ अनेनैव श्लोकेन ग्रहाणामुदयांतरकर्मास्तीत्युक्तं भगवता ॥ तथाहि ॥ अनुपातानीतमध्यग्रहाणां नियताहोरा
त्रमानांतरकालेसिद्धत्वान्मध्यमध्यरात्रकाले ग्रहाणां सिद्धिः ॥ रविमध्यगत्यसवांप्रतिराशौ भिन्नत्वेन मध्यमसूर्याहोरात्रमान
स्य नियतत्वाभावात्तदंतरस्त्रैराशिकावगतग्रहा अनियतमध्यार्काहोरात्रमानांतरेणार्धरात्रे यत्संस्कारेण भवंति ॥ तदेवोदयांतरं
तत्साधनं भगवता स्वल्पांतरत्वादुपेक्षितं ॥ कथमन्यथा गतिकलासुनांसमत्वमुपास्य गतिकलानामसवो भगवदुक्ताः संगच्छंते श्रीः
उदयांतरस्य गतिकलासु भेदोत्पन्नत्वात् ॥ ५९ ॥ ॥ अथ चरोपयुक्तां क्रांतिज्यां चाह ॥ क्रांतेः क्रमोत्क्रमज्ये द्वे कृत्वा तत्रोत्क्रम २७

ज्यया ॥ हीना त्रिज्या दिनव्यासदलं तद्दक्षिणोत्तरमिति ॥ स्पष्टक्रांतेः ॥ क्रमोत्क्रमज्ये० द्वे पिप्रसाध्य० तन्न० तन्मध्ये क्रांत्या क्रमज्यया त्रि
ज्या हीना दिनव्यासदलं ॥ अहोरात्रवृत्तस्य व्यासार्धं द्युज्येत्यर्थः ॥ तत् दिनव्यासार्धं दक्षिणोत्तरं ॥ दक्षिणगोले उत्तरगोले च स्यात् ॥ क्रां
तेर्गोलद्वयेपि सत्त्वात् ॥ अपरा क्रांतिज्यैव ॥ अत्रोपपत्तिः ॥ क्रांत्यंशानां क्रमज्या क्रांतिज्या भुजः ॥ विषुवद्वृत्तानुकारस्याहोरात्रवृत्तस्या
भयगोले तदुभयतस्तद्व्यासार्धं द्युज्या कोटिः त्रिज्या कर्ण इति गोले प्रत्यक्षं त्रिज्यावृत्ते उन्मंडले याम्योत्तरवृत्ते वा प्रत्यक्षं ॥ तत्र भुजकर्ण
योर्वर्गांतरपदं कोटिरिति क्रांतिज्यावर्गोनात् त्रिज्यावर्गान्मूलं द्युज्या ॥ तत्रापि भुजोत्क्रमज्यया हीना त्रिज्या कोटिक्रमज्या स्यादिति
वृत्ते प्रत्यक्षदर्शनात् क्रांत्युत्क्रमज्ययोना त्रिज्या द्युज्या स्यादिति लाघवेन वर्गमूलनिरासेनोक्तं भगवता क्रांतेरित्यादि ॥ ६० ॥ ॥
अथ चरानयनपूर्वकदिनरात्रिमानसाधनं श्लोकद्वयेनाह ॥ क्रांतिज्या विषुवद्भाघ्नी क्षितिज्या द्वादशोद्धृता ॥ त्रिज्यागुणाहोरात्रार्ध
कर्णाप्ता चरजासवः ॥ ६१ ॥ ॥ तत्कार्मुकमुदक्क्रांतौ धनहीना पृथक्स्थिते ॥ स्वाहोरात्रचतुर्भागे दिनरात्रिदले स्मृते ॥ ६२ ॥ ॥
याम्याक्रांतौ विपर्यस्ते द्विगुणे तु दिनक्षये ॥ विक्षेपयुक्तोनितया क्रांत्या भानामपि स्वके ॥ इति क्रांतिज्या ॥ विषुवद्दिनीयमध्याह्ने द्वादशांगुलशं
कोः छायया गुण्या० द्वादशभक्ता फलं कुज्या स्यात् ॥ सा त्रिज्यया गुणिता ॥ अहोरात्रार्धकर्णाप्ता अहोरात्रवृत्तस्यार्धकर्णेन ॥ व्यासदलेन द्युज्य
या भक्ता ॥ फलं चरज्या ॥ चरज्येत्यर्थः ॥ तस्याश्चरज्यायाः धनुः ॥ असवश्चरासवो भवंति ॥ स्वाहोरात्रचतुर्भागे ॥ स्वस्य चरसंबंधिनो ग्रहस्य भाग
काहोरात्रासवस्तेषां चतुर्थांशे पृथक्स्थिते स्थानद्वये ॥ उत्तरक्रांतौ सत्यां चरासवः ॥ धनहीनौ ॥ युतहीनौ कार्यौ ॥ तौ क्रमेण० दिनरात्रिदले०
दिनार्धं रात्र्यर्धं कालविद्भिरुक्ते ॥ दक्षिणक्रांतौ सत्यां ॥ विपर्यस्ते दिनरात्रिदले ॥ यत्र हीनं तद्दिनार्धं ॥ यत्र युतं तद्रात्र्यर्धमित्यर्थः ॥ तु कारान्ते दिनार्ध
रात्र्यर्धं ॥ द्विगुणे ॥ दिनक्षये ॥ दिनमानरात्रिमाने ग्रहस्य स्तः ॥ उकारोत्थानक्षत्राणामपि दिनरात्रिमाने साध्ये इत्याह विक्षेपेत्यादि ॥ नक्षत्रभुवा
णामानीतया क्रांत्या ॥ नक्षत्रविक्षेपेणैकभिन्नादिक्क्रमेण युक्तया ॥ अंतरितया० उक्तप्रकारेण सिद्धया० स्वके० नक्षत्रदिनरात्रिमाने साध्ये इत्य
र्थः ॥ अत्रोपपत्तिः ॥ द्वादशांगुलशंकुः कोटिः ॥ पलभा भुजः ॥ अक्षकर्णः ॥ क्रांतिज्या कोटिः ॥ कुज्या भुजः ॥ अग्राकर्ण इत्यक्षक्षेत्रयं प्रसिद्धं०

165/1941

म०टी०
२८

तत्रदादशाकोटौपलभाभुजः क्रांतिस्याको टीकोभुजइत्यनुपातेन कृत्या० तत्स्वरूपंतु निरक्षदेशाक्षितिजस्वदेशक्षितिजांतरालस्थिताहोरात्र
वृत्तप्रदेशस्य दुज्याप्रमाणेन ॥ ज्येति० त्रिज्याप्रमाणेनतज्या चरज्येतिदुज्याप्रमाणेन केइत्यनुपातेन चरज्या ॥ तथनुश्चरासवोहोरात्रवृत्त
प्रदेशोनिरक्षस्वक्षितिजांतराले ॥ उत्तरगोलेस्वक्षितिजस्यनिरक्षक्षितिजादधः स्थित्वान्निरक्षक्षितिजयाम्योत्तरवृत्तांतरालेहोरात्रो
नचतुर्थांशत्वादहोरात्रासवश्चतुर्थांशेचरासवयुताः दिनार्धदीनाश्यर्धं० दक्षिणगोलेस्वक्षितिजस्यनिरक्षक्षितिजादूर्ध्वत्वाद्धीनादि
नार्धंयुतारात्र्यर्धमित्युपपन्नंसर्वंक्रांतिज्येत्यादि ॥ ६३ ॥ ॥ अथग्रहस्यनक्षत्रानयनमाह ॥ भभोगोष्टशतीलिप्ताः स्वाश्विशैला
स्तथातिथेः ॥ ग्रहलिप्ताभभोगाप्ताभानिभुक्त्याद्दिनादिकमिति ॥ अष्टशतमिताः कलानक्षत्रभोगः ॥ प्रसंगात्तिथिभोगमाह ॥ स्वा
श्विशैलाइति ० । तीर्थविंशत्यधिकसप्तशतमिताः कलास्तथाभोगइत्यर्थः ॥ यस्यग्रहस्यनक्षत्रज्ञानमिष्टंतस्यग्रहस्यराश्यादयस्त्रिं
शत्कुण्या अंशायोज्यास्तेषष्टिगुणिताः कलायोज्याइतिपरिभाषया कलानक्षत्रभोगभक्ताः फलंग्रहस्यगतनक्षत्राणिशेषंवर्त्तमा
नक्षेत्रस्यगतकलाः ॥ तस्मात्तस्यगतदिनाद्यानयनमाह ॥ भुक्तेति ॥ ग्रहस्यकलात्मिकयागत्याशेषाद्दिनादिकंगतंभागहरणेनसा
ध्यमेवंशेषोनाद्भोगाद्गतिकलाभागेनैष्यदिकनादिकंसाध्यं ॥ अत्रोपपत्तिः ॥ भचक्रभोगेनसप्तविंशतिनक्षत्राण्यश्विन्यादीनिग्र
होधुनक्ष्यतः ॥ सप्तविंशतिनक्षत्राणांचक्रकलाः षट्शतयुतैकविंशतिसहस्रयुताः भोगस्तदेकनक्षत्रस्यकइत्यनुपातेनाष्टश
तकलाभोगः ॥ अथाष्टशतकलाभिरेकंनक्षत्रंतदाग्रहकलाभिः किमित्यनुपातेनफलमश्विन्यादीनिग्रहभुक्तानिशेषकलाग्रहा
धिष्ठितनक्षत्रस्यगतं ॥ नभोगाच्छोनंतस्यैष्यं आभ्यांग्रहगत्यैकंदिनंतदाभीष्टकलाभिः किमित्यनुपातेनतस्यगतैष्यादिवसादं
भवति ॥ एवंचंद्रादिननक्षत्रंज्ञेयं ॥ ६४ ॥ ॥ अथप्रसंगाद्योगानयनमाह ॥ रवींदुयोगलिप्ताभ्योयोगाभभोगभाजिताः ॥ गतागं
म्याश्चषष्टिघ्नाभुक्तियोगाप्तनाडिकाइति ॥ सूर्यचंद्रयोगस्यराश्यादिकस्यपरिभाषयायाः कलास्ताभ्योयोगाः विष्कंभादयोभभो
गभाजिताः ॥ भयोगेनपूर्वोक्तेनाभिभक्ताः भवंति ॥ एकैकयोगस्यभभोगमितोभोगः ॥ सप्रत्येकंताभ्योपनीयपातमिताः शुभाश्रितता श्रीः
२८

योगाः गताः वस्यभभोगश्वस्थितिसवर्तमाइत्यर्थः ॥ तस्येशेषंगतंभोगोत्पत्तितमेषाताभ्यांघटिकाद्यानयनमाह ॥ गताइति ॥ गताए
ष्यश्चसमुच्चये ॥ कलाः षष्टिगुणिताः कार्याः ताभ्योभुक्तियोगाप्तनाडिकाः ॥ रविचंद्रकलात्मकस्योगयोयोगेनभजनाल्लब्धघटिकाग
तैष्याः भवंति ॥ अत्रोपपत्तिः ॥ सूर्यचंद्रयोगमितिग्रहस्यनक्षत्राणिविष्कंभादिसंज्ञानियोगात्मकत्वाद्योगाः ॥ अतस्तदानयनंपूर्वोक्त
वत् ॥ अतएवसूर्यचंद्रयोगतुल्यतदूत्याषष्टिसाम्यघटिकास्तदागतैष्यकलाभिः काइत्यनुपातेनगतैष्यघटिकानयनंयुक्तयुक्तं ॥
॥ ६५ ॥ ॥ अथप्रसंगात्तिथ्यानयनमाह ॥ अर्कोनचंद्रलिप्ताभ्यस्तिथयोभोगभाजिताः ॥ गतागम्याश्चषष्टिघ्ना नाड्योभुक्त्यंत
रोद्धृताइति ॥ पूर्वार्धव्याख्यानंश्लोकपूर्वार्धरीत्याशेषमुत्तरार्धंस्पष्टं ॥ अत्रोपपत्तिः ॥ तिथिभोगकलाभिरेकातिथिस्तदास्पष्टोन
चंद्रकलाभिः काइत्यनुपातेनफलंगततिथयः वर्तमानतिथेः गतैष्यशेषशेषोनभोगकले ॥ ताभ्यांगत्यंतरकलाभिरनुपातेनग
तैष्यघटिकाः पूर्ववत् ॥ ६६ ॥ ॥ अथपंचांगावशिष्टकरणानयनंश्रिवस्तावस्थिरकरणान्याह ॥ ध्रुवाणिशकुनिनागंततीयं
तुचतुष्पदं ॥ किंस्तुघ्नंतुचतुर्दश्याः कृष्णायाश्चापरार्धतइति ॥ कृष्णपक्षीयायाश्चतुर्दश्यास्तिथेर्द्वितीयार्धात ॥ द्वितीयार्धमारभ्ये
त्यर्थः ॥ वकारएवार्थे० एतेनान्यतिथेरितितिथिपूर्वार्धस्यचनिरासः ॥ स्थिराणिकरणानि ॥ तान्याह शकुनिरितिचतुरंघ्रिस्तृतीयं ॥
अनेनशकुनिनागयोः क्रमेणाद्यद्वितीयत्वंसूचितं ॥ तुकाराक्रमेणतिथ्यर्धेषुभवंति ॥ किंस्तुघ्नंचतुर्थं ॥ तुरंतावधिद्योतकः तेनो
क्तामिरिक्तंस्थिरकरणंनास्तीतिसूचितं ॥ ६७ ॥ ॥ अथचरकरणान्याह ॥ बवादीनिततः सप्तचराख्यकरणानिच ॥ मासेष्टकृत्वा
रेकैकंकरणानांप्रवर्त्ततइति ॥ ततः स्थिरकरणानन्तरं ॥ बवादीनिचसंज्ञकरणानिसप्तभद्रांतानिभवंति ॥ स्यतआहमासिशुक्लप्रति
पद्द्वितीयार्धतश्चतुर्थंतंभवंतितिथ्यर्धानुपंचम्यादिति ॥ कानिकरणानिभवंतीत्यतमासेइतिबवकरणानांबवादीनांसप्तानांमध्येएके
कं ॥ एकमेकंकरणं ० मासे० स्थिरकरणकालोनितत्रिंशतिथ्यात्मकमासे ॥ स्वल्पांतरात्मासग्रहणं अष्टकृत्वः ॥ अष्टवारंप्रवर्तंते ॥
प्रकर्षेणतिष्ठंति ॥ भवंतीत्यर्थः ॥ तथाचपंचम्याद्यर्धादंतानिपुनः पुनः परिभ्रमंतिकृष्णचतुर्दश्याद्यार्धपर्यंतमितिभावः ॥

167
1941

सू०टी०
२९

ननु स्थिरकरणोक्तावपरार्धं तद् इत्युक्त्वा तेषां चतुर्णां तिथ्यर्धभागेन शुक्लप्रतिपदाद्यार्धपर्यंतं क्रमेणावस्थानं युक्तं चरकरणानां तु केवलं
तेषां नदनंतरं कृष्णचतुर्दश्यार्धपर्यंतमेकस्य परिभ्रमोऽस्त्वन्यतस्तदनंतरं कथमन्यन्न स्यात् ॥ तिथ्यर्धभोगं सर्वेषां करणानां प्रकल्पयेत् ॥ ए
षां स्फुटगतिः प्रोक्ता सूर्यादीनां खचारिणामिति ॥ समानां च करणानां ॥ प्रत्येकं ॥ तिथ्यर्धं चासौ भोगश्च तं ॥ तिथ्यर्धकालमितावस्थाने ॥
प्रकल्पयेत् ॥ एकत्र निर्णीतशास्त्रार्थोऽपरत्र भवतीति न्यायात् करणत्वेनैषामवस्थानं तत्तुल्यं कुर्यादित्यर्थः ॥ अत एव तिथ्यर्धं करणं स्मृत
मित्युक्त्या चांद्रमासे त्रिंशत्तिथ्यात्मके षष्टिकरणानां सन्निवेशाच्चरकरणानामेव परिभ्रमणे प्रतिमासमनियततिथिभागं करणं भव
तीति तद्वारणकप्रतिमासनियततिथिभागकरणकसिद्ध्यर्थं चरकरणानामष्टवारपरिभ्रमणानंतरमेव शिष्टतिथ्योश्चतुर्षु र्धेषु स्थिरक
रणान्युक्तानीति तात्पर्येण ॥ तत्रापि कृष्णचतुर्दश्यापरार्धतस्तत्कल्पनं तद्दिशानियामकं स्वतंत्रं छस्य नियोगान हंतात् ॥ अथाग्रिम
ग्रंथासंगतित्वनिरासार्थमुक्ताधिकारमुपसंहरति ॥ एषेति ॥ हे मय ॥ सूर्यादीनां ॥ समयहाणांएषा ॥ दृश्यं त्यादिसंकल्पयेदित्यंतं
यावानोसा ॥ स्फुटगतिः स्पष्टगतिः ॥ स्पष्टक्रियाज्ञानसंपादिकाः प्रोक्ता तुभ्यं ॥ मयोक्ता ॥ एतेन स्पष्टाधिकारः परिपूर्तिमात इति
सूचितं ॥ ६९ ॥ ॥ रंगनाथेरचिते सूर्यसिद्धांतटिप्पणे ॥ स्पष्टाधिकारः पूर्णोऽयं तत्त्वगूढार्थप्रकाशके ॥ २ ॥ ॥ इति श्रीस
कलगणकसार्वभौमबल्लालदैवज्ञात्मजरंगनाथगणकविरचिते गूढार्थप्रकाशके स्पष्टाधिकारः पूर्णः ॥ ॥ अथ त्रिप्रश्नाधि
कारो व्याख्यायते ॥ तत्र विना प्रश्नं गुरोस्तत्प्रतिपादनेच्छानुदयाद्दिनावतद्दिक्छात्राणां तत्ज्ञानासंभवात्त्रयाणां दिग्देशकालानां प्र
श्नाद्विति त्रिप्रश्नव्युत्पत्तेस्तावद्दिग्ज्ञानं श्लोकचतुष्टयेनाह ॥ शिलातलेंऽबुसंशुद्धे वज्रलेपेऽपि वा समे ॥ तत्र शंक्वंगुलैरिष्टैः समं मंडल
मालिखेत् ॥ १ ॥ ॥ तन्मध्ये स्थापयेच्छंकुं कल्पनाद्वादशांगुलं ॥ तच्छायाग्रं स्पृशेद्यत्र वृत्ते पूर्वापरार्धयोः ॥ २ ॥ ॥ तत्र बिंदू विधा
यो भौ वृत्ते पूर्वापराभिधौ ॥ तन्मध्ये तिमिना रेखा कर्तव्या दक्षिणोत्तरा ॥ ३ ॥ ॥ याम्योत्तरदिशोर्मध्ये तिमिना पूर्वपश्चिमा ॥
दिङ्मध्यमत्स्यैः संसाध्या विदिशस्तद्वदेव हि ॥ इति ॥ तत्र दिक्साधनोपक्रमे प्रथमं ॥ अंबुसंशुद्धे जलवत्समीकृते ॥ शिलाप्रदे

श्रीः
२९

169
1941

शे ॥ अपि वा ॥ अथवा तदभावे ॥ अन्यत्र वज्रलेपे ॥ चत्वारादौ घुटनादिना समस्थाने कृते ॥ शंक्वंगुलैः ॥ शंकुस्थांगुलविभागमानगृहीतै
रभीष्टसंख्याकांगुलैः ॥ व्यासार्धरूपैः वृत्तं ॥ अवक्रं ॥ आलिखेत् ॥ सर्वतः केंद्राद्वृत्तपरिधिरेखातुल्यांतरं स्यादित्यर्थः ॥ ततस्तन्मध्ये ॥ तस्य
वृत्तस्य केंद्ररूपमध्ये ॥ कल्पनया द्वादशसंख्याकांगुलानि तुल्यानि यस्मिंस्तं ॥ द्वादशविभागांकितमित्यर्थः ॥ शंकुं ॥ समतलमस्तकपरि
धिकाष्ठदंडं ॥ स्थापयेत् ॥ तेन पूर्वापरार्धयोः ॥ दिनस्य प्रथमद्वितीयविभागयोः तच्छायाग्रं ॥ स्थापितशंकोः तच्छायाग्रप्रदेशः ॥ मं
डलपरिधौ यस्मिन्विभागे स्पृशेत् ॥ दिनस्य प्रथमविभागेनुक्षणं छायाग्रं सा वृत्ते यत्र प्रविशति दिनस्यापरार्धे यानुक्षणं वर्धते व
त्तेयत्र निर्गच्छतीत्यर्थः ॥ तत्र निर्गमप्रवेशस्थानयोः ॥ उभौ ॥ द्वौ ॥ बिंदू ॥ पूर्वापरसंज्ञौ क्रमेण ॥ वृत्ते ॥ परिधिरेखायां ॥ कृत्वा ॥ तन्मध्ये पू
र्वापरबिंद्वंतरमध्ये ॥ तिमिना ॥ मत्स्येन ॥ रेखा कार्या ॥ सा दक्षिणोत्तररेखा भवति ॥ मत्स्यस्तु बिंद्वंतरालसूत्रमितेन व्यासार्धेन बि
न्दुद्वयकेंद्रकल्पनेन वृत्तद्वयं निष्पाद्य वृत्तद्वयसंयोगाभ्यां वृत्तद्वयपरिधिविभागाभ्यां मत्स्याकारं स्थानं भवति ॥ तत्रैकः संयोगो
मुखं चान्यः पुच्छभागसंमार्जनेन अपरसंयोगस्तु पुच्छमितवक्रभागद्वयसंमार्जनेन ॥ मुखपुच्छावधिज्वारेखा दक्षिणोत्तररेखा ॥ तत्र बिं
दोः सव्यं रेखायं दक्षिणादिक् ॥ पश्चिमबिंदोः सव्यं रेखाग्रमुत्तरादिक् ॥ अनंतरं पूर्ववत्तं मत्स्यश्च संमार्जनीयः ॥ शंकुरर्पितस्थाना
न्निष्काश्य इति केवलाद्दक्षिणोत्तररेखास्थितेति तात्पर्यार्थं ॥ दक्षिणोत्तरदिशोर्मध्यस्थाने ॥ तिमिना ॥ दक्षिणोत्तररेखामितेन व्या
सार्धेन दक्षिणोत्तरस्थानाभ्यां पूर्ववत्प्रत्येकं वृत्तं विधाय पूर्ववत्सिद्धेन मत्स्येनेत्यर्थः ॥ पूर्वपश्चिमा रेखा कार्या ॥ तत्र पूर्वबिंदोरा
सन्नं पूर्वं रेखाग्रं पूर्वापश्चिमा बिंदोरासन्नं रेखाग्रं पश्चिमेति मत्स्यसंमार्जनेन केवला पूर्वापररेखापि सिद्धा ॥ अथ रेखासंयोग
स्थानादिक्साधनोपक्रमोक्तं पूर्ववृत्तमालिखेत् ॥ तद्वृत्तपरिधौ यत्र रेखालग्ना तत्र दिगिति तद्वृत्तमध्यस्यादिक्चतुष्टयं वृत्ते सिद्धं
तद्वत् यथा दक्षिणोत्तराभ्यां पूर्वापरा साधिता तत्प्रकारेणेत्यर्थः ॥ एवकारोन्यप्रकारनिरासार्थकः ॥ हि निश्चयेन ॥ विदिशः कोण
दिशः ॥ दिशां पूर्वादीनां मिथः दिशां यो मध्यमत्स्य अव्यवहितदिग्द्वयांतरोत्पन्नालघुवत्स्तैः ॥ संसाध्याः ॥ सम्यक्प्रकारेण साध्याः ॥

रेखावृत्तसंयोगस्थत्वेन ज्ञेयाः॥ अत्रोपपत्तिः॥ क्षितिजपूर्वापरवृत्तसंयोगो पूर्वापरविभागरेखे पूर्वापरदिशौ तत्र पूर्वापरविभागज्ञानं
सूर्योदयास्ताभ्यां॰ तत्र क्षितिजे पूर्वापरवृत्तं कुत्र लग्नमिति ज्ञानं तु विषुवद्वृत्तक्रांतिवृत्तसंपातस्थ सूर्यस्योदयास्तस्थलज्ञानेन॰ विषुवद्वृत्त
स्य पूर्वापरक्षितिजवृत्तसं पातयोः संबंधत्वात्॥ अथान्यस्मिन्दिने सूर्योदयास्ताव ग्रांशांतरेण याम्योत्तरे भवत इति सूर्योदयास्तस्थ
नाभ्याग्रांशांतरेणोत्तरयाम्यो पूर्वापरस्थानं भवतीति क्षितिजस्य महत्वाद्दूरत्वाच्च तदानेन पूर्वापरज्ञानमशक्यमतस्तत्सूत्रेण स्वाभी
ष्टप्रदेशे ज्ञानार्थमभीष्टसमस्थले क्षितिजानुकारं वृत्तं कृतं॥ तत्रापि सूर्योदयास्तसमसूत्रेण स्थलज्ञानस्य दुःशकत्वाच्छायार्थं शंकु
च्छाया॥ तथापि सूर्योदये छायानंत्याद्वृत्तपरिधौ तदग्रस्याभावः॥ परंतु यथा यथा सूर्य ऊर्ध्वं भवति तथा तथा छाया ह्रासाद्वृत्तछा
याग्रं परिधौ यदा प्रविशतीति तत्स्थाना तात्कालिको वक्ष्यमाणभुजो व्यस्तोर्ध्वज्याकारेण दंडयस्तद्व्यक्रमज्यायत्र परिधिप्रदेशे लगति
तत्र शंकुस्थानस्य पश्चिमा॰ छायाग्रस्य पूर्वापरसूत्राद्भुजांतरेण याम्योत्तरपतनात्॥ सूर्यपरिदिशि छायापतनाच्च॰ एवं दिना
परार्धे सूर्यो यथा यथाधः संचरति तथा तच्छायावृत्तैः॥ शंकुच्छायावृत्तपरिधौ यत्र यदा निर्गच्छति तात्कालिको वक्ष्यमाणभु
जो व्यस्तोर्ध्वज्याकारेण तत्स्थानादेव यस्तद्व्यक्रमज्यायत्र परिधिप्रदेशे लगति तत्र शंकुस्थानस्य पूर्वा॰ तत्सूत्रं पूर्वापरसूत्रं॰ इदं
शंकोरूपलक्षणत्वेन ज्ञानं तथा छायोपलक्षणेनापि प्रदेशस्य पूर्वापरसूत्रज्ञानं॥ तथाहि॰ छायाग्रं विशति तत्रापरा॰ छा
याग्रं निर्गच्छति तत्र पूर्वा॰॥ तत्रापि प्रवेशनिर्गमयोरेककालत्वासंभवाद्यत्कालिको प्रवेशस्तत्काले छायायाः पश्चिमत्वं त
त्र वस्तुभूतं॥ तत्काले निर्गमस्य पूर्वत्वासंभवः॥ एवं निर्गमकाले निर्गमस्थानस्य पूर्वत्वं वस्तुभूतं॥ तत्काले प्रवेशस्य पश्चिमत्वासं
भवः॥ एवं निर्गमकाले निर्गमस्थानस्य पूर्वत्वं वस्तुभूतं॰ तत्काले प्रवेशस्य पश्चिमत्वासंभवः॥ एककालिकसिध्यर्थमुभयोरे
कतरं चिह्नं चाल्यं तत्कालिकभुजयोरंतरेण॰ तत्र पूर्वचिह्नं भुजांतरांगुलै रपरदिशि चाल्यं पश्चिमचिह्नं वा व्यस्तायनदिशि चा
ल्यं॥ तत्र सूत्रं सूत्रमध्यदेशस्य पूर्वापरसूत्रं॥ एतन्मध्ये स्थापितशंकोः छायाग्रप्रवेशनिर्गमचिह्नाभ्यां यथोक्तरीत्या भुजदा

श्रीः
३०

नेन सिद्धपूर्वापरसूत्रेण भिन्नत्वात्॥ तदुक्तं सिद्धांतशिरोमणौ॥ तत्कालापमजीवयोस्तु विवराच्छाकर्णमित्याहताल्लंबज्याप्तमि
तांगुलैरपरदिश्यैंद्रीस्फुटा चालितेति॥ तदेतद्भगवतालोकानुकंपयास्वल्पांतरत्वादेकतरबिंदुचालनं नोक्तं सुखार्थं किंचित्स्थू
लावेव निर्गमप्रवेशबिंदु पूर्वापराभिधावुक्तौ॰ एवं चाभीष्टस्थानं प्रवेशनिर्गमसूत्रमध्ये यथा भवति तथानेन प्रकारेण मंडलकेंद्रे
शंकुस्थापनादिनाभीष्टप्रदेशपूर्वापरदेशो साध्य इति॥ तन्मध्ये दक्षिणोत्तररेखा बिंदुद्वयोत्पन्नमध्यमत्स्यरेखैवेति॰ याम्यो
याम्योत्तरमध्ये पूर्वापररेखा द्विमध्यमत्स्येनेति याम्योत्तरादिशोरित्यादि सम्यगुक्तं॥ ननु पूर्वापरबिंदुभ्यां मत्स्येन यादक्षि
णोत्तररेखा तदग्राभ्यां मत्स्येन रेखा पूर्वापरबिंदुस्पृष्टैवेति पूर्वं तस्या एव बिंदुतरत्वेन सिद्धत्वात्पुनः साधनं व्यर्थमन्यदक्षिणो
त्तररेखाया असंगतत्वापत्तेरिति चेन्नसत्यं॰ दक्षिणोत्तररेखा शुद्ध्यर्थमेव पूर्वापरबिंदुस्पृष्टरेखायाः पुनः साधनमिति केचित्॥
वस्तु॰ तस्तु दक्षिणोत्तरपूर्वापरसूत्रसंपातरूपाभीष्टस्थानात्केंद्रात्प्रागुक्तं वृत्तस्य वक्ष्यमाणोपयोगित्वेनावश्यकत्वात्तस्य च
पूर्वापरबिंद्वंतरस्त्राधिकव्याससूत्रत्वाद्विवतरेरेखाम्लाग्रयोर्वर्धनीयाः सा तत्र वृत्ते पूर्वापररेखा भवति॥ तस्या बिंदो रू
पर्यधरश्च वक्रत्वं कदाचित्स्यादत॰ प्रथममेव पूर्वरेखासिध्यर्थे बिंद्वंतरसिद्धमस्य मुखपुच्छगतरेखायां बिंद्वंतराधिक
त्वेन तदुत्पन्नमत्स्यरेखायाः तत्र्याः सुतरामधिकत्वेन पुनः पूर्वापररेखासाधनं युक्ततरमिति तत्वं॰ एवमेवाग्य वहितदिग्
द्व्यांतरोत्पन्नलघुमत्स्यैश्चतुर्भिः सूत्रैर्वृत्ते कोणदिशः तदिदमभीष्टस्थानकेंद्रकमंडले दिगष्टकं सिद्धं॥ ४॥ ॥अथदि
दिक्सूत्रसंपातभूपाभीष्टस्थानात्तात्कालिकछायाग्रस्थानमाह॥ चतुरस्रं बहिः कुर्यात्सूत्रैर्मध्याद्विनिर्गतैः॥ भुजसूत्रांगुलैः
स्तत्र दत्तैरिष्टप्रभास्मृतेति॥ मध्यात्॥ अभीष्टस्थानाद्दिग्रेखासंपात्॥ रूपाद्विनिर्गतैः॥ निःसृतैः सूत्रैः अष्टदिग्रेखारू
पैः॥ बहिः दिक्सूत्रसंपातकेंद्रकवृत्ताद्बहिः अनेन वृत्तकरणं पूर्वमनुक्तं द्योतितं॥ अन्यथा बाहिरित्यस्यानुपपत्तेः॥
पूर्ववृत्तग्रहणेन तु दिग्रेखासंपातस्य मध्यत्वानुपपत्तेः॥ चतुरस्रं कोणरेखाधिकसूत्रकर्णद्व्यतुल्यं समचतुर्भुजं कुर्यात्

171
1941

सू०टी० ३१

नथापदेनत्रोनं० नत्रचतुरस्त्रे० भुजस्त्रांगुलैः॥वक्ष्यमाणभुजमितस्त्रस्त्रांगुलैः॥निर्गमप्रवेशकालिकैः॥दर्हैः॥पूर्वापरसूत्रादर्भ
प्रावदीयमानस्तत्रवर्तनेयस्मिन्प्रदेशेभुजाग्रंतत्प्रदेशेइष्टप्रभानिर्गमप्रवेशान्य। तत्र नैकालिकछायाग्रभुकंप्रानीतिस्युःइकस्तत्रसं
पातस्थशंकुनाज्ञेया॥अत्रोपपत्तिः॥वक्ष्यमाणभुजस्यछायाग्रपूर्वापरसूत्रांतरत्वेनप्रतिपादितत्वादिष्टछायाग्रेहमुक्तादिशाज्ञातं
सम्यकचतुरस्त्रकरणंवक्ष्यमाणाग्रासाधकप्राच्यपररेखानुकाररेखाभावनांतस्तर्क्षाहिवाकिजुतासिध्यर्थमिति॥५॥ ॥अथपू
र्वापररेखायाः संज्ञांतरमाह॥प्राक्पश्चिमाश्रितारेखाप्रोच्यतेसममंडलं॥उन्मंडलंचविषुवन्मंडलंपरिकीर्त्यतेइति॥प्राक्पश्चिम
श्रिताः पूर्वपश्चिमसंबंधासाधितारेखासमवृत्तमुच्यसेव रेखाः उन्मंडलं०विषुवन्मंडलं० च० समुच्चये० उभयसंज्ञकं कथ्यते॥अ
त्रोपपत्तिः॥क्षितिजपूर्वापरवृत्तसंपातौपूर्वापरे० तत्सूत्रंपूर्वापरसूत्रमितिपूर्वापरवृत्तस्यभूमावूर्ध्वाधरानुकारिवृत्तत्वेनादर्शना
द्रेखाकारतयैवदर्शनाच्च पूर्वापरवृत्तमपितत्सूत्रंपूर्वापरवृत्तस्यसममंडलत्वेनाभिधानातद्रेखासममंडलसंज्ञोक्ताः॥अथस्व
निरक्षदेशक्षितिजवृत्तस्योन्मंडलाख्यस्यतत्संयोगयोः सल्लग्नत्वात्तन्मध्यसूत्रत्वेनपूर्वापरसूत्रस्यापिसत्वात्पूर्वापरसूत्रमु
न्मंडलसंज्ञं० एतेनान्यदेशक्षितिजसंज्ञायास्वदेशक्षितिजसंज्ञाफलतरांसिद्धेतिपूर्वापरसूत्रस्यक्षितिजवृत्तसंज्ञाद्योतिता॥पू
र्वापरस्थानयोः क्षितिजवृत्तस्यसल्लग्नत्वाउद्धिरिवत॥वृत्तस्यक्षितिजानुकारित्वाच्च॥एवंनिरक्षदेशपूर्वापरवृत्तंविषुवन्मंडलाख्यंपू
र्वापरस्थानयोः संलग्नमितितन्मध्यसूत्रत्वेनापिपूर्वापरसूत्रस्यासिद्धत्वात्पूर्वापरसूत्रंविषुवन्मंडलसंज्ञं० क्रांतिवृत्तस्यदृग्वृत्त
स्यचवत्त्वात्कदाचित्कत्वेपूर्वापरस्थानसंलग्नत्वात्संज्ञानोक्तेतिध्येयं॥६॥ ॥अथाग्राज्ञानमाह॥रेखाप्राच्यपरासा
ध्याविषुवद्भाग्रगातथा॥इष्टछायाविषुवतोर्मध्यमग्राभिधीयते॥इति॥तस्मिंश्चतुरस्त्रेपूर्वापररेखातउत्तरभागेविषुवद्भाग्र
गाअक्षभाग्रप्रदेशस्थ० अक्षभांगुलांतरितेत्यर्थः॥प्राच्यापरारेखा० पूर्वापररेखानुकारारेखा० तथा० सर्वतस्तुल्यांतरेण०
च० थेष्टछायाग्ररेखाभुजांतरेणतथाक्षभांतरेणकार्या० अनंतरं० इष्टछायाविषुवतोः॥इष्टछायाग्ररेखाक्षभाग्ररेखयोरि
त्यर्थः॥मध्यं० चतुरस्त्रेंगुलात्मकमंतरालंसर्वतस्तुल्यं॥अग्राकर्णवृत्ताग्रा० उच्यते० अत्रोपपत्तिः॥भुजस्यकर्णवृत्ताग्राप श्रीः ३१

भासंस्कारणाग्रेउक्तत्वाद्दक्षिणगोलेपलभाधिकोत्तरभुजसद्भावेनपलभोनोभुजोग्रेतिप्राच्यपरसूत्रादुत्तरभागेक्षभाग्रेरे
खाभुजमध्येभवतीतिद्वयोरेखयोरंतरमग्रापलभोनभुजरूपा० एवमुत्तरगोलेउत्तरभुजस्यपलभात्मत्वाद्भुजोनपलभाग्रेति
पलभारेखाप्राच्यपरसूत्रादुत्तरभागस्थभुजरेखातोथग्रांतरेणोत्तरादिशातिद्वयोरंतरंभुजोनपलभारूपंकर्णवृत्ताग्रा० ए
वंदक्षिणभुजस्यपलभोनाग्रात्वात्पलभायुतोभुजोग्रेतिप्राच्यपरसूत्राद्भुजाग्रपलभाग्ररेखयोः क्रमेण॥याम्योत्तरत्वात्तयोरंत
रालंपलभाभुजैक्यरूपमग्रा० पलभायाः शंकुतलानुकूलत्वात्सदोत्तरत्वंछायासंबंधाद्युक्तं॥गोलेशंकुतलस्यदक्षिण।त्वा
दग्रहात्परिदिशाछायासद्भावाच्च॥अतएवप्राच्यापरसूत्राद्दक्षिणभागेदक्षिणभुजवशाद्भाग्ररेखाकल्पनेउक्तानुलत्वास
भ्युत्तरभागंपूर्वापरसूत्राददिशीतिविषुवद्भाग्रगेत्यत्रव्याख्यातं॥७॥ ॥अथप्रसंगाद्भातछायातःकर्णज्ञानंतछुद्धिंचा
ह॥शंकुछायाकृतियुतेर्मूलंकर्णोस्यवर्गतः॥प्रोज्झ्यशंकुकृतिंमूलंछाया० शंकुर्विपर्ययादिति० द्वादशांगुलशंकुर्छायो
र्वर्गयोगात्पदंछायाकर्णः स्यात्॥अथास्यशुद्धिरूपंछायासाधनमाह॥अस्येति० छायाकर्णस्यवर्गतः शंकुवर्गंचतुश्च
त्वारिंशादधिकंशतं० विशोध्य० मूलंछाया० प्रकारांतरेणछायाकर्णः शुध्धिमाहशंकुरितिविपर्ययात्॥छायासाधनवैप
रीत्यात् छायाकर्णवर्गाछायावर्गंविशोध्यमूलमित्यर्थः॥शंकुर्द्वादशांगुलमितःस्यात्॥अत्रोपपत्तिः॥द्वादशांगुलशं
कुः कोटिरक्षभाभुजस्तत्कृत्योर्योगपदंकर्णइत्यक्षकर्णः॥कर्णइत्याद्यक्षक्षेत्रात्साद्युक्तरीत्योपपन्नं० ननुदिक्साधनोत्त
रमिष्टप्रभाग्राकर्णसाधनंभगवतासर्वज्ञेनकिमर्थमुक्तं० अग्रेग्रादीनांस्वतंत्रतयोक्तत्वात्॥नचविनागणितेश्रममग्राज्ञाना
मिदंयुक्तमुक्तमितिवाच्यं॥वक्ष्यमाणभुजज्ञानस्याग्रोपजीव्यत्वेनतस्याश्चभुजोपजीव्यत्वेनान्योन्याश्रयात्गणितज्ञानाग्र
तव्याः पुनःसाधनस्यव्यर्थत्वाच्च॥नचभुजस्त्रांगुलैर्दत्तैरित्यनेनेष्टछायाग्रंज्ञातमिति० किंतुनइत्यादिकसंल्लसंपातस्थ
शंकोर्दत्तपरिधौछायाग्रज्ञानात्पूर्वापरसूत्रांतरेभुजसद्भावाद्विनागणितंभुजोपिज्ञातइतिनान्योन्याश्रयइतिवाच्यं॥त

173/1941

थापिभगवतः सर्वस्यापि प्रयोजनोक्तेरनुचितत्वात्॥ विनाप्रयोजनंमंदोपिरप्यभावा न्न० नहिदिक्साधने प्रभुजादिकमाव
श्यकं तदुक्तिर्युक्ता॥ किंचकर्णसाधनस्यगणितोक्त्या वक्ष्यमाणकर्णसाधनतुल्यत्वेनात्र कथनमुचितं नहिदिक्साधनार्थं
भाकर्णमित्याह तदिति सिद्धांतशिरोमण्युक्तिवदत्र छायाकर्ण उपयुक्तो येन तदुक्तियुक्तेति चतुरस्रामित्यादि श्लोकचतुष्टय
मन्येन मंदबुद्धिनापि तन्नभगवतोक्तमिति चेन्मैवं भुजसाधनोपजीव्यायाश्छाया एतदुक्त प्रकारेण सिद्धो दिशः सम्यक् सि
द्धाइति दिक्साधनशुद्ध्यर्थं मग्रासाधनं प्रकारांतरेणापि वक्ष्यमाणात्रिज्या दृतीयाग्रयात्रिज्यालभ्यते तदानयागतया
स्याइति दिक्साधनशुद्ध्यर्थं मग्रासाधनं प्रकारांतरेणापि वक्ष्यमाणात्रिज्यादृतीयाग्रयाफमिति
कृत्यनुपातेन साधितकर्णसंवादेन शुद्ध्यवगमार्थं कर्णसाधनं चोक्तं॥ अनयाग्रया कर्णस्तदा त्रिज्यादृतीयाग्रयाफमिति
फलस्य त्रिज्यातुल्यस्यानयनार्थं वा कर्णसाधनमिति केचित्॥ वस्तुतस्तु मंडले छाया प्रवेशनिर्गमस्थानस्थितत्पूर्वापर
बिंदोः प्रत्येकं रेखेति रेखाद्वयस्य सर्वतस्तुल्यांतरं कार्यं तेनान्यतरेणान्यरोगबिंदुश्चाल्यस्तो पूर्वापरबिंदुत द्रेखा तद्रेखामध्य
स्थानस्य पूर्वापररेखेति तत्रोभयबिंदुरेखयोरंतरांगुलमानं स्वल्पं तद्गणयितुमशक्यतः प्रत्येकरेखे प्रकल्प्य तन्म
ध्यकेंद्रात्सर्ववृत्तं प्रत्येकमिति वृत्तद्वयं कुर्यात् तत्र स्वस्ववृत्तस्वस्वप्राच्यपररेखास्पृष्टाकार्या ताभ्यां स्वस्वकालिकौ भुजौ
स्वस्ववृत्तं दंयोस्तदग्रे छायाग्ररेखे स्वस्ववृत्ते कार्ये॥ स्वस्वप्राच्यपरसूत्रात्स्वस्ववृत्ते उत्तरभागे क्षभांगुलांतरेण रेखे कार्ये तत
स्वस्ववृत्ते स्वस्वतद्रेखयोरंतरं स्वस्ववृत्ते उभयकालिकर्णवृत्ताग्रे बहुत्वेन गणयितुं शक्यो तदंतरं पूर्वबिंदोर्याम्योत्तरकर्ण
वृत्ताग्रा साधनकथनेनानीतं॥ भुजांबरस्य बिंदंतरत्वात्तस्य चाग्रांतरत्वेन फलितत्वात्॥ विषुवद्दिने गोलभेदेषु भुजांत
रमग्रायोगाइति० नंतोक्तरीत्या बिंदोश्चाल्यस्तत्सूत्रं पूर्वापरसूत्रं स्फुटमित्याशयेन भगवताग्रानिरूपितातस्याः शुद्ध्य
र्थं कर्णोपि साधित इति तत्वं॥ ८॥ ॥ अथ पूर्वाधिकारे क्रांत्याद्यानयनमुक्तं तत्पूर्वाधिकारावगतग्रहात्केत्यान्नसाध्य
मिति॥ श्लोकाभ्यामाह॥ त्रिंशत्कृत्यो युगे भानां चक्रं प्राक्परिलंबते॥ तद्गुणाद्भूदिनैर्भक्ताद्युगणाद्यदवाप्यते॥ ९॥ ॥
तद्दोस्त्रिघ्नादशाप्तांशा विज्ञेया अयनाभिधाः॥ तत्संस्कृतात् ग्रहात्क्रांतिछायाचरदलादिकमिति॥ भानां चक्रं॥ राशि

175/1941

नांचक्रं॥ क्रांतिवृत्तं तत्स्थविक्षेपमितस्वात्मकाश्रभोतनक्षत्रगुणैर्युक्तमित्यर्थः॥ युगे महायुगे प्राक्पूर्वविभागे० त्रिंशत्कृत्यः॥ त्रिंशत्संख्या
कृति विंशति० षट्शतमित्यर्थः॥ परिलंबते भुवाधारभगोलस्थानात्तदारनवलंबते॥ अत्र परिलंबते॥ इत्यनेन भचक्रपूर्णभ्रमणाभा
वयुक्तोन्यथाग्रहभगणप्रसंगेन मध्याधिकार एवैतदुक्तं स्यात्॥ तथा च तद्दारमवलंबनोत्क्षापरावर्त्य यथास्थितं भवतीत्यागतं तत्रा
पिस्वस्थानात्तथैव पश्चिमतोप्यवलंबते इति सूचितं॥ एवं च भचक्रं पश्चिम तईश्वरेछया प्रथमतः कतिविद्भागेश्चलति ततः परा
वृत्य यथास्थितं भवति ततोपि तद्भागैः क्रमेण पूर्वतश्चलति ततोपि परावर्त्य यथास्थितमित्येका विलक्षणो भगणः॥ तेन प्रागित्यु
पलक्षणं॥ पश्चिमावलंबनानुक्तिस्तु संवादकालेन तदभावात्॥ अत्र विंशत्कृत्वेतिपाठः प्रामादिकः॥ युगे षट्शतमित्याह॥
भचक्रं प्राग्विलंबते इति संमसिद्धांतात्॥ विरोधात्॥ तलश्चाञ्चलितं चक्रमिति ब्रह्मसिद्धांतोक्तेश्च० अहर्गणात० षट्शतग
णितात्० भूदिनैः॥ युगीयसूर्यसावनदिनैः॥ भक्तात्तत्फलं भगणादिकं प्राप्यते तस्य भगणत्यागेन राश्यादिकस्य भुजः कार्य
स्तस्माद्दशांशा॥ दशाभिर्भुजनेनाप्तभागास्त्रिगुणिताः अयनसंज्ञकाः ज्ञेयाः॥ भुजांशास्त्रिगुणिताद्दशभक्ताः फलमयनां
शाइति तात्पर्यार्थः॥ तत्संस्कृतात् तैरयनांशैर्भचक्रपूर्वापरचलनवशाद्युतहीनात् ग्रहात्॥ पूर्वापरचक्रचलनावगमस्त्व
यग्रहस्य षड्भानांतर्गतांतर्गतत्वक्रमेण क्रांतिछायाचरदलादिकं साध्यं न केवला दिक्शेषोक्तः॥ छाया वक्ष्यमाणाचरदलं चरं पूर्वाधि
कारोक्तं॥ आदिशब्दादयनवलनमायनदृक्कर्म संगृह्यते तद्यपि तत्संस्कृतात् ग्रहात्क्रांतिरित्येव वक्तव्यं अन्येषामत्र तदुपजीव्य
त्वात् ग्रहणं व्यर्थं तथापि क्रांतिरित्युक्त्या केवलक्रांतिज्ञानार्थं तत्संस्कृत ग्रहात्क्रांतिः साध्या पदार्थांतरोपजीव्याया क्रांतेः
साधनं तु केवलादित्यस्य वारणार्थं क्रांतिमात्रं तत्संस्कृतात् साध्यमिति सूचकं छायाचरदलादिकथनं॥ अत्रोपपत्तिः॥ ईश्वरेछया
क्रांतिवृत्तं स्वमार्गे पश्चिमतः सप्तविंशत्यंशैः क्रमोपचितैश्चलितं ततः परावृत्य स्वस्थाने आगत्य तत्स्थानात् पूर्वतः सप्तवि
शत्यंशैश्चलितं तथा च स्वस्थानादिभूतक्रांतिविषुवद्वृत्तसंपाताश्रितक्रांतिवृत्तप्रदेशो रेवत्यासन्नः प्रागानीतग्रहाभोगावधि
रूपः स्वस्थानात्पूर्वमपरत्र वा क्रांतिवृत्तमार्गगतः विषुवद्वृत्ते तद्भागस्य पश्चिमभागः पूर्वभागो वागतः संपातो तद्वृत्तयो

सं०टी०
२२

याम्योत्तरेत्तराभावात्क्रांत्यभावः पूर्वसंपातप्रदेशे तुतयोर्याम्योत्तरांतरत्वात्क्रांतिरुत्पन्नातोयथास्मिन्ग्रहभोगात्क्रांतिरसंगते
तिसंपातावधिकग्रहभोगात्क्रांतिर्युक्ता। तत्रसंपातावधिकग्रहभोगज्ञानार्थंपूर्वसंपातावधिकः पूर्वाधिकारोक्तोग्रहभोगोवर्तमान
संपातपूर्वसंपाताश्रितक्रांतिवृत्तप्रदेशयोरंतरभोगैरयनांशाख्यैः पूर्वसंपातप्रदेशस्यपूर्वपश्चिमावस्थानक्रमेणयुतहीनोभव
ति० कां। उपजीव्यपदार्थोअपिवर्तमानसंपातादुत्पन्नाइतितत्साधनमपितत्संस्कृतग्रहात्॥ अथायनांशज्ञानंतुषड्ज्ञातभगणेभ्यः
पूर्वानुपातरीत्याहर्गणात्ग्रहभोगोभगणादिकस्तत्रगतभगणात्मकंपरपूर्वभचक्रावलंबनंगतं। वर्तमानंत्वारभेपश्चिमावलंबना
द्राशिषट्कांतर्गतेराश्यादिकेपश्चिमावलंबनमनंतर्गतेपूर्वावलंबनं॥ तत्रापित्रिभांतर्गतानांतर्गतत्वक्रमेण चलनंपरावर्तनंचेति
भुजः साधितस्ततोनवत्यंशाः समविंशतिभागास्तदाभुजांशाः केइत्यनुपातेनगुणहरौनवभिरपवर्त्यभुजांशास्त्रिगुणितादश
भक्ताइतिसर्वमुपपन्नं॥ १०॥ ॥ अथोक्तस्यांतरस्यप्रत्यक्षसिद्धत्वमितिसार्धश्लोकेनाह॥ स्फुटंदृक्तुल्यतागच्छेदयनेविषुवद
ये॥ प्राक्चक्रंचलितंहीनेछायार्कात्करणागते॥ ११॥ ॥ अंतरांशैरियाद्रत्यपश्चाच्छेषैस्तथाधिकेइति। अयने। दक्षिणोत्तराय
णसंधौविषुवदये॥ गोलसंधौचलितंचक्रंदृक्तुल्यतां॥ दृष्टिगोचरतां। स्फुटमनायासं। गच्छेत्॥ तत्रप्रत्यक्षतस्तन्निर्णयतरंद
श्यतइत्यर्थः॥ तथाचसृष्ट्यादिकालेरेवतीयोगतारासन्नावधिमेषतुलायोः कर्कमकरयोः विषुवायनप्रवृत्तेरिदानीं त्वन्यंतु
तत्स्वरूपेप्रत्यक्षेइतिक्रांतिवृत्तंचलितमन्यथातदनुपपत्तेरितिभावः॥ ननुपूर्वापरयोरत्रवाचलितमितिकथंज्ञेयमित्यतआह
प्रागितिछायार्कात्॥ यद्दिनेसूर्यस्यायनदिक्परावर्तनमुदयेप्राच्यपरस्तत्वंछतंवातस्मिन्दिनेन्यस्मिन्दिनेवामध्याह्नछाया
तोवक्ष्यमाणप्रकारेणसूर्यः साध्यस्तस्मादित्यर्थः॥ करणागते। प्रागुक्तकरणानीतः स्पष्टः सूर्यस्तस्मिन्नित्यर्थः॥ न्यूनेसति।
अंतरांशैः। सूर्ययोरंतरांशैः। चक्रं। क्रांतिवृत्तं। प्राक्॥ पूर्वस्मिन्॥ चलितमितिज्ञेयं॥ अथ। यदि। अधिकेसति। शेषैः॥
सूर्ययोरंतरांशैः। चक्रं। आवृत्य। परिवृत्य। पश्चात्॥ पश्चिमाभिमुखं। तथाचलितमितिज्ञेयं॥ अत्रोपपत्तिः॥ छायातोवक्ष्य श्रीः
माणप्रकारेणसूर्योवर्तमानसंपातात्गणितागतस्तुरेवतीयोगतारासन्नाद्यावधितोतस्तयोरंतरमयनांशाः॥ तत्रक्रां २२

172
1941

तिरत्नस्यपूर्वचलनेगणितागतात्कांछायार्कोधिकोभवति॥ पश्चिमचलनेतुन्यूनोभवतीतिसम्यगुपपन्नं॥ ११॥ ॥ अथचराद्युप-
जीव्यांपलभामाह॥ एवंविषुवतीछायास्वदेशेयाद्दिनार्धजा॥ दक्षिणोत्तररेखायांसातत्रविषुवत्प्रभेति॥ स्वाभीष्टदेशे। एवंवि
षुवती। चलितविषुवद्दिनसंबंधाः रेवत्यासन्नस्थानस्याप्युपचाराद्विषुवसंज्ञातद्यावर्तकमेवमिति। दिनार्धजा। माध्याह्निकीचा
यन्मिता। द्वादशांगुलशंकोः छाया। दक्षिणोत्तररेखायां। निरक्षोत्तरदक्षिणदेशक्रमेणोत्तरस्यांदक्षिणस्यां। प्रभाया। दक्षि
णोत्तररेखात्वंविनामध्याह्नासंभवात्॥ सा। तन्मिताः तत्र। तस्मिन्नभीष्टदेविषुवत्प्रभा। अक्षभाभवति। एतेनद्वादशांगु
लशंकुः कोटिः पलभाभुजस्तत्कृत्योर्योगपदंकर्णइत्यक्षकर्णः कर्णइत्यक्षक्षेत्रंवक्ष्यमाणोपयुक्तंप्रदर्शितं॥ तदासूर्यस्यावि
षुवद्वृत्तस्थत्वाद्विषुवत्प्रभेतिसंज्ञोक्ता॥ १२॥ ॥ अथलंबाक्षयोरानयनमाह॥ शंकुछायाहतेत्रिज्येविषुवत्कर्णभाजिते॥
लंबाक्षज्येतयोश्चापेलंबाक्षौदक्षिणौसदेति॥ त्रिज्येद्विस्थानस्थे। शंकुछायाहते। एकत्रद्वादशगुणिता। परत्रप्रागुक्तयावि
षुवत्प्रभयागुणिता। विषुवत्कर्णभाजिते। उभयत्राक्षकर्णेनभक्ता। फलेक्रमेण। लंबज्याक्षज्ये। तयोर्ज्ययोर्धनुषीक्रमेणलंबाक्षौ।
सदाभयगोलेदक्षिणदिकस्थौभवतः॥ अत्रोपपत्तिः॥ याम्योत्तरवृत्तेनिरक्षस्वदेशात्पूर्वापरवृत्तयोर्यदंतरंतदक्षः॥ याम्योत्तर
वृत्तेदक्षिणक्षितिजप्रदेशाद्विषुवद्वृत्तस्ययदंतरंतल्लंबः॥ उभाइर्ध्वगोलेस्वपूर्वापरवृत्ताद्दक्षिणौ। तज्ज्याक्षलंबज्येभुजकोटित्रिज्या
कर्णइत्यक्षक्षेत्राद्दक्षकर्णकर्णोद्वादशपलभेकोटिभुजौतदात्रिज्याकर्णेकावित्यनुपाताभ्यांलंबाक्षज्ये। तद्धनुषीलंबाक्षावि
त्युपपन्नं॥ १३॥ ॥ अथमध्याह्नछायातोक्षानयनंश्लोकाभ्यामाह॥ मध्यछायाभुजस्तेनगुणितात्रिभमौर्विका॥ स्वकर्णा
प्ताधनुर्लिप्तानतास्ताद्दक्षिणेभुजे॥ १४॥ ॥ उत्तराश्चोत्तरेयाम्यास्ताः सूर्यक्रांतिलिप्तिकाः॥ दिग्भेदेमिश्रिताः साम्येविश्लि
ष्टाश्चाक्षलिप्तिकाइति॥ अभीष्टदिनेमाध्याह्निकीछायाभुजसंज्ञोज्ञेयः॥ तेनभुजेनत्रिज्यागुणिता माध्याह्नछायाकर्णेनभक्ता।
फलस्यधनुः कलाः नताः नतसंज्ञाः। नतकलाः। दक्षिणेभुजे। मध्याह्नछायारूपभुजे। प्राच्यपरसूत्रमध्याद्दक्षिणदिक्स्थेस
ति। उत्तरादिक्काः उत्तरेभुजे। दक्षिणाः वोविषयव्यवस्थार्थकः ताः नतकलाः सूर्यक्रांतिकलाः प्रागुक्ताः दिग्भेदे। स्वादिशोभिन्न

त्वे॰ मिश्रिताः संयुक्ताः॥ साम्ये॰ अभिन्नदिक्के॰ विश्लिष्टाः अंतरिताः चोविषयव्यवस्थार्थकः॥ अक्षकलाः भवंति॥ अत्रानावश्यक
भुजसंज्ञयाभवत्वोपपत्तिरुक्ता॰ तथाहि॰ द्वादशांगुलशंकुः कोटिर्मध्याह्नछायाकर्णेवामध्यछायाभुजस्तथास्वस्तिकामध्याह्नकाले
स्वसंस्थयाम्योत्तरवृत्तेयदंतरेणनतवृत्तानतकलाः तज्ज्ञानतांशज्यामध्याह्नोन्नतांशज्यारूपशंकोः त्रिज्याकर्णेवाभुज इतिमध्याह्नछाया
कर्णेमध्याह्नछायाभुजस्तदात्रिज्याकर्णेकोभुज इत्यनुपातेननतज्यातधनुरत्रकलात्मकत्वान्नतकलाः॥तायसंबन्धाइतिछायादिविप
रीतदिक्काः॥ अथकांत्यंशाक्षांशायोरेकदिक्केयोगेननतांशाइतिदक्षिणानतकलाः दक्षिणक्रांतिकलाभिर्हीना अक्षांशाःभवंति॥
क्रांत्यंशाक्षांशयोभिन्नदिक्केतरेणनतांशायदिदक्षिणास्तदाक्रांत्यूनाक्षांशास्यनतत्वादुत्तरक्रांतियुताअक्षांशाः॥यदित्तरास्तदा
क्षीनक्रांतेर्नतत्वांनतोनोत्तरक्रांतिरक्षइतिसम्यगुपपन्नंकिंचिनुभुजग्रहणादभीष्टकालेप्राच्यपरसूत्रछायाग्रवदंतरेणयाम्यमु
त्तरंवाभुजस्तंस्वस्वांतरान्मध्यछायांप्रकल्प्यनस्याः कर्णेचानियोक्तदिशानतलिप्तास्ताअभीष्टकांतिसंस्कृताअक्षांशाःभवंतीत्या
द्युः॥१५॥ ॥अथाक्षासलभानयनमाह॥ तेभ्योक्षज्यावनद्वर्गप्रोज्झत्रिज्याकृतेःपदं॥ लंबज्यार्कगुणाक्षज्याविषुवद्भाथलंबये
ति॰ ताभ्योक्षकलाभ्योक्षज्यामवंति॰ वसमुच्चयं॰ अक्षज्यावर्गत्रिज्यावर्गोत्यक्त्वाशेषान्मूलंलंबज्या॰ अनंतरंअक्षज्याद्वादशगुणा
लंबज्या॰ लंबज्याया॰ गुणनस्यभजनसंबन्धाद्वक्रेत्यर्थसिद्धं॥ अत्रोपपत्तिः॥ अक्षकलानांज्याक्षज्यास्तस्यास्त्रिज्याकर्णेभुज
त्वात्तद्वर्गोनात्त्रिज्यावर्गान्मूलंलंबज्याकोटिः॥ तथाक्षज्याभुजस्तदाद्वादशकोटिःकोभुज इत्यनुपातेनविषुवच्छायेति॥१६॥ ॥
अथाक्षज्ञानेननतभागेभ्यः क्रांतिद्वारास्पष्टसाधनंसार्धश्लोकाभ्यामाह॥ स्वाक्षार्कनतभागानांदिक्साम्येंतरमन्यथा॥ दिग्भेदे
पक्रमः शेषस्तस्यज्यात्रिज्ययाहता॥१७॥ ॥ परमापक्रमज्याप्ताचापंमेषादिगोरविः॥ चक्रार्धेप्रोह्यचक्राच्छोतुलादौभार्धसं
युताद्॥१८॥ ॥ मृगादौप्रोह्यभगणामध्याह्नेर्कःस्फुटोभवेत्॥ इतिस्वदेशाक्षांशोदृष्टनीयमध्याह्नसूर्यनतांशयोः॥ भाग
नांबहुत्वाद्बहुवचनं॥ एकदिक्के॰ अंतरं॥ अन्यदिक्के॰ अन्यथा॰ योगः कार्यः शेषः उक्तसंस्कारसिद्धांकः॥ क्रांतिः स्यात्॥ तस्या
पक्रमस्यज्या॥ त्रिज्ययागुण्या॰ परमक्रांतिज्यया प्राग्युक्तयाभक्ता॰ फलस्याधनुर्भागादिकं॰ मेषादिगःमेषराशित्रितयांतर्गतो श्रीः
३४

कःस्यात्॥ कर्कादित्रयेर्कः॥ चक्रार्धात्॥ षड्राशितः॥ आगतार्कंत्यक्त्वा॰ शेषं॰ माध्याह्नकालेस्फुटोर्कःस्यात्॥ तुलादित्रितये॰ षड्युतादा
गताकर्कात्॥ स्फुटोर्कोज्ञेयः॥ आगतोर्कः षड्युतः स्फुटोर्कस्यादित्यर्थः॥ मकरादित्रयेर्केद्वादशराशिभ्य आगतार्कंत्यक्त्वाशेषमय
नांशासंस्कृतः स्फुटार्कः स्यात्॥ करणागतज्ञानार्थंवस्तायनांशासंस्कृतइत्यर्थसिद्धं॥ एवंतत्संस्कृतग्रहात्क्रांतिःसाध्येदित्यर्थः॥
स्योक्तेः अत्रोपपत्तिः॥ एकदिशिक्रांत्यक्षयोगान्नतंदक्षिणमतोक्षोनंक्रांतिर्दक्षिणा॥ भिन्नदिशिक्रांत्यूना क्षोनतंदिशिदक्षि
णमनेनाक्षोहीनः क्रांतिरुत्तराः अक्षोनक्रांतिर्नतं॥ उत्तरमतोक्षयुतंक्रांतिरुत्तरा॰ अस्याज्याक्रांतिज्या॰ परमक्रांतिज्ययात्रिज्या
भुजज्यालदानयार्केनेष्टासायनार्कभुजज्या॰ तद्धनुः॰ सायनार्कभुजः॥ भुजस्यचतुर्षुपदेषुतुल्यत्वात्प्रथमपदेमेषादित्रयेसूर्य
स्येवभुजत्वात्भुजएवसूर्यः॥ कर्कादित्रयेद्वितीयपदेषड्राशिनास्यार्कस्यभुजत्वाद्भुजोनषड्भमर्कः॥ एवंतृतीयपदेतुलादित्रये
षड्भेनहीनार्कस्यभुजत्वात्षड्भयुतोभुजोर्कः चतुर्थपदेमकरादित्रयेसूर्योनभगणस्यभुजत्वाद्भुजोनभगणोर्कइतिसर्वंपरी
त्यास्फुटगमतरं॥१९॥ ॥अथगतस्फुटसूर्यस्यकरणागतस्फुटतुल्यत्वज्ञानमागतस्फुटसूर्यान्मध्यमस्यकरणागतमध्यमार्क
न तुल्यत्वेविशेषवक्तुंश्लोकार्धेनाह॥ तन्मांदमसकृद्वामंफलंमध्योदिवाकरइति॥ तस्मादागतस्फुटसूर्यान्मांदंफलंमंदफलंअस
कृदनेकवारं॰ वामंव्यस्तं॰ संस्कृतंस्फुटसूर्ये अहर्गणानीतः स्फुटसूर्यः स्यात् अयमर्थः स्फुटसूर्यंमध्यमंप्रकल्प्यसूर्यमंदो
च्चात्प्रागुक्तरीत्यामंदफलंधनमृणमानीयस्फुटसूर्येऋणंधनंकार्यंमध्यमसूर्यः अस्मादपिमंदफलंस्पष्टसूर्येव्यस्तंसंस्कृतोमध्य
मोस्मादपिमंदफलंस्पष्टेव्यस्तंमध्यमार्कइतिमावदविशेषस्तावदसकृत्साध्योर्कोमध्योहर्गणानीतोभवतीति॰ तथाचमध्य
मार्कात्स्फुटार्कसाधनेएकवारंमंदफलसंस्कारः॥ स्फुटार्कान्मध्यार्कसाधनेत्वनेकवारंमंदफलंव्यस्तसंस्कारइति॰ विशेषोभि
हितः॥ अत्रोपपत्तिः॥ मध्यमसूर्यादानीतमंदफलेनसंस्कृतोमध्यः स्फुटोर्कोभवति॰ अयंवातेनैवमंदफलेनव्यस्तंसंस्कृतोम
ध्योभवति॰ तत्रस्फुटार्कान्मध्यार्कसाधनेमध्यमज्ञानासंभवात्तदानीतमंदफलज्ञानमशक्यं॥ अतः स्फुटसूर्यंमध्यमंप्र

129
194

कल्प्यानीतमंदफलेनाभिमतासन्नेनस्फुटोर्कोव्यस्तंसंस्कृतोमध्यमसन्नः॥ अस्मादपिमंदफलमभिमतासन्नमपिपूर्वस्मात्सूक्ष्ममितिया
वदविशेषंमध्यार्कसाधितंमंदफलंभवतीतिनिरवद्यंसर्वमुक्तं॥ ॥अथमध्याह्नेछायाकर्णयोरानयनंविवक्षुः प्रथमंतात्कालि
कनतांशज्ञानंकथयंस्तद्भुजकोटिज्येकार्यइत्याह॥ स्वाक्षापक्रमयोर्योगोदिक्साम्येंतरमतोन्यथा॥ शेषंनतांशाः सूर्यस्यतद्बाहुज्या च
कोटिज्येतिदिक्साम्ये। एकदिक्के० यतिभंगोवार्षत्वान्नदोषः॥ स्वदेशाक्षांशमध्याह्नकालिकसूर्यक्रांत्यंशयोर्योगः॥ अतउक्ता
देकदिक्कात्॥ अन्यथावैपरीत्येभिन्नदिक्केइत्यर्थः॥ अक्षांशक्रांत्यंशयोरंतरंकार्यं० शेषं० संस्कारोत्पन्नं० सूर्यस्यमध्याह्नेनतां
शाः॥ तेषांनतांशानांभुजरूपाणांज्याः कोटिज्याः तदंशानवतिशुद्धाः कोटिस्तत्उत्पन्नाज्याः च० समुच्चयेसाध्या अत्रोपपत्तिः॥
याम्योत्तरवृत्तेसूर्यस्यमध्याह्नेस्वस्वस्तिकादंतरंनतांशाः॥ विषुवद्वृत्तपर्यंतमक्षांशाः॥ विषुवद्वृत्तसूर्ययोरंतरंक्रांत्यंशाः॥ अतो
दक्षिणक्रांतौक्रांत्यक्षयोगोनतांशाउत्तरक्रांतौक्रात्यूनाक्षोक्षोनक्रांतिर्वादक्षिणोत्तरनतांशाः॥ तेषांज्याखगजाभुजः॥ तत्को
टिज्यामहाशंकुः कोटिः॥ त्रिज्याकर्णइतिछायाक्षेत्रेतदंशानांभुजत्वात्॥ २०॥ ॥ अथछायाकर्णयोरायनमहाशंकुमानां
गुलाभ्यस्तेभुजत्रिज्येयथाक्रमं॥ कोटिज्ययाविभज्यासेछायाकर्णावहर्दलेइति॥ भुजत्रिज्ये। नतांशज्यात्रिज्येइत्यर्थः॥ शंकोः
प्रमाणांगुलानिद्वादशतैर्गुणितेकार्ये० उभयत्र० कोटिज्यया: नतांशोननवत्यंशानांज्ययेत्यर्थः॥ भक्ताः लब्धे० द्व० यथाक्रमं॥
भुजज्यात्रिज्यास्थानीयफलक्रमेण० मध्याह्ने० छायातत्कर्णौभवतः अत्रोपपत्तिः॥ द्वादशांगुलशंकुः कोटिरिष्टछायाभुजस्त
त्कृत्योर्योगपदंकर्णइतिछायाकर्णः कर्णइतिछायाक्षेत्रे॥ महाशंकुकोटौदृग्ज्यात्रिज्येभुजकर्णौतदाद्वादशांगुलशंकुकोटौकावि
त्यनुपातेनमध्याह्नकालेछायातत्कर्णौभवतः॥ साधकयोस्तात्कालिकत्वादिष्टमुपपन्नं॥ २१॥ ॥अथभुजसाधनंविवक्षुः
प्रथमंमग्रांकर्णाग्रेआनयति० क्रांतिज्याविषुवत्कर्णगुणाप्ताशंकुजीवया॥ अर्काग्रास्येष्टकर्णघ्नीमध्यकर्णोद्धृतास्वकेति॥
सूर्यक्रांतिज्या० अक्षकर्णगुणिता० शंकुजीवया० शंकुर्द्वादशांगुलस्तद्भाज्यातयेत्यर्थः॥ द्वादशभिरितिफलितं० भक्ता श्री:
फलंसूर्यस्याग्रा० उपलक्षणात्ग्रहस्यापि० इयमग्रास्वाभिमतकालिकाछायाकर्णेनगुणिता० मध्यकर्णेनहृता० कर्णस्य० या २५

सस्य० मध्यं० अर्धमितिमध्यकर्णोव्यासार्धं० त्रिज्यातयेत्यर्थः॥ पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्य मवीराश्चेतिसूत्रेण
मध्यपदस्यपूर्वनिपातः॥ भक्ताः फलंस्वेष्टकास्वकर्णाग्रास्यात्॥ अत्रोपपत्तिः॥ क्रांतिःज्योन्मंडलकोटिरग्राक्षितिजेकर्णः कुज्या
भुजइत्यक्षक्षेत्रेद्वादशकोटावक्षकर्णः॥ कर्णस्तदाक्रांतिज्याकोटौकः कर्णइत्यनुपातेनाग्राः त्रिज्यावृत्तेइयंककर्णवृत्ताग्रेत्युपपन्नं
॥ २२॥ ॥अथभुजानयनंश्लोकामाह॥ विषुवद्भायुताकाग्रायाम्येस्यादुत्तरेभुजः॥ विषुवत्यांविशोध्योदग्गोलेस्यात्बाहुरुत्तरः
॥ २३॥ ॥विपर्ययाद्भुजोयाम्योभवेत्प्राच्यपरांतरे॥ माध्याह्निकोभुजोनित्यंछायामाध्याह्निकीस्मृतेति॥ अर्काग्रा० सूर्यस्या०
भीष्टकालिककर्णाग्रायाम्ये० दक्षिणगोले० विषुवद्भायुता० अक्षछायायायुक्ता॥ उत्तरदिक्कोभुजः स्यात्० उत्तरगोलेविषुवत्यां० प
लभायां० कर्णाग्रांविशोध्य० न्यूनीकृत्यशेषमुत्तरदिक्कोभुजः स्यात्॥ ननुकर्णाग्रायापलभायांयदानशुध्यातितदाकथंभुजः साध्यइ
त्यतआह विपर्ययादिति॥ अक्षभांकर्णाग्रायांविशोध्यशेषंदक्षिणोभुजः स्यात्॥ ननुभुजस्ययाम्यत्वमुत्तरत्वंवाकस्मादित्यत
आह प्राच्यपरांपरेइति० पूर्वापरसूत्रादंतरालप्रदेशेयाम्येउत्तरेवाभुजः स्यादित्यर्थः॥ ननुतथापिद्वितीयावधेरनुक्तत्वांदंतर
स्याप्रसिद्धेः पूर्वापरसूत्रांतस्यांतरंभुजइत्यांशंकायांतरंमध्याह्नछायास्वरूपकथनछलेनाहमाध्याह्निकइति॥ माध्याह्नकालि
कोभुजः॥ सदा० माध्याह्निकी० माध्याह्नकालिकीछायोक्ता० तथाचछायाग्रंप्राच्यपरसूत्राद्याम्यमुत्तरंवायदंतरेणसभुज
इतिव्यक्तीकृतं॥ अत्रोपपत्तिः॥ शंकुमूलंप्राच्यपरसूत्राद्याम्यमुत्तरंवायदंतरेणसयाम्योत्तरोभुजोग्रहस्य: शंकुस्तुग्रहा
दवलंबसूत्रंक्षितिजसमसूत्रावधितत्रायंभुजः शंकुत लाग्रयोः संस्कारजः॥ शंकुतलंतुस्वाहोरात्रवृत्तस्थितोदयास्तसूत्रा
वध्यंतरमुत्तरदक्षिणगोलक्रमेणोत्तरदक्षिणाः तत्रग्रहपरादिशिषड्रांतरेस्माद्यस्तमितिशंकुतलमुत्तरमग्रापिव्यस्तदिक्केतिल
त्संस्कारोभुजोगोलेप्रत्यक्षः॥ समहाशंकोरितिमहाशंकोरयंतदाद्वादशांगुलशंकोः कइत्यनुपातेनभुजः पूर्वापरसूत्रात्
छायाग्रावधिः तत्रशंकुतलाग्रेद्वादशांगुलशंकोः साधितेतत्संस्कारेणभुजःसएव॥ तत्रायमग्रापूर्वंसाधिता० शंकुतलंतुद्वा

18
1941

स०टी०
३६

द्शांगुलशंकोः पलभा० महाशंकुः कोटिः शंकुतलंभुजो हृदि० कर्णतुल्यक्षेत्रे द्वादशकोटौ पलभाभुजस्तदमहाशंकुकोटौ कोभुजइत्य
नुपातेन शंकुतलमानीयमहाशंकोरियं द्वादशांगुलशंकोः किमित्यनुपातेन गुणहारयोस्तुल्यत्वान्नाशेन पलभायाएवावशिष्टत्वात्
सात्तरा० दक्षिणगोलेग्राया उत्तरत्वादेकदिक्त्वेन पलभाग्रयोर्योग उत्तरोभुजः उत्तरगोलेग्रायाः दक्षिणत्वेन भिन्नदिक्त्वात्पल
भाग्रयोरंतरंभुजस्तत्र पलभायाः शेषमुत्तरोभुजोग्रायाः शेषंदक्षिणोभुजः मध्याह्नछायायाभुजरूपत्वान्मध्याह्नकालिकोभुजो
मध्याह्नछायेतिसर्वंयुक्तं॥ २४॥ ॥अथयाम्योत्तरवृत्तस्थछायाकर्णमुक्त्वापूर्वापरवृत्तस्थछायाकर्णमुक्त्वापूर्वापरवृत्तस्थछाया
कर्णप्रकारद्वयेनाह॥लंबाक्षजीवेविषुवछायाद्वादशसंगुणे॥ क्रांतिज्याप्तेतुतौकर्णौसममंडलगेरवाविति॥ लंबज्याक्षज्येक्रमे
णाक्षभाद्वादशाभ्यांगुणिते॥ उभयत्रक्रांतिज्याया भक्ते० तुकारात्फले॥समवृत्तस्थेर्के० तौ० दृग्योग्यछायासंबंधौः कर्णौः भवत
उभयत्रछायाकर्णःस्यात्॥ अत्रोपपत्तिः॥ स्वमस्तकोपरिपूर्वापरानुकारेणयद्वृत्तंतत्सममंडलंसांतं॥ तत्रस्थस्यछायाकर्णानय
नं॥पलभाभुजोक्षकर्णंकर्णस्तदाक्रांतिज्याभुजेकः कर्णइतिसमशंकुः क्रांतिज्याभुजेसमशंकुः कुज्योनतथत्यौः क्रमेणकर्णकोटि
त्वात्॥ अस्माछंकुमानांगुलाभ्यस्तेइत्यादिनात्रिज्याद्वादशगुणितानेनभक्ता० तत्रछेदंलंबंचपरिवर्त्येहरस्यशेषः कार्योथभागह
रणेगुणनाविधिश्चेत्युक्तेः पलभायापिगुण्याः क्रांतिज्याक्षकर्णाभ्यांभक्ता० तत्रत्रिज्याद्वादशगुणिताक्षकर्णभक्तालंबज्येवसिद्धा
तोलंबज्यापलभागुणिताक्रांतिज्याभक्ताफलंसमवृत्तगलछायाकर्णः॥ अथात्रैवपलभाभुजोद्वादशकोटिरक्षज्याभुजेका कोटि
रितिलंबज्याग्रहणेपलभयोस्तुल्यत्वान्नाशादक्षज्याद्वादशगुणाक्रांतिज्याभक्ताछायाककर्णः सममंडलगतः॥ क्रांतिज्या
याःसदायंकर्णःसिध्येन्नहिसर्वदासमवृत्तगतोग्रहइतिसमवृत्तगतग्रहस्यैवकर्णःसाध्योनान्यदेतिसूचनार्थंसममंडलगेरवा
वित्युक्तं॥ २५॥ ॥ननुग्रहाधिष्ठिताहोरात्रपूर्वापरवृत्तसंपातादवलंबरूपसमशंकोगोलेप्रत्यक्षसिद्धस्यसाधनार्थंसमवृत्त
स्थत्वाभावेपिछायाकर्णःसाध्याः॥ सममंडलगेरवापित्युक्तं किंतुस्वाधिष्ठिताहोरात्रवृत्तेपराःनत्वन्यदानसाध्योन्यथा॥ अ श्री:
लक्ष्यत्वेनप्रकारस्यातिप्रसंगापत्तेः॥ नहिप्रकारेतद्ध्यानकेनेविशेषणंप्रसिध्यंयेननातिप्रसंगः॥ परंतुयदासममंडलेक्षांशा ३६

183
1941

धिकक्रांत्याग्रहाधिष्ठितद्युरात्रवृत्तानामसंबद्धस्तदागोलेसमशंकोरदर्शनात्तत्रकथंसानमनिवारितमित्यतः सममंडलगेरवावित्य
स्यपूर्वोक्तएवार्थइत्यभिप्रायंसममंडलकर्णानयनप्रकारांतरकथनछलेनाह॥ सौम्याक्षोनायदाक्रांतिःस्यात्तदद्युदलश्रवः॥ विषुवछा
ययाभ्यस्तःकर्णोमध्याग्रयोद्धृतइति० यदोत्तराक्रांतिरक्षादल्पास्यात्तदा० द्युदलश्रवःसमवृत्तस्थार्कक्रांतिसाधितमध्याकर्णः॥ न
तुमध्याह्नकालिकाः॥ अक्षभयागुणितःमध्याग्रया० ग्रहीतमध्याह्नकर्णाग्रया० भक्तः फलंसममंडलगतग्रहबिंबस्यछायाकर्णः
स्यात्॥ अत्रसौम्येत्यनेनदक्षिणक्रांतौतदसाधनंसममंडलगतग्रहबिंबस्यादर्शनादितिस्फुटमुक्तमन्यथाक्षाल्पक्रांतौदक्षिण
गोलेसमशंकोःप्रत्यक्षत्वात्तन्निवारणानुपपत्तेः॥ अत्रोपपत्तिः॥ सममंडलप्रवेशकालिकमध्याह्नछायाकर्णादवस्तुभूतात्कर्णेन
द्वादशांगुलशंकुस्तदात्रिज्याकर्णेनकइतिमध्यशंकुस्तात्कालिकः॥ द्वादशांकोटावक्षभाभुजस्तदामहाशंकुकोटौकइतिशंकु
तलंद्वादशायोर्नाशात्पलभात्रिज्याघातोमध्यकर्णभक्तइति॥ अनेनभुजेनमध्यशंकुस्तदाग्राभुजेनकइतिसम शंकुर्द्वादशाग्रा
मध्याकर्णघातोमध्यकर्णपलभाभ्यांभक्तोग्राभुजेसमशंकुतस्थतयोःकोटिकर्णत्वात्॥ अस्मात्पूर्वप्रकारेणछायाकर्णानयने
द्वादशायोर्नाशान्मध्यकर्णपलभात्रिज्याघातोग्रामध्यकर्णाभ्यांभक्तइतितुल्ययोर्मध्यकर्णभितगुणहरयोर्नाशाकरणेनसिद्धं०
स्वतंत्रेछस्यनियंतुमशक्यत्वात्॥ तत्रापिभाज्यहरौत्रिज्ययापवर्त्यहरस्थानेमध्यकर्णगुणितायात्रिज्याभक्तेतिमध्यकर्णाग्रा
सिद्धातोमध्याग्रयोस्थतइत्युक्तं॥ भाज्यस्थानेतुमध्यकर्णपलभाघातइति० दक्षिणगोलेसमवृत्तस्थग्रहादर्शनान्नसाधितः॥
उत्तरगोलेपिक्रांतिरक्षाधिकातदासममंडलप्रवेशासंभवान्नसाधितः॥ सममंडलावध्यक्षांशत्वात्॥ अल्पक्रांतौतत्संभ
वान्नसाधितः॥ नह्यसिध्यंगोलेगणितसाध्यं॥ मानाभावादित्युपपन्नंसौम्येत्यादि० भास्कराचार्यैस्तुमार्तंडः सममंडलंप्रविश
तिस्वल्पेपमेक्षात्सदादृश्योह्युत्तरगोलएवसविशन्नसाध्यातदैवास्यभाःअप्राप्तोपिसमाख्यमंडमिलिनेयः॥ शंकुरुक्तयुक्तेन
नंसोपिपरानुपातविधेयनैवकविदुष्यतीत्यनेनतत्रापिसाधितः॥ २६॥ ॥ अथस्वाभिमतकर्णेनस्वस्वकालेभुजार्थंक
कर्णवृत्ताग्रासाध्येतिसूचनार्थंकर्णाग्रामुक्तप्रकारेणपुनरुपिमध्यकर्णइतिप्रागुक्तस्यस्फुटीकरणार्थमाह॥ स्वक्रांतिज्या

क्रीतोबाभीलंबज्यानाग्रेमौर्विका॥ स्वेष्टकर्णहताभक्ता त्रिज्ययाग्रांगुलादिका इति॥ स्वाभिमतकालिक क्रांतिज्याभिज्ययागुणिनालंबज्ययाभक्ताग्र
लमग्राज्यारूपा: लंबज्याकोटी त्रिज्या॰ कर्ण: क्रांतिज्याकोटीक: कर्णतुल्यत्रेत्युपपत्ति:॥उत्तरार्धंपुनरुक्तंव्याख्यानप्रायं॥ २७॥ ॥अथकर्ण
छायाकोणसाधनार्थंकोणशंकुदृग्ज्ये श्लोकत्रयेणाह॥ त्रिज्यावर्गार्धतोग्रज्यावर्गोनाद्द्वादशाहतात्॥ पुनर्द्वादशनिघ्नाच्चलभ्यंतेयत्फलंबु
धै:॥ २८॥ ॥शंकुवर्गार्धसंयुक्तविषुवद्वर्गभाजितात्॥ तदेवकरणीनामतां पृथक्स्थापयेद्बुध:॥ २९॥ ॥अर्कघ्नाविषुवच्छायाग्र
ज्यायागुणिनातथा॥भक्ताफलाख्यंतद्वर्गसंयुक्तकरणीपदं॥ ३०॥ ॥फलेनहीनंसंयुक्तंदक्षिणोत्तरगोलयो:॥ याम्ययोर्विदिशो: शंकुरे
वंयाम्योत्तरेरवौ॥ ३१॥ ॥परिभ्रमतिशंकोस्तुशंकुरुत्तरयोस्तु स:॥तत्त्रिज्यावर्गविश्लेषान्मूलंदृग्ज्याभिधीयते इतिपूर्वप्रकारानीतेन
कालिकाग्रज्यया॰॥तनुकर्णाग्रया: पूर्वंकर्णस्यैवसिध्ये:॥वर्गेनहीनात्॥ त्रिज्या॰ वर्गार्धात्॰ द्वादशगुणात्॥ पुनर्द्वितीयवारं॰ द्वादशगु
णात्॥ च॰ समुच्चये॰ तेनद्वादशगुणितस्यद्विधास्थापननिरासाच्चतुश्चत्वारिंशदधिकशतगुणिताद्दित्यर्थ:॥ पृथग्गुणिकोक्तिस्तुगण
नसुखार्थंशंकोर्द्वादशांगुलात्मकस्यवर्गार्धेन॰ द्विसप्तत्यायुक्तेनपलभावर्गेणभाजितात्॥ बुधैर्गणितकर्तृभि: यत्संख्यामितंफलंप्राप
ते॥तत्संख्यामितंकरणीनाम॰ संज्ञयाकरणी॰ तां॰ करणीं॰ बुधोगणक:॥पृथगेकत्रस्थानेस्थापयेत्॥ ततोद्वादशगुणिता पलभा॰ अ
ग्रज्ययापूर्वंसंगृहीतयागुणिता॰ तथाद्विसप्ततियुतेनपलभावर्गेणभक्ता॰ लब्धांफलसंज्ञं॰ तस्यफलस्यवर्गेणयुतायाः करण्या: मूलं॥दक्षि
णोत्तरगोलयो: क्रमेणफलेनोनयुतंएवमुक्तप्रकारेणसिद्ध: शंकु: शंको:॥गणितकर्तु: सकाशाद्दक्षिणोत्तरेसूर्यपरिभ्रमतिसति॰
तुकार: क्रमार्थे॰ क्रमेण॰ याम्योत्तरयोर्विदिशो: आग्नेयनैऋत्योरीशानीवायव्यो: कोणयोरित्यर्थ:॥द्वितीयतुकार: पूर्वापरदिन
विभागक्रमार्थकस्तेनविदिशोरित्यत्रान्वेति॰ तेनदिनपूर्वार्धसिद्धे आग्नेयैशान्योर्दक्षिणोत्तरक्रमेण॰ दिनापरार्धेनैऋत्यवायव्योर्द
क्षिणोत्तरक्रमेणफलितार्थ:॥स: कोणसंज्ञ: शंकु: स्यात्॥ कोणशंकुत्रिज्ययोर्वर्गांतरान्मूलंदृग्ज्योच्यते॥ अत्रोपपत्तिर्बीजैकवर्णम
ध्यमाहरणेन॥तत्रयावत्तावत्कल्प्यमव्यक्तराशेर्मानंतस्मिन्कुर्वतोद्दिष्टमेव॰ तुल्यौपक्षौसाधनीयौप्रयत्नात्यत्क्वापिसाचापिसंगुण्य
भक्तेत्युक्ते:॥ समौपक्षौसाध्यौ॰ तदर्थंकोणशंकुमानं॰ या १ द्वादशकोटीपलभाभुज: शंकुकोटीकोभुजइतिकोणशंकुतुल्यया॰ प

185
1941

अग्रयायुतंदक्षिणगोलेभुज: या॰ प॰१ अ॰१२ उत्तरगोलेग्रयांतरितंभुज:॥तत्रसमरेखादुत्तरेशंकुतलोनाग्राभुज: या॰ प॰ अ॰
कोणस्यदक्षिणोत्तरपूर्वापरस्तत्रमध्यत्वाद्भुज: तुल्यसमचतुरस्रेकर्ण: स्वस्वस्तिकात्कोणस्थसूर्यनतांशानांज्यादृग्ज्येतिभुजवर्गोद्वि
गुणोदृग्ज्यावर्ग: दक्षिणगोलेयाव॰ पव १ या॰ प॰ अ॰ २४ अ अं॰ ७२ उत्तरगोले याव॰ प १ या॰ प॰ अ॰ २४ अ प॰ ७२ अयंकोण वर्गशंकु॰ या॰ १
याव १ हीनात्रिज्यावर्गरूपदृग्ज्यावर्गयाव॰ त्रिव॰ समइतिपक्षौसमच्छेदीकृत्यछेदगमे या याव॰ पव॰ या॰ प॰ अ॰ २४ अव॰ ७४ याव॰ ७२ या॰ रूत्रिव ७२ उत्तर
गोले॰ यदन्यपक्ष॰ | यव॰ पव॰ या॰ प॰ अ॰ २४ अव॰ ७४ या ७२ या॰ रूत्रिव ७२ | पक्षयो: शोधनार्थं॰ आस: दक्षिणगोले याव॰ ७२ या प अ २४ अव त्रिवर्ग ७४
अथएकाव्यक्तशोधयदन्यपक्षाद्रूपाण्यन्यस्येतरस्माच्चपक्षादित्युक्तेनाव्यक्तपक्षेव्यक्तवर्गैकस्थानेद्विसप्ततिपलभावर्गयोगोयावद्वर्गगुणो
व्यक्तस्थानेपलभाचतुर्विंशतिघातोयावद्गुणोदक्षिणगोलेधनमुत्तरगोलेऋणंरूपपक्षेतुचतुश्चत्वारिंशदधिकशतगुणितेनग्रावर्गेण
हीनोद्विसप्ततिगुणस्त्रिज्यावर्ग:॥तत्रद्विसप्ततिगुणितस्त्रिज्यावर्गश्चतुश्चत्वारिंशदधिकशतगुणितेनत्रिज्यावर्गार्धेनतुल्यत्वात्तुल्य
गुणलाघवार्थं॥तथैवध्रुवत:॥तत्राद्येकस्यैवगुणनार्थंत्रिज्यावर्गार्धमग्रावर्गेणहीनंचतुश्चत्वारिंशदधिकशतगुणमितिसिद्धं॰ सार्धरा
शिज्याधिकाग्राचेत्तुत्रिज्यावर्गार्धेनहीनोग्रावर्गश्चतुश्चत्वारिंशदधिकशतगुणऋणं॰ अथ॰ अव्यवर्गादियदावशेषंपक्षौतदेष्टेनविह
त्यकिंचित्॥ क्षेप्यंतयोर्येनपदप्रदस्यादव्यक्तस्यपक्षोस्यपदेनभूप:॥ व्यक्तस्यपक्षस्यसमक्रियैवमव्यमानंखलुलभ्यतेतदित्युक्ते: पक्षयो
र्मूलार्थमव्यक्तवर्गांकेनापवर्तनं कार्य:॥ वर्गांकस्तुद्विसप्ततियुत: पलभावर्ग: तेनोपवर्तिते॰ व्यक्तपक्षेप्रथमस्थानेयावद्वर्ग: सिद्ध: द्विती
यस्थानेद्विमितिगुणकस्यपृथक्करणादर्कघ्नाविषुवच्छायाग्रज्ययागुणिनातथाभक्तापलाख्यमित्युक्त्याफलंद्विगुणंया २ वद्गुणंदक्षि
णोत्तरगोलक्रमेणधनमृणं॥ रूपपक्षेपवर्तितेकरण्याख्यंसार्धराशिज्यातोग्रायामूनाधिकायाधनमृणं॥ ततोपिमूलार्थंपक्षयोरव्यक्ता
कार्धरूपफलस्यवर्गोयोजित॥तत्राव्यक्तपक्षेयोजनपूर्वकमूलग्रहणेप्रथमस्थानेयावत्॥ द्वितीयस्थानेफलंदक्षिणोत्तरगोलयोर्धनमृ
णं॥ यथा या १ फ १ या १ फ १ उत्तरगोलेव्यक्तस्वर्णत्वंवा या: १ फ १ अन्यथामध्याव्यक्तनाशिसंभवात्॥ रूपपक्षेतुमूलग्रहणेतद्वर्ग
संयुक्तकरणीपदमितिसार्धराशिज्यानधिकायाग्रायां॰ अधिकायांतुकरण्यूनस्यफलवर्गस्यमूलं॥ तथाचत्रिज्यावर्गार्धतोग्रज्यावर्गो

स०टी०
३८

नारित्यत्र सार्धराशिज्याधिकायायानुक्तानुपपत्तावपि क्वचिद्बुधिविधेयदेहृक्शोध्यं नशुध्येद्विपरीतशास्या० विधिस्तदा प्रोक्तवदेवकिंतु
योगेवियोगः कधियाविधेयइतिभास्कराक्तरीत्याः अग्रज्यावर्गोनात्रिज्यावर्गेणाग्रावर्गोद्वाहीनाद्रिल्यंदवेन क्रमेणन्यूनाधिकाग्रासं
बस्वेनवानक्षितिरितिध्येयं॥ अथपुनः समशोधनार्थंपक्षयोर्न्यासः दक्षिणगोले |या १ क १ / अ १ १ १| करण्यमफलवर्गपदस्यफलतोन्यूनत्वानत्तयो
रविन्यासः |या १ क १ / या १ १ १| अवएकाव्यक्तमित्यादिना० शेषाव्यक्तेनोध्धरे द्रूपशेषंव्यक्तमा नंजायतेव्यक्तराशेरित्यनेन च प्रथमस्थनेपद
फलेनहीनमित्युपपन्नं द्वितीयस्थनेपदेनहीनंफलमित्स्थणंकोण शंकुर्भवतायनोक्तः॥ ऋणस्याग्रस्थितिविपरीतत्वात॥ नह्यूर्ध्वगोले क्षितिविप
रीतमधोगोलेदृश्यमपिदृश्यंतेयेन केनेथमावश्यकं० नाप्यधोगोलदृश्यत्वात्तत्कथनापत्तिः॥ ऊर्ध्वगोलस्थस्यछायासाधकत्वेनसाधना
नंतरछायासंभवादेवाप्रयोजकत्वात॥ उत्तरगोलेतु॥ |या १ क ०१ / या १ १ १| वा |या १ क १ / या १ १ १| प्रथमस्थनेफलेनयुतंपदमुपपन्नं॥ द्वितीयस्थनेफलेनोनंपद
मित्स्थणत्वान्नोक्तः छायाप्रयुक्तत्वात॥ करण्यूनफलवर्गपदस्यफलतोन्यूनत्वाततत्पक्षयोरविन्यासः |या १ क १ / या १ १ १| वा |या १ क १ / या १ १ १| अत्रप्रथमस्थाने
पदेयुक्तंफलंकोणशंकुरुपपन्नः॥ द्वितीयस्थनेपदेहीनंफलकोणशंकुरितिद्वयमुपपन्नं० नन्विदंतत्रोर्ध्वगोलेदिनार्धएवकोणशः॥
द्वयंदृश्यत्वाभगताकथमुपेक्षितमितिचेन्न० तत्रात्रिज्यावर्गार्धतइत्यत्रव्यस्तशोधनात्फलेन। हीनसंयुक्तंपदमित्यत्रापुत्तरगोलेएवही
नासंयुक्तमित्यस्यार्थत्वात्फलंपदेनहीनं संयुक्तमित्यर्थंसिद्धेर्भगवतातद्वयस्यानुपेक्षितत्वात॥ समरवृत्तादक्षिणस्थत्वेकोणशंकुर्दिन
पूर्वापरार्धक्रमेणाग्नेय्यांनैरृत्यांचा० उत्तरस्थत्वेऐशान्यांवायव्यांवाभवतीतिसर्वमुपपन्नं० अत्रबीजक्रियोपपादकस्तत्रापाणुप
पत्तिविस्तरभीत्यानोक्ताःसालयजरुद्धदेवज्ञगुरुवरणरचितायांभास्करीयबीजटीकायांसम्यगुक्ताबधेयेति० शंकुः कोटिस्त्रिज्या
कर्णस्तद्वर्गांतरपदंदृग्ज्यादृग्वत्तनतांशानांज्येतितत्रिज्याकर्णविश्लेषान्मूलंदृग्ज्येत्युपपन्नं॥ ३२॥ ॥ अथैतच्छायाकर्णयोरानय
नमाह॥ स्वशंकुनाविभज्याप्तेदृक्त्रिज्येद्वादशाहते॥ छायाकर्णौतुकोणेषुयथास्वंदेशकालयोरिति० कोणीयदृग्ज्यात्रिज्येवादशगु
णेदृग्ज्यासंबंधिकोणशंकुनाभक्त्वा० लब्धेदृग्ज्यात्रिज्याक्रमेण० छायाछायाकर्णौसाध्यौ० अयमर्थः॥ क्वचिद्देशेचतुर्षुकोणेषु
क्वचित्रकोणद्वये० क्वचिद्दिनार्धएवकोणद्वयेइत्यादिदेशकालानुरोधेनयथायोग्यमिति अत्रोपपत्तिः प्रागुक्तात॥ ३३॥ ॥ श्रीः
अथाद्दिक्प्रदेशासंबंधेनछायाकरणावुक्ताकालसंबंधेनसार्धश्लोकाभ्यामाह॥ त्रिज्योदक्चरजायुक्तायाम्यायांतद्विवर्जिताः॥ ३८

अंत्यानतोत्क्रमज्योनीस्वाहोरात्रार्धसंगुणा॥ ३४॥ ॥ त्रिज्याभक्ताभवेच्छेदोलंबज्याघ्नोथभाजिताः॥ त्रिभज्ययाभवेच्छंकुस्तद्वर्गंपरि
शोधयेत॥ ३५॥ ॥ त्रिज्यावर्गात्पदंदृग्ज्याछायाकर्णौतुपूर्ववदिति० उत्तरगोले० चरासन्नयाज्यया० चरज्ययेत्यर्थः॥ पूर्वंकरानयने
चरज्यायाचरजेतिसंज्ञोक्तेः॥ युक्तात्रिज्या० अंत्यास्यात० याम्यगोले० तया० चरज्ययोनात्रिज्या अंत्यास्यात० नतोत्क्रमज्यो
ना० सूर्योदयादिनगतघटीभिःशेषघटीभिर्वादिनार्धांतर्गतात्रनतसंज्ञाः॥ ताभिरूनंदिनार्धंनतकालोघात्मकस्तस्यासुभ्यो
लिप्तास्तत्वयमैरित्याविधिनासुनयोरंध्रयमलाइत्याद्युत्क्रमज्यापिंडैर्ज्योत्क्रमज्या० पंचदशघट्यधिकनतेतुपंचदशघट्यून
नतस्यक्रमज्याखंडैः क्रमज्या० तयायुक्तात्रिज्योत्क्रमज्याभवति० तयाहीनेत्यर्थः॥ स्वाहोरात्रार्धसंगुणा० गृहीतचरज्यासंबंध्य
होरात्रवृत्तव्यासार्धद्युज्यातयागुणिता० त्रिज्ययाभक्ता० फलंछेदसंज्ञंस्यात० अथानंतरंछेदोलंबज्ययागुणितः त्रिज्ययाभा
ज्यः फलमिष्टकालेशंकुःस्यात॥ तस्यशंकोर्वर्गस्त्रिज्यावर्गाच्छोधयेत॥ शेषस्यमूलंदृग्ज्या० आभ्यांछायाकर्णौतुपूर्ववत० पूर्वोक्त
रीत्याभवतः अत्रछायाकर्णौदितिकोणछायाकर्णसाधनश्लोकांतर्भागतस्यग्रहणांतश्लोकोक्तरीत्याभीष्टशंकुदृग्ज्याभ्यांछाया
कर्णौसाध्यावित्युक्तं॥ अत्रोपपत्तिः॥ याम्योत्तरवृत्तोर्ध्वभागग्रहाधिष्ठितद्युरात्रवृत्तसंपातात्क्षितिजद्युरात्रसंपातद्वयबद्धोदया
स्तसूत्रक्षितिजसंबंधयाम्योत्तरवृत्तसूत्रसंपातपर्यंतमहोरात्रवृत्तेसूत्रंत्रिज्यानुरूपमंत्यासाउत्तरगोलेचरज्यायुतात्रिज्या०
दक्षिणगोलेचरज्ययोनात्रिज्या० उन्मंडलयाम्योत्तरसूत्रावद्धहोरात्रवृत्तव्यासार्धेत्रिज्यास्यात॥ उन्मंडलस्योत्तरदक्षिणक्रमेण
क्षितिजादूर्ध्वाधःस्थत्वेनतद्याम्योत्तरसूत्रयोर्मध्येचरज्यात्वाच्च० ग्रहाहोरात्रवृत्तेयाम्योत्तराहोरात्रवृत्तसंपातादुभयत्रनतघ
टिकांतरेणस्थानेतत्सूत्रंनतकालस्यसंपूर्णज्या० तन्मध्यादूर्ध्वसूत्रंशररूपंनतोत्क्रमज्या० तयाहीनांत्याग्रहस्थानादहोरात्रवृत्ते
उदयास्तसूत्रपर्यंतमृजुसूत्रंत्रिज्यानुरूपमिष्टांत्यातत्तुल्यायाम्योत्तरोर्ध्वव्याससूत्रांतर्गता० साद्युज्याप्रमाणसाधितेष्टहृतिरि
तिद्युज्यागुणात्रिज्याभक्ताफलंछेदः॥ अस्यत्रिज्याकर्णेलंबज्याकोटिस्तदेष्टहृतिकर्णेकाकोटिरित्यनुपातेनेष्टशंकुः॥ अस्माद्
दृग्ज्याछायातत्कर्णाउक्तरीत्यासिध्यंतीत्युक्तमुपपन्नं॥ ३६॥ ॥ अथश्लोकत्रयेणछायाकर्णाभ्यांनतकालानयनमाह॥

सू०टी०
२९

अभीष्टछायायाभ्यस्तात्रिज्यातत्कर्णभाजिता॥ दृग्ज्यातद्वर्गसंशुध्दात्रिज्यावर्गात्पदंसदं॥ ३७॥ ॥शंकुः सत्रिभलीवाघ्नः स्वलंब
ज्याविभाजितः॥ छेदः सत्रिज्ययाभ्यस्तः स्वाहोरात्रार्धभाजितः॥ ३८॥ ॥उन्नतज्यातयाहीनास्वांत्याशेषस्यकार्मुकं॥ उत्क्रमज्या
भिरेवंस्युः प्राक्पश्चार्धनतासवइति॥ अभीष्टकालिकछायायागुणितात्रिज्या॰ ग्रहीतछायायाः छायाकर्णेनभक्ताफलंदृग्ज्या॰
दृग्ज्यायाः वर्गेणहीनात्रिज्यावर्गाद्यत्संख्यामितंमूलं॰ चकारोयत्तदोर्नित्यसंबंधात्तछंकुरः अभीष्टशंकुः सइष्टशंकुस्त्रिज्यया
गुणितः स्वदेशीयलंबज्ययाभक्तः फलंछेदः सः छेदः॥ त्रिज्ययागुणितः द्युज्ययाभक्तः उन्नतकालस्यज्याविलक्षणाः यच्चतुरुन्न
तकालोनभवति॰ तया॰ आनीतयोन्नतज्ययाहीना॰ स्वांत्या॰ स्वद्युज्यासंबंधचरज्ययावगतांत्या॰ अवशेषस्यउत्क्रमज्याभिः॥ धनु
योरंभयमलाइत्याद्युक्तज्यापिंडैः॥ धनुः अवशेषस्यात्रिज्याधिकत्वेतुयदधिकंतस्यक्रमज्यापिंडैर्धनुश्चतुः पंचाशंशतयुक्तमुक्त
मधनुर्भवति॥ एवंप्रकारेणसिद्धाः दिनस्यपूर्वार्धापरार्धयोर्नतकालासवोभवंति॰ अत्रोपपत्तिः॥ पूर्वोक्तव्यत्यासात्क्रमा॥
तत्रछेदस्त्रिज्यापरिणतइष्टांत्या॰ तस्या॰ ज्यात्वासंभवः॥ अवध्युदयास्तसूत्रस्याहोरात्रवृत्तसंव्यासूनत्वाभावादित्युपपन्नं॥
भज्याकारेणस्वस्यांतरत्वेनदर्शनादुन्नतज्येत्युक्तं॥ अतएवभास्कराचार्यैः इष्टांत्यकामुन्नतकालभौवांतुल्यांप्रकल्प्येत्याद्युक्तं
तच्चतुरत्वानामुन्नतकालत्वापत्त्यातयाहीनेस्यादिभागस्यव्यर्थत्वापत्तेरितिदिक्॥ ३९॥ ॥अथेष्टकालिकाग्रयाक्रांतिज्याद्वारा
सर्वसाधनंसाधंश्लोकेनाह॥ इष्टाग्राघ्नीतुलंबज्यास्वकर्णांगुलभाजिता॥ क्रांतिज्यासात्रिजीवाघ्नीपरमापक्रमोद्धृता॥ ४०॥
तत्रापंभादिकंक्षेत्रंपदैस्तत्रभवेदिति॰ इष्टकालिककर्णाग्रयागुणितालंबज्या॰ तुकाराद्यग्रज्यायानिरासः॥ तात्कालिक
छायायाः कर्णांगुलसंख्याभिर्भक्ता॰ फलंक्रांतिज्या॰ सा॰ क्रांतिज्या॰ त्रिज्ययागुणिता॰ परमक्रांति ज्ययाभक्ताफलस्यधनु
राश्यादिकंक्षेत्रंस्थानंभुजइतियावत्॥ पदैश्चतुर्भिश्चिह्नजातैस्तत्रपदेभवउत्पन्नः॥ यथोक्तरीत्याकर्कादौप्रोद्यत्क्रार्केत्याद्यु
त्थास्सर्यः स्यात्॥ अत्रोपपत्तिः कर्णाग्रेकर्णाग्रालभ्यतेत्रिज्याग्रेकेत्यग्रा॰ त्रिज्याकर्णेलंबज्याकोटिस्तदायाकर्णेकाकोटि
रित्यनुपातेनत्रिज्ययोस्तुल्ययोर्गुणाहरयोर्नाशादिष्टकर्णाग्रागुणितलंबज्याकर्णभक्ताक्रांतिज्या॰ अस्या॰ सूर्यानयनंभागे श्रीः २९

189
1941

वोकमितिपुनरुक्तत्वात्क्रमांतरं॥ ४०॥ ॥अथभ्रमणमाह॥ इष्टेह्निमध्येप्राक्पश्चाच्चलंबाङ्कुत्रयांतरे॥ मत्स्यद्वयांतरयुतेस्त्रि
स्पृक्सूत्रेणभाभ्रमइति॥ अभिमतेदिवसेमध्ये॰ पूर्वविभागे॰ पश्चिमविभागे॰ वाङ्कुत्रयांतरे; पूर्वापरसूत्राद्भुजत्रयांतरस्थानेष्ट
ते॰ अयमर्थः पूर्वापरसूत्रस्यमध्यस्थनाद्भुजांगुलांतरेणचिह्नमेकं॰ द्वितीयंपूर्वविभागेपूर्वापरसूत्रात्कालांतरीयभुजांगुलांत
रेणचिह्नः तृतीयंपश्चिमविभागेपूर्वापरसूत्रादितरकालांतरीयभुजांगुलांतरेणत्वेनङ्कमेवमेकस्मिन्दिवसेकालत्रयेस्वभुजांतरेण
पूर्वापरसूत्राच्चिह्नत्रयेकृतेसतीति॰ मत्स्याद्वयांतरयुतैः॥ अव्यवहितचिह्नाभ्यांप्रत्येकंमत्स्यमुत्पाद्येतिमत्स्यद्वयस्यप्रत्येकमुखपुच्छ
गतरूपमध्यसूत्रयोः स्वमार्गानुसारिणप्रसारितयोर्योगोयस्मिन्स्थानेतस्मादित्यर्थः॥ त्रिस्पृक्सूत्रेणचिह्नत्रयलग्नतुल्यसूत्र
मितेनव्यासार्धेन॰ भाभ्रमः॥ छायामार्गमंडलंभवति॥ प्रथमांतिमकालांतर्गतकालिकछायाग्रंतद्वृत्तपरिधौभवतीत्यर्थः॥ अत्रो
पपत्तिः॥ प्राच्यपरसूत्रात्भुजांतरेणछायामितिछायाग्रत्रयंज्ञात्वातत्स्पृष्टपरिधिवृत्तस्यमध्यज्ञानार्थमव्यवहितचिह्नद्वयमत्स्या
स्यामव्यवहिताचिह्नमध्यस्यदक्षिणोत्तरसूत्रेभवतः॥ तत्रत्यात्तपरिधिप्रदेशेभ्यः केंद्रस्यतुल्यांतरत्वेनाव्यवहितचिह्नमध्यस्थानस्या
कथंपरिधिसक्तत्वात्तत्सूत्रमपिकेंद्रेलग्नंभवत्येकंप्रत्येकाव्यवहितचिह्नमध्यसूत्रयोर्योगस्तद्वृत्तकेंद्रंसिद्धं॥ मध्यरेखाज्ञानार्थं
मत्स्यद्वयं॰ तत्केंद्राद्वृत्तंभायत्रयस्पृग्भवतीति॥ किंचित्रंयद्यपिछायाग्रस्यसूर्यचलनानुरोधेनचलनात्तस्यतुवृत्ताकारासंभवात्
प्रतिक्षणंधुरात्रवृत्तभेदान्यथक्रांतिभेदानुपपन्नेरित्येकवृत्तपरिधौछायाग्रभ्रमणंनसंभवत्यतएवभास्कराचार्यैर्भात्रित्रय
तश्चाभ्रमणंनसाध्वित्युक्तंतथासाधकभाग्राणामवश्यमेकवृत्तस्थत्वसंभवात्तदंतर्वर्तिनांछायाग्राणांतत्परिधिस्थत्वंस्वल्पांतरत्वा
दंगीकृत्यभगवताकृपालुनाछायाग्रदर्शनंविनापिछायाग्रस्थानज्ञानमन्यकालिकछायाग्रस्थानयोर्दर्शननाभीष्टसमये
मेघादिनाछादितरवौराश्यादिस्वज्ञोर्थेनोपजीव्यायाभुजादिज्ञानार्थमुक्तं॥ बहुकालांतरेभाग्रग्रहणेस्थूलं॥ अल्पांतरेते
किंचित्सूक्ष्ममितिध्येयं॥ ४१॥ ॥अथकालज्ञानमुक्त्वातदुपजीवकलादेशाद्युपयुक्तलग्नंज्ञानंविवक्षुस्तदुपयुक्तस्वोदय

सं॰टी॰
४०

ज्ञानार्थं मेषादित्रयाणां लंकोदयासु साधनपूर्वकं तन्निबंधनं श्लोकाभ्यामाह॥ त्रिभद्युकर्णार्धगुणाः स्वाहोरात्रार्धभाजिताः॥ क्रमादेकद्वि
त्रिभज्यास्तच्चापानि पृथक् पृथक्॥४२॥ ॥ स्वाधोधः परिशोध्याथ मेषाल्लंकोदयासवः॥ खागाष्टयोर्थगोगैकाः शरत्र्यंकहिमांश
वइति॰ एकद्वित्रिभज्याः एकराशिज्याद्विराशिज्यात्रिराशिज्याः॥ त्रिराशिज्यया गुणाः क्रमात् स्वक्रांतिज्यासंबंधिद्युज्याभिर्भा
ज्याः फलानां धनूंषि भिन्नभिन्नस्थाने स्थाप्यानि स्थानत्रये स्थाप्यानीत्यर्थः॥ अनंतरं॥ स्वाधोधः स्वादधोधः॥ एकराशिज्यासंबंधिफलं य
थास्थितं॥ ततः प्रथमफलं द्वितीयफलाद्द्वितीयफलं तृतीयफलान्न्यूनीकृत्य॰ पृथगनुक्तौ प्रथमफलं द्वितीयफलान्न्यूनं कृतं सद्वयोः फलयो
र्मा ज्ञनीत्वे नयैर्द्वोध्यासंभवः॥ प्रथमस्यज्ञानासंभवश्चेति प्रथमद्वितीययोः पृथक्स्थापनमावश्यकमतएवं त्रिधापृथागित्युक्तं मेषात्
मेषमारभ्य राशित्रयाणां लंकोदयासवो भवंति॰ प्रथमफलं मेषस्योदयासवः॥ प्रथमोनद्वितीयफलं वृषोदयासवः द्वितीयोनतृतीयफ
लं मिथुनस्योदयासवइत्यर्थः॥ नियतत्वात्तन्मानमाह खागाष्टयइति॰ मेषमानं सप्तनिवृत्तं षोडशशतं॥ वृषमानं पंचोनमष्टादश
शतं॥ मिथुनमानं पंचत्रिंशदधिकमेकोनविंशतिशतमित्यर्थः॥ अत्रोपपत्तिः॥ सिद्धांतशिरोमणौ मेषादिजीवाः श्रुतयोपरन्नेतत्
वानं॥ मिथुनमानं पंचात्रिंशदधिकमेकोनविंशतिशतमित्यर्थः॥ अत्रोपपत्तिः॥ ...
भमिजेक्रांतिगुणाभुजाः स्युः॥ तत्कोटयश्च द्युनिशास्यवृत्ते व्यासार्धएते परिणापरिणामितानां॰ चापेषु तासामसवस्ततोयेन धो
विशुद्ध्याउदयानिरक्षेइति तत्स्वरूपं त्र्यभात्रिज्याकर्णे त्रिराशिद्युज्याकोटिस्तदेकद्विराशिज्याकर्णे का इत्यनुपातेन कोटयो द्युज्य
प्रमाणेनाहोरात्रवृत्ते॰ तदंककरणार्थं त्रिज्याप्रमाणेन साध्याइति॥ द्युज्याप्रमाणेनैतास्तदा त्रिज्याप्रमाणेन का इत्यनुपातेन त्रिज्या
योर्गुणहरयोस्तुल्यत्वेन नाशादेकद्विराशिज्यास्त्रिराशिद्युज्यायाभक्ताइत्युपपन्नाः आसाधनूंषि॥ एकादिराशीनामुदयास
वस्तत्रप्रत्येकराश्युदयासुज्ञानार्थं स्वाधोध॥ शोधनमित्युपपन्नं त्रिभद्युकर्णार्धगुणाइत्यादिलंकोदयासवइत्यंतं॥ अत्र लंकापदं
निरक्षदेशपरं व्याख्येयं॥ सर्वनिरक्षदेशाभेत्रसं... स्थानस्योक्तस्यतुल्यत्वेनोक्तरीत्यान्यनिरक्षदेशेतान्निषेधो बाधकाभावात्॥ अ श्रीः ४०
न्यथास्वनिरक्षदेशे तत्साधनार्थं ग्रहवद्देशांतरसंस्कारकरणापत्तेः॥ निजोदयकरणार्थं स्वनिरक्षदेशीयानां चरसंस्कारस्य

191/1341

समनंतरमेवोक्तत्वादितिदिक्॰ खागाष्टयइत्यादावुक्तप्रकारगुणितकर्मैवोपपत्तिः॥४३॥ ॥ अथेभ्यः स्वदेशोदयासून्श्लोका
र्धेनाह॥ स्वदेशचरखंडोना भवंतीष्टोदयासवइति॰ एमेसिद्धाः स्वकीयदेशसंबंधेनपान्युलंनानि चरखंडानि॰ चरानयनप्रकारे
णैकादिराशीनां चराण्यानीयोक्तरीत्यरस्वाधोधः शोधितानि मेषादिमिथुनानां राशीनां चरखंडानि भवंति॥ तैरूनाः संतइष्टो
दयासवः॥ चरखंडसंबंधिदेशे मेषादित्रयाणामुदयासवो भवंतीत्यर्थः॥ अत्रोपपत्तिः मेषादेर्मिथुनांतो नाडीभिस्तिथिमिता
भिरुद्गतो॰ लगतिकुजेतदधः खेपश्चान्नाभिश्चरीनाभिरितिभास्करोक्त्या प्रत्येकोदयासुज्ञानं प्रत्येकचरेणेतिप्रत्येकचरं तु चर
खंडमित्युपपन्नं॥४४॥ ॥ अथावशिष्टराशीनामुदयानाह॥ व्यस्ताव्यस्तैर्युताः स्वैः स्वैः कर्कटाद्यास्ततस्त्रयः॥ उत्क्रमेणष
डेवैते भवंत्येतेतुलादयः॥ उत्क्रमेणस्थापिताः स्वैः स्वैर्मेषादिचरखंडकैस्त्रिभिः॥ व्यस्तैः॥ उदयक्रमेणस्थापितैः॥ युताः कर्कादि
यस्त्रयः कन्यांताः क्रमेणज्ञानोदयासुमानाः भवंति॰ एवं षण्मुक्तावशिष्टानामुदयासुज्ञानमाह॥ उत्क्रमेणेति॰ एते उक्ता मेषा
दयः कन्यांताः षट्संख्याकाः उत्क्रमेण॰ कन्यासिंहकर्काद्युत्क्रमेण॰ एवकारो मेषवृषादिक्रमनिरासार्थः॥ तुलादयः षड्राशयः॥
दृष्टाः॥ ज्ञातस्वदेशोदयाः समानाः भवंति॰ तथाचकन्योदयस्तुलायाः सिंहोदयो वृश्चिकस्य॰ कर्कोदयो धनुषः॥ मिथुनोदयो
मकरस्य॰ वृषोदयः कुंभस्य॰ मेषोदयो मीनस्येति सिद्धं॰ अत्रोपपत्तिः॥ कन्यान्तादिधनुषोंतास्तिथिमितनाडीभिरुद्गते॥ लग
तिकुजे चोर्ध्वखेपश्चान्नाभिश्चराद्यादिति॥ तद्रहितैः खडुताडैः कन्यांतोवाझषांतोवा॰ चरखंडैरूनाढ्यास्तेन निरक्षोदयाः स्व
देशास्युरितिभास्करोक्तगमा॥४५॥ ॥ अथाभीष्टकालेकृणधनग्रहसाधनार्थं गतभोग्यासूनाह॥ गतभोग्यासवः कार्या भा
स्करादिष्टकालिकात्॥ स्वोदयासुहता भक्तभोग्याभुक्ताः खवह्निभिरिति॰ इष्टकालेचालनेन संजातात्सूर्यात्॥ गतभोग्यासवः॥ गता
सवो भोग्यासवश्च साध्याः॥ कथंसाध्याइत्यत आह॥ स्वोदयासुहताइति॰ भुक्तभोग्या॰ सूर्याक्रांतराशेर्येभुक्तभागाः सूर्यस्य
भागाद्यवयवात्मकाः॥ तेत्रिंशातः शुद्धाः भोग्याभागाः सूर्यक्रांतराशेः स्वदेशोदयासुभिर्गुणिताः॥ त्रिंशताभक्ताः गतास
वो भोग्यासवः क्रमेणभवंति॥ अत्रोपपत्तिः॥ यस्मिन्काले लग्नं साध्यं तस्मिन्काले सूर्यः साध्यो न्यथा तात्कालिकलग्नसि

क्षितिर्न स्यात॥ अथैतदर्थं सूर्याक्रांतराशेर्भुक्तासवो भोग्यासवश्च साध्याः॥ सूर्योदयात्कालपर्यंतं पूर्वाग्निमकालो लग्नराशेर्लग्नत्वा
त्॥ अनंतरं राश्युदयासुगणनया लग्नज्ञानस्य सुशकत्वाच्च॥ अतस्त्रिंशद्भागैरुदयासवस्तदेष्टे भुक्तभोग्यभागैः किं इति भुक्तभो
ग्यकालासवः॥ अनोदयाकालास्तेषां संपातावधि राशिग्रहणेनोत्पन्नत्वात्सायनांशसंस्कृतो ग्राह्यः॥ अन्यथा सूर्याक्रांति
राशेरुक्तोदयसंबंधाभावादसंगतापत्तेः॥ अत एवमुक्तायनांशा स्वयमः प्रसाध्यः कालोऽन्तरंवेशात् स्वलुभुक्तभोग्यासवेति तितिभा
स्कराचार्योक्तं संगच्छते॥ ननु तत्कालीनोदयिकार्कादेव भुक्तभोग्यासवः साध्याः सूर्योदयात्कालावधिद्वादशोर्लग्नत्वात्॥ न हीष्ट
कालेन द्वादशिलग्नं येन तद्गतभोग्यासवः साधवः न तितात्कालिकार्कात्सूर्योदयावधिकास्ते तात्कालिकार्कास्य सूर्योदय
कालिकत्वाभावात्॥ तत्कथं भगवता सर्वज्ञेन भास्करादिष्टकालिकादित्युक्तमिति केचित्॥ उच्यते॥ उदयानां नाक्षत्रत्वान्नाक्ष
त्रघट्यो ग्राह्यास्तास्त्वसिद्धाः॥ सर्वत्र साधितघटीनां सावनत्वात्॥ तासां नाक्षत्रीकरणमावश्यकमन्यथा तद्गणनानुपपत्तेः॥
तदर्थं ग्रहोदयप्राणहता इत्याद्युक्ता इष्टसावनघटीगतिकलोत्पन्नासवो धिकानाक्षत्रत्वार्थं तदिष्टसावनघटीषु क्षेप्यदधि
कमित्यनुपातेनागतफलासुयुक्ताः सावनाः कार्याः तथा चागतफलस्य भेत्राव्यवयवउदयासुभिरष्टादशाशतकलास्तदागतासु
भिः काइत्यनुपातसिद्धाष्टादशशतोदयास्वोर्गुणहरयोस्तुल्यत्वेन नाशादवशिष्टचालनस्वरूपः सूर्यो योजितः॥ सावना
स्त्वविकृता एव स्थिताः॥ तथा चेष्टकालिकार्को यत्कालिलग्नं तत्काला पूर्वगृहीतसावनघट्यो नाक्षत्रा एव भवंतीति भगवतास
म्युक्तं भास्करादिष्टकालिकादिति॰ अनेनैवाभिप्रायेण वभास्कराचार्यैः फलं॰ लग्नार्थमिष्टघटिका यदि सावना सास्ता
त्कालिकार्ककरणेन भवेयुरार्क्ष्यः॥ अर्क्षोदयाहि सदृशाभ्यसुहापनेया स्तात्कालिकत्वमथनं किमतेयदार्क्ष्यं इति॥ ४६॥
अथाभीष्टघटिकाभ्यः क्रमेण धनलग्नसाधनं श्लोकाभ्यामाह॥ अभीष्टघटिकासुभ्यो भोग्यासून्प्रविशोधयेत्॥ तद्वदिष्ट
लग्नास्तेनैवयास्तांस्तथोत्क्रमात्॥ ४७॥ ॥ शेषं चेत्त्रिंशताभ्यस्तमशुद्धेन विभाजितं॥ भागहीनं च युक्तं च तल्लग्नं क्षि
तिजं तदेति॥ अभीष्टकालेयाः सूर्योदयात् घटिकास्तासामसुभ्यः॥ भोग्यासून्विशोधयेत्॥ तदनंतरं॥ तदिष्टलग्नासव॰ सूर्या

क्रांतराशेरग्निमराशय एषलग्नाभिः॰ तेषामुदयास्तनापि॰ तद्वत्॰ क्रमेण शोधयेत्॥ यो राश्युदयो न शुध्यति सोऽशुध्यस्तेन त्रिंशेष
मक्तं॰ चेदित्यनेन शेषाभावे क्रियान कार्येत्यर्थः॰ सिद्धोऽस्तीति सूचितं॥ फलेन भागादिना भुक्तसंबंधेन हीनं॥ चकारादशुद्धराशि
संख्यामानं॥ भोग्यसंबंधभागादिफलेन युक्तं॥ चकारादंतिमशुद्धराशिसंख्यामानं॥ तेन॰॥ आगतराश्यादिमानं संबंधि
संपातावधिकं क्रांतिवृत्ते कप्रदेशरूपं तदा॰ अभीष्टकाले॰ क्षितिजे॰ क्षितिजवृत्तपूर्वविभागे लग्नं समस्तं लसंबंधेन लग्नस्व
रूपान्न्याभीष्टकाले तल्लग्नं स्यादित्यर्थः॥ फलादेशार्थं॥ ग्रहाणां रेवतीयोगतारासन्नावधितो ग्रहात्तेषां करणे लग्नस्यापि फला
देशार्थं तत एव समुचितं ग्रहणमित्यागतलग्नं संपातावधिकमयनांशैर्युक्तं संस्कुर्यादिति स्वतः॥ सिद्धमिति नोक्तं॥ नच प्र
र्वमेव सूर्यस्यायनांशसंस्कारानुक्त्या लग्नमपि यथास्थितमित्ययनांशव्यस्तसंस्कारोनुक्तः स गत इति वाच्यं॰॥ स्थूलत्वात्
लग्नार्थं सूर्ये यनांशसंस्कारस्य तत्संस्कृतात्यहगक्रांतिछायादृलचरादिकमित्यनादिपदसंगृहीतत्वाच्च॰ अथ भगवता
यनांशव्यस्तसंस्कारः कंठेनानोक्त इति लग्नं संपातावधिकमेव फलादेशार्थं गृहीतं॰ सूर्यस्य तुलाग्नार्थमयनांशसंस्कारस्य
कृतत्वात्॥ उदयनां संपातावधिकत्वादिति चेन्मैवं॰ भागहीनं च युक्तं च तल्लग्नं क्षितिजं तदेत्यर्थस्यावृत्त्याग्निमश्लोकादिस्थानाक्
पश्चादित्यस्यावृत्त्या वप्राक्पश्चाच्चक्रचलने भागैरयनांशैः क्रमेण हीनं युक्तं लग्नं स्यादित्यर्थे भगवत कंठोक्तः सिद्धत्वाच्च॰ अ
अत्रोपपत्तिः॥ अभीष्टघटिकासुभ्यो भोग्यगतासुशोधने सूर्याक्रांतराशिर्लग्नं नेति ज्ञातं॰ ततोग्निमपश्चाद्राश्युदयशो
धने शुद्धो राशिर्लग्नं नेति ज्ञातं॰ ततो यो राश्युदयो न शुध्यति स एव राशिरभीष्टकाले क्षितिजे लग्न इति॰ तस्य को भागो ल
ग्न इति ज्ञानार्थमशुद्धराश्युदयासुभिस्त्रिंशद्भागास्तदा शेषासुभिः का इत्यनुपातेन भुक्तभोग्यक्रमेण लग्नराशेर्भोग्यभुक्त
भागादिकं सिद्धं तत्र भोग्यभागास्त्रिंशतः शुद्धागता भागा लग्नराशेर्भवंतीत्यशुद्धराशिसंख्यानो भोग्यभागाः शुद्धाल
ग्नं भवति॰ भुक्तभागाश्च भुक्तराशिसंख्यायां युक्ता लग्नं भवति॰ अयनांशास्तव्यस्तसंस्कारो ग्रहपंक्तिस्थत्वार्थं॰ अन्यथा फ
लादेशार्थं ग्रहा अयनांशसंस्कृता ग्राह्या इति सर्वं निरवद्यं॥ ४८॥ ॥ अथ प्रसंगान्मध्यलग्नानयनविशेषस्तदर्थमाह॥ ना

193
1941

सू०टी०
४२

प्राक्पश्चिमनतनाडीभिस्तस्माल्लंकोदयासुभिः॥भानौक्षयधने कृत्वामध्यलग्नंतदाभवेदिति॥दिनार्धांतर्गतनतदिनगतशेषहीनादि
नार्धक्रमेणप्राक्पश्चिमनतं॥रात्र्यर्धांतर्गतरात्रिशेषगतयुतंदिनार्धंप्राक्पश्चिमनतंज्ञानकप्रश्नोभमसिध्यं॥नतघटिकाभिःन
स्मात्कालिकसूर्यात॰निरक्षदेशराश्युदयासुभिः॥शर्वोक्तप्रकारेणासिध्यराशिभागादिकं॥प्राक्पश्चिमनतक्रमेणसूर्ये॰क्ष
यधने॰हीनयुते कृत्वातदाभीष्टकालेमध्यलग्नं॥दशमलग्नंस्यात्॥ अयमभिप्रायः॥ प्राक्नतेनतघ्रासुभ्यः॥सूर्याक्रांतराशे
र्निरक्षोदयासुभिर्भक्तास्तन्विशोध्यतत्पूर्वराशीनांनिरक्षोदयासूंश्चविशोध्यशेषंत्रिंशद्गुणमशुद्धनिरक्षोदयभक्तं॰
फलेनभागादिनाशोधितग्रहसंख्यातुल्यराशिभिश्चसूर्योहीनोमध्यलग्नं॰एवंपश्चिमनतेनतघ्रासुभ्यःसूर्याक्रांत्यराशे
र्निरक्षोदयासूंश्चविशोध्यशेषंत्रिंशद्गुणमशुद्धनिरक्षोदयभक्तंफलेनभागादिनाशोधितग्रहसंख्यातुल्यराशिभिश्च
सूर्योयुतोमध्यलग्नं॰एवंभुक्त॥ भोग्यासुभ्योल्पकालेपीएवसवस्त्रिंशद्गुणिताःसूर्याक्रांतराश्युदयभक्ताःफलेनभाग
दिनाहीनयुतोर्कोमध्यलग्नंस्यात्॥अनेनप्रकारेणलग्नमपिसाध्यं॥अत्रोपपत्तिः॥ऊर्ध्वयाम्योत्तरवृत्तेयःक्रांतिवृत्तप्रदे
शोलग्नस्तन्मध्यलग्नंतत्साधनार्थमभीष्टकालेयाम्योत्तरवृत्ताद्युरात्रवृत्तेसूर्योयावताघटिविभागादिनानतःसनतकालः
प्राकपश्चिमसंज्ञः॥अर्धरात्रमारभ्यदिनार्धपर्यंतंप्राक्कपालं॰तत्रप्राङ्मतेसूर्यस्ययाम्योत्तरवृत्तात्पूर्वस्थत्वेनसूर्याश्रिम
राशेर्मध्यलग्नत्वात्सूर्यादधिकंक्रमलग्नरीत्यानतघटीभिःसाध्यं॰पश्चिमनतेतुसूर्यस्ययाम्योत्तरवृत्तस्यपश्चदशाद्यंतरेण
नियतत्वान्निरक्षोदयासुभिःसाध्यमिति॰शेषाक्षिप्तोपपत्तिस्त्वातिस्पष्टतरेतिसंक्षेपः॥ ४९॥ ॥अथकालसाधनमा
ह॥ भोग्यासूनूनकस्याथभुक्तासूनधिकस्यच॥संपिंड्यांतरलग्नासूनेवंस्यात्कालसाधनमिति॰ अथानंतरं॰लग्नार्कयोर्म
ध्ययोत्पंतम्नतस्यभोग्यासूनः॥अधिकस्यभुक्तासून॰संपीड्य॰एकीकृत्य॰अंतरलग्नासून॰सूर्यलग्नमध्येयेलग्न
राशयस्तेषामुदयासून्॥च॰समुच्चये॰एकीकृत्य॰एवमुक्तप्रकारेण॰कालस्यासिद्धिर्भवति॰अत्रोपपत्तिःऊनाधिकमग्र
वभवतीन्यनतुल्यलग्नस्यभोग्यकालोंतरस्थराश्युदययुतोधिकतुल्यलग्नस्यभुक्तकालेनयुतस्तत्कलयोरंतरवतीकालः श्रीः ४२

195
1941

सिध्यःस्यात्॥५०॥ ॥अथैकंलग्नार्काभ्यांसाधितकालस्यदिनराश्यंतर्गतत्वज्ञानमाह॥सूर्याद्दूने निशाशेषे लग्नेकोदधिके दिवा
भचक्रार्धयुताद्भानोरधिकेस्तमयात्परमितिसूर्यात्॥निशाश्यंतर्गतत्वेनन्यूनेलग्नेसतिपूर्वप्रकारसिध्यःकालोरात्रिशेषेभवति॰स
र्यात्षड्भांतर्गतत्वेनाधिकेलग्नेपूर्वप्रकारसिध्यः॥कालोदिनेस्यात्॥षड्भयुतात्सूर्यादधिकेलग्ने॰लग्नसषड्भसूर्याभ्यामानीतःपूर्व
रीत्याकालः॥अतस्तमयात्॥सूर्यास्तकालात्॥ परमनंतरंरात्राविल्यर्थः॥एतेनरात्रीष्टकालेगतेसषड्भसूर्याल्लग्नंसाध्यमितिसू
चितं॥अत्रोपपत्तिः॥सूर्योदयेसूर्यतुल्यलग्नत्वात्सूर्यादूनाधिकेलग्नेक्रमेणरात्रिशेषेदिनेचकालःस्यात्॥एवमस्तकालेसषड्भ
सूर्यस्यलग्नत्वात्तदधिकेलग्नेरात्रावेवकालःसिध्येदित्यादिसुगमतरं॥५१॥ ॥अथाग्निमग्रंथस्यासंगतित्वनिरासार्थम
धिकारसमाप्तिंफक्किकयाहइतित्रिप्रश्नादधिकारइति॰दिग्देशकालानांप्रतिपादनेदंपरिपूर्त्तिसमाप्तिमित्यर्थः॥दिशांसा
धनंशिलातलेइत्यादिनियतं॥तत्संबंधेनःसमकोणयाम्योत्तरशंकूनांसाधनान्यपिदिगंतरगतान्याभियातानिःपलभाल
वाक्षादिसाधनंदेशनिरूपणंनियतमग्राचरादिसाधनमनियतं॰कालसाधनंतद्दशाछायादिसाधनंचकालनिरूपणमिति
विवेकः॥ ॥रंगनाथविरचितेसूर्यसिध्यांतटिप्पणे॥त्रिप्रश्नस्याधिकारोयंपूर्णोगूढप्रकाशके॥३॥ ॥इतिश्रीसकल
गणकसार्वभौमबल्लालदैवज्ञात्मजरंगनाथगणकविरचितेगूढार्थप्रकाशकेत्रिप्रश्नाधिकारःपूर्णः॥ ॥अथचंद्रग्रहणा
धिकारोव्याख्यायते॥ ॥तत्रप्रथमंसूर्यचंद्रयोर्बिंबयोजनानितत्स्फुटीकरणंचसार्धश्लोकेनाह॥सार्धानिषट्सहस्राणि
योजनानिविवस्वतः॥विष्कंभोमंडलस्येंदोःसहाशीत्याचतुःशतं॥१॥ ॥स्फुटस्वभुक्त्यागुणितौमध्यभुक्त्योधृतौस्फुटौ
विति॥षट्सहस्राणि॰सार्धानि॰सहस्रस्यार्धेपंचशतं॰तत्सहवर्तमानानि॰पंचषष्टिशतंयोजनानिसूर्यस्य॰विष्कंभा
व्यासः॰चंद्रस्य॰अशीत्यासह॥अशीत्याधिकं॰चतुःशतंयोजनानि॰तौव्यासौस्पष्टयोनिजगत्यागुणितौनिजमध्यगत्या
भक्तौस्फुटौस्तः॥अत्रगणितेव्यासस्यैव॥बिंबव्यवहारोभिवुक्तानां॰अत्रोपपत्तिः॥त्रिज्यामितकर्णेमध्यमकक्षायांभ्रम
णात्तत्रयत्बिंबव्यासात्मकंतन्मध्यमं॥तत्रस्वल्पांतरेणमध्यगत्यंगीकारान्मध्यगत्येदंतदास्फुटगत्याकिमितिस्पष्टं

बिंबानीत्यस्य उक्तेरुत्तरं ॥ गत्वोः परमाधिकन्त्वनत्वात् ॥ ॥ अथ सूर्यबिंबं चंद्रकक्षायां साधयंस्तयोः कलात्मकबिंबानयनं सार्धश्लोके
नाह ॥ रवेः स्वभगणाभ्यस्तः शशांकभगणोद्धृतः ॥ शशांककक्षागुणितो भाजितो वार्ककक्षया ॥ २ ॥ ॥ विष्कंभश्चंद्रकक्षायां तिथ्या
प्ता मानलिप्तिका इति । सूर्यस्य विष्कंभः ॥ प्रागुक्तः स्पष्टो व्यासः स्वभगणैः ॥ सूर्यभगणैरुक्तैर्गुणितः ॥ चंद्रभगणैर्भक्तः । वा० अथ
वा० चंद्रकक्षया वक्ष्यमाणया गुणितः सूर्यकक्षया वक्ष्यमाणया भक्तः चंद्रकक्षायां चंद्राधिष्ठिताकाशगोले सूर्यव्यासः स्पष्टभ
वति । ततो व्यासयोजनसंख्याः ॥ पंचदशभक्ताः ॥ सूर्यचंद्रबिंबव्यासप्रमाणकलाः भवंति । अत्रोपपत्तिः ॥ चक्रकलाभिश्चंद्रक
क्षायोजनानि तदैककलया कानीति चंद्रकक्षास्थितैककलायां पंचदशयोजनानि । अतश्चंद्रस्य स्वकक्षायां स्थितत्वात् स्पष्टचंद्र
बिंबव्यासयोजनानि पंचदशभक्तानि चंद्रबिंबव्यासकलाभिः भवंति । एवं सूर्यं चंद्रकक्षायामेककलासाधनं ज्ञातद्वययोजनैरिति
स्पष्टसूर्यव्यासस्तैर्भक्तो व्यासकलाः भवंति ॥ तत्र सूर्यलोकैर्दृष्टांतरा चंद्राकाशाइव दर्शनात् तस्य भर्तारि विभक्तांतरेण दर्शनाभावात्
चंद्रकक्षाप्रमाणेन सूर्यबिंबव्यासः सूर्यकक्षायां तदा चंद्रकक्षायां क इत्यनुपातेन गणिताधर्मनस्तु भवेत् साधितः नतु वस्तुत
श्चंद्रकक्षायां सूर्यमंडलस्थानत्वात् । सूर्यग्रहणे चंद्रस्य छादकत्वानुक्तिप्रसंगात् ॥ अथ सूर्यस्य स्पष्टव्यासश्चंद्रभक्तगण भक्त इति
प्रवं रवकक्षारूपचंद्रकक्षया गुणितः सूर्यभगणभक्तो रवकक्षारूपसूर्यकक्षया भक्त इति रवकक्षारूपगुणहरयोर्नाशात् सूर्यभगण
गुणितश्चंद्रभगणभक्त इति प्रवं कक्षयोरनुक्तेरयं प्रकारो मुख्यत्वात् प्रथममुक्तस्ततश्चंद्रकक्षास्थितसूर्यबिंबव्यासः पंचदशभ
क्तः सूर्यबिंबव्यासकलाः सिध्यातु इत्युपपन्नमुक्तं ॥ ३ ॥ ॥ अथोपयुक्तं भूच्छायां श्लोकाभ्यां साधयति ॥ स्फुटेंदुभुक्तिर्भूव्या
सगुणिता मध्ययोद्धृता ॥ लब्धं सूचीमहीव्यासस्फुटार्कश्रवणांतरं ॥ ४ ॥ ॥ मध्येंदुव्यासगुणितं मध्यार्कव्यासभाजितं ॥
विशोध्य लब्धं सूच्यां तु तमो लिप्तास्तु पूर्ववत् इति ॥ स्पष्टचंद्रस्य गतिः ॥ भूव्यासेन गुणिता । मध्यया चंद्रस्य गत्या भक्ता । फलं सू
चीसंज्ञं स्यात् ॥ भूव्यासस्पष्टसूर्यबिंबव्यासयोरंतरं ॥ मध्येन चंद्रबिंबव्यासेनाशीत्याधिकचतुःशतयोजनेन गुणितं । म
ध्येन सूर्यबिंबव्यासेन पंचषष्टिशतयोजनेन भक्तं ॥ फलं सूच्यां प्राक्सिद्धायां न्यूनीकृत्य तत्काराशेषं तमः ॥ भक्ताप्राक् श्रीः ४२

197
1941

पंचयोजनात्मकं ॥ भाभावस्तमइति छायायास्तमस्त्वात् ॥ अस्य कलात्मकं मानमाह ॥ लिप्ता इति । तस्य पूर्वसंबंधानुक्तेरुत्तरत्र सं
बंधो परेण सुबोधः ॥ अत एव पूर्ववाक्यसमाप्तिरुक्तम् पदमत्र नान्वेति । पूर्ववत् ॥ तिथ्याप्ता मानलिप्तिका इति पूर्वोक्तेर्भूच्छायायाः
कलाः कार्याः ॥ अत्रोपपत्तिः ॥ भूव्यासहीनं रविबिंबमिंदुकर्णाहतं भास्करकर्णभक्तं । भूविस्तृतिर्लब्धफलेन हीना भवेत्कुभाविस्
तिरिंदुमार्गे इति सिद्धांतशिरोमणौ सूक्ष्मप्रकार उक्तोस्योपपत्तिः सटीकायां व्यक्ता । तत्र भूव्यासोनस्य रविबिंबस्य ४९०० स्वल्पांत
रांगीकारेण स्पष्टगतिमात्रमध्यगतिगुणितचंद्रमध्ययोजनकर्णरूपस्पष्टेंदुयोजनकर्णो गुणः तादृशः सूर्यकर्णो हरस्तत्रैनेन खंडस्य
कलाकरणार्थं त्रिज्यागुणः ॥ चंद्रकर्णस्तादृशोहर इति चंद्रस्पष्टमध्यगत्योस्तुल्यगुणहरत्वेन नाशात् त्रिज्या मध्येंदुयोजनकर्ण
योस्त्रिज्यापवर्तनेन हरः पंचदश पृथगुक्तो ये ॥ अवशिष्टो भूव्यासहीनमध्यार्कबिंबयोजनानां रविस्पष्टगतिमध्यमगतिगुण
हरौ चंद्रस्य सूर्ययोर्मध्ययोजनकर्णौ व्युत्क्रमेण गुणहरौ । तत्र कर्णस्थाने लाघवात् तयोर्बिंबयोजनानि गृहीतानि । यद्यपि सूर्यचंद्रयो
र्मध्ययोजनकर्णानुसारित्वाभावात् द्विबिंबयोजनग्रहणमनुचितं तथापि स्वल्पांतरांगीकारेण न तद्दोषः ॥ इंदुव्यासार्कव्यासयोर्भूगोला
ध्यायोक्तकक्षाभ्रकर्णगुणिता महीमंडलभाजिताः तत्कर्णा इति तत्कक्षाव्यासार्धत्वेन सूक्ततरां । तत्रार्कस्य स्पष्टार्कबिंबयोजनग्रहणे
मध्यार्कयोजनबिंबं सूर्यस्य स्पष्टगतिगुणितं ॥ सूर्यमध्यगतिभक्तमिति सिद्धं । न चोक्तरीत्या सूर्यस्य स्पष्टमध्यगतिगुणहरौ भूव्यास
मध्यार्कबिंबयोजनांतरस्योत्पन्नौ न केवलं बिंबस्येति भूव्यासस्तादृशो महाव्यास इत्यनेन कथं सिद्ध इति वाच्यं । भगवता स्वल्पां
तरेण महीव्यासस्य यथास्थितस्यैवांगीकारात् ॥ महाव्यासस्फुटार्कश्रवणांतरमित्युक्त्या मध्यस्फुटपदस्योभयत्रान्वये
नार्कश्रवणसंनिधानेन च बिंबस्फुटत्वस्यैव महीव्यासस्य स्फुटत्वसिद्धेश्च । अथैतत् खंडसिद्धं फलं भूव्यासाधीनं भूभायोजना
नि ॥ तत्कलाकरणार्थं भूव्यासस्यापरखंडस्य त्रिज्यागुणः ॥ स्पष्टचंद्रगतिभक्तं मध्यगतिगुणितं चंद्रमध्ययोजनकर्णरूपस्पष्ट
योजनकर्णो हरस्तत्र त्रिज्यामध्ययोजकर्णौ गुणहरौ गुणेनापवर्त्य हरस्थाने पंचदश । चंद्रस्पष्टमध्यगती गुणहराविति सूच्यु
क्तोपपन्ना भूभायाः सूच्यनुकारत्वात् ॥ प्रथमखंडं द्वितीयखंडहीनं भूभायोत्मीकासा पंचदशभक्ता कलादिकैत्युक्तमुपप

स०टी०
४४

नं ॥ यदितु भव्यासहीनं रविबिंबमित्यादौ मध्याबिंबानुक्तेः प्रथममेव स्पष्टार्कबिंबग्रहणं तदा महीव्यासस्य स्पष्टत्वाऽप्रसिद्ध्या
महीव्यासस्फुटार्कश्रवणांतरमित्येवं यथाश्रुतं सम्यक् ॥ परंतु तदा भव्यासोनार्कबिंबस्य सर्वमध्यस्पष्टगतिहरगुणावविशिष्टो
वाच्याविपि भगवतास्वल्पांतरत्वादनुक्तौ ॥ नचानुपाते सूर्यचंद्रयोर्मध्ययोजनकर्णौ कल्हीतौ न स्फुटाविति मध्यस्फुटगतौ हर
गुणावनुत्पन्नौ नोक्ताविति वाच्यं ॥ चंद्रस्पष्टयोजनकर्णस्वरूपग्रहणे नोत्पन्नस्त्व्या अनुक्तत्वापत्तेः ॥ नच चंद्रकर्णस्य मध्यत्वेन
गृहीते बह्वंतरमतः स्पष्टत्वेन तस्य ग्रहे सत्युपपन्ना सत्कर्णस्य मध्यत्वेन गृहीतेत्यल्पांतरमिति वाच्यं ॥ मध्यार्कबिंबयोजन
ग्रहणे न स्फुटार्कश्रवणानुपपत्तेः नचोभयत्रागृहीते प्रत्येकमल्पांतरमपि बह्वंतरमत एकत्र सूर्यगतिग्रहणमुचितमिति वाच्यं ॥
विनिगमनाविरहात् ॥ पूर्वं सूर्यबिंबस्यैवं सूर्यस्य स्पष्टमध्यगतिगुणहरौ न महीव्यासस्य प्रांत्येतद्भयोरिति स्थूलसूक्ष्मविनिगमके
नुप्रात्सेः सूर्यगतिग्रहणस्यौचित्याच्च ॥ अथ महीव्यासस्य प्रथमखंडस्य चंद्रगतिग्रहणेन सूक्ष्मत्वा बिंबादितीयखंडस्य भव्यासोन
स्फुटरविबिंबस्यार्थात् सूर्यगतिग्रहणं सूचितमिति न क्षतिरिति चेन्न व्यास्या प्रसंगे सूर्यगतिग्रहणे मानाभावात् ॥ उपपत्तेर
प्रसंगाच्च ॥ अन्यथात्रापि चंद्रगतिग्रहणापत्तेरिति ॥ एतेन चंद्रमध्यगत्या भव्यासस्तदा चंद्रस्पष्टगत्या कइतिभव्यासरूपः
खंडस्य एवं स्विसंज्ञं सूर्यबिंबप्रमाणेनापरं भव्यासोनस्फुटरविबिंबखंडं तदा चंद्रबिंबप्रमाणेन किमिति स्पष्टं द्वितीयखंड
तयोः स्पष्टयोरंतरस्पष्टा भूभेति सर्वमुपपन्नमिति निरस्तं ॥ उक्तानुपाताभ्यां तयोः स्पष्टत्वसिद्धौ मानाभावात् ॥ स्पष्टत्व
स्याप्रसंगाच्च चंद्रसूर्ययोर्मध्याबिंबानुपपत्तेश्च ॥ यत्तु भव्यासस्य स्पष्टत्वं सूचितरूपमनुपपद्यमानं हृदि ज्ञात्वा भव्यासए
व प्रथमखंडं भव्यासोनस्पष्टरविबिंबस्य मध्यकर्णानुपाताभ्यामल्पांतरेणापवर्तनान्मध्याबिंबे गुणहरावुत्पाद्य द्वितीयखं
डमुभयोरंगुलीकरणं चंद्रमध्यकर्णेन त्रिज्यामिता कलास्तदाभ्यां का इत्यनुपाते प्रमाणफलापवर्तनेन प्रमाणस्थानापन्न
पंचदशहरेण तिनयोरंतरं भूभेत्युक्तं ज्ञानराजदैवज्ञैः सिद्धांतसुंदरे ॥ इनावनीव्यासवियोगनिघ्नशशांकबिंबभक्तं
फलोनभव्याससमाकुभासौशरेंदुभक्ताकलीकाल्पादिकास्यादिति ग्रंथेन ॥ अत्र सूर्यव्यासः ॥ स्फुटार्कबिंबयोजनात्मकः ॥

श्री०
४४

न मध्ययोजनात्मः ॥ चंद्रार्कबिंबे गुणहरौ मध्ययोजनात्मकौ न स्फुटबिंबयोजनात्मकौ टीकाकृता चिंतामण्यभिमतौ उपजीव्यसूर्य
सिद्धांतविरोधात् ॥ तदुक्ततदुपपत्त्यादितदपि सिद्धेश्च ॥ अत्र यादपि तट्टीकाकृच्चिंतामण्युक्तं मध्यमस्य भूभाबिंबस्यानयनं फ
लाविशेषेण मध्यकर्णाविव गुणहरौ भकल्पोक्तविधिना सिद्धस्य मध्यमबिंबस्यायदि मस्याध्यगत्यंतरेणेदं स्फुटगत्यंतरेण कि
मित्यनुपातेन स्फुटत्वं सूलकृदनुक्तमपि कार्यमिति तन्न गत्यंतरवशेन भूभाया अनुत्पत्त्या न समंजसं ॥ अन्यथा गतिवशेन सा
धिकं चंद्रबिंबवद्गत्यंतरकलाभ्यां विकृताभ्य एव भूभायाः साधनापत्तेरिति ॥ तदसत् स्फुटेंदुभुक्तिभव्यासगुणिता मध्यमे
स्पष्टेति सूर्यसिद्धांतोक्तयुक्तिसिद्धस्य त्यानुक्त्या भव्यासस्यैवाविकृतस्य ग्रहणादितत्परं परदोषगवेषणापलुवितेन ॥ ५ ॥ ॥
अथ ग्रहणद्वयसंभूतिमाह ॥ भानोर्भार्धे महीछायात् तुल्येर्कसमेपि वा ॥ शशांकपाते ग्रहणं कियद्भागाधिकोनके इति ॥ सूर्यात्स
काशात् षड्ढांतरे भूछाया सूर्यापरदिकत्वात् ॥ तत्तुल्ये ॥ सषड्भार्करूपछायासंत्रादिना समे चंद्रपाते ॥ अपि वा ॥ अथवा ॥ सूर्यतु
ल्ये चंद्रपाते ॥ सूर्यचंद्रयोः प्रत्येकं ग्रहणं ॥ ननु समत्वाभावेपि ग्रहणमित्यत आह कियद्भागेत्यादि ॥ सषड्भार्काद्वा कतिपयैर्भागैरधि
के ऊनेपि चंद्रपाते ग्रहणं ॥ तथा च ॥ नक्षति भागाश्चंद्रे चंद्रग्रहणे द्वादश निश्चयार्थं सूर्यग्रहणे तु न तांशषडंशसंस्कारात्सप्त
त्यापातिन ॥ अत्रोपपत्तिः ॥ सषड्भार्के के वा काकान्यतरतुल्यत्वे चंद्रपाते शराभावः ॥ चंद्रस्य तत्तुल्यत्वात् ॥ तदा चंद्रो भूछायायां
भवतीति ग्रहणमेवं शरसत्त्वेपि मानैक्यखंडदल्ले भूछायायां मंडलैकदेशस्य सत्त्वेन ग्रहणं ॥ एवं शराभावे मानैक्यखंडान्य
न शरे च चंद्रमंडलसूर्यमंडलस्याछादकं भवति ॥ परंतु तत्र राशौ मितिसंस्कृतः अतः सम्यगुक्तमुपपन्नं ॥ ७ ॥ ॥ ननु तत्कुत्र
भवतीत्यतस्तयोर्ग्रहणयोः कालमाह ॥ तुल्यौ राश्यादिभिः स्यातां ॥ मावास्यांतकालिकौ ॥ सूर्येंदु पौर्णिमास्यंते भार्धभागा
दिकौ समाविति ॥ अमावास्यांतकालोत्पन्नौ सूर्यचंद्रौ राश्याद्यवयवैः समौ भवतः ॥ पौर्णिमास्यंते भार्धभागादिकौ तुल्यौ सूर्यचं
द्रौ षड्भांतरे स्यातां ॥ तथा चामांते सूर्यचंद्रयोरेकत्राधोधरांतरेण सत्त्वात्सूर्यग्रहणं ॥ पौर्णमास्यंते चंद्रभूभयोरेकत्रावस्थानात्
चंद्रग्रहणं ॥ एतेन पूर्वश्लोके शशांकपाते इत्यत्र चंद्रचंद्रपातौ द्वौ न ग्राह्यौ इति सूचितं ॥ एतच्छ्लोकस्यैवेव्यर्थापत्तेः ॥ अत्रो
पपत्तिः ॥ अमांते सूर्यचंद्रयोः पूर्वापरांतराभावेन योगात्तुल्यौ सूर्यचंद्रौ ॥ पौर्णमांते भचक्रार्धांतरत्वात् षड्राश्यंतरौ भागादिसमा

199
1941

सू॰टी॰
४५

विति॥ ७॥ ॥अथपर्वांतेसूर्यचंद्रपातानांसाधनमाह॥ गतैष्यपर्वनाडीनांस्वफलेनोनसंयुतौ॥ समलिप्तौभवेतांतौपातस्तात्कालिको
न्यथेति। तौसूर्यचंद्रौ। गतैष्यपर्वनाडीनां। तत्कालिकौसूर्यचंद्रौतात्कालगतादृष्यावादर्शांतपौर्णिमांतान्यतरघटिकास्तासांस्वफलेन
स्वगतिसंबंधेनयत्फलंइष्टनाडीगुणाभुक्तिःषष्ट्याभक्ताकलादिकमितिमध्याधिकारोक्तेनानीतंतेन। गतैष्यक्रमेणोनयुतौतत्रस
मकलौस्तः॥ यद्यपिसमांशावितिवक्तुंयुक्तं। तथाप्यतिथ्यंतीयसाधितौसमकलावितिद्योतनार्थंसमकलावित्युक्तं। पातःस्व
गत्युपपन्नफलेन॰ अन्यथागतैष्यक्रमेणयुतोनः॥ तात्कालिकःपर्वांतकालिकःस्यात्॥ अत्रोपपत्तिश्चालनश्लोकः॥ तत्रतिथ्यंते
भागांतरत्वेनकलादिसाम्यःपातस्यवक्रत्वोधनत्वेनंतरग्रहवैपरीत्यं॥ ८॥ ॥अथभानुकानांबिंबानांप्रयोजनमाह॥ छादको
भास्करस्येंदुरधस्थोघनवद्भवेत्॥ भूछायांप्राङ्मुखश्चंद्रोविशत्यस्यभवेदसाविति। सूर्यमंडलस्याछादकश्चंद्रस्यात्॥ नन्वाकाशेद
योःसत्वेनसूर्यएवचंद्रस्यछादकःकथंनस्यादित्यतआह अधःस्थइति। वक्ष्यमाणकक्षाध्यायेसूर्यकक्षतोधःकक्षास्थत्वाच्चंद्र
स्यैवाछादकत्वेनस्थर्धः छादकोयेनसूर्यचंद्रस्यछादकः॥ ननुविनैकत्रावस्थानंभवत्यतोतेह घनवदिति। यथाधःस्थोमेघः
सूर्यस्याछादकोभवतितथाचंद्रोभवतीत्यर्थः॥ प्राङ्मुखः॥ पूर्वाभिमुखोगच्छंश्चंद्रोभूछायांप्रतिप्रविशति॰ अंतःकारणादस्य
चंद्रस्य। असौभूभा। आछादिकाभवेत्॥ तथाचसूर्यग्रहणेसूर्यचंद्रबिंबयोःप्रयोजनं॥ चंद्रग्रहणेचंद्रभूभाबिंबयोःप्रयोजनमि
तिभावः॥ अत्रोपपत्तिः॥ चंद्रोदर्शांतेसूर्यादधोभवतीतिचंद्रःसूर्यस्याछादकः। बुधशुक्रयोस्तुमंडलाल्पत्वानाछादकत्वं। चंद्र
स्याधोग्रहाभावात्पृथ्व्यंतरेभूस्याप्रतिबंधात्सूर्यकिरणाश्चंद्रगोलेनपतंति। अतोतिःश्यस्यचंद्रस्यभूमायांप्रवेशइतिचंद्रस्यभू
भाछादिका॥ ९॥ ॥अथग्रासानयनमाह॥ तात्कालिकेंदुविक्षेपछाद्यछादकमानयोः योगार्धात्प्रोह्ययच्छेषंतावच्छन्नंतदुच्य
तेइति॥ यःछाद्यतेसछाद्यःसूर्यग्रहणेसूर्यःचंद्रग्रहणेचंद्रः यछादयतिसछादकः॥ सूर्यचंद्रग्रहणयोःक्रमेणचंद्रभूभे॰
तयोःपूर्वानीतमानकलयोःऐक्यस्यार्धात्॥ तात्कालिकचंद्रात्पूर्वोक्तप्रकारेणसाधितंविक्षेपंकलादिकंविशोध्ययदवशिष्टं
त॥ तत्प्रमाणकंछन्नं। छादकेनछाद्यस्ययावान्मंडलप्रदेशःआछादितस्तावत्प्रदेशात्मकंग्रासरूपंग्रहणंतत्तज्ज्ञैःकथ्यते॥ अ
त्रोपपत्तिः॥ छाद्यछादकमंडलनेमियोगेग्रहणाद्यंतरूपेमंडलकेंद्रयोरंतरंस्वबिंबखंडयोगरूपं॥ बिंबस्यव्यासमानात्मकत्वा श्रीः ४५

201
194

त्तत्तुसमत्वालाघवाच्चयोगार्धरूपंधृतं॥ ततोयथाप्रवेशस्तथाग्रासोभवतीतिपर्वांतेछाद्यछादकयोर्विपातांतरितत्वात्तेनविक्षेपेणमंड
लयोगात्स्वदंतरमितिसएवग्रासः॥ १०॥ ॥अथसंपूर्णन्यूनग्रहणज्ञानंग्रहणाभावज्ञानंचाह॥ यत्प्रस्थमधिकेतस्मिन्सकलं
न्यूनमन्यथा॥ योगार्धाधिकेनस्याद्विक्षेपेग्रासंभवइतितस्मिन्॰ छन्नमाने॰ अधिके॰ ग्राह्यमानाधिके॰ यद्यस्मात्कारणात्॥
ग्राह्यमानमस्ति॰ अंतःकरणात्॥ सकलंसंपूर्णंग्रहणंभवति॰ अन्यथा॰ ग्राह्यमानान्न्यूनेग्रासे॰ न्यूनंग्राह्यमानांतर्गतंग्रहणंस्यात्॥
मानैक्यखंडात्॥ विक्षेपे॰ अधिकेसति॰ ग्रासासंभवः॥ ग्रहणंनस्यात्॰ अत्रोपपत्तिः॥ ग्राह्यमानाधिकेग्रासेसंपूर्णंग्रहणंन्यू
नेन्यूनं॥ मानैक्यखंडादधिकेविक्षेपेमंडलस्पर्शासंभवात्ग्रहणाभावः॥ ११॥ ॥अथस्थित्यर्धविमर्दार्धश्लोकाभ्यामाह॥ ग्रा
ह्यग्राहकसंयोगवियोगौदलितौपृथक्॥ विक्षेपवर्गहीनाभ्यांतद्वर्गाभ्यामुभेपदे॥ १२॥ ॥षष्ट्यासंगुण्यसूर्येंद्वोर्भुक्त्यंतरविभा
जिते॥ स्यातांस्थितिविमर्दार्धनाडिकादिफलेनयोरिति। ग्राह्यग्राहकमानयोर्योगांतरे अर्धिते॰ पृथक्॰ स्थानांतरस्थापे॰ अ
ग्निमक्रियायांकदाचिदस्थत्वसंभवेपुनःक्रियार्थंमतयोरावश्यकत्वात्। तद्वर्गाभ्यां। योगार्धांतरार्धयोर्वर्गाभ्यां। विक्षेपवर्गे
णवर्जिताभ्यां॥ उभे॰ द्वे॰ मूले॰ षष्ट्यागुणयित्वा॰ सूर्यचंद्रयोर्गत्यंतरकलाभिर्भक्ते॰ तयोः॥ योगवियोगयोःस्थितिःघट्या
दिफले॰ क्रमेणस्थित्यर्धविमर्दार्धेभवतः॥ अत्रोपपत्तिः॥ ग्रहणात्प्रग्रहणांतपर्यंतं। तत्रबिंबनेमिस्पर्शकालेमानैक्य
खंडंकर्णस्पर्शमोक्षकालिकशरोभुजः॥ स्पर्शमोक्षान्यतरकालिकशराग्रमध्यकालिकशराग्रयोरंतरंपूर्वापरंकोटिरिति
तत्खंडसाधकंक्षेत्रं॥ एवंसंपूर्णग्रहणेसंमीलनोन्मीलनकालयोरंतरकालोमर्दस्तन्मध्यग्रहणात्संमीलनोन्मीलनका
लावधिखंडेतत्साधकंछादकछाद्यछादकमंडलकेंद्रयोरंतरंमानार्धपरंतुल्यंकर्णः॥ तात्कालिकशरोभुजःशराग्रयोरंत
रंविक्षेपदत्तेपूर्वापरंकोटिरितिक्षेत्रं॥ संमीलनंछाद्यमंडलस्याछादनसमाप्तिः॥ उन्मीलनंतुछादकमंडलादाछादितसंपूर्णछा
द्यमंडलस्यानिःसरणारंभः तत्रस्पर्शमोक्षसंमीलनोन्मीलनकालानामज्ञानान्मध्यकालिकविक्षेपग्रहणं॥ भुजकर्णवर्गांत
रपदं॰ कोटिरितिपूर्वश्लोकोक्तमुपपन्नं॰ छाद्यछादकमंडलकेंद्रयोःपूर्वापरांतराभावेमध्यग्रहणसंभवाछाद्यछादकयुतिगं
त्यंतरकलाभिःषष्टिघटिकास्तदानीतकोटिकलाभिःकाइत्यनुपातेनस्थितिमर्दखंडे॰ तत्रचंद्रग्रहणेभूभागतेःसूर्यगत्यनुरो

स॰टी॰
४८

धात्मपंगत्वमित्युपपन्नंद्वितीयश्लोकोक्तं॥१३॥ ॥अथस्थित्यर्धविमर्दार्धेअसकृत्साध्येइति॰श्लोकाभ्यामाहस्थित्यर्धनाडिकाभ्या
माहस्थित्यर्धनाडिकाभ्यस्तागतयः षष्टिभाजिताः लिप्तादिग्रहेऽग्रोध्यंमोक्षेदेयंपुनः पुनः॥१४॥ ॥तद्विक्षेपैः स्थितिदलंविमर्द
र्धंतथासकृत॥संसाध्यमन्यथापातेतल्लिप्तादिफलंस्वकंमिति॥सूर्यचंद्रपातानांगतयः स्थित्यर्धगतीभिर्गुणिताः षष्ट्याभक्ताः॥फ
लंकलादि॰ग्रहे॰स्पर्शस्थित्यर्धनिमित्तंसूर्यचंद्रयोर्हीनं॥मोक्षे॰मोक्षस्थित्यर्धनिमित्तं॰सूर्यचंद्रयोर्देयं॰योज्यं॰चंद्रपाते॰तल्लि
प्तादिफलं॰स्थित्यर्धघट्यानीतंकलादिपूर्वफलं॰स्वकं॰स्वगत्युपपन्नं॰अन्यथाविपरीतं॰ग्रहस्थित्यर्धनिमित्तंयोज्यं॰मोक्षस्थित्यर्द्ध
निमित्तंहीनमित्यर्थः॥संसाध्य॰कृत्वा॰तद्विक्षेपैः तात्कालिकचंद्रपाताभ्यामानीतैःशरकलाभिः कलानांबहुत्वाद्विक्षेपैरितिबहुव
चनं॰विक्षेपाभ्यामित्यर्थः॥पुनःपुनः स्थितिदलंकार्यं॰अत्रेकंपुनःपदं॰स्पर्शस्थित्यर्धसंबंधं॰द्वितीयंमोक्षस्थित्यर्धेपुनःपदं॰तेनस्प
र्शस्थित्यर्धोक्तसाधितचंद्रपाताभ्यामानीतशरेणप्रागुक्तप्रकारेणस्पर्शस्थित्यर्धंसाध्यं॰मोक्षस्थित्यर्धार्थंसाधितचंद्रपाताभ्या
मानीतशरेणपूर्वोक्तरीत्यामोक्षस्थित्यर्धंसाध्यमित्यर्थः॥तत्रोभयमसकृद्वारंवारं॰स्पर्शस्थित्यर्धानीतचालनेनमध्यकालिकौ
चंद्रपातावुक्तरीत्याप्रचाल्यतच्छरेणपूर्वोक्तरीत्यास्पर्शस्थित्यर्धमेवंयावदविशेषः॥एवंमोक्षस्थित्यर्धानीतचालनेनमध्यका
लिकौचंद्रपातावुक्तरीत्याप्रचाल्यतच्छरेणपूर्वोक्तरीत्यामोक्षस्थित्यर्धंतस्मादप्युक्तरीत्यामोक्षस्थित्यर्धमेवंयावदविशेषइत्यर्थः
ननुस्थित्यर्धविमर्धार्धयोरेकरीत्योक्तेः कथंविमर्दार्धमसकृत्साध्यमितिनोक्तमित्यत आह विमर्दार्धमिति तथा॰स्पर्शमोक्षस्थित्य
र्धसाधनरीत्याअसकृद्यावदविशेषस्तावत्स्पर्शमर्दार्धमोक्षमर्दार्धंचसाध्यं॰यथाहि॰स्थित्यर्धनाडिकाभ्यास्तेत्यत्रविम
र्दार्धनाडिकाग्रहात्॰स्पर्शमर्दार्धमोक्षमर्दार्धंसाध्यं आभ्यांप्रत्येकमसकृत्स्पर्शमर्दार्धमोक्षमर्दार्धेस्फुटेस्तः॥अत्रोपप
त्तिः॥प्रागुक्तंक्षेत्रंस्पर्शमोक्षसंमीलनोन्मीलनकालिकशरवशादितितदज्ञानान्मध्यकालिकशरग्रहणेनस्थूलंस्थित्यर्धमर्दा
र्धंचातोमध्यकालान्तरेणपूर्वाग्रिमकालयोस्तेषांसंभवात्कालचालितचंद्रपाताभ्यांविक्षेपस्तापस्तात्कालिकोभवति॥
परंस्थूलः॥स्थूलस्थित्यर्धाद्यानीतत्वात॥अतोस्मादानीतस्थित्यर्धादिश्वरापेक्षायासूक्ष्ममपिस्थूलमित्यसकृत्सूक्ष्ममिति
तत्रसंमीलनोन्मीलनकालयोःशरज्ञानात्स्पर्शमोक्षसंभवात्स्पर्शमोक्षमर्दार्धमितिध्येयं॥१५॥ ॥अथमध्यग्रहणस्पर्शमो श्री: ४८

क्षकालानाह स्फुटतिथ्यवसानंतुमध्यग्रहणमादिशेत॥स्थित्यर्धनाडीकाहीनेग्रासोमोक्षस्तुसंयुते इति॰स्पष्टतिथ्यंतकाले॰तुका
रात्पूर्वापरकालनिरासः॥मध्यग्रहणं॥ग्रासोपचयसमाप्तिः कथयेत्॰मोक्षस्थित्यर्थंसाध्यमित्यर्थः॥तत्रोभयमसकृद्वारंवा
रं॰स्पर्शस्थित्यर्धानीतचालनेनमध्यकालिकौचंद्रपातावुक्तरीत्याप्रचाल्यतच्छरेणपूर्वोक्तरीत्यास्पर्शस्थित्यर्धमस्मादप्युक्तरीत्या
स्पर्शस्थित्यर्धमेवंयावदविशेषः॥एवंमोक्षस्थित्यर्धानीतचालनेनमध्यकालिकौचंद्रपातावुक्तरीत्याप्रचाल्यतच्छरेणपूर्वोक्त
रीत्यामोक्षस्थित्य॰मध्यग्रहणसंबंधेनमध्यसूर्यचंद्रानीतमध्यतिथ्यंतेतत्संभवइतिकेचित्भ्रमस्तद्वारणार्थंस्फुटेति॰स्थि
त्यर्धघटिकाभिरूनेतिथ्यंतकालेग्रासः॥स्पर्शःसंयुते॰स्थित्यर्धघटिभिर्युतेतिथ्यंतकालेमोक्षः॥तुकारः स्पर्शमोक्षस्थित
र्धाभ्यांस्पर्शमोक्षकालावितिविषयव्यवस्थार्थकः॥अत्रोपपत्तिः तिथ्यंतकालेछाद्यछादकयोः पूर्वापरांतराभावाद्योगेमंड
लस्पर्शाद्यावान्नभवतिततः पूर्वाग्रिमकालयोर्न्यूनएवातोत्रमध्यग्रहणकालः॥केचित्तु॰पर्वांतः किलसाधितोभवलयेसूर्ये
दुविक्षांतरात्तस्मिन्नबिंबसमागमोनहियतश्चंद्रः शरायेस्थितः॥तस्मादायनदृक्संस्कृतविधोरानीततिथ्यंतकोबिंबैक्यं
भवतितिकिंनविहितंपूर्वैर्नविघ्नोवयमित्यनेनात्रमध्यग्रहणंखंडयंति॥तन्न॰पूर्वापरांतराभावेयोगसत्वेनकदंबसूत्रद्वयोयाम्यो
त्तरांतरस्यैवसत्वेनतत्रमध्यग्रहणस्योचितत्वात्॥अन्यथाध्रुवसूत्रेसमसूत्रेवायोगाभ्युपगमेतिदिग्गमनाविरहापत्तेः॥
यथागतग्रहयोः कदंबसूत्रेणैवयोगाभ्युपगमात्॥दृष्टिप्रययार्थदृक्कर्मोक्तेः॥ग्रहणद्वयस्यस्वतएवदृग्गोचरत्वात्॥ग्रहद्वया
दर्शनात्रेत्यादिसंक्षेपः॥मध्यग्रहणकालात्पूर्वंस्पर्शस्थित्यर्धघटीभिस्पर्शः॥अग्रिमकालेमोक्षस्थित्यर्धघटीभिर्मोक्षः॥
स्थित्यंतपोत्स्वदंतररूपत्वेनसिद्धेः॥१६॥ ॥अथसंपूर्णग्रहणेनिमीलनोन्मीलनकालावप्याह॥तद्वदेवविमर्दार्धनाडिका
हीनसंयुते॥निमीलनोन्मीलनाख्येभवेतांसकलग्रहेइति॰संपूर्णग्रहणेतद्वत्॥यथास्थित्यर्धानाधिकेस्थित्यंतेस्पर्शमोक्षौ
तथेत्यर्थः॥एवकारातादिक्कालादिनिरासः॥स्पर्शविमर्दार्धक्षेमोक्षविमर्दार्धघटीभ्यांक्रमेणोनयुतेतिथ्यंतकालेणनिमीलनो

203
1941

स०टी०
४७

मीलन संज्ञेस्यातां ॥ अत्रोपपत्तिः ॥ मर्दार्धस्यमध्यकालात्तदंतररूपत्वेननहनाधिकेतास्मिन्क्रमेणनिमीलनोन्मीलनेसंभवे
ग्रहणारंभभवतः ॥ स्पनग्रहणंतत्स्वरूपव्याघातांतदभावः ॥१७॥ ॥अथेष्टकालेइष्टग्रासज्ञानार्थंकोटिकलानयनमाह ॥ इष्ट
नाडीविहीनेनस्थित्यर्धेनार्कचंद्रयोः ॥ भुक्त्यंतरंसमाहन्यात्षष्ट्याप्ताःकोटिलिप्तिकाइति॰ सूर्यचंद्रयोर्गत्यंतरं॰ कलात्मकंग्रह
णारंभाद्याइष्टघटिकाः स्पर्शस्थित्यर्धघट्यनधिकास्ताभिरून नेनस्पर्शस्थित्यर्धेनगुणयेत् ॥ अस्मात्षष्टिविभक्ताःकोटिक
लाःभवंति॰ अत्रोपपत्तिः ॥ इष्टकालेछाद्यछादकमंडलकेंद्रयोरंतरंकर्णः तत्कालशरोभुजः ॥ तत्कालशराग्रमध्यकालिकश
रग्रयोरंतरंविक्षेपवृत्तेकोटिरितिक्षेत्रेइष्टघट्यनस्पर्शस्थित्यर्धघटिकानांकला॰ कोटिः लिप्ता॰ पूर्वस्पर्शकालिककोट्यः
स्थित्यर्धघटिकानांस्थित्वात् ॥ १८ ॥ ॥ अथात्रसूर्यग्रहणेविशेषमाह ॥ भानोर्ग्रहेकोटिलिप्तामध्यस्थित्यर्धसंगुणाः ॥
स्फुटस्थित्यर्धसं कोभिस्फुटाःकोटिकलास्मृताइति॰ सूर्यस्यग्रहणेयुक्तप्रकारेणयाःकोटिकलाः ॥ सूर्यग्रहणोक्तस्पष्टस्थि
त्यर्धानीताः ॥ मध्यस्थित्यर्धेन॰ सूर्यग्रहणोक्तस्पष्टशरानीतस्थित्यर्धेनसंगुणिताःस्फुटस्थित्यर्धेनसूर्यग्रहणाधिकारोक्तेनभ
काःसंतःस्पष्टाःकोटिकलाःसूर्यग्रहणसंज्ञेस्तकाः अत्रोपपत्तिः ॥ सूर्यग्रहणेस्पर्शमोक्षान्यतरमध्यकालयोरंतरस्यस्थित्य
र्धत्वात्तस्यचस्पष्टशरोत्थस्थित्यर्धलंबनांतरैक्यसंस्कारमितत्वात्स्पष्टस्थित्यर्धानुरूपानुक्तरीत्यानीताः कोटिकलाः
अपेक्षितास्वस्पष्टशरोद्भूतस्थित्यर्धानुरूपाः ॥ एतत्कोटिसंबंधक्षेत्रस्यस्थित्यर्धक्षेत्रांतर्गतत्वात् ॥ स्पष्टस्थित्यर्धस्य
तत्क्षेत्रासन्नत्वाभावात् ॥ अन्यथास्पष्टशरोद्भूतस्थित्यर्धस्यलंबनांतरैक्यसंस्कारानुक्तेप्रसंगः ॥ अतःस्पष्टस्थित्यर्धेन
ताआगताःकोटिककलास्तदास्पष्टशरोद्भूतक्षेत्रजमध्यमरूपस्थित्यर्धेनकाइतिस्फुटाःकला॰ लिप्ताः ॥१९॥ ॥
अथाभ्यइष्टग्रासानयमाह ॥ क्षेपोभुजस्तत्कृतिवर्गयुतेर्मूलंश्रवस्तुनत ॥ मानयोगार्धतःप्रोज्झ्यग्रासस्तात्कालिकोभवेदि
ति ॥ क्षेपोविक्षेपोभुजः ॥ कोटिभुजयोःकर्णसापेक्षतादाहतयोरिति॰ कर्णस्तु॰ तयो॰ कोटिभुजयोर्वर्गयोगान्मूलंसिध्य
त्येव॰ तत् ॥ कर्णात्मकंमूलं ॥ ग्राह्यग्राहकमानैक्यार्धाद्विशोध्यशेषंतात्कालिकःकाल्पितेष्टकालसंबंधीग्रासःअवांतरग्रा श्री:
४७

205
1941

सःस्यात् ॥ अत्रोपपत्तिःक्षेत्रंपूर्वंप्रतिपादितं॰ स्पर्शकालेमानैक्यखंडस्यकर्णत्वात्क्षेत्रयोरुभयोर्मध्यकावधिस्तादिष्टकर्णोनंमानै
क्यखंडमिष्टग्रासएव ॥ २० ॥ ॥अथमध्यग्रहणानंतरमिष्टग्रासानयनमाह ॥ मध्यग्रहणतश्चोर्ध्वमिष्टनाडीर्विशोधयेत् ॥ स्थि
त्यर्धान्मौक्षिकाच्छेषंप्राग्वच्छेषंतुमौक्षिकेइति॰ मध्यग्रहणकालात्॰ ऊर्ध्वमनंतरं॰ चकारोविशेषार्थकतुकारपरः ॥ इष्टघटिकाः
॥ कर्म॰ मौक्षिकात् ॥ मोक्षकालसंबंधात्स्थित्यर्धात॰ नस्पर्शस्थित्यर्धात्॰ विशोधयेत् ॥ गणकइतिकर्ताक्षेपः ॥ शेषंकोटिलिप्ता
दिग्रासानयनांतंगणितकर्मप्राग्वत्॰ ॥ भुक्त्यंतरंसमाहन्यादित्युक्तप्रकारेणकुर्यात् ॥ मौक्षिकेमोक्षस्थित्यर्धांतर्गतेष्टकाले॰
तुर्विशेषःग्रासाःशेषं ॥ उर्वरितोग्रासोवांतरोभवति॰ नपूर्ववत्गतः ॥ अत्रोपपत्तिःमध्यग्रहणात्पूर्वमिष्टकालस्यग्रहणारंभा
वधिकस्पर्शस्थित्यर्धसंबंधत्वात्प्रागतोग्रासउपचयात्मकः ॥ नावशिष्टः अवशिष्टमंडलस्यभुक्तत्वेनअस्तत्वासंभवात्॰ ए
वंमध्यग्रहणानंतरमिष्टकालस्यमोक्षस्थित्यर्धांतर्गतत्वादुक्तरीत्यानीतोग्रासोपचयात्मकः ॥ नतुक्षविंबदर्शनात्मकोग्र
स्तत्वाभावात् ॥ २१ ॥ ॥ अथाभीष्टग्रासादिष्टकालानयनंश्लोकाभ्यामाह ॥ ग्राह्यग्राहकयोगार्धाच्छोध्याःस्वच्छन्नलिप्ति
काः ॥ तद्वर्गात्प्रोज्झ्यतत्कालविक्षेपस्यकृतिंपदं ॥ २२ ॥ ॥ कोटिलिप्तारवेःस्पष्टस्थित्यर्धेनाहताहताः ॥ मध्येनलिप्तास्तन्ना भंकौ
प्याहितवत्ग्रासनाडिकाइति॰ छाद्यछादकमानैक्यखंडात् ॥ अभीष्टग्रासकलाःशोध्याः ॥ शेषस्यवर्गात्॰ अभीष्टग्रा
सकालिकविक्षेपस्यवर्गंशोध्य॰ शेषस्यमूलंकोटिकलाःसूर्यग्रहणेविशेषमाहरवेरिति॰ सूर्यस्यग्रहणेइतिशेषः ॥ भानो
र्ग्रहेइतिपूर्वमुक्तेः ॥ उक्तप्रकारेणयाःकलास्तान्मध्यग्रहणकालस्पर्शमोक्षान्यतरकालयोरंतररूपेणस्पष्टस्थित्यर्धेनगुण्याः
स्पष्टशरोत्पन्नेनस्थित्यर्धेनमध्यमेनभक्ताः फलंकोटिकलाभवंति॰ स्थितिवत् ॥ स्थित्यर्धसाधनरीत्या॰ षष्ट्यासंगुण्यास्सूर्ये
दोर्भुक्त्यंतरंभाजितेइत्युक्तेन ॥ तासांकोटिकलानांघटिकायास्ताअभीष्टग्राससंबंधिघटिकाःस्पर्शमोक्षान्यतरस्थित्यर्धां
तर्गताःक्रमेणमध्यग्रहणाच्छेषागताभवंति ॥ अत्रोपपत्तिः ॥ पूर्वोक्तव्यत्यासात्कगमनरा॰ परंतुस्वाभीष्टग्रासकालिकशर
ज्ञानेसूक्ष्मंतच्छरज्ञानंमध्यकालिकशरग्रहणेनस्थूलमतएव ॥ भास्कराचार्यैःकालसाधनेनकालबाणेनमुहुःस्फुटइत्यु

क्रमिति विशेषः ॥ २३ ॥ ॥ अथ वक्ष्यमाणग्रहणपरिलेखोपयुक्तवलनस्यानयनं श्लोकाभ्यामाह ॥ नतज्या सेज्यवाम्यस्त्वाक्षि
ज्याप्तात्तस्य कार्मुकं ॥ वलनांशाः सौम्यवाम्याः पूर्वापरकपालयोः ॥ २४ ॥ ॥ राशित्रययुतात्ग्राह्यात्क्रांत्यंशैर्दिक्समैर्युताः
भेदेऽन्तराज्यावलना सप्तत्यंगुलभाजितेति ॥ तत्कालिकं वलनं कर्तुमिष्टं तत्कालिकं नतं चंद्रग्रहणे चंद्रस्य ॰ सूर्यग्रहणे सर्वस्य
साध्यंति ॥ तद्यथा ॰ सोदयात्स्वात्स्वास्ताद्गतशेषघटिकाः स्वदिनार्धांतर्गताः स्वदिनार्धोनाः क्रमेण पूर्वापरनतघटिकाः
भवंति ॰ तन्नतं नवतिगुणं स्वदिनार्धभक्तं नतांशाः स्युः तेषां ज्या नतज्येत्यर्थः ॥ स्वदेशाक्षांशज्यया गुणिता त्रिज्यया भक्ता ॰ फल
स्य धनुः कलात्मकं षष्टिभक्तं पूर्वापरकपालयोः पूर्वापरनतयोः क्रमेणोत्तरदक्षिणाः वलनांशाः भवंति ॰ तत्कालिकं वलनं
तात्कालिकात् ग्राह्यात् ॥ राशित्रययुतात्सायनांशाद्येकांत्यंशास्तैर्दिक्तुल्यैर्युताः तेषां ज्या ॰ भेदे ॰ भिन्नदिक्के ॰ अंतरात् ॥
क्रांत्यंशवलनांशयोरंतरात् ॥ ज्या ॰ सप्तत्यंगुलैर्भक्ता शेषं दिक्का ॰ अंगुलात्मकत्वेन हरस्यो दशादंगुलादिका वलनाभ
वति ॥ अत्रोपपत्तिः ॥ समवृत्तपूर्वापरादिकस्थः क्रांतिवृत्तपूर्वापरादिक् दिङ्गीयानन्नांतरेण वलिता उत्तरस्यां दक्षिणस्यां वा
वलनांशाः तदानयनार्थं प्रथमतः समवृत्तानुरूपाद्दिग्भ्यो विषुवद्वृत्तदिङ्गीयावानांतरेण वलिता दक्षिणोत्तरयोस्तदा
क्षवलनं ॥ तथाहि ॥ सनभोत्तवलवृत्तं ग्रहबिंबकेंद्रस्थं समाविषुवद्वृत्तयोर्यत्र लग्नं तत्संदेशांनवत्यंशांतरे स्वस्ववृत्ते प्राच्योरंत
रं वलनं नतुल्यमेव तराद्दिशामंतरं पूर्वकपालस्थग्रहे समवृत्तप्राचीतो विषुवद्वृत्तप्राच्या उत्तरत्वादुत्तरं ॥ पश्चिमकपालस्थे
तु समवृत्तप्राचीतो विषुवद्वृत्तप्राच्या दक्षिणत्वाद्दक्षिणं ॥ तत्र क्षितिजस्थे ग्रहे तदंतरमक्षांशतुल्यं याम्योत्तरवृत्तस्थे ग्रहे
तदंतराभावः ॥ अतस्त्रिज्यातुल्यया नतकालः ज्यया अक्षज्यातुल्याक्षवलनज्या तदेष्टनतज्यया का इत्यनुपातागताक्षज्या
या धनुराक्षं वलनमुक्तमुपपन्नं ॥ द्वितीयं तु विषुवद्वृत्तदिग्भ्यः क्रांतिवृत्तदिङ्गीयावतांतरेण वलिता दक्षिणोत्तरयोस्तदा
यनं वलनं ॰ तथाहि ॰ ध्रुवप्रोतवृत्तं ग्रहबिंबकेंद्रस्थं विषुवद्वृत्ते यत्रासन्नं लगति तत्स्थानाच्चतुर्थांशांतरे यत्स्थानं तद्विषुवत्प्राची
तस्याग्रहबिंबात् त्रिभांतरित क्रांतिवृत्तप्राच्यो यदंतरं तत्तदायनं वलनं ॥ तत्तुल्यमेवोत्तरदिशामंतरं ॰ उत्तरायणस्थे ग्रहे श्रीः ४८

207
1941

उत्तरदक्षिणायनस्थे ग्रहे दक्षिणं ॰ तदयनसंवादभावात्मकं ॰ गोलसंधौ परमक्रांतितुल्यमतः सत्रिभक्रांतितुल्यं सत्रिभग्रहगोल
दिक्कमित्युपपन्नं राशित्रययुतात् ग्राह्यात् क्रांत्यंशैरिति ॰ द्वयोर्वलनयोरेकदिक्त्वे समवृत्तप्राचीतः क्रांतिवृत्तप्राचीत योगरूपस्फु
टवलनांतरेण वलनदिशि भवति ॰ भिन्नदिक्के तु वलनांतररूपस्फुटवलनांतरेण शेषदिशि भवति ॰ तज्यास्फुटवलनज्या त्रि
ज्यावृत्ते ॰ अग्रे परिलेखे एकोनपंचाशन्मितव्यासार्धवृत्ते तदानार्थं त्रिज्यावृत्ते इयं तदैकोनपंचाशन्मितव्यासार्धे केत्यनुपाते
प्रमाणफलयोः शिलापवर्तनाष्टस्थाने धोवयवत्यागात्सप्ततिः अतो दिक्समैर्युताद् इत्याद्युपपन्नं ॥ २५ ॥ ॥ अथ कलात्म
कं बिंबविक्षेपादिनामंगुलीकरणमाह ॥ सोन्नतं दिनमध्यर्धं दिनार्धाप्तं फलेन तु ॥ छिद्याद्विक्षेपमानानि तान्येषामंगुला
नीत्विति ॰ दिनमानं ॰ अध्यर्धं ॰ अर्धेन इत्यध्यर्धं ॰ सार्धं युक्तमित्यर्थः ॥ अभीष्टकालिनोन्नतघटीभिः सहितं ॰ दिनार्धेन भक्तं
फलेन ॰ तु कारो यत्र ग्रहणं तस्य दिनमानोन्नते ग्राह्ये इत्यर्थकः ॥ विक्षेपग्राह्यग्राहकबिंबमानानि ॰ तानि ॰ पूर्वोक्तानि ॰ क
लात्मकानि ॰ ग्रासादिकमपि धेयं ॰ भजेत् ॥ तुकारात्फलं ॥ एवं कलात्मकानां ॥ अंगुलानि ॰ भवंति ॰ अत्रोपपत्तिः ॥ उदया
स्तकाले बिंबकिरणानां भूमिगोलावरुद्धत्वेनाल्पैर्धस्थकिरणानां नयनप्रतिहननानर्हत्वाद्बिंबव्यक्तत्वान्महद्भासते ॥
तत्रांगुलात्मकं बिंबकलात्रयात्मकैकांगुलप्रमाणेन भवति ॥ खमध्यस्थे ग्रहे तु बिंबस्य सर्वकिरणावरुद्धत्वान्नयनप्रति
घाताच्च स्वल्पं बिंबं भासते ॰ ॥ तत्रांगुलात्मकं बिंबकला चतुष्टयात्मकैकांगुलप्रमाणेन भवति ॥ तत्रोदयास्तकाले शंको
रभावात्खमध्ये तस्य त्रिज्यातुल्यत्वात्त्रिज्यातुल्यशंकौ उदयकालिकाल्लिकैकांगुलमानस्य कलात्रयस्यैकांगुलत्वे च
यो लभ्यते तदेष्टशंकौ क इत्यनुपातेनाभीष्टकाले फलं युक्तत्रये मैकांगुलस्य कलात्मकं मानं भवति ॥ अत एव भास्कराचार्यै
रुदयास्तकाले सार्धं द्वयं कला अंगुलमानमंगीकृत्य त्रिज्योद्धृतास्तत्समभोक्तशंकुः ॥ सार्धद्वियुक्तोंगुललिप्तिका भुस्
रित्युक्तं ॥ तत्र भगवता लोकानुकंपया सल्पांतरात् मध्याह्नेपि कलाचतुष्टयात्मकमेकांगुलमंगीकृत्य दिनार्धतुल्यपर
मोन्नतकाले एवमुपचयस्तदेष्टोन्नतकाले इत्यनुपातागता फलयुक्तं तयं कलाएकांगुलमानमभीष्टकाले ॰ तत्र दिनार्ध

स०टी०
४९

नकोन्नतकाल स्वफलरूपत्वात्त्रयाणां समछेद तयायोजने त्रिगुणितं दिनार्धं सार्धैकगुणदिनमानरूपमुन्नतकलायुक्तं दिनार्धंभ
कमितिसिद्धं ॥ नतएव नतकालाभिरूपांगुलं तदंष्टकलाभिः किमित्यनुपातेन कलात्मकानामंगुलीकरणमुक्तमुपपन्नं ॥ २८ ॥ ॥
अथाग्निमग्रंथस्यासंगतित्वानिरासार्थमधिकारसमाप्तिं फक्किकयाह इति चंद्रग्रहणाधिकार इति । स्पष्टं ॥ रंगनाथविरचिते सूर्य
सिद्धांतटिप्पणे ॥ चंद्रग्रहाधिकारोयं पूर्णोऽष्टप्रकाशके ॥ १४ ॥ ॥ इति श्रीसकलगुणकसार्वभौमबल्लालदैवज्ञात्मजरंगनाथगण
कविरचिते गूढार्थप्रकाशके चंद्रग्रहणाधिकारः संपूर्णः ॥ ॥ अथ सूर्यग्रहणाधिकारो व्याख्यायते ॥ ॥ तत्र प्रसंगात्सूर्यविशेष
प्रयुक्तं चंद्रग्रहणाधिकारातिरिक्तः ॥ सूर्यग्रहणाधिकारस्तद्विशेषसंप्रेभावस्थानादर्शनात्तन्नियमात्तयोरभावस्थानकथनप्रयोज
नतयालंदेवाह ॥ मध्यलग्नसमेभानौ हरिजस्य न संभवः ॥ अक्षोदङ्मध्यमक्रांतिसाम्ये नावनतेरपीति ॥ सूर्ये । अमावास्यांत
कालिके ॥ मध्यलग्नसमे सति ॥ दिनमध्यस्थानं ऊर्ध्वं याम्योत्तरवृत्ते लग्नः क्रांतिवृत्तप्रदेशो मध्यलग्नं । त्रिप्रश्नाधिकारोक्तं तत्तुल्ये
सति । मध्याह्न इति फलितं । हरिजस्य । लंबनस्याभाव क्षितिजवशात्लंबनोस्यते लंबनस्यापि क्षितिजवाचकहरिजशब्देना
भिधानात् ॥ । संभवउत्पत्तिः न । तत्र लंबनाभाव इत्यर्थः ॥ अयं मध्याह्न इति स्फुटो विपक्षया मध्यलग्नसमे इति वक्रोक्तिः फ
लाभिंगवतो नोचितेत्यग्निमग्रंथार्थतत्वविचारणायापि मध्याह्ने तदाभावानुपपत्ते ॥ सांप्रदायिकव्याख्यानाह्लतत्वा
र्थो व्याख्यायते । लग्नयोरुदयक्षितिजप्रदेशयोः संलग्नक्रांतिवृत्तप्रदेशयोर्मध्यं । ऊर्ध्वमध्यप्रदेश स्त्रिभोनलग्नमित्यर्थः ॥
प्रयोगस्तु मध्याह्न इतिवत् ॥ ननु त्वस्मिन् केलंबनस्याभाव इति । दृग्ज्ञानलग्नं प्रथमं विधायलंबनं त्रिभोनलग्नतुल्ये । रवौ वह्
नेप्यधिकं बलत्वादिवंधनं कशश्ववंद्य मितिभास्कराचार्येण स्फुटमुक्तेश्च । नत्यभावस्थानमाह अक्षेत्यादि । अक्षांशाः उत्तरा
ये । मध्यस्य । मध्यलग्नक्रांत्यंशाः ॥ अत्र मध्यलग्नशब्देन दशमभावस्त्रिभोनलग्नं वाप्याह्युभयपक्षेऽपि दोषः ॥ अनयोस्तु
ल्यत्वे मध्यलग्नतुल्यार्कत्वाभावेपि तदभावापत्तेः ॥ अत्रोपपत्तिः ॥ अमावास्यांतकाले समौ सूर्यचंद्रौ । तत्र चंद्रस्याराभावेनभो
नीयमानं सूर्यमर्करश्मनावधिचंद्रस्य उपात्येतिभगर्भेछादकत्वं चंद्रस्य सूर्यस्यछाद्यत्वं संभवति । तत्र मनुष्याणामसत्वाद्भूर श्रीः ४९

पृष्ठेपांस्त्वा चन्द्रपृष्ठान्नीयमानमर्कोपरि सूर्यचंद्रौ न लगत्येव । किंतु चंद्राधिष्ठानगोले चंद्रबिंबाद्दूर्ध्वं लगति । तत्र यदा चंद्रभाया
तिनदा भूपृष्ठस्य सूर्यस्य चंद्रः छादको भवति । यदा तु खमध्ये सूर्यस्तदा भूगर्भस्थं भूपृष्ठस्थं सूर्यबिंबयोपरि गमकमेव चंद्रे लगतीति
भूपृष्ठे मांतकाले चंद्रश्छादको भवति । अतएव भूगर्भपृष्ठस्थयोरंतरं लंबनं । भूपृष्ठे स्थानात्सूर्योपरिगात्चंद्राधिष्ठानाकाशगोले चंद्रस्य
प्रारसत्वे चंद्रबिंबस्यालंबितत्वात् ॥ अत एव भास्कराचार्येणारुक्तं दृग्गर्भस्थयोरैक्यादर्खमध्ये नास्ति लंबनमिति । अथ चंद्राधि
ष्ठानगोले भूपृष्ठस्थमर्कोपरिगतं चंद्रबिंबाद्दूर्ध्वं चंद्रदृग्वृत्ते यं देशे लगति तल्लंबनं दृग्वृत्ताकारक्रांतिवृत्ते भवति । यदा तु दृक्
वृत्ताद्भिन्नं नतादा भूपृष्ठस्थं चंद्राधिष्ठानगोले चंद्रदृग्वृत्ते चंद्राद्दूर्ध्वं यत्र लग्नं तत्र चंद्रगोलस्थक्रांतिवृत्तयाम्योत्तररूपक
दंबप्रोतवृत्तमानीय चंद्रगोलस्थक्रांतिवृत्ते यत्र लग्नं तत्र चंद्रबिंबयोरंतरं क्रांतिवृत्ते पूर्वापरं स्फुटलंबनकलाः कोटिः ॥ चंद्रस्य
क्रांतिवृत्तानुसारिणगमनात् ॥ प्रोतवृत्ते क्रांतिवृत्तदृग्वृत्तयोरंतरं याम्योत्तरं कलात्मकं नतिर्भुजः ॥ भूगर्भपृष्ठस्थयोरंतरं दृग्वृ
त्ते कलात्मकं दृग्लंबनं कर्णः ॥ दृग्वृत्तस्य कदंबप्रोतवृत्ताकारत्वे क्रांतिवृत्ततयोरंतराभावाल्लंबनाभावः ॥ याम्योत्तरत्वं दृग्लं
बनं नतिरेवोत्पन्ना । दृग्वृत्ताकारक्रांतिवृत्ते तु दृग्लंबनमेव क्रांतिवृत्ततयोरंतरमिति लंबनमुत्पन्नं नत्यभावश्च ॥ तथा च दृग्वृ
त्तस्य कदंबप्रोतवृत्ताकारत्वे त्रिभोनलग्नस्थाने कौ भवति । तद्वृत्तस्य क्रांतिवृत्ति याम्योत्तरत्वेनोदयास्तलग्नमध्यवर्तित्वे
नलग्नस्थनात् त्रिभांतरित्वात् ॥ नहि क्रांतिवृत्ताधाम्योत्तरांतरज्ञानार्थं समप्रोतवृत्तमंगीकार्यं येन दशमभावतुल्यार्के लं
बनाभावउपपन्नः स्यात् ॥ क्रांतिवृत्तस्य गोलवृत्तत्वेन समप्रोतवृत्तस्य देशवृत्तत्वेन संबंधाभावात् ॥ अत एव भगवतास
र्वज्ञेन नति साधनार्थमग्रे दृक्क्षेपः कदंबप्रोतवृत्ते त्रिभोनलग्नस्य खमध्यस्थत्वेन तदा नदा तस्य दशमभावतुल्यत्वेन दशम
भावनतांशाभावाद्दृक्क्षेपाभावः ॥ तदा त्रिभोनलग्नस्य नतांशाभावश्च । नतांशाभावस्त्वक्षांशतुल्योत्तरक्रांतौ । सुखा
र्थं स्थलांगीकारे तु दशमभावस्यैव नतांशोन्नतज्येदृक्क्षेपदृग्गतीनतिलंबनयोः साधनार्थे समनंतरमेव भगवतोक्ते ।
नतु वस्तुरूपं । आयासेन दृक्क्षेपसाधनस्योक्तस्य वैयर्थ्यापत्तेरिति सर्वं निरवद्यं ॥ १ ॥ ॥ अथोदिष्टयोरभावस्थानानि

209
1941

स्प०टी०
५०

निक्रंत्स्याने संवातस्य तिपादनंभातिज्ञानीते• देशकालविशेषेणयथावनतिसंभवः॥ लंबनस्यापिपूर्वान्यादिग्वशान्नतथोच्यतेइति• दे
शाविशेषेणकालविशेषेण• अवनतिसंभवः॥ नतिकक्षोत्पत्तिगोलस्थित्यायथाभवति• लंबनस्य• अपि• समुच्चये• त्रिभोनल
ग्नस्थानात्पूर्वापरदिगनुरोधात॥ चकारात्संभवोदेशकालविशेषेणयथाभवतीत्यर्थः॥ तथा• तत्तुल्यत्वेन• नतिलंबनेआ
नयनद्वारामयाकथ्यते॥ २॥ ॥तत्रोपयुक्तादयाभिधामाह॥ लग्नपर्वविनाडीनांकुर्यात्स्वैरुदयास्तकैः॥अनयत्याप
क्रमज्याघ्नीलंबज्यामोदयाभिधेति॥ स्वैः स्वदेशीयैः॥ उदयास्तकैः॥ राश्युदयासुभिः॥ पर्वघटिकानांलग्नंगणकः कु
र्यात॥ पर्वांतकालिकंलग्नंसाध्यमित्यर्थः॥ यद्यपिपूर्वंलग्नसाधनंस्वोदयैरेवोक्तमितिस्वैरुदयास्तकैरितिव्यर्थंतथापि
समनंतरमेवदशमभावसाधनोक्त्याकस्यचिल्लंकोदयैरेवात्रसाध्यमितिभ्रमस्यवारणायपुनरुक्तिः॥ तस्यलग्न
स्यायनांशसंस्कृतस्यज्याभुजज्या• परमक्रांतिज्यया गुण्या• स्वदेशीयलंबज्ययाभक्तयाफलमुदयसंज्ञंस्यात॥ अत्रोपपत्तिः
लग्नक्रांतिज्यासाधनार्थंलग्नभुजज्यायाः परमक्रांतिज्यागुणस्त्रिज्याहरस्ततोलंबज्याकोटौत्रिज्याकर्णस्तदालग्नक्रां
तिज्याकोटौकः॥ कर्णइत्यनुपातौत्रिज्ययोर्नाशाल्लग्नभुजज्यापरमक्रांतिगुणालंबज्ययाभक्ताफलंग्रस्याग्राः इयंभगव
तोदयसंज्ञोक्ता• लग्नस्योदयसंज्ञत्वात॥ उदयसंबंधात्वित्युक्तमुपपन्नं॥ ३॥ ॥ अथोपयुक्तांमध्यज्यांसाधयच्छ्लोकेनाह॥ त
द्वल्लंकोदयैर्लग्नंमध्यसंज्ञंयथोदितं॥ तत्क्रांत्यक्षांशसंयोगोदिक्साम्येंतरमन्यथा॥ ४॥ ॥ शेषंनतांशास्तन्मौर्विमध्यज्या
साभिधीयतेइति• तदा• पर्वांतकाले• लंकोदयैः• व्यक्षदेशीयराश्युदयैः॥ यथोदितं• पूर्वोक्तप्रकारेण• ज्ञातकपक्षलग्न
नतघटीभिर्धनमृणंयथायोग्यं• मध्यसंज्ञंलग्नंदशमभावात्मकंसाध्यं• अत्रलग्नसंबंधेनस्वदेशराश्युदयासुग्रहणशं
कावारायणायलंकोदयैरित्युक्तं• तस्यदशमभावस्यायनांशसंस्कृतस्यक्रांतिः॥ स्वदेशाक्षांशाः अनयोर्योगएकदि
क्केकार्यः अन्यथा• भिन्नदिक्के• अंतरंतयोरेव• शेषंसंस्कारजदिक्कानतांशाः तेषांज्याकार्याः सा• मध्यज्याच्यते• श्रीः ५०
तत्संबंधात• अत्रोपपत्तिः॥ स्पष्टा॥ अथाभ्यामुपयुक्तंदृक्क्षेपंलंबनोपयुक्तांदृग्गतिंचसाधयच्छ्लोकेनाह॥ मध्योदयज्या

211/194

प्याभ्यस्ता त्रिज्याप्ता वर्गितंफलं॥ मध्यज्यावर्गविश्लिष्टंदृक्क्षेपः शेषतः पदं॥ ५॥ ॥ तत्त्रिज्यावर्गविश्लेषान्मूलंशंकुः सदृग्गति
रिति॥ पूर्वोक्तमध्यज्यापूर्वानीतोदयाभिधेयोदयज्ययाः॥ अस्याज्यारूपत्वाज्ज्येत्युक्तं• गुणिता• त्रिज्ययाभक्ता• फलं• २ वर्गितं
वर्गः संजातोयः स्यात॥ फलस्यवर्गः कार्यइत्यर्थः॥ मध्यज्यायाः वर्गे• विश्लिष्टं• हीनंवर्गितंफलंकार्यं• शेषान्मूलंदृक्क्षेपः स्यात
दृक्क्षेपत्रिज्ययोर्योगौर्वनयोरंतरान्मूलंशंकुः॥ सआनीतः शंकुर्दृग्गतिसंज्ञोभवति• नतुशंकुमात्रं• अत्रोपपत्तिः त्रिभोनल
ग्नस्यादृग्ज्यानयनार्थंक्षेत्रंमध्यलग्नदृग्ज्याकर्णस्त्रिभोनलग्नस्ययाम्योत्तरवृत्तात्प्रागपरस्थित्वेनतत्स्वस्वस्तिकांतरस्थिततदी
यदृग्वृत्तेप्रदेशांशज्याकोटिः मध्यलग्नात्रिभोनलग्नांतरांज्याक्रांतिवृत्तस्थेभुजः॥ अत्रभुजानयनंचोदयलग्नस्थक्रांतिवृत्तप्रदेशः
प्राक्स्वस्तिकादेतन्नग्रांतरेणोनदक्षिणोभवत्येवमस्तलग्नप्रदेशः परस्वस्तिकादक्षिणोत्तरः॥ तदनुरोधेनचत्रिभोनलग्नप्रदे
शक्रांतिरत्नीययाम्योत्तरवृत्तरूपतदग्रत्वंक्षितिजेयाम्योत्तरवृत्तक्षितिजसंपातात्तदग्रांतरेणलग्नमवश्यंभवत्यतस्त्रिज्यातु
ल्यमध्यलग्नदृग्ज्यायालग्नाग्रातुल्योभुजस्तदाभीष्टतदृग्ज्यायाकइत्यनुपातेनसफलसंज्ञा॥ तद्वर्गोनान्मध्यलग्नदृग्ज्या
वर्गान्मूलंत्रिभोनलग्नस्यदृग्ज्याक्षेपाख्या• तद्वर्गोनात्रिज्यावर्गान्मूलंत्रिभोनलग्नशंकुदृग्गतिसंज्ञः॥ अत्रेदमवधेयं• त्रिप्र
श्नाधिकारोक्तप्रकारेणात्रिभोनलग्नस्यशंकुदृग्ज्येदृग्गतिदृक्क्षेपतुल्येनभवतः किंतुदृग्गतिदृक्क्षेपाभ्यांक्रमेणन्यूनाधिकेभवः॥
सर्वदाधूलीकरणानुभवादतआनीतोयंदृक्क्षेपस्त्रिभोनलग्नदृग्मंडलस्थितोपित्रिज्यानुरूपः किंतुफलवर्गोनात्रिज्यावर्गप
दरूपविलक्षणवृत्तव्यासार्धप्रमाणेनसिद्धः इतिगम्यते• अतोदृग्ज्याः यास्त्रिज्यानुरूपत्वेनत्रिज्यावृत्तपरिणतोदृक्क्षेपः
स्त्रिभोनलग्नस्यदृग्ज्यास्फुटदृक्क्षेपरूपा• अस्यास्तत्रिज्यावर्गेत्यादिनादृग्गतिः स्फुटात्रिभोनलग्नशंकुरूपाः एतदनुक्तिः
स्वल्पांतरत्वाद्गणितसुखार्थंकृपालुनाकृताः त्रिप्रश्नक्रियागौरवभियैतन्मार्गांतरंलाघवादुक्तमितिदिक॥ ६॥ ॥अथ
लाघवाद्दृक्क्षेपदृग्गतिगुणितस्फुटार्थंश्लोकार्धेनाह॥ नतांशबाहुकोटिज्येस्फुटेदृक्क्षेपदृग्गतीइति• दशमभावनतांशानां
भुजकोट्योः नतांशात हतनवतिरूपयोरनयोर्ज्ये• क्रमेणदृक्क्षेपदृग्गती• अस्फुटे• स्थूले• यद्वा• स्फुटे• प्रागुक्तदृक्क्षेप

सू.टी.
५३
दृग्गतिविद्यायगणितलाघवार्थंदशमभावनतांशभुजकोट्योर्ज्ये॰ नत्साधनापन्नत्वाद्ये॰ यतदयत्नाभावेनतांशबाहुकोटिज्येदक्षे
पदृग्गतीस्फुटेइति॰ तन्न॰ उक्तप्रकारेणैनातिभ्रंशस्तत्कथनस्यव्यर्थत्वात्॰ अत्रोपपत्तिः त्रिभोनलग्नस्यदशमभावस्याभ्यांतर
वत्तत्वेनलाघवार्थंदशमभावमेवत्रिभोनलग्नंप्रकल्प्यतन्नतांशैस्याम्यज्यारूपात्रिभोनलग्नदृक्क्षेपः उन्नतज्याशंकुर्दृग्गतिः॥
इत्यतिस्थूलं॰ येस्तुभगवतोक्तंमध्यलग्नंदशमभावपरतयाव्याख्यातंतेषांमतेएतदुक्तमतिसूक्ष्मं॰ प्रयाससाधितदृक्क्षेपदृग्गती
प्रागुक्तेसूक्ष्मेपतिस्थूलेइतिध्येयं॰ भास्कराचार्यैस्तुत्रिभोनलग्नस्यादिनार्धजातेनतोन्नतज्येयदिवासुरवार्थमितियदुक्तंतदस्मात्
सूक्ष्ममितिध्येयं॥ ॥अथलंबनोपयुक्तछेदकथनपूर्वकंलंबनानयनंसार्धश्लोकेनाह॥ एकज्यावर्गतश्छेदोलब्धंदृग्गतिजीव
या॥मध्यलग्नार्कविश्लेषज्याछेदेनविभाजिता॥ ७॥ ॥रवींद्वोर्लंबनंज्ञेयंप्राक्पश्चाद्घटिकादिकम्॥ एकराशिज्यायाः वर्गात
दृग्गतिजीवयाः प्रागुक्तदृग्गत्याः दृग्गतेः शंकुरूपत्वेनज्यारूपत्वाजीवयेतिस्वरूपप्रतिपादनं॰ भागहरणेनलब्धंछेदसंज्ञः
स्यात्॥अथमध्यलग्नं॰ त्रिभोनलग्नदर्शांतकालिकं॰ नतुदशमभावः॥तात्कालिकः सूर्यः॥अनयोरंतरस्यत्रिभोनाधिकस्यज्या
छेदेनप्राक्साधितेनभक्ता॰ फलंघटिकादिकं॰ प्राक्पश्चात्त्रिभोनलग्नरूपमध्यलग्नस्थानात्पूर्वापरविभागयोः॥सूर्यचंद्र
योस्तुल्यंलंबनंज्ञेयं॥अत्रोपपत्तिः॥त्रिभोनलग्नार्कविशेषसिंजिनीकुनाहताव्यासदलेनभाजिता॥हृताफलाप्तित्रिभलग्न
शंकुनानिजीवयाप्तंघटिकादिलंबनमितिसिद्धांतशिरोमणौसूक्ष्मलंबनानयनमुक्तं॥तस्योपपत्तिस्तट्टीकायांसुप्रसि
द्धामध्यलग्नस्यत्रिभोनपरत्वेनव्याख्यानान्मध्यलग्नार्कविश्लेषज्या॰ त्रिभोनलग्नार्कविशेषसिंजिनीरूपाजाता॰ इयं
चतुर्गुणात्रिभोनलग्नशंकुरूपदृग्गत्याचगुण्याः त्रिज्यावर्गेणभाज्येतिलंबनानयनप्रकारेणसिद्धं॰ तत्रचतुस्त्रिज्यावर्ग
योर्गुणहरयोर्गुणापवर्तनेनहरस्थानेएकराशिज्यावर्गः सिद्धः॥ अत्रापिदृग्गत्येकराशिज्यावर्गौगुणेनापवर्त्यहरस्थानेए
कज्यावर्गनइत्यादिनाछेदउपपन्नः॥हरस्यछेदाभिधानत्वात्॥अतोमध्यलग्नार्केत्याद्युक्तमुपपन्नं॥लंबनघटिकाभिर
नयोश्चालनंवक्ष्यमाणंगणितेआवश्यकमितिसूचनार्थंरवींद्वोर्लंबनमित्युक्तं॰ अन्यथादर्शांतकालेसूर्यगतभएवस्य श्रीः
५३

213
1941

त्राचंद्रकक्षायांचंद्रचिह्नस्यतत्घटिभिर्लंबात्वाद्वयोरुक्त्यनुपपत्तिः॥त्रिभोनलग्नसमेर्केलंबनाभावात्पूर्वापरविभागेसूर्येस
तिलंबनंभवतीतिप्राक्पश्चादित्युक्तं॰ अत्रेदमवधेयं॰ लंबनानयनंमध्यलग्नस्यात्रिभोनलग्नेत्यर्थेछेदः॥पूर्वसाधितसूक्ष्मदृग्ग
त्यासूक्ष्मांननतांशत्यादिग्रहीत॰ स्थूलदृग्गत्यास्थूलइति॰ एवंमध्यलग्नेत्यस्यदशमभावार्थेतुविपरीतमिति॥एतेनमध्यलग्नेत्यस्यद
शमभावार्थः॥तत्रप्रयाससाधितसूक्ष्मदृग्गत्यासूक्ष्मंलंबनं॰ नतांशैत्याद्युक्तस्थूलदृग्गत्यास्थूलंलंबनमितिसांप्रदायिकोक्तं
निरस्तंयुक्त्यभावात्॰ नचात्रमध्यलग्नरूपदशमभावग्रहेपिभगोलयुक्त्याप्रतिपादनस्यसत्वात्कथमादित्योक्तंमध्यलग्नमि
तिपरंसार्वजनीनदशमभावप्रत्यायिकंत्रिभोनलग्नपरतयाहठाद्व्याख्यातंयुक्तं॰ नतांशबाहुकोटिज्येस्फुटेदृक्क्षेपदृग्ग
तीइत्यत्रस्फुटेइत्यनेनभगवतस्तदाशयस्यव्यक्तीकृतत्वादितिवाच्यं॰ तथापिगौरवसाधितदृक्क्षेपोक्तिभगवदाशयस्त्रित्रि
भोनलग्नग्रहणंवनक्त्यान्यथाप्रयाससाधितदृक्क्षेपस्यवैयर्थ्यापत्तेरिति सुधियाविलोक्यमित्युक्तंविस्तरेण॥८॥ ॥
अथमध्यग्रहणकालज्ञानार्थंतिथौ लंबनसंस्कारं॥तदसकृत्साध्यमितिचाह॥मध्यलग्नाधिकेभानौतिथ्यंतात्प्रविशोधये
त्॥धनमूनेसकृत्कर्मयावत्सर्वंस्थिरीभवेदिति॰ सूर्ये॰ मध्यलग्नं॰ त्रिभोनलग्नं॰ तस्मादधिकेसति॰ तिथ्यंतात्॰ दर्शांति
थ्यंतकालात्॥आगतंलंबनंशोधयेत्॥सूर्ये॰ त्रिभोनलग्नात्॰ न्यूनेसतितिथ्यंतकाले॰ लंबनंधनयुक्तंकार्यं॰ एवं॰ कर्म॰ ग
णितं॰ असकृन्मुहुः कार्यं॥अयमर्थः॥तिथ्यंतकालिकः सूर्योलंबनघटीभिः॥क्रमेणपूर्वाग्निमकालेचाल्योलंबनसंस्कृतति
तिथ्यंतेकोभवति॥तस्माल्लंबनसंस्कृततिथ्यंतकालेलग्नदशमभावौप्रसाध्यपूर्वोक्तरीत्यालंबनसाध्यमिदमपिकेवलः
तिथ्यंतेसंस्कार्योक्तरीत्यालंबनंकेवलमस्मादपिलंबनंतिथ्यंतेसंस्कार्यमित्यसकृदिति॥गणितावधिमाहयावदिति॥स
र्वंलंबनादि॰ यावद्यसारतत्तावधि॰ स्थिरीभवेत्॥अविलक्षणं॰ यावद्विशेषइत्यर्थः॥अत्रोपपत्तिः॥दर्शांतकालेरविगतभूपृष्ठ
सूत्राच्चंद्रस्याधोलंबितत्वेनत्रिभोनलग्नादूनेरवौक्रांतिवृत्तेपूर्वापरांतराभावेनैकसूत्रस्थितत्वरूपयुतिर्दर्शांतकालाल्लंब
नकालेनाग्रेभवति॰ शीघ्रचंद्रस्यमंदगरावितः पृष्ठस्थितत्वात्॰ अधिकेरवौचंद्रस्यपुरः॥स्थितत्वेनदर्शांतकालाल्लंबनकाले श्रीः

सू०टी०
५२

नष्टर्यंयुतिर्भवति ॥ अतोदर्शांतकाले लंबनसंस्कृतोमध्यग्रहणकालः स्यात् ॥ युतिकालस्यमध्यग्रहणकालत्वात् ॥ परंतुतावतालं
बनकालेनस्वस्यापिक्रांतिवृत्ते चलनाल्लंबनसंस्कृतदर्शांतकालेरविगतभूपृष्ठसूत्राच्चंद्रस्यलंबितत्वंस्यादेवेतिमध्यग्रहणकालत्व
सिद्धः ॥ नहिस्वर्योधनलंबनेकृणलंबने चंद्रस्यलंबनकाले स्थिरीकृतेनतयोर्युतिः संगतास्यात् ॥ अतस्तादृशकालात्पुनस्तत्कालि
कंलंबनमसाध्यदर्शांतेपुनःसंस्कार्यंमध्यकालः स्यात् ॥ एवंतादृशलंबनसंस्कृतदर्शांतेरपितयोर्भूपृष्ठसूत्रकत्वाभावात्पुनर्लंबनं
साध्यं ॥ तत्संस्कृतोदर्शांतोमध्यग्रहस्यसकृद्विधिनायदालंबनंपूर्वलंबनतुल्यंसिद्ध्यतितदाव्यस्तंतादृशलंबनसंस्कृतोदर्शांतकृ
पमध्यग्रहणकाले भूपृष्ठसूत्रेतयोः संनिवेशः ॥ यतस्तदास्वर्यगतभूपृष्ठसूत्रंच द्वयोरंतराभावेनपूर्वागतलंबनतुल्यलंबन
स्यपुनःसिद्धेः ॥ अन्यथातुल्य लंबनानुपपत्तेः तस्मान्मध्यकालोसकृत्पावरविशेषः ॥ साध्यइत्युपपन्नंमध्यलग्नेत्यादि ॥ ९ ॥
अथनतिसाधनमाह ॥ दृक्क्षेपः शीतितिग्मांश्वोर्मध्यभुक्त्यंतराहतः ॥ तिथिघ्नाघ्नात्रिज्ययाभक्तोलब्धंसावनतिर्भवेदिति ॥
दृक्क्षेपः प्रागानीतः ॥ शीततिग्मांश्वोः ॥ चंद्रार्कयोर्मध्यगतिकलात्मकेतयोरंतरेणगुणितः ॥ पंचदशगुणितयात्रिज्ययाभक्तः
फलंसा ॥ देशकालविशेषाभ्यांयागोलेसिद्धाभवतिसैवात्रगणितेननतिर्भवेत् ॥ अत्रोपपत्तिः ॥ यदाक्रांतिवृत्तदृग्वृत्ताकारंतदा
नत्यभावइतिप्रागुक्तं ॥ तत्रत्रिभोनलग्नस्यमध्यत्वेनदृक्क्षेपाभावः ॥ यत्रचपद्घघ्नांशास्तत्रदेशेत्रिभोनलग्नस्यक्षिति
जस्थत्वेनपरमानतिः ॥ परमास्तुनतिकलाः भूगर्भक्षितिजाद्भूपृष्ठक्षितिजस्यभूव्यासार्धांतरेणोद्धिताग्रगतियोजनैर्गत्यं
तरकलाः लभ्यंतेतदाभूव्यासार्धयोजनैः कइत्यनुपातेन ॥ तत्रमध्यगतियोजनानांभूव्यासार्धस्यचनियतत्वाद्भूव्यासार्धे
नापवर्तः कृतः ॥ तेनमध्यगत्यंतरकलानांस्वल्पांतरेणपंचदशांशः ॥ परमानतिकलाः ॥ अतएवषष्टिघटिकानांपंचदशांशोघ
टिकाचतुष्टयंपरमंलंबनंसिद्धं ॥ आभिस्त्रितुल्यदृक्क्षेपेस्वर्यगतभूपृष्ठसूत्राच्चंद्रस्यदक्षिणांतरेणचलंबनंभवति ॥ अत
स्त्रिज्यातुल्यदृक्क्षेपेणमध्यगत्यंतरपंचदशांशोत्रोनतिस्तदेष्टदृक्क्षेपेणकेत्यनुपातेनगत्यंतरगुणोदृक्क्षेपोहरघातेनपंच
दशगुणितत्रिज्यात्मकेनभक्तोनतिकलाइत्युक्तमुपपन्नं ॥ १० ॥ ॥ अथप्रकारांतराभ्यांनतिसाधनंलाघवादाह ॥ दृक्क्षेपा टी:
५२

215
1941

नतियुताद्वेदावनतिः फलं ॥ अथवात्रिज्ययाभक्तात्सप्तसप्तकसंगुणादिति ॥ सप्तत्याभक्ताद्दृक्क्षेपात्फलं ॥ कलादिकानतिः प्रकारांतरे
णभवेत् ॥ अथवा ॥ प्रकारांतरेण ॥ सप्तसप्तकसंगुणात् ॥ सप्तानांसप्तकं ॥ सप्तवारमावृत्तिर्वर्गएकोनपंचाशदित्यर्थस्तेनगुणितादृक्क्षेपा
त् ॥ त्रिज्ययाभक्तात् ॥ फलंकलादिकानतिः ॥ अत्रोपपत्तिः ॥ दृक्क्षेपस्यगत्यंतरकलामिति ७३१।२७ गुणकपंचदशगुणितत्रिज्याभि
तहरौ ५१५७० प्रथमप्रकारेगत्यंतरापवर्तितौहरस्थानेसप्तति ॥ द्वितीयप्रकारेपंचदशाभिरपवर्त्यगुणस्थानेस्वल्पांतरादेकोनपंचा
शत् ॥ हरस्थानेत्रिज्येत्युपपन्नं ॥ ११ ॥ ॥ अथनतेर्दिग्ज्ञानंस्पष्टविक्षेपंचाह ॥ मध्यज्यादिग्वशात्साचविज्ञेयादक्षिणोत्तरा ॥ इंदु
विक्षेपदिक्साम्येस्युक्ताविश्लेषितान्यथेति ॥ सा ॥ अवनतिः मध्यज्यायादिगनुरोधाद्दक्षिणोत्तरा ॥ मध्यज्याचेद्दक्षिणातदानति
रपिदक्षिणा ॥ चेदुत्तरातदोत्तराज्ञेया ॥ च ॥ समुच्चये ॥ तेनमध्यज्यानतांशदिक्केति ॥ सादक्षिणोत्तरानतिः ॥ चंद्रविक्षेपदिक्साम्ये ॥
तयोरेकदिक्त्वेइत्यर्थः ॥ युक्ताः विक्षेपणयुतेत्यर्थः ॥ अन्यथा ॥ तयोर्भिन्नदिक्त्वे ॥ विक्षेपेणांतरिता ॥ शेषदिक् ॥ विक्षेपसंस्कृतान
तिः ॥ स्पष्टशरूपास्यात् ॥ अयंचंद्रविक्षेपोमध्यग्रहणकालिकइतिध्येयं ॥ अत्रोपपत्तिः ॥ नतांशदिक्कमध्यज्यावशाद्दृक्क्षेपस्योत्प
न्नत्वादुत्पन्नतेस्तद्दिक्कंयुक्तमेव ॥ अथरविगतभूपृष्ठसूत्राच्चंद्राकाशगोलेक्रांतिवृत्तावधियाम्योत्तरांतरस्यनतित्वात्क्रांतिमंडला
च्चंद्रविंबावधिविक्षेपत्वाद्रविगतभूपृष्ठसूत्राच्चंद्राकाशगोलेक्रांतवृत्तावधियाम्योत्तरांतरस्यनतित्वात्क्रांतिमंडलाच्चंद्रविंबावधि
विक्षेपत्वाद्रविगतभूपृष्ठसूत्राच्चंद्रविंबावधियाम्योत्तरांतरस्यस्पर्शग्रहणोपयुक्तनतिसंस्कृतविक्षेपरूपस्पष्टविक्षेपत्वाद्वयोरेक
दिशियोगोभिन्नदिश्यंतरमित्युपपन्नं ॥ १२ ॥ ॥ अथचंद्रग्रहणाधिकारोक्तमत्रातिदिशति ॥ तयास्थितिविमर्दार्धग्रासाद्यं
तुयथोदितं ॥ प्रमाणंवलनाभीष्टग्रासादिहिमरश्मिवदिति ॥ तया ॥ विक्षेपसंस्कृतया ॥ नत्यास्पष्टविक्षेपरूपयेत्यर्थः ॥ स्थि
त्यर्धविमर्दार्धग्रासः ॥ आद्यशब्दात्स्पर्शमोक्षसंमीलनोन्मीलनं ॥ यथोदितं ॥ चंद्रग्रहणेयथोक्तंतथा ॥ तुकारस्तदतिरि
क्तरीतिव्यवच्छेदार्थकाचकारपरः प्रमाणं ॥ मानमित्यर्थः अवशिष्टमथाहवलनेत्यादि ॥ वलनाभीष्टग्रासः आदिशब्दादिष्ट

यामादिष्टकालानयनं॰ हिमरश्मिवत्॥ चंद्रग्रहणोक्तरीत्याकार्यमित्यर्थः॥अत्रोपपत्तिः रविवेषवत्॥१३॥ ॥अथस्थित्यर्द्ध
विमर्दार्धेचविशेषंश्लोकत्रयेणाह॥स्थित्यर्धोनाधिकात्प्राग्वत्तिथ्यंतात्लंबनंपुनः॥ग्रासमोक्षोद्भवंसाध्यंतन्मध्यहरिजांतरं
॥१४॥ ॥प्राक्कपालेधिकंमध्यात्भवेत्प्राग्रहणंयदि॥मौक्षिकंलंबनंहीनंपश्चार्धेतुविपर्ययः॥१५॥ ॥तदाशोध्यंस्थितिदले
देयंप्रग्रहणेतथा॥हरिजांतरकंशोध्यंयत्रैतत्स्यात्दिगर्थकः॥१६॥ ॥एतदुक्तंकपालैक्येतद्भेदेलंबनैकता॥स्वेस्वेस्थितिदले
योज्याविमर्दार्धेपिचोक्तवदिति॰ चंद्रग्रहणाधिकारोक्तप्रकारेणासकृत्साधितंस्पर्शस्थित्यर्धंमोक्षस्थित्यर्धंच॥तद्यथामध्य
ग्रहणेकालिकस्पष्टशरोक्तरीत्यास्थित्यर्धंनिमित्तमग्रेचाल्याः तत्कालयोः प्रत्येकंनतिशरौप्रसाध्यस्पष्टशरः साध्यः॥ततः प्र
थमकालिकस्पष्टशरस्थित्यर्धंमनेनप्राग्वत्तिथ्यंतकालिकग्रहान्प्रचाल्योक्तरीत्यास्पष्टशरंप्रसाध्यस्थित्यर्धंसाध्यमेवमसकृत्स्पर्श
स्थित्यर्धं॰ एवमेवद्वितीयकालिकस्पष्टशरात्स्थित्यर्धमनेनाग्रेतिथ्यंतकालिकग्रहान्प्रचाल्योक्तरीत्यास्पष्टशरंप्रसाध्यस्थित्य
र्धंसाध्यमेवमसकृन्मोक्षस्थित्यर्धमिति॥अथाभ्यांस्पर्शमोक्षस्थित्यर्धाभ्यांक्रमेणहीनयुताद्दर्शान्तकालात्॰ प्राग्वत्॰ उक्तरी
त्यालंबनंपुनरसकृत्॥ग्रासमोक्षोद्भवंस्पर्शमोक्षकालिकंकार्यं॥तथाहि॰ स्पर्शस्थित्यर्धहीनातिथ्यंतात्कालिकसूर्याल्लग्नदश
मौमंवौप्रसाध्योक्तरीत्यालंबनंसाध्यं॰ तेनस्पर्शस्थित्यर्धोनातिथ्यंतंसंस्कृत्यास्माल्लंबनमनेनापिस्पर्शस्थित्यर्धोनातिथ्यंतंसं
स्कृत्यास्माल्लंबनमेवमसकृत्स्पर्शकालिकंलंबनं॰ एवमेवमोक्षस्थित्यर्धयुतात्तिथ्यंतात्तात्कालिकसूर्याल्लग्नदशमभावौप्रसाध्यो
क्तरीत्यालंबनंसाध्यंतेनस्पर्शस्थित्यर्धोनातिथ्यंतंसंस्कृत्यास्माल्लंबनमनेनापिस्पर्शस्थित्यर्धोनातिथ्यंतंसंस्कृत्यास्माल्लंबनमेव
मसकृत्स्पर्शकालिकंलंबनं॰ एवमेवमोक्षस्थित्यर्धयुतात्तिथ्यंतात्तात्कालिकसूर्याल्लग्नदशमभावौप्रसाध्योक्तरीत्यालंबनंसा
ध्यंतेनमोक्षस्थित्यर्धयुततिथ्यंतंसंस्कृत्यास्माल्लंबनमनेनापिस्पर्शस्थित्यर्धोनातिथ्यंतंसंस्कृत्यास्माल्लंबनमेवमसकृत्स्पर्श
कालिकंलंबनं॰ एवमेवमोक्षस्थित्यर्धयुतातिथ्यंतंसंस्कृत्यास्माल्लंबनमेवमसकृन्मोक्षकालिकंलंबनमिति॰ प्राक्कपाले॰ त्रि
भोनलग्नात्पूर्वभागे॰ त्रिभोनलग्नाधिकरवौ॰ मध्यात्॰ मध्यकालिकात्॰ अग्रिमलंबनस्याधिक्येविपरिणामादन्वये

217
1941

नलंबनात्॥ प्राग्रहणं॰ प्रग्रहणंस्पर्शः॥स्पर्शकालिकं॰ अत्रापिलंबनमित्यस्यान्वयः॥लंबनंवेदधिकंस्यात्॰ मौक्षिकं॰ मोक्षका
लसंबंधिलंबनंन्यूनंस्यात्॰ पश्चार्धे॰ त्रिभोनलग्नात्पश्चिमभागे॰ त्रिभोनलग्नाक्षीनेरवौ॰ तुकारः समुच्चयार्थेचकारपरः॥विपर्ययः
उक्तवैपरीत्यं॰ मध्यकालिकलंबनात्स्पर्शकालिकंलंबनंन्यूनं॰ मोक्षकालिकलंबनमधिकमित्यर्थः॥तदातर्हि॰ तन्मध्यहरिजां
तरं॰ तयोः स्पर्शमोक्षकालिकलंबनयोः मध्यकालिकलंबनेनप्रत्येकमंतरं॰ मोक्षस्थित्यर्धेयोज्यं॰ प्राग्रहणे॰ स्पर्शस्थित्यर्धे॰ तथादे
यं॰ मोक्षमध्यकालिकलंबनयोरंतरंमोक्षस्थित्यर्धेयोज्यं॰ स्पर्शमध्यकालिकलंबनयोरंतरंस्पर्शस्थित्यर्धेयोज्यमित्यर्थः॥य
त्रयस्मिन्काले॰ विपर्ययः उक्तवैपरीत्यं॰ प्राक्कपालेमध्यकालिकलंबनात्स्पर्शकालिकलंबनंन्यूनं॰ मोक्षकालिकलंबनमधिकं॰ प
श्चिमकपालेतु॰ मध्यकालिकलंबनात्स्पर्शकालिकलंबनमधिकं॰ मोक्षकालिकलंबनंन्यूनंभवतीत्यर्थः॥तत्र॰ एतत्॥मो
क्षस्पर्शमध्यकालिकं॰ हरिजांतरकं॰ लंबनांतरंमोक्षस्थित्यर्धेमध्यमोक्षकालिकलंबनयोरंतरं॰ स्पर्शस्थित्यर्धेमध्यस्पर्शका
लिकलंबनयोरंतरमित्यर्थः॥शोध्यं॰ हीनंकुर्यात्॥एतत्॥लंबनांतरंयोज्यं॰ शोध्यंवा॰ कपालैक्ये॰ द्वयोः स्पर्शमध्ययोर्मध्य
मोक्षयोर्वाएककपाले॥स्वस्वकालिकात्त्रिभोनलग्नात्स्वस्वकालिकसूर्येउभयत्राधिकेन्यूनेवेत्यर्थः॥उक्तं॰ कथितं॰ तद्भेदे॰ तयोः
स्पर्शमध्ययोः मध्यमोक्षयोश्च॰ भेदे॰ कपालभेदेस्पर्शकालिकत्रिभोनलग्नात्तात्कालिकार्कस्याधिकत्वेमोक्षकालिकत्रिभोनल
ग्नात्तात्कालिकार्कस्यान्यूनत्वे॰ मध्यकालिकत्रिभोनलग्नात्तात्कालिकार्कस्याधिकत्वेमोक्षकालिकत्रिभोनलग्नात्तात्कालिका
र्कस्याधिकत्वेमोक्षकालिकत्रिभोनलग्नात्तात्कालिकार्कस्यन्यूनत्वेइत्यर्थः॥लंबनैकता॰ लंबनैक्यं॰ स्पर्शमध्ययोर्भेदेतात्का
लिकलंबनयोर्योगः मध्यमोक्षयोर्भेदेतात्कालिकलंबयोर्योगइत्यर्थः॥स्वकीयेस्वकीयेस्थित्यर्धेसंयुक्ताकार्या॰ स्पर्शस्थित्य
र्धेस्पर्शमध्यकालिकलंबनयोर्योगोयोज्यः॥मोक्षस्थित्यर्धेमोक्षमध्यमकालिकलंबनयोर्योगोयोज्यइत्यर्थः॥स्पर्शस्थित्यर्धं
मोक्षस्थित्यर्धंचस्फुटंभवति॥आभ्यांचंद्रग्रहणोक्तदिशामध्यग्रहणकालात्पूर्वमपरत्रक्रमेणस्पर्शमोक्षकालौस्तइत्यर्थं
सिद्धं॥अथोक्तरीत्याविमर्दार्धेपिस्पष्टत्वामतिदिशति॰ विमर्दार्धेइति॰ स्पर्शविमर्दार्धंमोक्षविमर्दार्धंचंद्रग्रहणाधिका

रोक्तरीत्यास्पष्टशरेणासकृत्साधिते० उक्तवत्• स्थित्यर्धोनाधिकात्साम्यतिथ्यंताल्लंबनंपुनरित्याद्युक्तरीत्यास्थित्यर्धेस्तानेम
दीर्घेग्रहणेनग्रासग्रहणमित्यत्रसंमीलनग्रहणेनमौक्षिकमित्यत्रोन्मीलनग्रहणंस्फुटंसाध्ये• अपि• समुच्चये॥ चकारस्ताभ्यांसं
मीलनोन्मीलनकालौमध्यग्रहणकालात्पूर्ववत्साध्याविद्युतिअर्थः॥ अत्रोपपत्तिः॥ स्थित्यर्धोनयुतोमध्यग्रहणकालः स्थूलः स्पर्श
मोक्षकालः मध्यकालिक लंबनसंस्कारात्॥ स्पर्शमोक्षकालिकलंबनसंस्कारस्यापेक्षितत्वाच्चनाद्यः कालोलंबनसंस्कृतः स्फु
टः स्वस्वभिन्नाकालिकलंबनसंस्कृतः स्फुटः स्यात्संबंधाभावात्॥ पूर्वस्पर्शमोक्षकालयोरज्ञानात्तात्कालिकलंबनज्ञानाभा
वाच्च॥ अतोमध्यकालज्ञानार्थंयथातिथ्यंतादसकृल्लंबनंप्रसाध्यतिथ्यंतेसंस्कृत्यमध्यकालतस्तथास्पर्शमोक्षस्थित्यर्ध
हीनयुक्ततिथ्यंतकालाभ्यांस्पर्शमोक्षतिथ्यंतरूपाभ्यांप्रत्येकंलंबनमसकृत्प्रसाध्यस्वस्वतिथ्यंतेसंस्कृत्यस्पर्शमोक्षकालौस्फु
टौ॥ तन्मध्यकालयोरंतरंस्फुटंस्थित्यर्धं• तत्रर्णलंबनेनस्पर्शस्थित्यर्धोनतिथ्यंतस्याधिकलंबनोनितस्यस्पर्शकालत्वान्न्यून
लंबनोनितस्यस्पर्शकालत्वान्न्यूनलंबनोनितस्यतिथ्यंतस्यमध्यकालत्वात्तयोरंतरेतिथेः समत्वेननाशात्स्पर्शस्थित्यर्धं
स्पर्शकालिकलंबनेनयुतंमध्यकालिकलंबनेनहीनमितिलंबनयोरंतरेतत्रधनंयोज्यं० एवंमोक्षस्थित्यर्धयुतस्यन्यूनलंबन तिथ्यं
नोनितस्यमोक्षकालत्वान्मध्यमोक्षकालयोरंतरेपूर्वरीत्यामध्यमोक्षकालिकयोर्लंबनयोरंतरंधनंमोक्षस्थित्यर्धेयोज्यं• यदा
तु• मध्यलंबनाधीनंस्पर्शलंबनंमोक्षलंबनंवाधिकंतदान्यूनलंबनहीनस्यस्पर्शकालत्वादधिकलंबनहीनस्यमध्यकाल
त्वादुक्तरीत्यादंतरेस्पर्शस्थित्यर्धेलंबनांतरं• एवमधिकलंबनहीनस्यमोक्षकालत्वान्मध्यमोक्षयोरंतरेमो क्षस्थित्यर्धेलं
बनांतरंहीनं॥ धनलंबनेनस्पर्शमध्यमोक्षेष्वेतौतुयदामध्यलंबनान्न्यूनंस्पर्शलंबनंमोक्षलंबनंवाधिकंतदास्पर्शस्थि
त्यर्धोनतिथ्यंतस्यन्यूनलंबनाधिकस्यस्पर्शकालत्वादधिकलंबनाधिकस्यतिथ्यंतस्यमध्यकालत्वात्तयोरंतरेलंबनांतरं
स्पर्शस्थित्यर्धेयोज्यं• एवंमोक्षस्थित्यर्धयुततिथ्यंतस्याधिकलंबनाधिकस्यमोक्षकालत्वान्मध्यमोक्षयोरंतरंलंबनांतरंमो
क्षस्थित्यर्धेपूर्वरीत्यायोज्यं• यदातु• मध्यलंबनादधिकंस्पर्शलंबनंमोक्षलंबनंवान्यूनंतदाप्यधिकलंबनाधिकस्यस्पर्शका श्रीः
५४

219
1941

लत्वाधीनलंबनाधिकस्यमध्यकालत्वात्तयोरंतरेउक्तरीत्यास्पर्शस्थित्यर्धेलंबनांतरंहीनंएवंन्यूनलंबनाधिकस्यमोक्षकालत्वा
न्मध्यकालांतरेमोक्षस्थित्यर्धेलंबनांतरंहीनमितिसिद्धं• नन्वयंलंबनांतरहीनपक्षोनसंगतः॥ बाधात्॥ तथाहि० ऋणलंब
नस्यक्रमेणापचयात्स्पर्शमध्यमोक्षकालानांयथोत्तरंसंभवाच्चमध्यकालिकलंबनात्स्पर्शमोक्षकालिकलंबनयोः क्रमेणान्यू
नाधिकत्वमसिद्धं• एवंधनलंबनस्यक्रमेणोपचयान्मध्यलंबनात्स्पर्शमोक्षकालिकलंबनयोः क्रमेणाधिकन्यूनत्वमसिद्धं० न
हिकदाचिन्मध्यकालात्स्पर्शमोक्षकालौक्रमेणाग्रिमपूर्वकालयोः संभवतोयेनोक्तंयुक्तं० बाधात्॥ तथाचलंबनांतरंयोज्यमि
त्यस्यैवोपपन्नत्वेमहतैनावनाप्रपंचेनहरिजांतरकं शोध्यंयत्रैतत्स्याद्विपर्ययइतिसर्वज्ञभगवदुक्तंकथंनिर्वहतीतिचेत्॥ मैवंलं
बनसंस्कृतस्पर्शमोक्षकालयोः स्फुटयोर्वस्तुभूतयोः सर्वदामध्यकालात्क्रमेणपूर्वोत्तरावश्यंभावित्वेपिलंबनासंस्कृतयोः स्थि
त्यर्धोनयुततिथ्यंतरूपस्पर्शमोक्षकालयोः परिभाषिकत्वेनावास्तवयोः कादाचित्कमध्यकालर्णधनलंबनाभ्यांस्पर्शस्थित्यर्धं
मोक्षस्थित्यर्धयोः क्रमेणान्यूनत्वेमध्यकालादग्रिमपूर्वकालयोः क्रमेणसंभावात्स्फुटोनिर्वाहः॥ परंत्वृणलंबनेधनलंबनेच
मध्यलंबनात्क्रमेणक्षेमोस्पर्शलंबनयोराधिकत्वासंभवः॥ मध्यकालात्पूर्वोग्रिमकालयोर्मोक्षस्पर्शयोः परिभाषिकयोः
क्रमेणासंभवात्॥ अतः साक्षात्कंठोक्तेरभावाद्विपर्यय इत्यनेनविपर्ययविशेषस्यैवविवक्षितत्वंपूर्वंतुसाधारण्याच्छब्दस्यसा
धारण्येनव्याख्यानंकृतमित्यदोषः॥ नतुतथा॥ सकृल्लंबनसाधनेलंबनस्यस्पष्टस्पर्शमोक्षकालाभ्यांसिद्धत्वेनर्णलंबनेम
ध्यलंबनात्स्पर्शलंबनंन्यूनंभवत्येव० धनलंबनेमोक्षलंबनंन्यूनंभवत्येव० मध्यकालाद्वास्तवस्पर्शमोक्षकालयोःक्रमेणाग्रिमपू
र्वकालयोरसंभवनिर्णयात्॥ अन्यथास्थिरलंबनासंभवात्॥ किंच• असकृल्लंबनसाधनेनयत्कालास्थिरलंबनंसिद्धंतत्काल
स्यसूक्ष्मस्पर्शमोक्षकालत्वात्स्फुटस्थित्यर्थसाधनंव्यर्थं० तस्यतज्ज्ञानार्थमेवावश्यकत्वात्॥ नचचंद्रग्रहणरीत्यास्पर्शमो
क्षकालयोर्ज्ञानार्थंस्फुटस्थित्यर्धोक्तिरितिवाच्यं• गौरवाद्व्यर्थत्वाक्षरिजांतरकंशोध्यमित्यस्यानुपपत्तेश्चेतिचेन्न० लंबन
योरसकृत्साधनस्यानंगीकारात्॥ सकृत्साधितलंबनस्यसांतरत्वेपिभगवतास्वल्पांतरेणांगीकाराच्च० अतएवलंबन

सू० टी०
५५

पुनरित्यत्रस्पष्टव्याख्यानमसकृदितिपूर्वमुक्तं नयुक्तं॥ किंतुमध्यकालार्थलंबनस्यसाधनात्स्पर्शमोक्षकालार्थमपिद्वितीयवारंलंबनंसाध्यमि
तिव्याख्यानंपुनरितिवाक्यालंकारणंवायुक्ततरमिति॰ अथयदास्थूलस्पर्शकालकृणलंबनेधनलंबनेचमध्यकालस्तदास्पर्शस्थित्यर्धो
नतिथ्यंतस्यलंबनहीनस्यस्पर्शकालत्वाल्लंबनाधिकतिथेर्मध्यकालत्वात्तदंतरेस्पर्शस्थित्यर्धतात्कालिकलंबनयोर्योगेनयुक्तमित्युक्तरीत्यो
पपद्यते॥ एवंयदामध्यकालऋणलंबनेस्थूलमोक्षकालस्यधनलंबनेतदालंबनहीनातिथ्यंतस्यमध्यकालत्वान्मोक्षस्थित्यर्धयुतातिथ्यंतस्यलंबना
धिकस्यमोक्षकालत्वात्तदंतरेमोक्षस्थित्यर्धलंबनयोगयुक्तमित्युपपन्नं॥ नचासकृल्लंबनसाधनेनसूक्ष्मस्पर्शमोक्षयोः सिद्धौसकृल्लंबनां
गीकारेणोक्तरीतिः सांतरत्वात्कथंभगवतः सर्वज्ञस्यास्यांवीत्यामभिनिवेशइतिवाच्यं॥ असकृल्लंबनसाधनेश्रमसाधिक्यभयाद्भगवतास
र्वज्ञेनस्वल्पांतरांगीकाराल्लाघवाच्चचंद्रग्रहणोक्तरीत्यायुगमार्थस्फुटस्थित्यर्धसाधनस्यैवोक्तेरितिदिक्॰ वस्तुतस्तुसूर्योदयाद्यत्रप्राक्
स्पर्शोनंतरंमध्यकालस्तदाध्यर्धमेलंबनात्स्पर्शलंबनंसाविभलग्नचतुर्थभावसाधितंकदाचिन्न्यूनंभवति॥ यत्रचोदयात्पूर्वंमध्यःपरतोमोक्ष
स्तत्रकदाचित्त्रिभलग्नचतुर्थभावानीतेमध्यकाललंबनान्मोक्षकाललंबनमधिकंभवति॰ यत्रचास्तात्पूर्वंस्पर्शः परतोमध्यस्तदाम
ध्यकाललंबनाद्रात्रिसंबंधात्स्पर्शकाललंबनंकदाचिदधिकंभवति॰ यत्रचास्तात्पूर्वंमध्यकालः परतोमोक्षस्तदापिमध्यकाललंबनान्
मोक्षकाललंबनंरात्रिसंबंधान्न्यूनंभवतिकदाचिदितिग्रस्तोदयग्रस्तास्तयोःकदाचिद्वैपरीत्यसंभवात्परिज्ञानंतरकंशोध्यमित्यस्यनाप्र
सिद्धिः॥ एतेनलंबनमसकृत्साध्यं॰ विपर्ययइतिविपर्ययाविशेषइतिचोक्तंसमाधानंनिरस्तमितितत्त्वं॥ विमर्देर्धेऽप्युक्तरीतिस्तु
ल्येतिसर्वमुपपन्नं॥ भास्कराचार्यैस्तुतिथ्यंतात्गणितागतात्स्थितिदलेनोनाधिकाल्लंबनंतात्कालोत्थंतिथिषुसंस्कृतिभवस्थित्यर्धहीना
धिके॥ दर्शोगणितागतेधनमृणंवाविधायासकृद्येप्रग्रहमोक्षसंज्ञसमयावेवंक्रमात्स्फुटौभिन्नमध्यकालांतरयोःसं
मानेस्पष्टेभवेतांस्थितिखंडकेवा॰ दर्शांतमर्दलोनयुक्तात्संमीलनोन्मीलनकालावपित्यनेनभगवदुक्तादतिसूक्ष्ममुक्तमित्यलं
पल्लवितेन॥ १७॥ ॥ अथाधिमग्रंथस्यासंगतित्वनिरासार्थमधिकारसमाप्तिंफक्किकयाहइतिसूर्यग्रहणाधिकारइति॰ स्पष्टं
॥ ॥ रंगनाथेनरचितेसूर्यसिद्धांतटिप्पणे॥ सूर्यग्रहाधिकारोयंपूर्णोगूढप्रकाशके॥ ॥ इतिश्रीसकलगणकसार्वभौमबल्लालदैव श्रीः
५५

ज्ञात्मजरंगनाथगणकविरचितेगूढार्थप्रकाशकेसूर्यग्रहणाधिकारः पूर्णः॥ ॥ अथपरिलेखाधिकारोव्याख्यायते॥ तत्रतत्संप्रयोजनं
प्रतिजानीते॰ नछेद्यकमृतेयस्माद्भेदाग्रहणयोः स्फुटाः॥ ज्ञायंतेतत्प्रवक्ष्यामिछेद्यकज्ञानमुत्तमम्मिति॥ यस्मात्कारणात्॥ ग्रहणयोः
चंद्रसूर्यग्रहणयोः॥ द्विवचनेनग्रहणत्वेनपूर्वाधिकारयोरेकाधिकारत्वंनिरस्तंभेदाःकस्यांदिशिस्पर्शमोक्षौसंमीलनोन्मीलने॥ ग्र
स्तांशः किंपरिमाणस्त्यादिभेदाः॥ स्फुटाःगोलस्थितिसिद्धावास्तवाः॥ छेद्यकं॰ गोलस्थितिप्रदर्शककल्पितप्रकारःछेद्यकपदवाच्यस्तं॰
ऋतेविना॰ छेद्यकस्यक्षतद्भेदज्ञानसाधकं॰ छेद्यकज्ञानं॰ ज्ञायंतेतेभेदानित्यर्थःपरिलेखसाधकग्रंथ॰ सूर्यांशपुरुषोहं॰ प्रवक्ष्यामि॰ कथया
मि॰॥ १॥ ॥ तत्रप्रथमंवलनवृत्तंलिखेदित्याह॥ सुसाधितायामवनौबिंदुंकृत्वाततोलिखेत्॥ सप्तवर्गांगुलेनादौमंडलंवलनाश्रितं
मिति॰ आदौ॰ प्रथमं॰ सुसाधितायां॰ जलवत्समीकृतायां॰ अवनौ॰ पृथिव्यां॰ अभीष्टस्थानेबिंदुं॰ वृत्तमध्यज्ञापकचिह्नं॰ कृत्वा॰ तत्र
चिह्नात्॥ सप्तवर्गांगुलेन॰ एकोनपंचाशदंगुलमितेनव्यासार्धेन॰ मंडलं॰ वृत्तं॰ वलनाश्रितं॰ प्रागुक्तस्फुटवलनमाश्रितंयत्र॰ वल
नाश्रयभूतं॰ वलनदानार्थंवृत्तमित्यर्थः॥ लिखेत्॥ ग्रहणंभेदज्ञानंकुर्वाणकउल्लिखेत्॥ अत्रोपपत्तिःप्रागुक्ता॥ २॥ ॥ अथद्वि
तीयतृतीयवृत्तेआह॥ ग्राह्यग्राहकयोगार्धसंमितेनद्वितीयकं॥ मंडलंतत्समासाख्यंग्राह्यार्धेनतृतीयकमिति॥ ग्राह्यग्राहकबिं
बमानांगुलयोर्योगार्धमितेनांगुलात्मकव्यासार्धेन॰ द्वितीयमेवद्वितीयकं॰ द्वितीयंवृत्तंलिखेत्तद्वृत्तंसमाससंज्ञं॥ योगोत्पन्नत्वा
त्॰ तृतीयकंवृत्तं॰ ग्राह्यबिंबांगुलार्धमितेनव्यासार्धेनलिखेत्॥ अत्रोपपत्तिः॥ ग्रहणेशरस्यमानैक्यखंडन्यूनत्वाद्विक्षेपोमानैक्य
खंडवृत्तेइतिविक्षेपदानार्थंमानैक्यखंडलिखनंतत्परिधिकेंद्रकग्राहकार्धव्यासार्धवृत्तेनग्राह्यवृत्तैक्यंयोगात्समाससंज्ञं॥
ग्राह्यवृत्तंतुग्रहणभेदज्ञानार्थमित्युपयुक्तं॰ नहितद्वृत्तंविनातद्भेदज्ञानंसंभवति॥ ३॥ ॥ अथतद्वृत्तेषुदिक्साधनात्दिशंस्पर्शमोक्ष
वलनदानार्थंस्पर्शमोक्षादिदिक्त्रियमप्याह॥ याम्योत्तराप्राच्यपरासाधनंपूर्ववद्दिशां॥ प्रागिंदोग्रहणंपश्चान्मोक्षोर्कस्यविपर्ययादि
ति॰ दिशामष्टदिशांमध्ये॰ याम्योत्तराप्राच्यपरासाधनं॰ पूर्ववत्॥ शिलातलेंबुसंशुद्धेइत्यादित्रिप्रश्नाधिकारोक्तरीत्याकार्यं॰ त
थाहि॰ द्वादशांगुलशंकोपिमध्यकेंद्रस्थापितस्याद्यवृत्तेपूर्वाह्णेछायाप्रवेशोपराह्णेछायानिर्गमस्तच्चिह्नाभ्यांमत्स्यमुत्पाद्यरेखा श्री

221
1941

सू॰टी॰ ५७

यायाम्योनरासावत्र बाह्योधिकासंमार्जनीया॥ सा वृत्ते पूर्वापरारेखा भवतीति॥ चंद्रस्य पूर्वदिशि ग्रहणं॰ ग्रहणारंभ॰ स्पर्श इतियावत्॥ पश्चिमदिशि मोक्षः॥ ग्रहणांतः॥ अर्कस्य विपर्ययात्॥ स्पर्शमुक्ती ज्ञेये॥ ग्रहणादिरूपस्पर्शः पश्चिमस्यां॰ ग्रहणांतरूपमोक्षः प्राच्यामित्यर्थः॥ अत्रोपपत्तिः॥ वृत्ते दिक्साधनेन दिशः समभंडलीयाः अंकिताः॥ एतद्भिन्नाद्वलनांतरेण क्रांतिवृत्तादिशांसत्वात्॥ तत्र स्पर्शमोक्षादिज्ञियमार्थं क्रांतिवृत्तप्राच्यपरानुसारेण चंद्रसूर्ययोः स्पर्शमोक्षौ निर्णेयौ॰ ग्रहभोगस्य तद्वृत्तानुसारत्वात्॥ शीघ्रगश्चंद्रः सूर्यषड्भांतरितभकक्षायांसूर्यगत्यनुरूपगमनं प्रतिपश्चाद्दागत्य मिलनारंभं करोत्यतश्चंद्रबिंबस्य पूर्वभागे स्पर्शः॥ भ्रमातिक्रम्याग्रेचंद्रोयदागच्छति तदा चंद्रस्यपश्चाद्बिंबभाविर्योगीतः पश्चान्मोक्षः॥ सूर्यचंद्रः पश्चादागत्याच्छादयत्यतः सूर्यस्यपश्चिमभागेस्पर्शः पूर्वभागे मोक्ष इति॰॥४॥ ॥ अथ वलनवृत्ते वलनदानमाह॥ यथादिशं प्राग्ग्रहणं वलनं हिमदीधितेः॥ मौक्षिकं तु विपर्यस्तं विपरीतमिदं रवेरिति॰ चंद्रस्य ग्राह्यस्य स्पार्शिकं वलनं॰ पूर्वचिह्नात्॥ यथादिशं॰ दक्षिणं चेद्दक्षिणाभिमुखमुत्तरं चेदुत्तराभिमुखं च पूर्वापरसूत्राद्धर्ज्यावद्वलनाश्रितवृत्ते देयमनएतद्वृत्तं वलनाश्रितसंज्ञं॰ मौक्षिकं॰ मोक्षकालिकं॰ तु कारा चंद्रस्य वलनं॰ विपर्यस्तं॰ विपरीतं॰ पश्चिमचिह्नात्पूर्वापरसूत्राद्धर्ज्यावद्दक्षिणं चेदुत्तरादिगभिमुखमुत्तरं चेद्दक्षिणदिगभिमुखं देयमित्यर्थः॥ सूर्यग्रहणे विशेषमाह विपरीतमिति॥ सूर्यस्य ग्राह्यस्य॰ इदं स्पार्शिकं मौक्षिकं वलनं॰ विपरीतं॰ व्यस्तं॰ मौक्षिकं वलनं॰ पूर्वचिह्नात्पूर्वापरसूत्राद्धर्ज्यावद्दक्षिणं चेद्दक्षिणदिगभिमुखमुत्तरं चेदुत्तरादिगभिमुखं॰ स्पार्शिकं वलनं पश्चिमचिह्नात्पूर्वापरसूत्राद्धर्ज्यावद्दक्षिणं चेत्तरादिगभिमुखमुत्तरं चेद्दक्षिणदिगभिमुखं देयमित्यर्थः॥ अत्रोपपत्तिः॥ चंद्रस्य पूर्वभागे स्पर्श इति समभंडलपूर्वचिह्नाद्वलनांतरेण स्पर्श इति तद्वृत्ते यथाशं स्पार्शिकं वलनं देयं॰ पश्चिमत उत्तराभिमुखस्य दक्षिणत्वाद्दक्षिणाभिमुखस्योत्तरत्वान्मौक्षिकं वलनं पश्चिमचिह्नाद्विपरीतं देयं॰ सूर्यस्य तु पश्चिमभागे स्पर्शः पश्चिमचिह्नात्स्पार्शिकं वलनं व्यस्तं देयं॰ पूर्वभागे मोक्ष इति मौक्षिकं वलनं पूर्वचिह्नाद्यथाशं देयमिति॥५॥ ॥ अथ द्वितीयवृत्ते स्पार्शिकमौक्षिकविक्षेपयोर्दानमाह॥ वलनाग्रात्क्रियेन्मध्यं सूत्रं यत्र च संस्पृशेत्॥ तत्समासे ततो देयौ विक्षेपौ ग्रासमौक्षिकाविति॥ प्रथमवृत्ते यत्र स्पार्शिकवलनाग्रं यत्र श्री: ५७

223
1941

च मौक्षिकवलनाग्रं ज्ञातं॥ तस्मात्॰ यत्॰ प्रत्येकं सूत्रं रेखामित्यर्थः॥ मध्यं॰ वृत्तमध्यबिंदुं केंद्ररूपं प्रतिनयेत्॥ तत्॰ रेखात्मकं सूत्रं॰ समासे समासाख्ये द्वितीयस्थानपरिधौ यत्र यस्मिन्प्रदेशे संस्पृशेत्॥ स्पर्शं कुर्यात्॰ ततः तत्सूत्रादवधिरूपात्समासवृत्ते धर्ज्यावद्यथादिशौ स्पार्शिकमौक्षिकविक्षेपौ यथायोग्यं देयौ॥ अत्रोपपत्तिः॥ वलनाग्रसूत्रमानैक्यखंडवृत्ते यत्र लग्नं तत्र क्रांतिवृत्तप्राच्यपरातः सूर्यचंद्रस्य विक्षेपांतरेण सत्वात्समासवृत्ते वलनाग्रसूत्राद्विक्षेपोदयो ग्राहकबिंबकेंद्रज्ञानार्थं परं सूर्यग्रहणे तु चंद्रग्रहणे चंद्रस्य विक्षेपवृत्तस्थत्वात्तदानीं तवलनादानादवगतवलनाग्ररेखामानैक्यखंडवृत्ते यत्र लग्ना तत्र क्रांतिवृत्तानुसृतप्राच्यपराविक्षेपमंडलेन तच्छादकाद्याद्याचंद्राच्छादकः सूर्यो विक्षेपांतरेण यादिग्विपरीतादिशि भवतीति वलनाग्रसूत्रात्समासवृत्ते धर्ज्यावत्सरो व्यस्तो देय इति सिद्धं॥ अत एव विपरीताः शशांकस्येत्यग्रे उक्तं॥६॥ ॥ अथ ग्राह्यवृत्ते स्पर्शमोक्षस्थानज्ञानमाह॥ विक्षेपाग्रात्पुनः सूत्रं मध्यबिंदुं प्रवेशयेत्॥ तत्ग्राह्यबिंबसंस्पर्शाद्ग्रासमोक्षौ विनिर्दिशेदिति॰॥ विक्षेपाग्रं समासवृत्ते यत्र लग्नं तस्मात्॰ सूत्रं॰ रेखामित्यर्थः॥ अत्र सरलरेखानायाली निःशंकया प्रथमतो वधिद्वयांतसूत्रं धत्वात्तदनुसारेण रेखाकार्येति सूचनार्थं सूत्रोक्तिः॰ सर्वत्रेति ध्येयं॰ पुनः द्वितीयवारं॰ पूर्वं वलनाग्ररेखाया॰ मध्यकेंद्रावधिकाया॰ कृतात्तथैव विक्षेपाग्राद्रेखामित्यर्थः॥ वृत्तमध्यरूपकेंद्रबिंदुं प्रतिगणकः प्रवेशयेत्॰ प्रविष्टं कुर्यादित्यर्थः॥ तद्रेखाग्राह्यबिंबवृत्तपरिधेः संयोगात्॥ ग्रासमोक्षौ॰ स्पर्शमोक्षौ॰ गणकः विनिर्दिशेत्॥ कथयेत् स्पार्शिकशराग्रसूत्रं ग्राह्यवृत्ते यत्र लग्नं तत्र स्पर्शः॥ मौक्षिकशराग्रसूत्रं ग्राह्यवृत्ते यत्र लग्नं तत्र मोक्ष इत्यर्थः॥ अत्रोपपत्तिः॥ मानैक्यखंडवृत्ते यत्र ग्राहकबिंबकेंद्रं तस्माद्ग्राहकार्धेन वृत्तं ग्राहकवृत्तं ग्राह्यवृत्ते यत्र लग्नं तत्र स्पर्शमोक्षौ भवतः॥ तत्र रेखाकरणलाघवात्ग्राहककेंद्रात्ग्राह्यकेंद्रं यावत्सूत्रं मानैक्यखंडमितं ग्राह्यवृत्ते यत्र लग्नं तत्र परिधौ स्पर्शमोक्षौ स्वस्वव्यासार्धयोगात्॥७॥ ॥ अथ ग्रहणे विक्षेपस्य दिग्व्यवस्थां मध्यग्रहणज्ञानार्थं मध्यकालिकवलनदानं च श्लोकाभ्यामाह॥ नित्यशोर्कस्य विक्षेपाः परिलेखे यथादिशं॥ विपरीताः शशांकस्य तद्वशादथ मध्यमं॥८॥ ॥ वलनं प्राङ्मुखं देयं तद्विक्षेपैकतायदि॥ भेदे पश्चान्मुखं देयमिंदोर्भानोर्विपर्ययादिति॰ अर्कस्य ग्रहणे॰ चंद्रविक्षेपाः॥ परिलेखे॰ ग्रहणभेददर्शनप्रकारे॰ यथादिशं॥ दिश॰ नि

त्वज्ञाः॥ नित्यं॰ ज्ञेयाः॥ चंद्रस्यग्रहणे॰ चंद्रविक्षेपाः विपरीताः दक्षिणाश्चेदुत्तराउत्तराश्चेद्दक्षिणाः॥ एतदनुरोधेनैवस्पार्शिकमौक्षिक
विक्षेपौदेयौनयथागतादिशाविति ज्ञेयं॥ यथानंतरंतद्वशात्॥ मध्यग्रहणकालिकविक्षेपदिशः सकाशात्॥ सूर्यग्रहणेमध्यग्र
हणकालिकस्पष्टविक्षेपदिक्कचिह्नात्॥ चंद्रग्रहणेमध्यकालिकविक्षेपदिग्विपरीतदिक्चिह्नादित्यर्थः॥ यदि॰ यहीत्यर्थः॥ तद्विक्षे
पैकतानतः॰ वलनं॰ विक्षेपो॰ मध्यग्रहणकालिकविक्षेपः॥ अनयोरेकतः एकांदिक्संबंधेनेतिशेषः॥ एकदिशीत्यर्थः॥ अत्रचंद्रवि
क्षेपादिग्यथाक्रिनैवनविपरीतादिगितिध्येयं॰ प्राङ्मुखं॰ पूर्वचिह्नासंमुखंवलनाश्रितदंतेर्धज्यावच्चंद्रस्यमध्यमंवलनं॰ मध्यग्रहणकालि
कस्फुटलंबनंदेयं॰ भेदे॰ वलनविक्षेपदिशोर्भिन्नादिक्त्वे॰ पश्चान्मुखं॰ वलनाश्रितदंतेर्धज्यावन्मध्यग्रहणकालिकचंद्रस्यवलनंपश्चि
मचिह्नसंमुखंदेयं॰ सूर्यग्रहणविशेषमाह भानोरिति॰ सूर्यग्रहणेसूर्यस्यवलनं॰ विपर्ययात्॥ उक्तवैपरीत्यात्॥ एकदिशिपश्चिमचि
ह्नसंमुखंभिन्नादिशिपूर्वचिह्नसंमुखंदेयमित्यर्थः॥ फलितार्थस्तुचंद्रग्रहणेमध्यकालवलनादिक्तत्कालविक्षेपंयथागतंदि
शोर्दक्षिणत्वेउत्तरचिह्नाद्वलनाश्रितदंतेर्धज्यावन्मध्यवलनंपूर्वचिह्नाभिमुखंदेयं॰ तयोरुत्तरत्वेदक्षिणचिह्नात्पूर्वाभिमुखंवल
नंदेयं॰ यदिदक्षिणावलनमुत्तरविक्षेपस्तदादक्षिणदिक्चिह्नादर्धज्यावत्पश्चिमाचिह्नाभिमुखंवलनंदेयं॰ यद्युत्तरंवलनंदक्षि
णविक्षेपस्तदावलनाश्रितदंतेउत्तरचिह्नात्पश्चिमाचिह्नाभिमुखंवलनमर्धज्यावद्देयं॰ सूर्यग्रहणेतुद्वयोर्दक्षिणत्वेवलनाश्रितद
क्षिणाचिह्नात्पश्चिमचिह्नाभिमुखंवलनंदेयं॰ उत्तरत्वेउत्तरचिह्नात्पश्चिमाभिमुखंदेयं॰ यदिदक्षिणंवलनमुत्तरविक्षेपस्तदोत्तर
चिह्नात्पूर्वाभिमुखं॰ यद्युत्तरंवलनंदक्षिणविक्षेपस्तदादक्षिणचिह्नात्पूर्वाभिमुखंदेयमिति॰ भास्कराचार्यैस्त्वेतदुक्तफलितंला
घवेनदक्षिणोत्तरवलनंक्रमेणसव्यापसव्यंदेयमित्युक्तं॥ अत्रोपपत्तिः॥ स्पार्शिकमौक्षिकशरादत्रोपपन्नावुक्ता॥ ग्राह्यबिंबकें
द्रोद्विक्षेपांतरेणग्राहकबिंबकेंद्रंभवती॰ शरस्यकदंबाभिमुखत्वेनकेंद्रात्कदंबाभिमुखत्वाच्छरदानार्थंकदंबज्ञानंवलनाश्रितदंते
आवश्यकमतोवलनांतरेणस्यादिग्भ्यः क्रांतिवृत्तदिशासत्वात्तदुत्तरदक्षिणादिग्भ्यांमध्यवलनांतरेणक्रांतिवृत्तयाम्योत्तररूपकदंबौ
॥ दक्षिणोत्तरतइतिपूर्वपश्चिमानुरोधेनैतत्स्थानंयुक्तंतरंयद्यपिचंद्रग्रहणेशरस्याविपरीतादिक्त्वात्तच्छरदिग्ग्रहणेनसूर्यचंद्रयोर्मध्य

225
1961

वलनदानमेकदिक्त्वेपश्चिमचिह्नाभिमुखंभिन्नादिक्त्वेपूर्वाभिमुखमित्येकोक्तिलाघवंतथापिसूर्यचंद्रयोर्ग्रहणभेदानमेकदिक्त्वेदेक्रोनैमि
मंदबुद्धीनांभवसंभवस्तद्वारणायैतत्पृथगिवोक्तिः कृता॰ स्वतंत्रेळस्यानियोगानर्हत्वाच्च॥ ९॥ ॥ अथमध्यग्रहणंश्लोकाभ्यांपरिलेखे
दर्शयति॰ वलनाग्रात्पुनः सूत्रंमध्यबिंदुंप्रवेशयेत्॥ मध्यसूत्रेणविक्षेपंवलनाभिमुखंनयेत्॥ १०॥ ॥ विक्षेपाग्राल्लिखेद्वृत्तंग्राह
कार्धेनतेनयत्॥ ग्राह्यवृत्तंसमाक्रांतंतत्ग्रस्तंतमसाभवेदिति॰ वलनाग्रात्॥ मध्यकालिकवलनाग्रात्पूर्वश्लोकोक्तात्॥ सूत्रं॰ रेखां॰
मध्यबिंदुं॰ वृत्तमध्यचिह्नंप्रति॰ पुनः वारंवारं॰ पूर्वंस्पार्शिकमौक्षिकवलनाग्राभ्यांसूत्ररचनानर्थेवेत्यर्थः॥ प्रवेशयेत्॥ गणकः प्रवि
ष्टंकुर्यात॰ मध्यसूत्रेणानेनमध्यकालिकविक्षेपंमध्यवलनाग्राभिमुखंनयेत्॥ मध्यवृत्तबिंदोरित्यर्थसिद्धं॰ तथाचवृत्तमध्यान्मध्य
वलनाग्रसूत्रेविक्षेपांगुलानिगणयित्वातदग्रेचिह्नंकुर्यादित्यर्थः॥ अस्माद्विक्षेपाग्रात्॰ ग्राहकबिंबमानार्धेन॰ वृत्तं॰ गणकोलिखेत्॥
तेनवृत्तेन॰ यत्॥ यन्मितं॰ ग्राह्यवृत्तंसमाक्रांतंव्याप्तं॰ तत्॰ ग्राह्यवृत्तविभागरूपः तमसा॰ अंधकाररूपेणछादकेनग्रस्तं॰ आच्छादितं॰
स्यात्॥ तन्मितंविभागंमध्यादिनालिप्तंकुर्यादित्यर्थः॥ अत्रोपपत्तिः॥ वृत्तेमध्यसूत्रंकदंबाभिमुखंतत्रग्राह्यकेंद्राच्छरांतरेणग्रा
हककेंद्रंतस्मात्ग्राहकार्धेनवृत्तंग्राहकबिंबवृत्तंतेनयाग्राह्यवृत्तंयावदाक्रांतंतावन्मध्यकालेग्रस्तंभितितद्भागस्यकृष्णत्वेना
कारोदर्शनात्तन्मसाग्रस्तमित्युक्तं॥ ११॥ ॥ ननुपूर्वकपालेग्रहणमोक्षसंभवेसर्वमुक्तमुपपन्नं॥ पश्चिमकपालेग्रहणसंभ
वेपरिलेखोक्तवैपरीत्येनभवति॰ यथाहि॰ यस्यांदिशिपरिलेखेस्पर्शोमोक्षोवापरकपालेतस्यपश्चिमाभिमुखत्वेनदर्शने
दिग्वैपरीत्यंप्रत्यक्षमित्यत आह॥ छेद्यकंलिखतभूमौफलकेवाविपश्चिताविपर्ययोदिशांकार्यः पूर्वापरकपालयोरिति॰
भूमौ॰ फलके॰ काष्ठपटिकायामित्यर्थः॥ वा विकल्पेभूमौलिखितस्यैतस्तत्रानयनासंभवात्फलकेइत्युक्तिः छेद्यकंप्रागुक्तं॰
लिखितागणकेन॰ विपश्चिता॰ तत्वज्ञेन॰ दिशां॰ पूर्वादिदिशां॰ पूर्वापरकपालयोः विपर्ययः व्यत्यासः कार्यः यथापूर्वकपा
लेसव्यक्रमेणपूर्वादिलिखनंतथापरकपालेसव्यक्रमेणपूर्वादिलिखनंनकार्यं॰ किंतुपश्चिमस्थानेपूर्वापूर्वस्थानेपश्चिमा॰ उत्त
रपश्चिमदिग्भागेक्रमेणोत्तरदक्षिणलेख्यैइत्यर्थः॥ तेनपश्चिमकपालेग्रहणसंभवेपिपरिलेखोक्तसंभवत्येवेतिभावः॥ अत्रोपपत्तिः॥

दिग्वैपरीत्यंभवतीतिपूर्वमेवंवैपरीत्येनदिग्भालेखनेपरिलेखोयथास्थितंभवतीतियुक्तंभास्कराचार्यैस्तुनेतदुक्तंपरिलेखेनामुकस्यादिस्थप
कंभवतीतिज्ञानस्यकल्पकत्वेनतस्यतत्रावाधात् ॥ नह्यियथाकारोतथादर्शनमभ्रमीफलकेवाकाशादौमांवास्तवानामभावात् ॥ अतएव
किंचिन्यूनंदृश्येनदर्शनत्वमितिध्येयं ॥१२॥ ॥अथानादिश्यग्रहणमाह ॥ स्वच्छत्वाद्द्वादशांशोपिग्रस्तश्चंद्रस्यदृश्यते ॥लिप्तात्रयमपि
ग्रस्तंतीक्ष्णत्वान्नोविवस्वतइति ॥ चंद्रबिंबस्यद्वादशांशः ग्रस्तआच्छादिताः अपि॰शब्दादाच्छादनेनतेजोहीनतयादृश्यतासंभावना
यामित्यर्थः ॥ नदृश्यते ॥ हेतुमाहस्वच्छत्वादिति॰तदतिरिक्तसंपूर्णदृश्यभागस्यस्वच्छत्वात् ॥ ज्योत्स्नावत्वात्॰तथाचतज्ज्योत्स्नावधिक्येन
ग्रस्तोस्यल्पोंशः स्वाकारेणदृश्यतेज्योत्स्नावत्वेनहरतयाभासते ॥ सूर्यस्यलिप्तात्रयंग्रस्तमपिनदृश्यते ॥ अत्रहेतुमाहतीक्ष्णत्वादि
ति॰सूर्यस्यतेजस्तैक्ष्ण्यादवलोकनयनप्रतिघाताहत्वादित्यर्थः ॥ वशिष्ठस्तु॰ग्रस्तंशशांकस्यकलाद्वयंवेलकलात्रयंभानुमतोनदृश्यं ॥
नालिंविद्वन्नंद्युतयास्तत्कालेलक्ष्यंवनलोकरश्मिहीनावित्युक्तमतउदयास्तकालेउक्तमदृश्यंदृश्यमितिध्येयं ॥१३॥ ॥अथेष्टग्रास
परिलेखार्थंग्राहमार्गज्ञानंश्लोकत्रयेणाह ॥ स्वसंज्ञितास्त्रयः कार्याविक्षेपाग्रेषुबिंदवः ॥तत्रप्राङ्मध्ययोर्मध्येतथामौक्षिकमध्ययोः
॥१४॥ ॥ लिखेन्मत्स्यौतयोर्मध्यान्मुखपुच्छविनिःसृतं ॥ प्रसार्यसूत्रद्वितयंतयोर्यत्रयुतिर्भवेत् ॥१५॥ ॥ तत्रसूत्रेणविलिखेच्चापं
बिंदुत्रयस्पृशा ॥ सपंथाग्राहकस्योक्तोयेनासौसंप्रयास्यतीति॰विक्षेपाग्रेषुस्पार्शिकमौक्षिकमाध्यविक्षेपाणांप्रवेस्वस्वस्थानेस्पर्श
मोक्षग्रहणज्ञानार्थंदत्तानामग्निमभागेषु॰स्वसंज्ञयासंकेतिताः ॥ बिंदवस्त्रयःकार्याः स्पर्शशराग्रेस्पर्शचिह्नांकितोबिंदुर्मोक्ष
शराग्रेमोक्षचिह्नांकितोबिंदुर्मध्यचिह्नांकितोबिंदुरितित्र्योबिंदवोगणकेनरच्याः ॥ तत्रउपस्थितबिंदुत्रयमध्ये॰प्राङ्मध्ययोः
स्पर्शमध्यबिंद्वोर्मध्यंतराले॰मौक्षिकमध्ययोस्तत्संज्ञयोर्बिंद्वोस्तथा ॥ अंतराले ॥ प्रत्येकंमत्स्यलिखेदितरांतरद्वयेगणकोमत्स्यं
लिखेत् ॥ तयोःमत्स्ययोर्मध्यात्गर्भात् ॥ मुखपुच्छाभ्यां॰विनिःसृतंनिष्क्रान्तंप्रत्येकसूत्रमितिसूत्रद्वितयं॰प्रसार्य॰अग्रेपि॰
स्वमार्गेणनि॰सार्य॰तयोःस्वस्वमार्गप्रसारितसूत्रयोः ॥ तत्रप्रदेशे॰युतिर्योगः स्यात्तत्रप्रदेशेकेंद्रंप्रकल्प्य॰सूत्रेण॰बिंदुत्रय
स्पर्शःप्रकल्पितकेंद्रबिंदुत्रयान्यतमबिंद्वंतरसूत्रेण॰व्यासार्धरूपेणेत्यर्थः ॥ चापंवृत्तैकदेशरूपंभनुर्बिंदुत्रयस्पर्शंलिखेत् ।गणकःकुर्यादि

227
1941

त्यर्थः ॥ सःचापात्मकोवृत्तैकदेशः ।ग्राहकस्य॰छादकस्य॰पंथाःमार्गः येनमार्गेणासौग्राहकःसंप्रयास्यति॰ग्राह्यबिंबछादनार्थंगमिष्यति॰परिलेख॰
स्यग्रहणकालपूर्वकालावरंभावत्वात् ॥ अत्रोपपत्तिरिरेखाद्विमध्येप्राकपश्चादितित्रिप्रश्नाधिकारांतर्गतश्लोकोपपत्तिः प्राक्प्रतिपादि
ता ॥१६॥ ॥ अथेष्टग्रासपरिलेखंश्लोकत्रयेणाह ॥ ग्राह्यग्राहकयोगार्धात्प्रोह्येष्टग्रासमागतं ॥अवशिष्टांगुलस्यासाशलाकां
मध्यबिंदुतः ॥१७॥ ॥ तयोमार्गोन्मुखींदद्यात्ग्रासतः प्रग्रहाश्रितां ॥ विमुंचतोमोक्षदिशिग्राहकार्धेनमेवसा ॥१८॥ ॥ स्पर्शेद्य
त्रतत्रीवृत्तंग्राहकार्धेनसंलिखेत् ॥ तेनग्राह्याद्यदाक्रांतंतत्तमोतस्तमादिशेदिति॰मनिकभखंडादिष्टकालिकाभीष्टग्रासं॰आग
तं॰चंद्रग्रहणाधिकारोक्तप्रकारावगतं॰त्यक्त्वा॰अवशिष्टाना्यंगुलानितत्प्रमाणांशलाकां॰यष्टिं॰मध्यबिंदुतः एतत्त्रयस्यमध्य
केंद्रबिंदोःसकाशात्॰तयोःस्पर्शमोक्षविक्षेपाग्रयोःमार्गोन्मुखींसबध्यमार्गचापरेखाभिमुखीं॰मार्गरेखासक्तांदद्यात्ःकथ
मित्यतआहग्रासतइतिमध्यग्रासतः प्राक्पूर्वकाले॰ग्राहाश्रितां ॥ग्रहःस्पर्शंतच्छराग्रसंबंधिमार्गेचापरेखाभिमुखीं॰मार्गरेखा
सक्तांदद्यात्शलाकांविमुचतः ॥ मुच्यमानांतर्गताभीष्टग्रासस्यशलाकां॰मोक्षदिशि॰मोक्षविक्षेपाग्रसंबंधिमार्गचापरेखायांस
क्तांदद्यात्॰साशलाका॰ग्राहकार्धानंग्राहकमार्गचापरेखां॰यत्र॰यस्मिन्भागे॰स्पृशेत्॰सल्लग्नास्यात् ॥ ततःतत्स्थानात् ॥ एव
कारस्तदतिरिक्तव्यवच्छेदार्थः ॥ ग्राहकमानार्धेनव्यासार्धेनवृत्तं॰सालिखेत् ॥ सम्यक्प्रकारेणकुर्यात् ॥ तेनवृत्तेन॰ग्राह्यात्॰ग्राह्यवृ
त्तात् ॥ यत्स्वयन्मितमेकदेशरूपंवृत्तं॰आक्रांतं॰व्याप्तं॰तत्॰तन्मितग्राह्यवृत्तांशंतमोग्रस्तं॰छादकछादितमभीष्टकाले॰आदिशे
त् ॥ कथयेत् अत्रोपपत्तिः ॥ इष्टग्रासोनमानैक्यखंडंकर्णःसतुग्राह्यग्राहककेंद्रांतररूपः ॥ अतोयंग्राह्यकेंद्रात्पूर्वज्ञातग्राहक
मार्गरेखायांयत्रलग्नस्तत्राभीष्टसमयेग्राहककेंद्रं॰तस्मात्ग्राहकवृत्तेनग्राह्यवृत्तंयदाक्रांतंतत्तत्कालेग्रासइतिसुगमं ॥१९॥
अथश्लोकाभ्यांनिमीलनपरिलेखमाह ॥ मानांतरार्धेनमितांशलाकांग्रासादिङ्मुखीं ॥ निमीलनाख्यांदद्यात्तांतमार्गंयत्रसंस्पृ
शेत् ॥२०॥ ॥ ततोग्राहकखंडेनप्राग्वन्मंडलमालिखेत् ॥ तद्ग्राह्यमंडलयुतिर्यत्रतत्रनिमीलनमिति॰ ग्राह्यग्राहकबिंबमा
नयोरंतरस्यार्धेनतेनपरिमितांशलाकां॰निमीलनसंज्ञां॰ग्रासेदिङ्मुखीं॰स्पार्शिकशराग्रविभागाभिमुखीं॰मध्यबिंदोःसकाश

स०टी०
५९

दधात्॥ सानिमीलनसंज्ञा शलाकांतमार्गस्पार्शिकग्राहकमार्गेचापरेरेखा कारत्॥ यस्मिन्प्रदेशेसंलग्नातस्मा॥ तत्स्थानात्॥ ग्राहकमानार्धे
न प्राग्वत्॥ मध्यानीष्टग्रासज्ञानार्थंयथातद्वत्तंकुतंतथेत्यर्थः॥ वृत्तंकुर्यात्॥ तद्ग्राह्यमंडलयुतिः॥ लिखितवृत्तग्राह्य वृत्तयोः संयोगः
यत्रयस्यांदिशि तत्र तस्यांदिशिनिमीलनंग्राह्यबिंबस्यनिमज्जनंस्यात्॥ अत्रोपपत्तिः॥ संमीलनकालेग्राह्यग्राहककेंद्रांतरमानार्ध
तरमितंकर्णः॥ अन्यथातदनुपपत्तेः॥ साग्राह्यकेंद्रात्स्पर्शमार्गेयत्रलग्नस्तत्र ग्राहकेंद्रंतस्माद्ग्राहकवृत्तंग्राह्यमंडलंयत्रस्पृशतित
त्रनिमीलनंस्पष्टं॥ २१॥ ॥अथोन्मीलनपरिलेखमाह॥ एवमुन्मीलनेमोक्षदिङ्मुखींसंप्रसारयेत्॥ विलिखेन्मंडलंप्राग्वदुन्मीलन
मथोक्तवदिति॥ उन्मीलने उन्मीलनज्ञानार्थमित्यर्थः॥ एवंबिंबमानांतरार्धमितांशलाकां॥ मोक्षादिङ्मुखीं॥ मौक्षिकशराग्रा
भिमुखीं॥ मध्यबिंदोः सकाशात्॥ संप्रसारयेद्याद्दित्यर्थः॥ प्राग्वत् संमीलनार्थंदत्तशलाकास्पार्शिकमार्गयोगस्थानात्
ग्राहकार्धेनवृत्तंकृतंतथेत्यर्थः॥ मौक्षिकमार्गदत्तशलाकायोगस्थानाद्ग्राहकवृत्तंकुर्यात्॥ अनंतरं उक्तवतः ग्राहकग्राह्यवृत्तयो
र्योगयस्यांदिशितस्यांदिशीत्यर्थः॥ उन्मीलनं ग्राह्यबिंबस्योन्मज्जनंस्यात्॥ अत्रोपपत्तिः॥ उन्मीलनेपिग्राह्यग्राहककेंद्रांतरमाना
र्धांतरमितंकर्णः॥ परमपरमोक्षादौत्रायियुक्तिस्तुल्या॥ २२॥ ॥अथग्रहणेचंद्रस्यवर्णानाह॥ अर्धादूनेसधूम्रंस्यात्कृष्णमर्धादिकं
भवेत्॥ विमुंचतः कृष्णताम्रंकपिलंसकलेग्रहेइति अर्धादर्धबिंबात्॥ ऊने न्यूनेग्रस्तेसति धूम्रग्रासीयाबिंबंधूम्रवर्णंस्यात्॥ अर्धा
धिकंग्रस्तबिंबंकृष्णंस्यात् विमुंचतः एतदनंतरग्रस्तमधिकमपिमुक्त्यनुमुखमितिमोक्षारंभोन्मुखस्यबिंबस्य पादोनबिंबाधिकग्र
स्तस्यासंपूर्णंर्णस्येत्यर्थः॥ कृष्णताम्रंश्यामारक्तमिश्रवर्णः॥ संपूर्णग्रहणे कपिलं पिशंगवर्णंबिंबंस्यात्॥ अत्रच्छायास्तेजोभाव
तथाचंद्राच्छादकत्वादेतेवर्णाः संभवंति॥ सूर्यस्यतुचंद्रोजनगोलरूपआच्छादकः॥ सदर्शनादिवसेस्मद्दृश्यार्धेसदाकृष्णएवेतिकृष्ण
एवसूर्यस्यग्रस्तोः सर्वदा॥ अतएवाविकृतत्वाद्भगवताव्वर्णोनोक्तः॥ २३॥ ॥अथोक्तच्छेद्यकस्यगोप्यत्वमाह॥ रहस्यमेतद्देवा
नांनदेयंयस्यकस्यचित्॥ सुपरीक्षितशिष्यायदेयंवत्सरवासिनेइति एतद्ग्रहणच्छेद्यकं देवानां गोप्यंवस्तु यस्यकस्यचित्॥
यस्मैकस्मैचिदपरीक्षितायनदेयं कस्मैदेयमित्यर्थागतंविवृणोति सुपरीक्षितशिष्यायेति॥ सुपरीक्षितमित्यत्रहेतुगर्भंविशेषणमाह॥ श्री:
५९

वत्सरवासिनेइति वर्षपर्यंतंतत्संगत्यातस्यतत्वतयाज्ञानंभवत्येवेतिभावः॥ २४॥ ॥अथाग्रिमग्रंथस्यसंगतित्वनिसार्थमधिकारसमाप्तिं
फक्किकयाहइतिछेद्यकाध्यायइति ग्रहणभेदज्ञापकपरिलेखप्रतिपादनंपरिपूर्णंसमाप्तमित्यर्थः॥ इयंदृग्भेदंग्रहगणितमित्युक्त्याग
णितक्रियाभावात्ग्रहणाधिकारांतर्गतं नाधिकारांतरमतएवाधिकारइत्युपेक्ष्याध्यायइत्युक्तं॥ ॥रंगनाथेनरचितेसूर्यसिद्धां
तटिप्पणे॥ छेद्यकंग्रहणात्तस्तुपूर्णंगूढप्रकाशके॥ ५॥ ॥इतिश्रीसकलगणकसार्वभौमबल्लालदैवज्ञात्मजरंगनाथगणकविर
चितेगूढार्थप्रकाशकेछेद्यकाधिकारः संपूर्णः॥ ॥अथयुत्याभासग्रहणनिरूपणेनसंस्थतत्वतयाआरब्धोग्रहयुत्यधिकारोव्याख्या
यते॥ ॥तत्रयुतिभेदानाह॥ ताराग्रहाणामन्योन्यंस्यातांयुद्धसमागमौ॥ शशांकेनसूर्येणास्तमनंसहेति ताराग्रहाणां भौमादिपंचग्रहा
णां परस्परं योगयुद्धसमागमौ वक्ष्यमाणलक्षणभिन्नौस्तः॥ चंद्रेणसहपंचताराणांतस्येमयोगः॥ समागमसंज्ञः॥ सूर्येणसहपं
चताराणामन्यतमस्यचंद्रस्यवायोगस्तस्तमनं पूर्णास्तंगतत्वं नत्वस्तमात्रं युत्यभावेप्रागपरकालेतस्यसत्वात्॥ १॥ ॥अ
थयुतेर्गंतैष्यत्वंसार्धश्लोकेनाह॥ शीघ्रेमंदाधिकेतीतःसंयोगोभविताऽन्यथा॥ द्वयोःप्राग्यायिनोरेवंवक्रिणोस्तुविपर्ययात्॥ २॥ ॥
प्राग्यायिन्यधिकेतीतोवक्रिण्येष्यसमागमइति॥ ययोर्ग्रहयोर्योगोभिमतस्तयोर्ग्रहयोर्मध्येयः शीघ्रगतिर्ग्रहस्तस्मिन् मंदाधि
के॥ मंदगतिर्ग्रहादधिकेसति तयोः संयोगोयुतिसंज्ञोगतः पूर्वंजातइत्यर्थः॥ अन्यथामंदगतिग्रहेशीघ्रगतिग्रहादधिकेसतीत्यर्थः॥
तयोर्योगोभविता॥ एषः एवमुक्तंगतैष्यत्वं द्वयोर्ग्रहयोः प्राग्यायिनोः पूर्वगतिकयोर्भवति वक्रिणोः वक्रगतिग्रहयोः॥ विपर्ययात्
उक्तवैपरीत्यात् तुकारात्गतैष्योयोगोभवति शीघ्रगतिग्रहेमंदगतिग्रहाधिकेएष्य संयोगः मंदगतिग्रहेशीघ्रगतिग्रहादधिकेगतः
संयोगइत्यर्थः॥ अथैकस्यवक्रत्वेआह॥ प्राग्यायिनीति द्वयोर्मध्येएकस्मिन्वक्रिणिसति तदावक्रगतिग्रहात्पूर्वगतिग्रहेधिकेस
तिगतोयोगः यदातुपूर्वगतिग्रहाद्वक्रगतिग्रहेधिकेसतिसमागमोयोगएष्यः स्यात्॥ अत्रोपपत्तिः॥ पूर्वगत्योर्ग्रहयोर्मध्येशीघ्रगस्या
धिकत्वेग्रेयोगेसंभवात्पूर्वंयोगोजातः॥ मंदगस्याधिकत्वेशीघ्रगस्यन्यूनत्वादग्रेयोगोभविष्यति वक्रिणोक्तशीघ्रगस्याधिकत्वेग्रेतन्न
तत्वेनयोगसंभवादेष्योयोगमंदगस्याधिकत्वेशीघ्रगस्योत्तरोत्तरंन्यूनत्वसंभवेनाग्रेयोगासंभवात्गतोयोगः॥ अथवक्रगतिग्रहा

229
1941

सूर्वगतिग्रहेऽधिकेउत्तरोत्तरंयोगासंभवाद्गतोयोग ॥ इर्वगतिग्रहाद्वक्रगतिग्रहेऽधिकेवक्रगतिग्रहस्यन्यूनत्वेनाग्रेयोगसंभवादेष्यः सं
योगइति ॥ ॥अथयुतिकालतुल्यग्रहयोरानयनंयुतिकालस्यगतैष्यदिनाद्यानयनंचसार्धश्लोकत्रयेणाह ॥ ग्रहांतरकला: स्वस्वभुक्ति
लिप्ता:समाहता: ॥ भुक्त्यंतरेणविभजेदनुलोमविलोमयो: ॥२॥ ॥द्वयोर्वक्रिण्यथैकस्मिन्भुक्तियोगेनभाजयेत् ॥लब्धंलिप्तादिकं
शोध्यंगतेदेयंभविष्यति ॥४॥ ॥विपर्ययाद्वक्रगतौरेकस्मिन्स्तुधनव्ययौ ॥समलिप्तौभवेतांतौग्रहौभगणसंस्थितौ ॥५॥ ॥
विवरंतद्वदुद्धृत्यदिनादिफलमिष्यते द्युतियुतिसंबंधिनोर्ग्रहयोरभीष्टैककालिकयोरंतरस्यकला: पृथक्स्वस्वगतिकलाभिर्गुणिता:
कर्मद्वयोर्ग्रहयोरनुलोमविलोमयो: ॥ मार्गगयोर्वक्रगत्योर्वेत्यर्थ: ॥ स्फुटगत्यंतरेण गणक: भजेत् ॥ विशेषमाहवक्रिणीति अथा
नंतरंद्वयोर्मध्ये एकतरेवक्रिणिसति तयोर्गतियोगेनभजेत् ॥ फलंकलादिकंसंस्वंगतेयोगेसति ग्रहयोर्मार्गयो: शोध्यंभविष्यति॰
एष्येयोगेसति तयोर्देयं योज्यं द्वयोर्वक्रगत्यो: स्वंस्वंफलं विपर्ययादुक्तवैपरीत्यात्कार्यं गतेयोगेयोज्यं एष्ययोगेहीनमित्यर्थ:
द्वयोर्मध्येएकतरेतुक्रारात्वक्रिणीसति तयोर्ग्रहयोर्वक्रमार्गयो: स्वस्वकलात्मकफलांकौ धनव्ययौ युतहीनौ कार्यौ यथाहि
गतयोगेमार्गग्रहेस्वफलंहीनंवक्रिणिग्रहेयोज्यं एष्ययोगेवक्रग्रहेशोध्यं मार्गग्रहेयोज्यमिति एवंकृतेतौ युतिसंबंधिनौ
ग्रहौ भगणसंस्थितौ भगणे राश्यधिष्ठितचक्रेसंस्थितिर्ययोस्तौ राश्याद्यात्मकौ समलिप्तौ समकलौस्त: लिप्तापदस्यभग
णा वयवोपलक्षणत्वेन समौस्तइत्यर्थ: ॥ अथयुतिकालज्ञानमाह ॥ विवरमिति अभीष्टकालिकयोर्युतिसंबंधिनोर्ग्रहयो
रंतरंकलात्मकं तद्वत्समकालोपयुक्तफलज्ञानार्थंयथागतगुणितमंतरं गतियोगेन गत्यंतरेणवाभक्तं तथेत्यर्थ: ॥ तेनह
रेणभक्ताफलंदिनादिकंगतैष्ययुतिवशादभीष्टकालात्गतैष्यमुच्यते ॥ तत्समयेतद्युतिकालेतौग्रहौसमौस्तइत्यर्थ: ॥ अत्रोप
पत्ति: ॥ गत्यंतरेणगतिकलास्तदाग्रहांतरकलाभि: काइतिफलंगतयुतौग्रहयो: शोध्ये एष्ययुतौयोज्ये द्वयोर्वक्रत्वेगत्यंतर
भक्तफलंगतयुतौग्रहयोर्योज्ये एष्ययुतौशोध्ये वक्रग्रहस्योत्तरोत्तरंन्यूनत्वात् ॥ अथैकोवक्रीतदातयोरंतरंप्रत्यहंगतियो
गेनोपचितमतोगतियोगहरेणागतिफलंगतयोगेमार्गग्रहेहीनं पूर्वंतस्यन्यूनत्वात् वक्रग्रहेयोज्यं पूर्वंतस्याधिकत्वात् ॥ एष्य श्री:
६०

योगेमार्गग्रहेयोज्यं उत्तरोत्तरमधिकत्वात् वक्रग्रहेशोध्यं तस्याग्रेन्यूनत्वात् गतियोगेनगत्यंतरेणवादिनमेकंलभ्यतेतदांतरकलाभि:
किमित्यनुपातेनगतैष्यदिनाद्यं ॥ ६ ॥ ॥ अथदृक्कर्मार्थमुपकरणानिसाध्यानीत्याह ॥ कृत्वादिनक्षपामानंतथाविक्षेपलिप्तिका:
नतोन्नतंसाधयित्वास्वकाल्लग्नवशात्तयोरिति ॥ तयो:समयोर्ग्रहयो: ॥ दिनक्षपामानं प्रत्येकंदिनमानं ॥ रात्रिमानंप्रसाध्य ॥
विक्षेपकला: ॥ तथाप्रसाध्येइत्यर्थ: ॥ अत्रभगवताविक्षेपकला:प्रसाध्यस्यस्यादिनरात्रिमानंप्रसाध्येतदनंतरमुक्तेदिनरात्रि
मानंस्पष्टक्रांतिज्ञचरेणनसाध्यंकिंतुसमग्रहीयशरासंस्कृतकेवलक्रांतिजचरेणसाध्यमितिसूचितं ॥ समग्रयो: प्रत्येकंनतका
लमुन्नतकालंप्रसाध्य ॥ अत्रमुख्यार्थकंनतेत्यत्रेति एतदर्थमेवदिनरात्रिमानंप्रसाध्येतिपूर्वमुक्तं समनंतरोक्तंदृक्कर्मकार्य
मितिवाक्यशेष: ॥ ननुनतोन्नतं कथंसाध्यंग्रहोदयाज्ञानात्तदवधिकालमानज्ञानाभावात् ॥ नह्ययंग्रहस्यादिनरात्रिगतकालज्ञा
नंविनापिकेवलदिनरात्रिमानाभ्यांतत्सिद्धिरतआह ॥ स्वकाल्लग्नवशादिति यस्मिन्कालेसमौग्रहौजातौतात्कालिकलग्नंग्र
हौक्तप्रकारावगतंतद्वशाद् ॥ तद्ग्रहणादित्यर्थ: ॥ स्वकात् ॥ समग्रहात् ॥ प्रत्येकमुन्नतनतकालंप्रसाध्येदित्यर्थ: ॥ एतदुक्तंभ
वति॰ युतिकालिकलग्नमधिकसंज्ञंजकस्यसमग्रहन्यूनसंज्ञकस्यभोग्यासन्नकस्याथभुक्तास्तन्नाधिकस्यचसपिंड्यांतर
लग्नासन्नेवंस्यात्कालसाधनमितित्रिप्रश्नाधिकारोक्तयाग्रहस्यादिनगतंरात्रिमानंप्रसाध्य॰ दिनेदिनगतशेषयोरात्रौरात्रिगत
शेषयोर्यदल्पंतदुन्नतं ॥ तेनोनं दिनार्धंरात्र्यर्धंवाग्रहस्यनतं दिनक्षपामानंनतोन्नतमित्येकवचनेसमग्रहयोरभिन्नंदिनमा
नंरात्रिमानंनतमुन्नतंचेतिसूचनादपिनोदयलग्नलग्नाभ्यामंतरकाल: प्रत्येकंभिन्न: साध्य: नवास्पष्टक्रांतिजचरेणादिन
रात्रिमानेप्रत्येकं पूर्वमुदयलग्नस्यैवासिद्धेरितिस्फुटीकृतं ॥ अत्रोपपत्ति: ॥ तात्कालिकालिकार्कलग्नाभ्यांयथासूर्यस्योद
यगत्यकालस्तथातात्कालिकग्रहलग्नाभ्यांग्रहोदयगतकाल: सिध्यति यद्यपिसूर्यस्यक्रांतिवृत्तस्थत्वात्सूर्यस्ययुक्त: काल:
ग्रहस्यतुक्रांतिवृत्तस्थत्वानियमादुक्तरीत्यागतकालस्यक्रांतिवृत्तस्थग्रहचिह्नायत्वेपिग्रहबिंबीयत्वाभावादयुक्तत्वमतएव
वक्ष्यमाणदृक्कर्मसंस्कृतग्रहादानीतकालोग्रहबिंबीयस्तदापिवक्ष्यमाणदृक्कर्मार्थंग्रहचिह्नीयस्यैवापेक्षितत्वान्नक्षति: ॥ ७ ॥ ॥

231
1941

अथाक्षदृक्कर्मसंस्कारस्य ग्रहस्य श्लोकाभ्यामाह ॥ विषुवच्छायया पलभाद्विक्षेपाहताद् द्वादशाप्तान् ॥ फलं स्वनतनाडीघ्नं स्वदिनार्धविभाजितं ॥ न॥
लब्धं प्राच्यमृणं सौम्यात् विक्षेपात् पश्चिमे धनं ॥ दक्षिणे प्राक्कपाले स्वं पश्चिमे तु तथा भवेत् इति । अक्षभयागुणिता ॥ ग्रहविक्षेपादानीतात् ॥ द्वाद
शभक्तात् ॥ लब्धं तत्स्वनतनाडीघ्नं । विक्षेपसंबंधिग्रहस्य नतघटीभिर्गुणितं ॥ तस्यैव दिनार्धेन भक्तं । रात्रौ रात्र्यर्धेनेत्यर्थसिद्धं । अत्र
समग्रहयोः पूर्वोक्तप्रकारेणादिनमाननतयोरभिन्नत्वात्स्वशब्द उभयत्रानावश्यको पि युतिव्यतिरिक्तदृग्ग्रहाणामप्यौजत्वन तथा साधने
वैयधिकरण्यव्यावृत्त्यर्थं स्वपदं भगवता दत्तं । वस्तुतस्तु दृग्ग्रहयोर्हेतुत्वत्वे भगवता श्रेयसुनेरुक्तत्वात् ॥ कालिकयोः स्पष्टयोस्तुल्यत्वे
न दृक्कर्मसाधनार्थं नतदिनमानयोस्तयोर्भिन्नत्वेन स्वपदं युक्तं । नतु स्पष्टक्रांतिजचरोत्पन्नादिनमानयोर्भेदात्तन्नतभेदावस्यमित्युक्तं ॥
तत्साधनस्य वैयधिकरण्येन प्रसक्तेरिति ध्येयं ॥ उक्तरीत्योत्तराद्विक्षेपात् लब्धं तत्कालात्मकं । प्राच्यां । प्राक्कपाले ग्रहस्य हीनं । पश्चिके कपे
पालेयोज्यं । दक्षिणे । तथा । विक्षेपे तु कारात्तु दुत्पन्नं फलं प्राक्कपाले योज्यं पश्चिमकपाले हीनं कार्यं ॥ ९॥ ॥ अथायनदृक्कर्माह ॥
सत्रिभग्रहजक्रांतिभागघ्नाः क्षेपलिप्तिकाः ॥ विकलास्स्वमृणं क्रांतिक्षेपयोर्भिन्नतुल्ययोरिति । विक्षेपकलाः पूर्वसाधिताः
राशित्रययुतग्रहोत्पन्नक्रांत्यंशैर्गुणिता विकला भवंति ॥ ता आक्षदृक्कर्मसंस्कृतग्रहे विकलास्थाने क्रांतिविक्षेपयोः ॥ सत्रिभ
ग्रहस्य क्रांतिः ॥ ग्रहस्य विक्षेपः ॥ अनयोः भिन्नतुल्ययोः भिन्नैकदिशयोः सतोः क्रमेण स्वमृणं कार्याः ॥ अत्रोपपत्तिः ॥ विक्षे
पवृत्तस्थग्रहबिंबोपरि ध्रुवप्रोतश्लथवृत्तं स्पष्टक्रांतिवृत्ते यत्र लग्नं तत्र गतस्य ग्रहविद्धस्यांतरं याः क्रांतिवृत्ते कलास्ता
आयनकलाः ॥ तदानयनार्थं क्षेत्रं ग्रहशरः कदंबाभिमुखः कर्णः ॥ तत्संबद्धध्रुवप्रोतवृत्तप्रदेशो ध्रुवप्रोतश्लथवृत्तसंपातयोरंतरं
राश्यंतरेभुजः ॥ ध्रुवप्रोतवृत्ते स्पष्टशरोग्रहबिंबतत्संपातांतरे कोटिरिति अस्मिन् ज्याकर्णमयजनवलनज्याभुजस्तदा शरकर्णे क इत्यनुपाते
न ध्रुवप्रोतवृत्ते भुज्याप्रमाणं न भुजकलाः नतु ग्रहविद्धतद्वृत्तसंपातांतरे क्रांतिवृत्ते भुजकलाः ॥ क्रांतिवृत्तस्य तिर्यक्त्वेन तादृशक्रां
तिवृत्तप्रदेशस्य तिर्यक्त्वात् भुजत्वासंभवात् ॥ आयनवलनज्याभुजस्त्रिज्याकर्णः षष्टिः कोटिस्तद्वर्गांतरपदरूपेति क्षेत्रं गोले प्र
समतोनुपातेन क्षतिः ॥ तत्र भगवता लोकानुकंपया गणितसुखार्थं ध्रुवप्रोतवृत्तस्थभुजकलाः क्रांतिवृत्तस्था अंगीकृताः स्वल्पांतरादतोय

233
1941

नवलनज्या द्वारा कलाभिर्गुण्याः त्रिज्यया भाज्येति प्राप्ते भगवता यनवलनस्य सत्रिभग्रहक्रांतिभागत्वेनांगीकारात् द्वारा अष्टपंचाशतागुणनी
याः । ज्या भवति । यतः परमाश्चतुर्विंशत्यंशा अष्टपंचाशता गुणिताः पंचोना परमक्रांतिज्या जाताः इत्यंशरगुणास्त्रिज्याभक्ता यनकला
स्तत्र विकलात्मकफलार्थं षष्टिर्गुण इति सत्रिभग्रहक्रांतिभागा गुणितो ग्रहविक्षेपोष्टपंचाशत् षष्टिघातेनाविंशत्यल्पत्वेन पंचाशच्छेते
न गुण्य स्त्रिज्यया भक्त इति सिद्ध मात्रापि लाघवात् गुणस्य त्रिज्ययामितत्वेन स्वल्पांतरादंगीकारात् गुणहरयोर्नाशइत्युपपन्नं स
त्रिभेत्यादि विकलाद्युत्पन्नं । भास्कराचार्यैस्त्वायनवलनमस्फुटेषुणा संगुण्य द्युज्याभाजितं हृतं हतं वृणं पूर्णधृतिभिर्ग्रहाश्रितव्य
क्षभीदृय दायनाः कलाइति सूक्ष्ममस्मादुक्तं । धनर्णोपपत्तिस्तु मकरादुत्तरायणे दक्षिणाध्रुवाद्दक्षिणाकदंबोधः उत्तरध्रुवा
दुत्तरे कदंबऊर्ध्वे । तत्र शरो यदान्तरस्तदा ग्रहबिंबस्योत्तरकदंबाभिमुखत्वेनोत्तरध्रुवादुन्नतत्वात्क्रांतिवृत्तस्थग्रहविद्धात् क्रां
तिवृत्तध्रुवप्रोतश्लथवृत्तसंपात आयनग्रहविद्धरूपः क्रांतिवृत्ते पश्चाद्भवत्यत आयनाविकलाः स्पष्टग्रहे ऋणं कृताश्चेदायनग्रह
भोगोन्नतः स्यात् ॥ एवं दक्षिणशरे ग्रहबिंबस्य दक्षिणकदंबोन्मुखत्वेन ध्रुवान्नतत्वात्क्रांतिवृत्ते ग्रहविद्धादायनग्रहविद्धमग्रे एव
भवतीति धनमायनविकलाः कर्कादिदक्षिणायनेन दक्षिणध्रुवाद्दक्षिणकदंबऊर्ध्वे । उत्तरध्रुवादुत्तरकदंबोधस्तत्र यदि ग्रहशरो दक्षि
णस्तदा ग्रहबिंबस्य दक्षिणध्रुवान्नदुन्नतत्वात्क्रांतिवृत्ते ग्रहविद्धादायनग्रहविद्धमग्रे क्रांतिवृत्ते भवतीत्यायनं धनमिति गोलस्थित्या
यनशरदिग्गैक्ये ऋणमयनशरदिग्भेदे धनमिति सिद्धं । तत्र ग्रहायनदिशः सत्रिभग्रहगोलदिक्तुल्यत्वात्सत्रिभग्रहक्रांतिः सत्रिभ
ग्रहक्रांतिग्रहशरयोरेकदिक्त्वे ऋणं । भिन्नदिक्त्वे धनमित्युपपन्नं । अथाक्षदृक्कर्मोपपत्तिः ॥ भूगर्भक्षितिजयाम्योत्तरवृत्तसंपातरूप
सम प्रोतवलयवृत्ते ग्रहबिंबसक्ते क्रांतिमंडलस्य ग्रहासन्नो यत्र संपातस्तत्राक्षदृक्कलासंस्कृतो ग्रहस्य वांतरे क्रांतिवृत्तप्रदेशे आ
क्षदृक्कलाः ॥ ताः क्षितिजस्थग्रहबिंबे परमांतरत्वात् परमाः ॥ याम्योत्तरवृत्तस्थे ग्रहे यत्र ग्रहविद्धमेवाक्षदृक्कलासंस्कृतग्रहविद्धं भ
वतीति तदभावः ॥ अतः क्षितिजस्थग्रहबिंबे वलनवृत्तं याम्योत्तरक्षितिजसंपातप्रोतक्षितिजवृत्ताभिन्नं तत्र ग्रहबिंबसक्तं ध्रुवप्रो
तवलयवृत्ते क्रांतिवृत्तसंपातो यनग्रहविद्धरूपः क्षितिजस्थक्रांतिवृत्तप्रदेशाद् ऊर्ध्वमधो वा याभिः कलाभिरंतरितस्ता आक्षदृक्कलाः ॥

सू॰टी॰
६२

आसांज्ञानार्थंतदंतरप्रदेशीयद्युरात्रवृत्तखंडप्रदेशस्थसर्वोक्षज्ञाः साधिताः ॥ तथाहि॰ ध्रुवद्वयंप्रोतग्रहबिंबगतचलवृत्ते विषुवद्वृत्त
ग्रहबिंबौ तरं स्फुटाक्रांतिः विषुवद्वृत्तक्रांतिवृत्तस्थायनग्रहचिह्नांतरं मध्यमाक्रांतिरयनग्रहस्य॰ अयनग्रहचिह्नग्रहबिंबांतरे स्फु
टशरः द्वयोः क्रांत्योरेकदिक्के स्फुटक्रांतिरधिका॰ तत्रोत्तरगोले यनग्रहचिह्नक्षितिजादधः स्वद्युरात्रवृत्ते क्रांत्योश्चरांतरासु
भिर्भवति ॥ यतोयनग्रहचिह्नद्युरात्रवृत्तस्योन्मंडलक्षितिजांतररूपचरात् ग्रहबिंबीयचरस्याधिकत्वेन मध्यमचरसंबंधक्षिति
जवृत्तप्रदेशाध्रुवाभिमुखंसूत्रं ग्रहबिंबीयचरसंबंधद्युरात्रवृत्तप्रदेशं यत्रलग्नं तत्क्षितिजांतराले चरांतरस्य सत्वेनस्पष्टशर
चरांतराभ्यां कोटिभुजाभ्यामायतचतुरस्रक्षेत्रस्य तद्युरात्रवृत्तद्वयमध्ये स्फुटं दर्शनं॰ एवं दक्षिणगोले यनग्रहचिह्नं स्वद्युरात्रवृ
त्ते क्षितिजादूर्ध्वं क्रांत्योश्चरांतरासुभिरिति॰ क्रांत्योर्भिन्नदिक्के तु क्षितिजादयनग्रहचिह्नं स्वद्युरात्रवृत्ते क्रांत्योश्चरयोगतुल्यासुभि
रधऊर्ध्वं॰ मध्यमक्रांतिद्युरात्रवृत्ते उन्मंडलात्स्पष्टक्रांतिचरतुल्यांतरेण दक्षिणोत्तरगोलयोरधऊर्ध्वमयनग्रहचिह्नस्य सत्वात् ॥
क्षितिजाच्चरांतरेणोद्गतस्य सत्वान्नेतिस्फुटं भास्कराचार्यैः स्फुटास्फुटक्रांतिजयोश्चरार्धयोः समान्यदिक्केंतरयोगजासवः ॥ पलोध्रु
वाख्याभनभः ॥ सदानितिस्क्ष्ममाक्षदृक्सुज्ञानमुक्तं ॥ भगवता तु पूर्वोक्तरीत्या स्फुटास्फुटक्रांतिसंस्कारोत्पन्नस्फुटशररूपक्रांति
खंडस्य स्वल्पांतरेण यथागतशरतुल्यस्य चरमाक्षदृक्सवद्वत्यंगीकृत्य द्वादशकोटौ पलभाभुजस्तदा विक्षेपरूपक्रांतिकोटौ क
स्तनुपाताद्विक्षेपज्याफलं धनुषोस्त्यागात्स्वल्पांतरेण कुज्याचरज्ययोरभेनत्वेनांगीकारात्तच्चरासक आक्षासव एतावत्कलाः धनाः
स्वल्पांतरत्वात् क्षितिजातिरिक्तस्थग्रहबिंबत्वेनाः कलाः अभीष्टनतकालपरिणताः भवंति विषुवच्छाययेत्यादिस्वदिनार्धविभाजि
तमित्यंतं ॥ अत्र ग्रहे आयनं दृक्कर्मसंस्कार्यं तस्मात् दिनरात्रिमानादितं साधयित्वाक्षदृक्कर्मं क्रियते न दा कोविंचित्तत्स्वमिति॰ सत्रि
भाग्रहे जेत्यादिश्लोकः ॥ समप्रोतवृत्तके तत्रतत्कंस्वनः सिद्धं॰ नतानुपाते स्पष्टव्यर्थप्रयोगशंकानवकाशश्च समग्रहस्यैवाय
नदृक्कर्मस्वसंस्कारेण भिन्नत्वसंभवात्तयोर्दिनमानननतयोरपि भिन्नत्वासत्त्वेरित्यवधेयं धनर्णोपपत्तिस्तु समप्रोतवृत्तस्थग्र श्री॰
हबिंबोपरिगं यत्र क्रांतिवृत्ते लगति स राश्यादिभोगो भवति आक्षदृक्कर्मसंस्कृतइति प्रागुक्तं॰ तत्र पूर्वकपाले तस्मात् ग्रहादय ६२

नग्रहचिह्नक्रांतिवृत्ते उत्तरशरेग्रिमभागेभवति दक्षिणशरे पश्चाद्भवतीति क्रमेणर्णं धनमुक्तं॰ पश्चिमकपाले तु उत्तरशरे पश्चाद्दक्षि
णशरे ग्रिमभागे इति क्रमेणायनग्रहे धनर्णं दृक्कर्मद्वयं संस्कृतो ग्रहः सिद्धो भवतीत्युपपन्नं सर्वं ॥ १०॥ ॥ अथ प्रसंगाद्
दृक्कर्मसंस्कारस्थलान्याह ॥ नक्षत्रग्रहयोगेषु ग्रहास्तोदयसाधने ॥ शृंगोन्नतौ तु चंद्रस्य दृक्कर्मादावि दं स्मृतमिति ॥ अत्रानिमित्तस
प्तमी॰ ग्रहनक्षत्राणां बहुत्वात् बहुवचनं ॥ नक्षत्रग्रहयोर्युत्यर्थं॰ नक्षत्रग्रहयोः ॥ इदं॰ द्वयं॰ दृक्कर्म॰ स्मृतं॰ प्रागुक्तं॰ आदौ॰ प्रथ
मं कार्यं॰ ताभ्यामनंतरं क्रिया कार्येत्यर्थः ॥ अत्र नक्षत्रध्रुवकाणामायनदृक्कर्मसंस्कृतानामेवोक्तत्वादायनं दृक्कर्म न कार्यमिति
धेयं॰ ग्रहाणामस्तोदयौ॰ नित्यास्तोदयौ॰ सूर्यसान्निध्यजनितास्तोदयौ च॰ ग्रहाणामुपलक्षणत्वान्नक्षत्राणामपि तयोः
साधननिमित्तं॰ ग्रहस्य नक्षत्रस्य वादेयं॰ अत्राक्षदृक्कर्मार्थं केवलः शरः साध्यः ॥ न तु दिनमानरात्रिमाननतोन्नते साध्ये॰
क्षितिजसंबंधेन दृग्ग्रहरूपोदयास्तलग्नस्यावश्यकत्वेन क्षितिजातिरिक्तनतपरिणामस्य व्यर्थत्वात् ॥ युतौ तु समप्रोतवल
वृत्ते युगपद्दर्शनार्थं तत्परिणामस्यावश्यकत्वात् ॥ शृंगोन्नतिनिमित्तं चंद्रस्य तुकारः समुच्चयार्थकः वकारकपरः ॥ अत्रापि
श्लोकपूर्वोक्तिक्रमाक्षदृक्कर्मसंस्कार्यमिति धेयं ॥ ११॥ ॥ अथ दृक्कर्मसंस्कृतग्रहयोर्युतिकालात्तात्कालिकविक्षेपाभ्यां ग्रह
योर्याम्योत्तरांतरं वा हता ॥ तात्कालिकपुनः कार्यौ विक्षेपौ च तयोस्ततः ॥ दिक्तुल्ये त्वंतरं भेदे योगः शिष्टं ग्रहांतरमिति॰ पुनः
द्वितीयवारं॰ तादृशग्रहाभ्यां शीघ्रे मंदाधिके तीतइत्यादिना युतेर्गतैष्यत्वं ज्ञात्वा ग्रहांतरं कलाइत्यादिना दृक्कर्मसंस्कृतौ समौ
स्युतिसमये भवतः ॥ विवरं तद्वदुद्धृत्येत्यादिना समस्पष्टग्रहकालात् दृक्कर्मसंस्कृतसमग्रहकालो युत्याख्यो ह्येयः ॥ तस्मिन् काले
साधितौ ग्रहौ स्फुटवसमौ नातात्कालिकौ मध्यस्पष्टादिक्रियया कार्यौ तयोः ॥ साधितग्रहयोः ॥ विक्षेपौ च॰ समुच्चये॰ कार्यौ॰ ए
तौ ग्रहौ दृक्कर्मसंस्कृतौ समौ भवत इति प्रतीतिः॰ नो चेत्तस्माद्दृक्करीत्या मुहुः कालं स्थिरं कृत्वा प्रतीतिर्द्रष्टव्या॰ ततः ॥ सूक्ष्मयुतिस
मये ग्रहयोर्विक्षेपसाधनानंतरं॰ दिक्तुल्ये॰ एकदिक्के॰ तुकारादिक्षेपयोः ॥ अंतरं॰ कार्यं॰ भेदे॰ भिन्नदिक्के विक्षेपयोर्योगः ॥ शि
ष्टं संस्कारोत्पन्नं ग्रहांतरं॰ युतिसंबंधिनोर्ग्रहबिंबकेंद्रयोरंतरालं याम्योत्तरं भवति॰ अत्रोपपत्तिः ॥ दृक्कर्मसंस्कृतग्रहयोः पू

235
1941

सू०टी०
६२

पूर्वापरांतराभावः समप्रोतवलये नेदृतितयोः समत्वं विक्षेपाग्रेग्रहबिंबकेंद्रत्वादेकदिशि विक्षेपयोरंतरंग्रह बिंबकेंद्रयोर्याम्योत्त
रमंतरंसमप्रोत वलयेत्तः भिन्नदिग्विशिरयोर्योगएवग्रह बिंबकेंद्रयोर्याम्योत्तरमंतरंभवदनें भास्कराचार्यैस्त्वेवं लब्धेग्रहयुतिदि
नेश्चालितौतौसमौस्तस्ताभ्यांसूर्यग्रहणवदिसंस्कृतौस्वस्वनत्या तौ वस्पष्टौतदनुविशिरवौपूर्ववत्संविधेयोऽसाम्येयाविपु
तिरनयोः संयुतिर्भिन्नादिक्के इत्यनेनसूक्ष्ममुक्तं भगवतात्कृपालुनातदुपेक्षितं स्वल्पांतरत्वात् ॥१२॥ ॥अथपंचताराणां
बिंबमानकलानयनंश्लोकाभ्यामाह॥कुजार्किज्ञामरेज्यानांत्रिंशदर्धार्धवर्धिता॥ विष्कंभाश्चंद्रकक्षायांभृगोःषष्टिरुदाहृताः॥
॥१३॥ ॥त्रिचतुःकर्णयुत्याप्तास्तेद्विघ्नास्त्रिज्ययाहृताः॥ स्फुटास्वकर्णास्तिथ्याप्ताभवेयुर्मानलिप्तिकाइति त्रिंशत् अर्धार्ध
वर्धिताः त्रिंशतोर्धंपंचदशतदर्धंसार्धसप्त तेरुत्तरोत्तरंयुक्तास्त्रिंशात् क्रमेणभौमशनिबुधबृहस्पतीनां चंद्रकक्षायां चंद्रा
कारगोलेचंद्रकक्षाप्रमाणेननस्वकक्षाप्रमाणेनेत्यर्थः॥विष्कंभाः॥बिंबव्यासाः योजनात्मकाउक्ताः॥भौमस्यत्रिंशत्॥शसेःसा
सम धत्रिंशत् बुधस्यपंचचत्वारिंशत् गुरोःसार्धद्विपंचाशत् अनेनैवक्रमेणशुक्रस्यषष्टिः॥भृगोः षष्टिरित्यनेनार्धेत्यस्यप्रत्येकमर्थ
युक्ताइत्यर्थोनिरस्तः स्वाभिमतार्थोव्यक्तीकृतश्च ते उक्ताविष्कंभाः द्विगुणाः त्रिज्ययागुणिताः त्रिचतुःकर्णयुत्याप्ताः॥तृतीय
कर्मणिचतुर्थकर्मणिचयौकर्णौ मंदकर्णशीघ्रकर्णौ तयोर्योगेनभक्ताइति सांप्रदायिकाव्याख्यानं नव्यास्तुतृतीयकर्मणिकर्णा
नुपातानुक्तेस्तृतीयकर्मणिमंदकर्णस्याप्रसिद्धेरुपपत्तिविरोधाच्चपूर्वव्याख्यामुपेक्षित्रिशब्देनत्रिज्या चतुःकर्णश्चतुर्थकर्म
णिशीघ्रकर्णस्तयोर्योगेनभक्ताइत्यर्थंकुर्वंति स्पष्टाःस्वकर्णाः॥स्वबिंबव्यासाः॥भवंतिपंचदशभक्ताः॥बिंबमानकलाःभवे
युः अत्रोपपत्तिः स्वस्वकक्षायांस्थिताःपंचताराग्रहाः दूरत्वाल्लोकैश्चंद्राकाशस्थितादृश्यतेतस्तेषांवास्तवबिंबव्यासयोजनानि
स्वयंज्ञातानियथासूर्यबिंबव्यासयोजनान्युक्तानिचंद्रग्रहणाधिकारेरवेःस्वभगणाभ्यांस्तइत्यादिनाचंद्रकक्षायांसाधिता
नितथास्वभगणानुसारेणोक्तप्रकारेणचंद्रकक्षायांसाधितानि॥तथाचशाकल्यसंहितायां॥अंतरुन्नतवृक्षाश्चवनप्रांतेस्थि
ताइव दूरत्वाच्चंद्रकक्षायांदृश्यतेसकलाग्रहाः॥यर्धार्धवर्धितास्त्रिंशद्विष्कंभाः शास्त्रदृष्टइति॥एताभिज्यौत्रिं तुल्यशीघ्र श्री:
६२

237
1941

कर्णउक्तानि अतःशीघ्रकर्णेऽधिकेन्यूनंबिंबग्राहस्योच्चासन्नत्वादल्पेतुनीचासन्नत्वादधिकंबिंबमितित्रिज्ययोक्तानिबिंबानित
देष्टशीघ्रकर्णेनकानीतिव्यस्तानुपातेनयुक्तमपिभगवतीलब्ध्यात्रिज्यार्धितौक्तन्यूनकर्णयोः क्रमेणव्यस्तानुपातागताधिकंन्यू
नंचबिंबदृष्टमतःकर्णएवत्रिज्याशीघ्रकर्णयोगार्धमितःक्रमेणन्यूनाधिकोगृहीतः॥अत्रछेदंलवंचपरिवर्त्यहरस्योत्पादि
द्विघ्नास्त्रिज्यागुणिताविष्कंभास्तेस्त्रिज्याशीघ्रकर्णयोगभक्ताइत्युपपन्नं त्रिचतुःकर्णयोगार्धेस्फुटकर्णोस्वमस्तके त्रिज्या
घ्नाः स्फुटकर्णाप्ताविष्कंभास्तेस्फुटाःस्मृताइति।शाकल्योक्तेश्च अतएवबिंबस्यद्राड्नीचोच्चमंडलस्थत्वेनशीघ्रकर्णस्यैवभू
गर्भाद्बिंबसंबंधान्मंदकर्णसंबंधस्त्वयुक्तः नहिकेंद्रकेमंदकर्णाग्राच्छीघ्रकर्णाग्रेग्रहबिंबमस्तीतिप्रतिपादितंयेनमंदशीघ्रक
र्णयोर्योगार्धे कर्णःसपपन्नं शीघ्रफलानयनेतथांगीकारात्तेः॥भास्कराचार्यैस्तुव्यधीषवःसचरणाकृतवस्त्रिभागयुक्ता
दयोनवनसत्रिलवेषवश्च स्युर्मध्यमास्तनुकलाःक्षितिजादिकानांत्रिज्याहृतकर्णविवरेणपृथग्विनिघ्नाः॥त्रिघ्नानिजात्य
फलमौर्विकयाविभक्तालब्धेनयुक्तरहिताःक्रमशःपृथकस्थाःऊनाधिकेत्रिभगणाद्वर्णेस्फुटाःस्युरित्युपलब्ध्योक्तं भास्क
रानुवर्तिनस्तुत्रिचतुःकर्णयुत्याप्ताइत्यस्यत्रिज्याशीघ्रकर्णयोर्योगार्धेनभक्ताइत्यर्थंवदंति॥१४॥ ॥अथयुतसंबं
धिनौग्रहौयुतिसमयेदर्शनीयावित्याह॥छायाभूमौविपर्यस्तेस्वछायाग्रेतुदर्शयेत्॥ग्रहःस्वदर्पणांतस्थःशंकुग्रेसंप्रदृ
श्यतेइति छायाभूमौ छायादानार्थंयोग्यायांजलवत्समाकृतायांपृथिव्यां विपर्यस्ते वैपरीत्येनदत्ते स्वछायायेग्रे ग्रहछा
याग्रस्थाने तुकारोन्ययोगव्यवच्छेदार्थेचकारपरः॥स्वदर्णांतस्थः॥स्वस्यपोदर्पणआदर्शस्तत्रस्थापितस्तन्मध्यस्थितोग्रहः॥
ग्रहप्रतिबिंबस्यात् तत्॥गणकःशिष्यायदर्शयेत्॥ एतदुक्तंभवति समभूमौदिक्साधनंकृत्वादिक्संपातस्थानाद्युतिका
लिकछायांगुलानिपूर्वापरसूत्राद्भुजविपरीतदिशिभुजांतरेणग्रहाधिष्ठितपूर्वापरकपालादिशिदत्वातत्रादर्शःस्थाप्य
स्तत्रप्रतिबिंबंग्रहस्यादिक्संपातस्थोगणकःशिष्यायदर्शयेदिति अत्रोपपत्तिः॥ग्रहबिंबादवलंबसूत्रंमहाशंकुरूपंय
त्रभूमौपततितत्रग्रहबिंबप्रतिबिंबोभवतितद्वानंतुरवमध्यात्ग्रहबिंबपर्यंतंनतांशाआकाशेतथाभूमौदिक्संपातस्थ

सू०टी० ६४

नाभहश्शंकुकोटौदृग्ज्याभुजस्तदा द्वादशांगुलशंकुकोटौभुजइत्यनुपातानिछायाग्रमितांतरेणग्रहाधिष्ठितकपालेभवति· यथा
दिक्संपातस्थद्वादशांगुलशंकोः छायाग्रहाधिष्ठितकपालान्यकपालेभवति· तथाग्रहप्रतिबिंबस्थानस्थद्वादशांगुलशंकोः
छायादिक्संपातेभवति· अतोदिक्संपातस्थानाछायाग्रहाधिष्ठितकपालेदत्तानदृश्येग्रहप्रतिबिंबस्थानंज्ञातंभवतीत्युपपन्नं
छायाभ्रमभावित्यादिस्वदर्पणांतः स्थइत्यंतं॥ अथग्रहाधिष्ठितकपालन्यकपालेछायासद्भावनियमात्ग्रहाधिष्ठितकपा
लेकथंछायादानंयुक्तंव्याघातादितिमंदाशंकास्वरसादाह॥ शंकग्रेइति· दिक्संपातस्थापितशंकोरग्रे· मस्तके· आका
शे· ग्रहः॥ दृश्यतेगणकेनेतिशेषः॥१५॥ ॥ ननुकथंदृश्यतइत्यतः प्रकृतग्रहयोर्युतिसंबंधिनोर्दर्शनप्रकारंसार्ध
श्लोकाभ्यामाह॥ पंचहस्तोछ्रितौशंकूयथादिग्भ्रमसंस्थितौ॥ ग्रहांतरेणविक्षिप्तावधोहस्तनिखातकौ॥१६॥ ॥
छायाकर्णौततोदद्याछायाग्राच्छंकुमूर्धगौ॥ छायाकर्णाग्रसंयोगेसंस्थितस्यप्रदर्शयेत्॥१७॥ ॥स्वशंकुमूर्धगौव्यो
म्नियहौदिक्तुल्यतामिनाविति॥ ग्रहयुतिसंबंधिनोर्ग्रहयोरायनदृक्कलाभ्लोकपूर्वार्धोक्ताक्षदृक्कलाभ्यांसंस्कृतयोस्तुल्ये
ल्पांतरेणासन्नेवोदयलग्नेस्तः पद्युतयोर्ग्रहयोरायनाक्षदृक्कलासंस्कृतयोस्तुल्येस्वल्पांतरेणासन्नेवास्तलग्नेभवतः
यस्मिन्कालेग्रहोद्रष्टुमभिमतौतात्कालिकलग्नाद्राशीयदुदयास्तलग्नेक्रमेणन्यूनाधिकेयदिभवतस्तोस्तर्येसान्निध्य
जनितास्ताभावेदर्शनयोग्यौतदापंचहस्तोछ्रितौचतुर्विंशत्यंगुलोहस्तः एवंपंचहस्तप्रमाणदीर्घौशंकू· काष्ठघटितस
रलदंडौ· यथादिग्भ्रमसंस्थितौ· युतिकालेग्रहयोर्दशांदिग्भ्रमणं· ग्रहोभवहभ्रमेणपूर्वकपालेपश्चिमपोकेलेवातत्रसं
स्थितौस्वाधिष्ठितस्थानात्ग्रहाधिष्ठितकपालदिशिस्थाप्योनग्रहानधिष्ठितकपालदिशि· ग्रहांतरेण· दिक्तुल्यत्वांत
रंभेदयोगइत्यादिनाज्ञातयाम्योत्तरग्रहांतरेणकालात्मकेन· विक्षिप्तौ· याम्योत्तरांतरितौस्थाप्यौ· अत्रसान्नलमि
त्यादिनाग्रहविक्षेपांगुलात्मकोकलादितुल्यत्वांतरमित्यादिनाग्रहांतरंज्ञाप्यंअधः॥ भूमेरंतः हस्तनिखातगौः
हस्तवेधः प्रमाणायागर्तांतत्रस्थितौ· भूम्यांशंकोर्हस्तमात्ररोपयित्वाभूमेरूर्ध्वंशंकूचतुर्हस्तप्रमाणदीर्घौस्यातामि श्रीः ६४

239
194

त्यर्थः॥ ततः शंकुमूलाभ्यांप्रत्येकंयच्छायाग्रं· ग्रहानधिष्ठितकपालदिशिस्थात्स्यात्प्रत्येकमित्यर्थः छायाकर्णौसूत्रकौयोःशंकुमूर्ध
गौ· निजशंकग्ररूपमस्तकप्राप्तिर्णौगणकोदद्यात्· एतदुक्तंभवति· युतिसमयेलग्नंकृत्वातात्कालिकोदयलग्नेष्टलग्नाभ्यांपूर्व
दंतरकालोग्रहोदयात्गतकालः सावन॥ एवंग्रहयोर्युतिसमयेस्वदिनगताग्निप्रश्नाधिकारेक्तविधिनास्पष्टक्रांत्याछाया
साध्याः ततोयाग्रहोदक्षिणोत्तरयोर्मध्येयदिशितछायादिक्स्थशंकोर्मूलात्ग्रहानधिष्ठितकपालदिशिपूर्वापरसूत्रात्स्वभु
जांतरेणभुजदिशिदेयाः परमानीतछायाद्वादशांगुलशंकारितिचतुर्हस्तशंकुप्रमाणेन प्रसाध्यरेखात्मितासमभूमौशं
कुमूलाकार्याः रेखाग्रेछायाग्रज्ञापकंचिह्नंकार्यंतत्रकीलादिनास्तत्रबधाशंकयसक्तंप्रसार्यमिति· छायाग्रंकर्णस्यमूलरूपमग्रं·
तयोः संपातेसंस्थितस्यछायाग्रस्थान तेर्कं गर्तोपविष्टशिष्यस्यगणकः ग्रहो· आकाशे· स्वशंकुमूर्धगौ· निजशंकग्ररूपमस्त
कसमस्तत्रस्थितौ· दृक्रूयतां· दृष्टिगोचरतां· इतौ· प्राप्तौः प्रदर्शयेत्· संदर्शयेत्· अत्रोपपत्तिः॥ उच्चत्वादर्शनार्थंपंचहस्त
प्रमाणौशंकूकृतौ· तत्रैकहस्तस्यभूमिगुह्यत्वंशंकुदृढत्वार्थंकृत· वहिः· पुरुषप्रमाणौचतुर्मितहस्तावनवशिष्टौ· शंकोः पुरुषप
र्यायेण· भिधानाच्च· शंकुस्तत्रस्यग्रहबिंबसक्तत्वाद्यथादिग्भ्रमसंस्थितावित्युक्तं· शंकग्रसमसूत्रेणग्रहबिंबवस्थानमियमात्
ग्रहांतरेणयाम्योत्तरांतरितौस्थापितौ· अत्रमध्यपिस्वस्वस्पष्टक्रांत्यायांप्रसाध्यततः कर्णाग्रांप्रसाध्योक्तदिशापलभासंस्कारे
णस्वस्वभुजंप्रसाध्यताभ्यांदिक्तुल्यत्वांतरंभेदयोगः॥ शिष्टंग्रहांतरमित्युक्तरीत्याग्रहांतरंशंकोरंतरंयुक्तंतथापिभगवताल्प
ल्पांतरेणगणितायमापनोदार्थमाकाशस्थितदृश्यांतरमेवस्थितं· शंकोः छायाग्राछायाकर्णस्तत्रग्रहबिंबदर्शनस्तत्रमतः क
र्णमूलदृशापुरुषेणग्रहबिंबंदृष्टव्यमेवेतिदिक्॥ अथश्लोकाभ्यांपंचताराणांप्राकृतिज्ञातौयुधसमागमावाह॥ उल्लेखांता
रकास्पर्शाद्भेदः प्रकीर्त्यते॥ युद्धमंशुविमर्दाख्यमंशयोगेपरस्परं॥ १८॥ अंशाद्नेपसव्याख्यंयुद्धमेकोत्रवेदणुः॥ समा
गमोंशादधिकेभवतश्चबलान्वितावितौ॥ भौमादिपंचताराणांमध्येद्वयोर्युतौतारकास्पर्शात्॥ बिंबनेभ्योः स्पर्शमात्रात्॥ उल्लेख
संज्ञंतुयुद्धंवदंतियुतिभेदज्ञाः इदंतुद्वयोर्मानैक्यखंडतुल्ययाम्योत्तरांतरे· अत्रभास्कराचार्यैस्तुमानैक्यार्धाद्युत्तरविवरेल्पेभवे

स॰टी॰
६५

द्वेद्योग: कार्यःसूर्यग्रहणवदखिलंबनाद्यंस्फुटार्थं कथमोध: स्फु:सुधांशुस्तदुपरिगइतीलंबनादिप्रसिध्योर्कि लर्कोदेवलग्नंग्रहयुति
समयेकल्पितार्कोन्नसाध्यं प्राग्वत्लंबनेनग्रहयुतिसमय: संस्कृत: भस्फुट: ॥स्यात्खेटौतौदृष्टियोग्यौग्रहयुतिसमयेका
र्यमेवंतदेव याम्योदक्‌छा धुचराविवरंभेदयोगेसबाणोज्ञेय: सूर्याद्धवेतिवचनत: शीतगुसाशरासा मंदाक्रांतोन्दुरपि
वदाध: स्थित: स्यात्तदैख्यांस्पर्शोमोक्षोपरिदिशिनदापारिलेख्यैवगम्यइतिविशेषोभिहित: ॥भगवतातुसूक्ष्मबिंबयो
राकाशेदूरतोविविक्तदर्शनासंभवाद्यथर्थंप्रयासादुपेक्षितमितिध्येयंयुतावन्योन्यंकिरणयोगेसति अंशुविमर्दाख्यं किर
णसंघट्टनसंज्ञंयुद्धंस्यात् ॥ द्वयोर्याम्योत्तरांतरं अंशात् षष्टिकलात्मकैकभागात् ॥ ऊने अनधिके सति अपसव्यसंज्ञंयु
द्धंभवति अत्रविशेषमाहएकइति अत्रापसव्ययुद्धे एक: द्वयोरन्यतर: ॥ अणु: अणुबिंबश्चेत्स्यात्तदापसव्यंयुद्धं
व्यक्तंस्यादन्यथात्वव्यक्तंयुद्धंस्यात् ॥एषांचतुर्णांफलं अपसव्येविग्रहंब्रूयात्संग्रामंरश्मिसंकुले॥लेखनेमामपीडास्यात्भे
दनेतुधनक्षयइतिभार्गवीयोक्तं ज्ञेयं युद्धभेदानुक्त्वासमागममाह समागमइति द्वयोर्याम्योत्तरांतरं षष्टिकलात्मकैक
भागात् ॥अभ्यधिकेसति समागमोयोगोभवति अत्रापिविशेषमाहभवतइति युतिविषयकौग्रहौ बलान्वितौ बलेन
स्थानादिबलचितं त्रव्यर्थाकेनापिनस्मृता प्रश्नतयेथवाथास्मिन्दृश्येल्पस्त्ष्म्यबलंस्मृतमितित्रत्यासिद्धांतवचनात्स्थ
लमंडलतैया आन्वितौ युक्तौस्थूलाविबौसमावित्यर्थ: चेत्तस्तदासमागमस्तयोर्व्यक्त: स्यादन्यथात्वव्यक्त: समागम:
॥द्वावमपिमयूखयुक्तौविपुलौग्धौसमागमेभवत: ॥तत्रोन्योन्यंप्रीतिर्विपरीतावात्मपक्षयोर्युद्धंसमागमोवायद्यव्य
कौतुलक्षणेभवत: ॥युविभ्रष्टतामापितथाफलमव्यक्तं विनिर्दिष्टमित्युक्ते: ॥भेदोल्लेखांशुसंमर्द्दो अपसव्यस्तथापर॥
ततोयोगोभवेदेषामेकांशकसमापनादितिकश्यपोक्तेश्चसर्वैनिरवद्यं ॥ १९॥ ॥ अथयुद्धेपराजितस्यग्रहस्यलक्ष
णमाह ॥अपसव्योजितोयुद्धेपिहीनोणुरदीप्तिमान् ॥रूक्षोविवर्णोविध्वस्तोविजितोदक्षिणाश्रितइति द्वयोर्मध्येस्तादि
तरेणविध्वस्त:हत:सविजित: ।पराजितोज्ञेय: इतरस्यलक्षणमाह अपसव्येइतिअपसव्यंयुद्धेयोजिता: जयलक्षणोविवर्जित: श्रीः
६५

241
1941

एतेनोल्लेखादित्रयेसंज्ञाफलंनपराजितस्यफलमितिसूचितं ।पिहितआच्छादितो:व्यक्तइतियावद् ॥ अयुरितरग्रहबिंबादल्पबिंब:
अदीप्तिमान् प्रभारहित: रूक्ष: अस्निग्ध: ॥विवर्ण: वर्णेनस्ववर्णेनस्वाभाविकेनरहितइत्यर्थ: दक्षिणाश्रितइतरग्रहापे
क्षदक्षिणदिशिस्थित:श्यामोवापसव्यपगतरश्मिमंडलोवारूक्षोवाव्यपगतरश्मिवान्कृशोवा ॥आक्रांतोविनिपातित:
कृतापसव्योविज्ञेयोहतइतिसग्रहोग्रहणेतिभार्गवीयोक्ते: ॥२०॥ ॥अथश्लोकार्धेनजयिनोग्रहस्यलक्षमाह॥उदक्
स्थदीप्तिमान्स्थूलोजयीयाम्येपियोबलीति इतरग्रहापेक्षयोत्तरदिक्स्थ: ।दीप्तिमान् ॥प्रभायुक्त: स्थूल: इतरग्रहबिंबा
पेक्षयापृथुबिंब: ॥जयी जय युक्त: स्यात् ॥अथोत्तरदक्षिणदिक्स्थत्वक्रमेणजयपराजयोनास्तीत्याहयाम्येइति द
क्षिणदिशि यो ग्रहोबली दीप्तिमान्पृथुबिंबोभवतिसजयी अपिशब्दउत्तरदिशासमुच्चयार्थक: ॥तथाचजयपराजयल
क्षणयोदिग्दानमनुपयुक्तमितिभाव: ॥२१॥ ॥अथयुद्धेविशेषमाह॥आसन्नावप्युभौदीप्तौभवतश्चेत्समागम: ॥स्वल्पौ
द्वावपिविध्वस्तौभवेतांकूटविग्रहाविति उभौ द्वौ आसन्नौ एकभागांतर्गतांतरितौ अपिशब्दाद्युद्धलक्षणक्रांतौ दीप्तौ
प्रभायुक्तौ चेत्स्यातांतदाबलान्वितावितिसमागमलक्षणैकदेशसद्भावात्समागमाख्यंयुद्धंद्वावपिग्रहौ स्वल्पौ सूक्ष्मबिंबौ
विधस्तौ द्वावपिपराजयलक्षणाक्रांतौस्यातांतदा क्रमेणकूटवियहसंज्ञकौयुद्धभेदौस्यातां॥२२॥ ॥अथोत्सर्गत:शु
क्रस्यजयलक्षणाक्रांतत्वमस्तीतिवदन्समागम: शशांकेनेतिप्राक्प्रतिज्ञातसमागमेउक्तप्रकारमतिदिशति उदक्स्थोदक्षि
णस्थोवाभार्गव: प्रायशोजयी शशांकेनैवमेतेषांकुर्यात्संयोगसानमिति इतरग्रहापेक्षयोत्तरदिक्स्थोदक्षिणदिक्स्थोवा
उभयदिशीत्यर्थ: ॥शुक्र: प्रायश: ॥उत्सर्गत: ॥ जयलक्षणाक्रांतत्वेनजयी कदाचित्पराजयलक्षणक्रांतोभवतीतिताल
र्यार्थ: ॥एतेषां भौमादिपंचताराणां चंद्रेणसहसंयोगसाधनं युतिसाधनं एवमुक्तरीत्या गणक: ॥कुर्यात् ॥ अत्रविशे
षार्थकमवनत्वास्फुटोज्ञेयोविक्षेप: शीतगोयुतान्वित्य र्थैकविलुप्तकेदृश्यतेनसर्वत्रतिस्थितंमत्वोपेक्षितं ॥अधिकार
स्यापूर्णश्लोकस्यापत्तेश्च एतदुत्तान्ययोगेनइतिसंस्कारनिषेधस्यासिद्धेस्तस्ययुक्तत्वमितितदनुक्तौसूर्यग्रहणोक्तरीत्या

सू०टी०
६६

सारण्येनसर्वत्रतद्विशेषोक्तिरथंसिध्येतिध्येयं॥ २३॥ ॥नन्वेषांग्रहणांदूरांतरेणसदोर्ध्वाधरांतरसद्भावात्परस्परंयोगा
संभवेनकथंयुतिःसंगतेत्यतआह॥भावाभावायलोकानांकल्पनेयंप्रदर्शिता॥स्वमार्गगाःप्रयांत्येतेदूरमन्योन्यमाश्रि
ताइति॥एते॥ग्रहाःस्वमार्गगाःस्वस्वकक्षास्थाः॥अन्योन्यमाश्रिताः॥युतिकालेऊर्ध्वाधरांतराभावेनसंयुक्ताःसंतःप्रयां
तिगच्छंति॥इतिदूरं॥दूरांतरेणदर्शनात्॥इयंग्रहयुतिःकल्पनात्मकाःअवास्तवा॥प्रदर्शिता॥पूर्वोक्तग्रंथेनकथि
ताःनन्ववस्तुभूताकिमर्थमुक्तेत्यतःप्रयोजनमाहभावाभावायेति॥लोकानां॥भूतस्थप्राणिनां॥भावः॥शुभफलं॥अभावः
अशुभफलं॥तस्मै॥शुभाशुभफलादेशायावस्तुभूतापियुतिरुक्तेतिभावः॥ २४॥ ॥अथाग्रिमग्रंथस्यासंगतिस्व
निरासार्थमधिकारसमाप्तिंफक्किकयाहइतिग्रहयुत्यधिकारइति॥स्पष्टं॥ ॥रंगनाथेनरचितेसूर्यसिद्धांतटिप्पणे
ग्रहयुत्यधिकारोयंपूर्णोगूढप्रकाशके॥ २५ ॥६॥ ॥इतिश्रीसकलगणकसार्वभौमबल्लालदैवज्ञात्मजरंगना
थगणकविरचितेगूढार्थप्रकाशकेग्रहयुत्यधिकारःसंपूर्णः॥ ॥अथप्रसंगादारब्धोनक्षत्रग्रहयुत्यधिकारोव्या
ख्यायते॥ ॥तत्रप्रथमंनक्षत्राणांध्रुवकज्ञानमाह॥प्रोच्यंतेलिप्तिकाभानांस्वभोगोथदशाहतः॥भवंत्यतीतधिष्ण्या
नांभोगलिप्तियुताध्रुवाइति॥भानामश्विन्यादिनक्षत्राणामुत्तराषाढाभिजिच्छ्रवणधनिष्ठावर्जितानां॥लिप्तिकाः॥भो
गसंज्ञा॥कलाः॥प्रोच्यंते॥समनंतरमेव॥कथ्यंते॥अथानंतरं॥स्वभोगःस्वाभिप्रनक्षत्रभोगःकलात्मकोवक्ष्यमाणःदश
भिर्गुणिताःकार्यः॥तत्रस्वाभीष्टनक्षत्रगततनक्षत्राणामश्विन्यादिनांभोगलिप्ताःभभोगोष्टशतीलिप्तास्तुक्ताष्टशतक
लाप्रत्येकंयुतः॥अश्विन्यादितनक्षत्रसंख्यागुणितकलाष्टशतंयुतमित्यर्थः॥ध्रुवाःनक्षत्राणांभवंति॥ १॥ ॥
अथप्रतिज्ञातानक्षभोगलिप्ताउत्तराषाढाभिजिच्छ्रवणधनिष्ठाव्यतिरिक्तानांतेषांचध्रुवकांनक्षत्रशरांश्चाष्टश्लोकैराह॥
अष्टार्णवाःशून्यकृताःपंचषष्टिर्नगेषवः॥अष्टार्थअब्धयोष्टागाअंगागामनवस्तथा॥ २॥ ॥कृतेषवोयुगरसाःशू
न्यबाणाविषद्रसाः॥खवेदाःसागरनगागजागाःसागरर्तवः॥ २॥ ॥मनवोरथसावेदावैश्वमाप्यार्धभोगगं॥अप्यस्येवा श्री:
६६

243
1941

भिजित्प्रांतेवैश्वांतेश्रवणस्थिति॥ ४॥ ॥त्रिचतुःपादयोःसंधौश्रविष्ठाश्रवणस्यतु॥स्वभोगतोवियन्नागाःषट्कृतिर्यमलाः
श्विनः॥ ५॥ ॥रंध्राद्रयःक्रमादेषांविक्षेपास्वादयक्रमात्॥दिङ्मासविषयाःसौम्येयाम्येपंचदिशोनव॥ ६॥ ॥सौम्येरसा
ःखंयाम्येगाःसौम्येखार्कास्त्रयोदशः॥दक्षिणरुद्रयमलाःसप्तत्रिंशदथोत्तरे॥ ७॥ ॥याम्येध्यर्धत्रिककृतानवसार्धश
रेषवः॥उत्तरस्यांतथाषष्टिस्त्रिंशत्षट्त्रिंशदेवहि॥ ८॥ ॥दक्षिणेत्वर्धभागस्तुचतुर्विंशतिरुत्तरे॥भागाःषड्विंशतिः
खचरस्यादीनांयथाक्रमामिति॥अश्विन्यादिनक्षत्राणांक्रमाद्भोगा॥एते॥तत्राश्विन्याअष्टचत्वारिंशत्कलाभरण्याश्चत्वा
रिंशत्॥कृत्तिकायाःकलापंचषष्टिः॥रोहिण्याःसप्तपंचाशत्कलाः॥मृगशिरसोष्टपंचाशत्॥आर्द्रायाश्चत्वारः॥अत्राब्धय
इत्यत्रगोब्धयोगोग्रहाइतिवापाठस्त्वयुक्तःशाकल्यसंहिताविरोधात्॥एतेनसौरोक्तरुद्रभस्यांशास्त्रद्वयागाब्धयःकलाद्
तिनामंदोक्तंदशकालोनपंचदशभागामिथुनेसर्वजनाभिमतध्रुवकोदशकलायुतत्रयोदशभागाःपर्वताभिमतध्रुवकस्थनिर
स्तः॥पुनर्वसोरष्टसप्ततिः॥पुष्यस्यषट्सप्ततिः॥आश्लेषायाश्चतुर्दशःतथैतिर्द्धरःपूरणार्थे॥मघायाश्चतुःपंचाशत्॥पूर्वाफा
ल्गुन्याश्चतुःषष्टिःउत्तराफाल्गुन्याःपंचाशत्॥हस्तस्यषष्टिः॥चित्रायाश्चत्वारिंशत्॥स्वात्याश्चतुःसप्ततिः॥विशाखायाअष्ट
सप्ततिः॥अनुराधायाश्चतुःषष्टिः॥ज्येष्ठायाश्चतुर्दश॥अनंतरंमूलस्यषट्॥पूर्वाषाढायाश्चत्वारः॥उत्तराषाढायाःध्रुवकमा
हवैश्वमिति॥उत्तराषाढायोगतारनक्षत्रं॥आप्यार्धभोगगं॥आप्यस्य॥पूर्वाषाढानक्षत्रस्यार्धेभोगः॥धनराशेर्विंशतिभागा
स्तत्रस्थितंज्ञेयं॥अष्टौराशयोविंशतिभागाउत्तराषाढायाःध्रुवइत्यर्थः॥एतेनपूर्वाषाढायोगताराया:सकाशादुत्तराषाढ
योगताराविंशतिकलोनसप्तभागांतरिताःतेनपूर्वाषाढाध्रुवकोष्टराशयश्चतुर्दशभागाःविंशतिकालोनसप्तभागैर्युत
उत्तराषाढायाश्चत्वारिंशत्कलाधिकोक्तध्रुवइतिपर्वतोक्तमपास्तं॥ब्रह्मसिद्धांतविरोधात्॥अभिजिद्ध्रुवकमाहआप्यस्ये
तिपूर्वाषाढायाभावसानेधनराशौविंशतिकलोनसप्तविंशतिभागेःअभिजिद्योगताराज्ञेयाःचत्वारिंशत्कलाधिकषड्वि
शतिभागाधिकाअष्टौराशयाभिजितोध्रुवइत्यर्थः॥एवकारोन्ययोगव्यवच्छेदार्थः॥तेनसंहितासंमतंश्रवणंपंचदशांश

स्थानं विंशतिविकलायुतत्रयोदशकलायुतचतुर्दशभागाधिकं नवराश्यां निरस्तं· श्रवणस्य ध्रुवकमाह वैश्वांतेइति· उत्तराषाढा
या अवसाने श्रवणयोगताराया: ज्ञातमंज्ञेयं· नवराश्योपादशभागा: श्रवणध्रुवकइत्यर्थ: धनिष्ठाया ध्रुवकमाह श्रवतु: पा
दयोरिति· श्रवणस्य तत्तीयेचतुर्थचरणयोः क्रमेणांतादिसंधौ मकरराशौ विंशतिभागेश्रविष्ठा: धनिष्ठाज्ञेया: नवराश्यो:
विंशतिभागा धनिष्ठा: ध्रुवइत्यर्थ:॥तुकात्स्वेत्रांतगेत धनिष्ठास्थानं कुंभस्या विंशतिकलोनसप्तभागानिरस्तं· शततारा
या: भोगमाहस्वभोगइति· धनिष्ठाभोगात्कुंभस्याविंशतिकलोनसप्तभागावधेरित्यर्थ:॥शततारायाअशीतिर्भोग:॥अ
त: प्राग्वत्ध्रुवाइति ज्ञापनार्थं स्वभोगइत्युक्तं· शततारायाः स्थानं शततारका ध्रुवइतिपर्यवसन्नं॰ अवशिष्टनक्षत्राणां
भोगमाह हृषट्कृतीरिति· पूर्वाभाद्रपदायाः षड्विंशत्कला: भोग:॥उत्तराभाद्रपदाया: द्वाविंशति: रेवत्याएकोनाशी
ति:॥अथध्रुवकानयनंयथा अश्विन्याः भोगः ४८ दशगुणित: ४८० अतीतनक्षत्रात्भोगयोजनाभाव: अतोश्विन्या:
कलात्मकोध्रुव: ४८० राश्याद्यस्तु ०।८ भरण्या: भोग: ४० दशघ्नो: ४०० अतीतनक्षत्रस्यैकत्वादशघ्नैतयुतोभरण्या:
परिभाषयाराश्याद्योध्रुव: ०।२० एवमाद्राभो: दशाहत: ४० अतीतनक्षत्राणां पंचतयापंचगुणिताष्टशतेन
४००० वतु: सहस्रात्मकेनयुत: कलाद्योध्रुव: ४०४० राश्याद्यस्तु २। ७।२० एवंपूर्वाषाढायाः दशगुणितोभोग: ४० एको
नविंशतिगुणिताष्टशतेन १५२०० युत: परिभाषयाराश्याद्योध्रुव: ८।१४ शततारायाः दशगुणितोभोग ८०० त्रयो
विंशतिगुणिताष्टशतेन १८४०० पुनश्चविंशतिगुणिताष्टशतरूपो १९२०० जातोध्रुवोराश्याद्य: १०।२० पूर्वाभाद्रपदा
दशगुणितोभोग: २६० चतुर्विंशतिगुणिताष्टशतेन १९२०० युतो १९४६० जातोध्रुवोराश्याद्य: १०।२५ उत्तराषाढा
भिजिच्छ्रवणधनिष्ठानांस्वभोगस्थानात्पश्चात्स्थितत्वेनोक्तरीत्यासंभवाभिन्नरीत्या ध्रुवकाउक्ता:॥स्वादिस्थानाद्योगतारा
पर्यंतरंकलाभि: स्थितास्ताला घवाद्वादशापवर्तिता: भोगसंज्ञाउक्ता:॥तथाचब्रह्मसिद्धांते· अष्टाविंशतिरर्धांनगजा श्री:
ग्निर्व्यर्धखेषव: त्रिनर्का: सत्रिभागाद्रिरसाः स्वंकाश्चपद्मकृतं॥९॥ ॥नवशानवसूर्याश्चवेदेंद्रा· शरबाणभू:॥स्वा ५०

ष्टि: सार्धतिथीं तिथ्यर्तिविश्वाश्विनस्तथा॥२॥ ॥वेदाक्षीनगोद्वधक्ष्वि हस्तायुगार्थदक्सोकृतिक्यंशहीनाश्वरसहस्रा: २६६।
४० स्वहस्तिदक्८०।३ स्वगोश्विन: स्वदंता: षड्गंताशैलगुणान्वय: मैत्राद्यश्वादिमध्यांशा: षड्शोना: स्वषड्गुणाइति· अथन
क्षत्राणांविक्षेपभागानाह स्याभिति· उक्तध्रुवकसंबंधिनां अश्विन्यादिनक्षत्राणां॥यथाक्रमं· क्रमादित्यर्थ:॥स्वात्सकीयादपक्र
णांदिक्सामाविकया: क्रमेणदशद्वादशपंचेत्यर्थ:॥दक्षिणादिशिरोहिण्यादित्रयाणांपंचदशनवउत्तरस्यांपुनर्वसौ: षड्भागा:
पुष्यस्यैवं· विक्षेपाभाव: अत्रपंचमाक्षरस्यगुरुत्वेनछंदोभंगआर्षत्वान्नदोषा:॥दक्षिणस्यामाश्लेषाया: सप्त: उत्तरस्यां· मघा
दित्रयाणांशून्यद्वादशत्रयोदश: दक्षिणस्यांहस्तचित्रयोरेकादशद्वौ· अनंतरं· स्वात्या· उत्तरदिशिसप्तत्रिंशत्· दक्षिणस्यांवि
शाखादीनांपण्मासार्धैकं त्र्यंचत्वार: नव: सार्धपंचक्रमेणउत्तरादिशि· तथाविक्षेपभागा: अभिजित· षष्टि: श्रवणस्त्रिंश
त्· धनिष्ठाया: षट्त्रिंशत्· एवकारोन्यूनाधिकव्यवच्छेदार्थं: चकार: पूरणार्थं· दक्षिणस्यां· तकारस्तथा· अर्धभागा: शतता
राया:॥तकारस्तथा॥उत्तरस्यांपूर्वाभाद्रपदायाश्चतुर्विंशति: तस्यामेवादिशिभागा: विक्षेपभागा: उत्तराभाद्रपदाया: षड्विं
शति· रेवत्या: विक्षेपाभाव:। चकार: पूरणार्थं॥९॥ ॥अथागस्त्यलुब्धकवह्निब्रह्महृदयताराणांध्रुवकविक्षेपास्तदुपपत्ति:॥
श्लोकत्रयेणाह॥अशीतिभागैर्याम्यायामगस्त्योमिथुनांतग:॥विंशेचमिथुनस्यांशेम्गव्याधोव्यवस्थिता:॥१०॥ ॥विक्षे
पोदक्षिणभागै: स्वार्णवै: स्यात्स्वकमात्॥हुतभुग्ब्रह्महृदयौवृषेद्वाविंशतिभागौ॥११॥ ॥अष्टाभिस्त्रिंशताचैवविक्षिप्ता
वुत्तरेणतौ॥गोलंबध्वापरीक्षेनाविक्षेपंध्रुवकंस्फुटमिति· स्वकीयाक्रांतिविभागस्थनात्॥दक्षिणस्यामशीत्यंशैस्ताराात्मको
गस्त्योमिथुनांतग: कर्कादिभोगेस्थित:॥अगस्त्यनक्षत्रस्यराशित्रयंध्रुवक: दक्षिणविक्षेपोशीतिरित्यर्थ:॥म्गव्याधोलु
ब्धकोमिथुनराशौविंशतिमेभागेस्थित: चकार: समुच्चये· लुब्धकनक्षत्रराशिद्वयंविंशतिभागा: ध्रुवकइत्यर्थ: दक्षिण
स्यांचत्वारिंशताभागै: परिमितस्तस्यस्वक्रांतिवृत्तस्थानाद्विक्षेप:॥वृषराशौवह्निब्रह्महृदयौ· द्वाविंशतिभागस्थितौ· वह्निब्रह्म

245
1941

स·टी·
६८

दृश्यनक्षत्रयोः द्वाविंशतिभागाधिकंककराशिध्रुवकः ॥ तौ वह्निब्रह्महृदयौ अष्टाभिस्त्रिंशता वकारः क्रमार्थे एवकारान्न्यूनाधिक
व्यवच्छेदः ॥ उत्तरेणउत्तरस्यामित्यर्थः ॥ विक्षिप्तौ विक्षेपवंतौ वह्नौ विक्षेपोष्टभागउत्तरः ब्रह्महृदयस्योत्तरोविक्षेपस्त्रिंशदित्यर्थः ॥
नन्वेते ध्रुवाविक्षेपाश्चकालक्रमेणानियता अनित्यावेत्यत आह गोलेत्यादि गोलं वक्ष्यमाणं बध्वा वंशशलाकादिभिर्निबध्य
स्फुटं विक्षेपं क्रांतिसंस्कारयोग्यं ध्रुवाभिमुखं ध्रुवकं स्फुटं आयनदृक्कर्मसंस्कृतं परीक्षेत स्वस्वकाले दृग्गोचरमिश्रमं
गीकुरुत तथा च क्रांतिसंस्कातिसंस्कारयोग्यविक्षेपा नत संस्कृत ध्रुवकयोरयनांशवशाद स्थिरत्वादपि मयेदानीं समया
नुरोधन लाघवार्थमायनदृक्कर्मसंस्कृता ध्रुवाः क्रांतिसंस्कारयोग्यविक्षेपाश्च नियताउक्ताः ॥ कालांतरे गोलयंत्रेनेधसिद्धाः
ज्ञेयाः नैतद्वतिभावः ॥ गोलयंत्रेणवेधस्तुगोलबंधोक्त विधिना गोलयंत्रं कार्यं तत्र खगोलस्योपरि भगोलमाधारवृत्तस्योप
रिविषुवद्वृत्तं तत्र यथोक्तं क्रांतिवृत्तं भगणांशांकितं तत्र बध्वा ध्रुवयष्टिकीलकयोः प्रोतमन्यत्तैर्वेधवलयं तत्र भगणांशां
कितं कार्यं ततस्तद्गोलयंत्रं सम्यक् ध्रुवाभिमुखयष्टिकं जलसमक्षितिजवलयं च यथा भवति तथा स्थिरं कृत्वा रात्रौ गोलम
ध्यछिद्रगतया दृष्ट्या रेवतीतारां विलोक्य क्रांतिवृत्ते मानांतादृशकलांतरित पश्चाद्भागं रेवतीतारायां निवेश्य मध्यगतयैव दृष्ट्या
श्विन्यादिनक्षत्रस्य योगतारां विलोक्य तस्या उपरि तद्वेधवलयं निवेश्यं एवं कृते सति वेधवलयस्य क्रांतिवृत्तस्य च यः संपातः
समीलोनोदयतो यावद्भिरंशैस्तावतस्तस्य नक्षत्रस्य ध्रुवांशाः ज्ञेयाः वेधवलयेन तस्यैव संपातस्य योगतारायाश्च यावतोंतरेंशा
स्तावतस्तस्य विक्षेपांशाः दक्षिणा उत्तरा वा वेद्या अथ कदंबप्रोतवेधवलयेनैवं धृतुसदा स्थिरा ध्रुवका आयनदृक्कर्मासंस्कृताः प
रंतु कदंबतारयोरभावाद्द्वशाक्यमिति यथोक्तवेधेनैवाक्तदृक्कर्मसंस्कृताः ध्रुवाः ज्ञेयाश्च ध्रुवाभिमुखाः ॥ स्फुटाः सिद्धाः भ
वंतीत्यादिक ॥ १२ ॥ ॥ अथ रोहिणीशाकटभेदमाह ॥ वृषस्य सप्तदशे भागे यस्य याम्याशकद्वयात् ॥ अधिकोभियाद्रोहिण्याः श
कटं तु स इति वृषराशेः सप्तदशेंऽशे यस्य ग्रहस्य नागद्वयादधिको विक्षेपो दक्षिणः स ग्रहो रोहिण्याः शकटं शकटाकारसन्निवेशं
भिद्यात् ॥ तन्मध्यंगतो भवेदित्यर्थः ॥ तु कारात्ग्रहविक्षेपो रोहिणीविक्षेपादल्प इति विशेषार्थकः ॥ विक्षेपस्य दक्षिणस्य रोहि श्रीः ६८

247
1941

णीविक्षेपादधिकत्वे शकटाद्बहिर्दक्षिणभागे ग्रहस्यास्थितत्वेन तद्भेदकत्वाभावात् ॥ अत्र शकटाश्रित नक्षत्रस्य ध्रुवकराशिः सप्तदशांशाः
दक्षिणः शरो भागद्वयमिति वेधसिद्धास्पष्टावुक्तिः ॥ १३ ॥ ॥ अथ भग्रहयोगसाधनार्थं ग्रहयोगसाधनरीत्यातिदेशमाह ॥ ग्र
हवद्युनिशे नानां कुर्याद्दृक्कर्म पूर्ववत् ॥ ग्रहमेलकवद्भेषु ग्रहभुक्त्यादिना निचोति ग्रहवत् ॥ धुनिशे ग्रहणार्थं यथा दिनमानरा
त्रिमान अक्षदृक्कर्मार्थं कृतेतथा दिनमानरात्रिमाने भानां नक्षत्रध्रुवकानां आक्षदृक्कर्मार्थं गणकः कुर्यात् ॥ तदनंतरं पूर्ववत् नक्षत्र
नित्योदयास्तौ साधयित्वाभीष्टकाले दिनगतशेषाभ्यां नतं कृत्वा विषुवच्छायाभ्यां स्पष्टादित्यादिनेत्यर्थः ॥ दृक्कर्म कुर्यात् ॥ अत्र
नक्षत्रध्रुवके पर्वतेनायनदृक्कर्माप्युदाहरणे कृतं तदयुक्तं तस्य ध्रुवके स्वतः सिद्धत्वात् तदनंतरं शेषं नक्षत्रग्रहयुतिसाधनं
ग्रह ध्रुवतुल्यतारूपं ग्रहमेलकवत् ॥ ग्रहयोगसाधनरीत्या ग्रहांतरकलाद्युत्यादिना कार्यं ननु तत्र ग्रहांतरकलाः स्वस्वभुक्ति
विप्तासमाहताः भुक्त्यंतरेण विभजेदित्युक्तेर्नक्षत्रकालिकागतिर्या ह्यास्यत आह ग्रहभुक्त्येति केवलया ग्रहगत्या ग्रहस्य
फलं ग्रहध्रुवांतररूपं ग्रहे संस्कार्यं ध्रुवसमो ग्रहो भवति नक्षत्रस्य पूर्वगत्यभावाद्ध्रुवो यथास्थित इत्यर्थः ॥ ननु तथापि ग्रहन
क्षत्रयुतिकालसाधनं भुक्त्यंतरासंभवात्कथं कार्यमिति मंदाशंकेत्यत आह दिनानीति अभीष्टसमयाद्द्विवरमित्यादिना
केवलया ग्रहगत्या ग्रहनक्षत्रयुति दिनानि साध्यानि च समुच्चये नक्षत्राणां गत्यभावात् ॥ १४ ॥ ॥ अथाभीष्टकाला
त्ग्रहनक्षत्रयुतिकालस्य गते एष्यत्व संभ्रमार्थं पुनराह ॥ एष्यो हीने ग्रहे योगो ध्रुवकादधिके गतः ॥ विपर्ययाद्वक्रगते ग्रहे ज्ञेयः
समागम इति नक्षत्रध्रुवादुक्तात् ग्रहे आयनदृक्कर्मसंस्कृत ग्रहे ॥ आक्षदृक्कर्मसंस्कृत नक्षत्र ध्रुवकात् ॥ दृक्कर्मद्वयसंस्कृतग्र
हे द्वितिविवेकार्थः ॥ न्यूने सति योगो नक्षत्रग्रहयोगः । स्वाभीष्टसमयाद्भावी अधिके सति पूर्वं जातं वक्रगते ग्रहे विपर्ययात्
उक्तवैपरीत्यात् समागमः ॥ नक्षत्रग्रहयोगो ज्ञेयः हीने ग्रहे गतो धिके ग्रहे एष्यो योगः ॥ अत्रोपपत्तिः ॥ नक्षत्रस्य गत्यभावे
न सदा स्थिरत्वात् ग्रहगमनेनैव योगसंभवादिति सुगमतरा ॥ १५ ॥ ॥ अथाश्विन्यादिनक्षत्रस्य बहुतारात्मकत्वात्कस्या
स्तारायाएते ध्रुवका इत्यस्य योगाताराया ध्रुवक इत्युत्तरं न सिध्यत्याश्विन्यादिनक्षत्राणां योगतारां विवक्षुः प्रथममेषां

सू०टी०
६९

नक्षत्राणां योगतारामाह ॥ फाल्गुन्योर्भाद्रपदयोस्तथैवाषाढयोर्द्वयोः ॥ विशाखाश्विनिसौम्यानां योगतारोत्तरास्मृतेति॥ एषां
कनक्षत्राणां प्रत्येकं स्वतारासु या उत्तरदिकस्थतारा सा योगतारा गोलतत्त्वज्ञैरुक्ता ॥ १६ ॥ ॥ अथान्ययोरनयोराह ॥ पश्चि
मोत्तरताराया द्वितीया पश्चिमे स्थिता ॥ हस्तस्य योगतारा सा श्रविष्ठायाश्च पश्चिमेति॥ हस्तनक्षत्रं पंचतारात्मकं हस्तपंचां
गुलिसंनिवेशाकारं ॥ तत्र नैर्ऋत्यदिगाश्रितपश्चिमावस्थिततारायाउत्तरदिगवस्थिततारायाः द्वितीयाः पूर्वोक्तातिरिक्ता॥ प
श्चिमे वायव्याश्रिते स्थिता सा हस्तस्य योगतारा ज्ञेयाः उत्तरतारासन्ना पश्चिमाश्रिततारा हस्तस्य योगतारेति फलितार्थः
धनिष्ठायाः योगतारामाह ॥ श्रविष्ठायाइति॥ धनिष्ठायास्तारासु या पश्चिमदिकस्था सा तस्याः योगतारा च॥ समुच्चये ॥
॥ १७ ॥ ॥ अथान्येषामेषामाह ॥ ज्येष्ठाश्रवणमैत्राणां बार्हस्पत्यस्य मध्यमा ॥ भरण्याग्नेयपित्र्याणां रेवत्याश्चैव
दक्षिणेति॥ ज्येष्ठाश्रवणानुराधानां॥ पुष्यस्य च॥ प्रत्येकं तारायात्मकत्वान्मध्यमतारा योगतारा स्यात् ॥ भरणीकृत्तिकाम
घानां रेवत्याश्च॥ समुच्चये॥ प्रत्येकं स्वतारासु या दक्षिणदिकस्था सा योगतारा ॥ १८ ॥ ॥ अथान्येषामेषामवशिष्टा
नां चाह ॥ रोहिण्यादित्यमूलानां प्राची सार्पस्य चैव हि ॥ यथाप्रत्यवशेषाणां स्थूला स्याद्योगतारकेति॥ रोहिणीपुनर्वसुमूला
नामाश्लेषायाश्च प्रत्येकं स्वतारासु पूर्वदिकस्थैव योगतारेत्येवाद्योर्थः ॥ प्रत्यवशेषाणां॥ अवशिष्टनक्षत्राणामार्द्रा
चित्रास्वात्यभिजिच्छततारणां स्वतारासु यथा अत्यंतस्थूला भाति तारा सा योगतारा स्यात् ॥ १९ ॥ ॥ अथब्रह्मसंज्ञ
कनक्षत्रस्थानमाह ॥ पूर्वस्यां ब्रह्महृदयादंशकैः पंचभिः स्थिता ॥ प्रजापतिर्वृषांते सौ सौम्ये ष्टात्रिंशदंशकैरिति॥ ब्रह्म
हृदयस्थानात्पूर्वभागे पंचभिरंशैः प्रजापतिस्तारात्मको ब्रह्माक्रांतिवृत्ते स्थितः ॥ कुत्रेत्यत आह वृषांतइति॥ वृषांतानिकटे॥
एकराशिः सप्तविंशत्यंशाः ब्रह्म ध्रुवकइत्यर्थः ॥ अस्यविक्षेपमाह असाविति॥ ब्रह्मात्तुत्तरस्यामष्टात्रिंशद्भागैः स्थितः
अष्टात्रिंशद्भागा अस्यविक्षेपइत्यर्थः ॥ २० ॥ ॥ अथापांवत्सापयोस्तारयोरवस्थानमाह ॥ अपांवत्सस्तु चित्राया उत्तरेंशै
स्तु पंचभिः ॥ बृहत्किंचिदतो भागैरापः षड्भिस्तथोत्तरेइति चित्रायाः सकाशादपांवत्ससंज्ञकस्तारात्मकः पंचभिर्भागैरुत्तर ग्रं०
६९

249
1941

स्थितः ॥ प्रथमस्तु काररिश्चित्राध्रुवतुल्यध्रुवकार्थकः ॥ द्वितीयस्तु काराश्चित्राविक्षेपस्य दक्षिणभागद्योतकत्वादपांवत्सविक्षेपउत्त
रस्त्रिभागइति स्फुटार्थकः ॥ अतः अपांवत्सात् किंचिदल्पांतरेण बृहत्॥ स्थूलतारात्मकः आपसंज्ञकः ॥ तथा ॥ अपांवत्सा
त्षड्भिरंशैरुत्तरस्यां स्थितः चित्राध्रुव एव स्वापस्य ध्रुवको विक्षेपउत्तरो नवांशइत्यर्थः ॥ २१ ॥ ॥ अथाग्निमग्रंथस्यासंगति
त्वनिरासार्थमधिकारसमाप्तिं फक्किकयाह इति नक्षत्रग्रहयुत्यधिकार इति स्पष्टं ॥ ॥ रंगनाथेन रचिते सूर्यसिद्धांतटिप्पणे
॥ ग्रहसंख्याधिकारोयं पूर्णो गूढप्रकाशके ॥ ७ ॥ इति श्रीसकलगणकसार्वभौमबल्लालदैवज्ञात्मजरंगनाथगणकवि
रचिते गूढार्थप्रकाशके नक्षत्रग्रहयुत्यधिकारः पूर्णः ॥ ॥ अथोदयास्ताधिकारो व्याख्यायते ॥ ॥ ननु सूर्येणास्तमनं सह
ति ॥ प्रागुक्तेर्ग्रहयुत्यधिकारोनंतरं नक्षत्रग्रहयुत्यधिकारात्प्रागेवोदयास्ताधिकारो निरूपणीय इत्यतोत्र तत्संगतिप्रदर्श
नार्थमादौ तदधिकारं प्रतिजानाति॥ अथोदयास्तमययोः परिज्ञानं प्रकीर्त्यते ॥ दिवाकराक्रांतमूर्तीनामल्पतेजसामिति॥
अथ॥ नक्षत्रग्रहयुत्यधिकारानंतरं॥ सूर्यकिरणाभिभुजामूर्तिर्बिंबं येषां तेषां चंद्रादिषड्ग्रहाणां नक्षत्राणां च॥ अत एवाल्पते
जसां॥ न्यूनप्रभावतां॥ उदयास्तमययोः ॥ अग्रिमकाले सूर्यादधिकासन्निहितसन्निहितत्वसंभावनया क्रमेणोदयास्तयोः
॥ सूर्यान्निकटाश्रितस्य यस्मिन्काले यदंतरेण प्रथमदर्शनं संभावितं स उदयः सूर्याद्दूरस्थितस्य यस्मिन्काले यदंतरेण प्रथम
दर्शनं संभावितं सोस्तः ॥ अनेन नित्योदयास्तव्यवच्छेदः ॥ तयोरित्यर्थः परिज्ञातं सूक्ष्मज्ञानं प्रकारः प्रकीर्त्यते ॥ अतिसूक्ष्म
त्वेन मयोच्यतेइत्यर्थः ॥ तथा च ग्रहयुत्युद्देशे स्तमनमुद्दिष्टमपि तस्य पूर्वमेव सूर्यासमत्व एव संभवात्तादृक्लक्षणतया ग्रह
युतिप्रसंगेनोक्तं॥ नक्षत्रग्रहयुतिस्तु ग्रहयुतिवदिति तदनंतरमुक्ता अतः प्रति बंधकजिज्ञासापगमे वश्यवक्तव्यत्वस्याव
सरसंगतित्वात्तत्संगत्या नक्षत्रग्रहयुत्यधिकारानंतरं प्रागुद्दिष्टमस्तमनं तत्प्रसंगादुदयश्च प्रतिपाद्यतेइति भावः ॥ १ ॥ ॥
तत्र प्रथमं पंचताराणां पश्चिमास्तपूर्वोदयानाह सूर्यादल्पाधिकाः पश्चादस्तं जीवकुजार्कजाः ॥ ऊनाः प्राग्उदयं यांति शुक्रज्ञौव
क्रिणौ तथेति॥ वक्रगतौ शुक्रबुधौ॥ तथा॥ सूर्याधिकौ पश्चिमास्तंगतौ ॥ सूर्यादल्पौ पूर्वोदयं प्राप्नुतः शेषं स्पष्टं ॥ २ ॥ ॥

सू॰टी॰
७०

अथ चंद्रबुधशुक्राणां पूर्वास्तपश्चिमोदयावाह ॥ ऊना विवस्वतः प्राच्यामस्तं चंद्रज्ञभार्गवाः ॥ व्रजंत्यभ्यधिकाः पश्चादुदयं शीघ्रया
यिन इति॰ शीघ्रयायिनः ॥ सर्वगत्याधिकगतय इत्यर्थः एतेन बुधशुक्रावर्कगत्यल्पगती सूर्यादल्पौ पूर्वास्तमधिकौ च पश्चि
मोदयं न प्राप्नुत इत्युक्तं॰ शेषं स्पष्टं॰ अत्रोपपत्तिः ॥ रविगतितोल्पगतिर्ग्रहो कोदयनश्चेप्राच्यां दर्शनयोग्यो भवितुमर्हतीति॰ यत
सूर्यात्स्वाधिकत्वेन बहुगतित्वाद्योत्तरोत्तरमधिकविप्रकर्षात्सावहवशोर्कन स्य पूर्वमुदयादधिकस्यानंतरमुदयनियमात्तथ
ह बिंबस्य प्राक्क्षितिसंलग्नतात्कालानंतरं यावत् सूर्यस्य तादृशः कालस्तावत्पर्यंतं प्रकर्षेदर्शनसंभवात् ॥ एवं यदाल्पगतिः
सूर्यादधिकस्तदा प्रवहवशेनार्कस्य पूर्वमुदयानंतरमुदितग्रहस्यदर्शनासंभवात्प्रवहवशेनादौन्यूनार्कस्यास्तसंभवादनंत
रमधिकग्रहस्यास्तसंभवात्तयोरस्तानंतरं पश्चिमभागे ग्रहदर्शनसंभवेप्यधिकगतिस्सूर्यस्य स्पष्टाश्चिन्नत्वेनोत्तरोत्तरमधिकं
संनिकर्षात्पश्चिमस्यामदर्शनंसंभवत्येव॰ तेन भौमगुरुशनिनः ॥ वक्रत्वेन्यूनगतित्वात् बुधशुक्रौ चेति॰ अथार्कग्रहगति
सूर्यादूनस्तदोत्तरोत्तरमधिकसान्निकर्षात्पूर्वस्मिन्नदर्शनं याति॰ यदा सूर्यादधिकस्तदोत्तरोत्तरमधिकवि
प्रकर्षात्पश्चिमस्यामुदयः ॥ तेन शीघ्राश्चंद्रबुधशुक्रा इत्युपपन्नमुक्तं ॥ ३ ॥ ॥ अथाभीष्टदिने आसन्ने सूर्योदयास्तका
लिकौ सूर्यदृग्ग्रहौ तत्कालज्ञानार्थं कार्यावित्याह ॥ सूर्यास्तकालिकौ पश्चात्प्राच्यामुदयकालिकौ ॥ दिवावार्कग्रहौ कुर्या
दृक्कर्माथ ग्रहस्याथ इति पश्चात् ॥ पश्चिमास्तोदयसाधने॰ अभीष्टदिने आसन्ने सूर्यग्रहौ॰ सूर्यास्तकालिकौ कुर्यात् ॥
गणकः ॥ पूर्वास्तोदयसाधने सूर्योदयकालिकौ कुर्यात् ॥ दिने अभीष्टकाले कुर्यात्॰ वकारो विकल्पार्थकः ॥ अनंतरं ग्र
हस्य॰ दृक्कर्म॰ आयनाक्षदृक्कर्मद्वयं कुर्यात्॰ तुकार आक्षदृक्कर्म्मण्यो कथ्य वाथोक्तमिति विशेषार्थकः ॥ अत्रोपपत्तिः ॥ पश्चा
दस्तोदसाधने पश्चिमस्यां तद्दर्शनमिति सूर्यास्तकालिकौ सूर्यग्रहाविष्टकालांशसाधनार्थं सूक्ष्मौ॰ पूर्वोदयास्तसाधने पू
र्वदिशि तद्दर्शनमिति सूर्योदयकालिकौ सूर्यग्रहाविष्टकालांशसाधनार्थं सूक्ष्मावन्यकाले तु किंचित्स्थूलावपि कृतौ॰ दृक्कर्म
संस्कृतग्रहस्य सूर्यवत्क्षितिजसंलग्नतायोग्यत्वाद् दृक्कर्मसंस्कृतो ग्रहः कार्य इति ॥ ४ ॥ ॥ अथेष्टकालांशानयन

श्री॰
७०

माह ॥ ततो लग्नांतरप्राणाः कालांशाः षष्टिभाजिताः ॥ प्रतीच्यां षड्भयुतयोस्तद्वल्लग्नांतरासव इति॰ ततस्ताभ्यां सूर्यदृग्ग्रहाभ्यां॰ लग्नां
तरप्राणाः ॥ भोग्यास्तनतत्कस्याद्युक्तप्रकारेण॰ अंतरकालासवः षष्टिभक्तादृशाः कालांशाः भवंति॰ प्रागुदयास्तसाधने॰
प्रतीच्यां॰ पश्चिमोदयास्तसाधनं॰ षड्भयुतयोः षड्राशियुक्तयोः सूर्यदृग्ग्रहयोः लग्नांतरासवः अंतरासवः तद्वत्। षष्टि
भक्ता इष्टकालांशाः भवंतीत्यर्थः ॥ अत्रोपपत्तिः ॥ दृग्ग्रहसूर्याभ्यामंतरकालो ग्रहस्य सूर्योदयकाले दिनगतं पूर्वोदयास्तनि
मित्तमुपयुक्तं ॥ एवं पश्चिमोदयास्तनिमित्तं सूर्यदृग्ग्रहाभ्यामस्तकालासुभिरंतरकालः सूर्यास्तकाले ग्रहस्य दिनशेषका
ल उपयुक्तस्तत्रास्तकालानामनुत्तरोदयासुभिः साधनाय सषड्भौ सूर्यदृग्ग्रहौ कृतौ॰ सकालो स्वात्मकः ॥ अहोरात्रासुभि
श्चक्रकलातुल्याभिश्चक्रांशाः लभ्यंते तदिष्टासुभिः के इत्यनुपाते प्रमाणफलयोः कलापवर्तितेन हरस्थाने षष्टिरतो लग्नां
तरकालः षष्टिभक्त इष्टकालांशा इत्युपपन्नमुक्तं॰ अत्रेदमवधेयं॰ सूर्योदयकालिकाभ्यामर्कदृग्ग्रहाभ्यामानीतेन
८ दिनगतेन पूर्वं वास्तोग्रहः ॥ सूर्यास्तकालिकाभ्यां सषड्भाभ्यामर्कदृग्ग्रहाभ्यामानीतेन विशेषणाग्रे वास्यः सषड्भो दृग्ग्रहः ॥
क्रमेण ग्रहोदयास्तकाले प्राक्पश्चिमदृग्ग्रहो भवतस्ताभ्यां सूर्यसषड्भसूर्याभ्यां च क्रमेण पूर्वपरीत्यांतरकालो ग्रहस्य सूर्यो
दयास्तकाले क्रमेण दिनगतशेषौ नाडिकौ षष्टिभक्तौ कालांशौ विष्टौ सूक्ष्मौ॰ अथेष्टकालिभ्यामानीतकालेन पूर्वं चाप्ति
ताभ्यां प्राक्पश्चिमदृग्ग्रहाभ्यां सूर्यसषड्भसूर्याभ्यां वानीतकालो नाडीत्रोपि सूक्ष्मासन्नः ॥ सूर्योदयास्तसंबंधाभा
वात् ॥ तद्युत्पन्नाः कालांशाः अपि तथा॰ अथ सूर्योदयास्तकालिताभ्यामानीतैकवारकालात्कालांशाः स्थूलाः इष्टकालि
काभ्यामानीतैकवारकालात्कालांशा इति स्थूलाः उभयत्र कालस्य सावनत्वात् ॥ न हि सावनषष्टिघटिभिश्चक्रपरिपूर्ति
येन सूक्ष्माः सिध्यंतीति ॥ अथ चैककालांशेरुदयोस्तो भौमादीनामिति वक्ष्यः प्रथमं गुरुशनिभौमानां कालांशानाह ॥ एका
दशामरेज्यस्य तिथिसंख्यार्कजस्य च ॥ अस्तांशा भूमिपुत्रस्य दश सप्ताधिकास्तत इति॰ ततः इष्टकालांशावगमानंतरं॰ अ
स्तांशाः अस्तो यैरंशैर्भवति ते अंशाः ॥ अस्तोपलक्षणादुदयांशाः ज्ञेयाः अमरेज्यस्य॰ गुरोरेकादशकालांशाः ॥ शनेः पंचदशसंख्या

२?/194

स०टी० कालांशानां· चमकत्रयं· भौमस्यसमाधिकाद्दशः समदशकालांशाइत्यर्थः ॥ ६ ॥ ॥ अथ शुक्रस्याह ॥ पश्चाद्दशमयोष्टाभि
७१ दयःप्राग्भव· तथा ॥ प्रागस्तमुदय ॥ पश्चादस्तोष्टदशभिर्भगांशैरिति· शुक्रस्यमहत्तया· वक्रत्वेनतीव्रासन्नत्वात्स्थूलबिंबत
यापश्चिमस्यास्त ॥ अष्टाभिः कालांशैः ॥ प्राच्यामुदयश्चतैः नाधिकं ॥ प्राच्यांशुक्रस्याल्पत्वादणुबिंबत्वाद्दशभिः कालांशैः
अस्तंगमनः कुर्यात नाल्पैः पश्चिमस्यामुदयस्तस्याणुबिंबस्यदशभिः कालांशैः रेवज्ञेयः ॥ ७ ॥ ॥ अथबुधस्याह ॥ एवंबुधो
द्वादशभिश्चतुर्दशभिरंशकैः ॥ वक्रीशीघ्रगतिश्चार्कात्करोत्यस्तमयोदयाविति· वक्रीशीघ्रगतिश्च· समुत्रयं· बुधः ॥ सूर्यात· द्वाद
शभिश्चतुर्भिश्चकालांशैः ॥ अस्तोदयौ· एवंशुक्रवत्स्याकरोति· पश्चादस्तं प्रागुदयंच· द्वादशभिः कालांशैः महाबिंबत्वाबु
धःकरोति· प्रागस्तंपश्चादुदयंचचतुर्दशभिः कालांशैरणुबिंबत्वात् बुधः करोतीत्यर्थः ॥ ८ ॥ ॥ अथभौमेष्टकालांशाभ्यान
स्तस्योदयस्यगतैष्यत्वज्ञानमाह ॥ एभ्योधिकैः कालभागैर्दृश्यान्यैरदर्शनाः भवंतिलोकेखचराभानुभाग्रस्तमूर्तयइति· एभ्यः
एकादशमरेज्यस्येतिश्लोकत्रयोक्तेभ्यः अधिकैरिष्टकालांशैर्दृश्याः दर्शनयोग्या अभीष्टकालेग्रहाः भवंति· तथाचास्तसाधन
दृश्यत्वं अस्तऐष्यं ॥ उदयसाधनेदृश्यत्वं उदयोगतइतिभावः अल्पैरिष्टकालांशैः ग्रहाः लोकेभ्लोके अदर्शना ॥ नविद्यते द
र्शनंदृष्टिगोचरत्वंयेषांते· अदृश्या अभीष्टकालेभवंति· ननुदृश्याः कुतोभवंतीत्यत आह भानुभाग्रस्तमूर्तयइति· सूर्यासन्नत्वेन
सूर्यकिरणदीप्त्याग्रस्ता अभिभूता· सूर्यकिरणंप्रतिहतालोकनयनविषयाः ॥ मूर्तिः बिंबस्वरूपंयेषांतेइत्यर्थः ॥ तथाचास्तसा
धने अदृश्यत्वंभागत ॥ उदयसाधने अदृश्यत्वंउदयएष्यइतिभावः ॥ अतएवोक्तेभ्यऊनाभ्यधिकायदीष्टाः खेटोदयोगम्यस्तोगं
स्तदास्यात् ॥ अतोन्यथाचास्तमयोगेवंस्यतइतिभास्कराचार्योक्तसंगच्छते अत्रोपपत्तिः उक्तकालांशैर्ल्पेष्टकालांशैर्यत्कालेग्रहो
साधितोतत्कालएवग्रहस्योदयोस्तोवार्कक्रतः ॥ उक्तकालांशानांसूर्यसान्निध्यजनिताग्रहदर्शनेहेतुत्वप्रतिपादनात् ॥
तथाचेष्टकालांशाउक्तेभ्योल्पास्तदाग्रहस्यास्तंगतत्वमेवेत्युदयसाधनेइष्टकालांशाउक्तेभ्योल्पास्तदेष्टकालादग्रेग्रहस्योदयः श्रीः
यदीष्टकालांशाउक्तदंग्रेहक्तेभ्योधिकास्तदेष्टकालात्ग्रहस्योदयः पूर्वंजातः ॥ एवमस्तसाधनेइष्टकालांशाअधिकाश्चकालात्ग्रहेस ७१

दास्तः ॥ यदिष्टकालांशाःऊनास्तदेष्टकालाद्ग्रेग्रहास्तोज्ञातइत्युपपन्नमुक्तं ॥ ९ ॥ ॥ अथोदयास्तयोर्गतैष्यदिनाद्यानयनमाह ॥
तकालांशांतरकलाभुक्त्यंतरविभाजिता ॥ दिनादिनफलंलब्धंभुक्तियोगेनवक्रिणइति· उक्तै एकालांशयोरंतरस्यकला ॥ सू
र्यग्रहयोर्गत्यौ कलात्मकांतरेणभक्ताः दिनादिकमुदयास्तयोः फलंउदयास्तयोर्गतैष्यदिनाद्यंभवतीत्यर्थः ॥ वक्रगतिग्रहस्यवि
शेषमाह ॥ लब्धमिति· वक्रिण ॥ वक्रग्रहस्य· उक्तयोगेन· सूर्यग्रहयोः कलात्मकगतियोगेनभक्ता· फलंगतैष्यादिनाद्यंज्ञेयं· अ
त्रोपपत्तिः ॥ सूर्यग्रहयोर्गत्यंतरकलाभिरेकंदिनंतदेष्टप्राप्तकालांशयोरंतरकलाभिः किमित्यनुपातेनोदयास्तयोरभीष्टका
लाद्गतैष्यदिनाद्यवगमः वक्रग्रहेतुसूर्यग्रहयोर्गतियोगेनग्रहमंतरवृद्धेर्गतियोगादनुपातउपपन्नइत्युक्तं ॥ १० ॥ ॥
अथग्रहगतिकालयोः कांतिवृत्तस्थत्वात्कालांशांतरस्याहोरात्रवृत्तस्थत्वाच्चानुपातः प्रमाणेच्छयोर्विजात्यत्वेनायुक्तइतिमनसि
धृत्वानयोरेकजातित्वसंपादनार्थंग्रहगत्योरिष्टघटाजातीयत्वंवदनुसारेणानुपातस्तुयुक्तएवेत्याह ॥ तल्लग्नासुहतेभुक्ती अ
ष्टादशशतोद्धृते ॥ स्यातांकालगतीताभ्यांदिनादिगतगम्ययोरिति· भुक्ती· रविग्रहयोर्गती कलात्मके· तल्लग्नासुहते· काल
साधनार्थंग्रहस्ययोराश्युदयोग्हीतस्तेनास्वात्मकोदयेनगुणिते· अष्टादशशतेनभक्ताः फले· सूर्यग्रहयोः कालांशवत्कालग
तीस्यातां· ताभ्यां· गतीभ्यां· गतगम्ययोरुदयास्तयोर्दिनादिपूर्वोक्तप्रकारेणयथास्थितगतीभ्यां· स्थूलत्वापत्तेः अत्रोपपत्तिः ॥
एकराशिकलाभिराश्युदयासवस्तदागतिकलाभिः केइत्यनुपातेनाहोरात्रवृत्तेगत्यसवः कलासनाइत्युपपन्नमुक्तं ॥ ११ ॥ ॥
अथनक्षत्राणांस्वस्थानान्निध्ययश्चादस्तोदयज्ञानार्थंकालांशान्विवक्षुः प्रथममेषामाह ॥ स्वात्यगस्त्यमृगव्याधचित्राज्येष्ठा
पुनर्वसुः ॥ अभिजिद्ब्रह्महृदयं त्रयोदशभिरंशकैरिति· मृगव्याधालुब्धकः ॥ त्रयोदशभिः कालांशैर्दृश्यादृश्याणिनक्षत्राणि
भवंति· शेषंस्पष्टं ॥ १२ ॥ ॥ अथान्येषामेषामाह ॥ हस्तश्रवणफाल्गुन्यः श्रविष्ठारोहिणीमघा ॥ चतुर्दशांशकैर्दृश्याविशाखाश्विनिदैवतमिति· फाल्गुनी· पूर्वोत्तराफाल्गुनीद्वयं· अश्विनीदैवतं· अश्विनीकुमारौदैवतं· स्वामियस्येत्यश्विनी
नक्षत्रं· दृश्या· उपलक्षणाददृश्याअपि· लिंगपरिणामश्चयथायोग्यंबोध्यः ॥ शेषंस्पष्टं ॥ १३ ॥ ॥ अथान्येषामेषामाह ॥

253
1941

सू०टी०
७२

कृत्तिकामैत्रमूलानिसार्पंरौद्रर्क्षमेवच॥दृश्यंतेपंचदशभिराषाढादितयंतथेति॰ कृत्तिकानुराधामूलनक्षत्राणिपंचदशभिः कालांशैः॥दृ
श्यंते॰ उपलक्षणाद्दृश्यंतेपि॰ एवकारोन्यूनाधिकव्यवच्छेदार्थः॥आश्लेषाआर्द्राचसमुच्चये॰ आषाढाद्वितयंतथा॰ पंचदशक
लांशैर्दृश्यंतइत्यर्थः॥ १४॥ ॥अथान्येषामवशिष्टानांचमाह॥भरणीतिष्यसौम्यानिसौभ्याग्निः समकांशकैः॥
शेषाणिसप्तदशभिर्दृश्यादृश्यानिभानितुइति॰ तिष्य॰ पुष्य॰ सौमदैवतं॰ मृगशिरोनक्षत्रं॰ एतानिनक्षत्राणि॰ सौभ्यात्॥अ
णुविंबत्वात्॥त्रिसमकांशकैः एकाविंशतिकलांशैः॥ दृश्यादृश्यादि॥इटतान्यल्पंगतानिचभवंतीत्यर्थः॥शेषाणिपूर्वा
धिकारोक्तनक्षत्रेभ्यःकातिरिक्तानि॰ शततारापूर्वोत्तराभाद्रपदारेवतीसंज्ञानि॰ चांद्रब्रह्मापांवत्सापसंज्ञानिच॥सप्तदश
भिः कलांशैः दृश्यादृश्याणिभवंति॥तुकारोदृश्यादृश्याणित्यत्रसमुच्चयार्थकः॥१५॥ ॥अथदिनाद्यानयनार्थमभीष्ट
छायाप्रमाणज्ञानीयकरणत्वमाह॥अष्टादशशतनाभ्यास्ताद्दृश्यांशाः स्वोदयासुभिः॥विभक्तलब्धाः क्षेत्रांशास्तैर्दृश्याद
श्यानार्थवेतिदृश्यांशाः कालांशाः अष्टादशगुणिताः तान्स्वोदयासुभिर्ग्राह्यास्फुटयासुभिर्भक्तालब्धाः॥क्षेत्रांशाः॥
क्रांतिवृत्तस्थांशाः तैरंशैर्दृश्यादृश्यता॥इत्यास्तौ॰ प्रकारांतरेणोक्तरीत्याज्ञेयौ॰ कालांशाभ्यासक्षेत्रांशावानीयतदंतरक
लायथास्थितगत्योरंतरेण॰ योगेवाभक्ता॰ फलमुदयास्तयोर्गतैष्यदिनाद्यंपूर्वागतमेवास्यादित्यर्थः॥अत्रोपपत्तिः॥
राश्युदयासुभिरेकराशिकलादौस्तेकालांशाककातुल्यासुभिः काइतिक्रांतिवृत्तेकलास्ताः षष्टिभक्ताअंशाइतिपूर्व
मेवछायारूढानेकलांशाएवध्रुता॰ लाघवादुक्तमुपपन्नं॥१६॥ ॥ननुग्रहणामस्तकादिष्वस्तोसुकाश्युदयइत्यु
क्तं तथानक्षत्राणांनोक्तं॥गत्यभावाद्वैयोगयोगासंभवेनगतैष्यदिनाद्यानयनासंभवश्चेत्यतआह॥प्रागेषामुदयः पश्चादस्तो
ग्रहवत्॥एषांनक्षत्राणांदृक्कर्म॰ आक्षदृक्कर्मपूर्ववत्॥पूर्वप्रकारेणकार्यं॰ परंतुल्लोकपूर्वार्धोक्तमितिध्येयं॰ सदा॰ नित्यं॰ ए
काराकदाचिदप्यन्यथानेत्यर्थः॥हि॰ निश्चयेनरविगत्या॰ गतैष्यदिवसानांलब्धास्यात्॥नक्षत्रगत्यसंभवात्॥१७॥ ॥ श्री:
७२

यांगंग्रहगतिवत्॥१७॥अथकतिपयानांनक्षत्राणांसूर्यसान्निध्यवशादस्तोनास्तीत्याह॥ अभिजिद्ब्रह्महृदयंस्वातीवैष्णववासवाः
अहिर्बुध्न्यमुदक्संस्थत्वान्नलुप्यंतेकरश्मिभिरिति॰ अभिजिद्ब्रह्महृदयं॰ अनेनैकदेशस्यब्रह्मणोपिग्रहणं॰ स्वातीश्रवणधनिष्ठाः
अहिर्बुध्न्यमुत्तराभाद्रपदाः एतानिनक्षत्राणिउत्तरदिक्स्थत्वात्॥उत्तरविक्षेपाधिक्यादित्यर्थः॥सूर्यकरैः॥न॰ लुप्यंते॰
अस्तंनयांतीत्यर्थः अत्रोपपत्तिः॥यस्योदयाकांदधिकोस्तभानुः प्रजायते॥सौम्यशरातिदैर्घ्यात्॥तिग्मांशुसान्निध्यवशे
ननास्तीधिष्ण्यस्यतस्यास्तमयः कथंचिदितिभास्कराचार्योक्ताः परमिदमिष्टमुक्ताक्षभायां॰ अन्यथापूर्वाभाद्रपदाया अपि
तथात्वापत्तेरितिदिक्॥१८॥ ॥अथाग्निमग्रंथास्यासंगतित्वनिरासार्थमधिकारस्यसमाप्तिफक्किकयाहइत्युदयास्ता
धिकारइति॥नक्षत्रग्रहयोरस्तोदयनिरूपणात्साधारण्येनोदयास्ताधिकारइत्युक्तं॥ ॥रंगनाथेनरचितेसूर्यसिद्धां
तटिप्पणे॥उदयास्ताधिकारोयंपूर्णोगूढप्रकाशके॥८॥ ॥इतिश्रीसकलगणकसार्वभौमबल्लालदैवज्ञात्मजरंगना
थगणकविरचितेगूढार्थप्रकाशकेउदयास्ताधिकारः पूर्णः॥ ॥अथभौमादीनांसूर्यसान्निध्योदयास्तासन्नेदीप्त्यासकल
बिंबदर्शनंशुक्लत्वेननभवति॰ किंत्वेकदेशएवशुक्लत्वेनदृश्यतेइतिभौमादिविसदृशत्वंचंद्रस्यकुतइत्याशंकायाः पूर्वाधिकारे
समुपस्थितेस्तदुत्तरभूतशृंगोन्नमनाधिधिकारोवश्यमुपस्थितआरब्धोव्याख्यायते॥ ॥शृंगोन्नतहस्यकालापूर्वकालेस्त
कालानंतरकालेचासन्नकतिपयदिवसेषुदर्शनात्पूर्वाधिकारेचंद्रस्यकालांशानुक्त्यातदुदयास्तानुक्तेश्चप्रथममुपस्थित
चंद्रोदयास्तयोः साधनमतिदिशति॥उदयास्तविधिः प्राग्वत्कर्तव्यः शीतगोरपिभागैर्द्वादशभिः पश्चाद्दृश्यः प्राग्यात्यदृश्य
तामिति॰ चंद्रस्य अपिशब्दः पूर्वाधिकारोक्तैर्ग्रहनक्षत्रैः॥समुच्चयार्थकः॥उदयास्तविधिः॥उदयास्तयोः साधनप्रकारः॥
प्राग्वत्॥पूर्वाधिकारोक्त[illegible]रीत्यागणकेनकार्यः॥ननुकालांशानांपूर्वमनुक्तेः कथंतत्सिद्धिरतआहभागैरिति॰ द्वा
दशभिरंशैश्चंद्रः पश्चिमस्यांदृश्यः॥उदितोभवति॰ प्राच्यां॰ अदृश्यतां॰ अस्तंप्राप्नोति॥अत्रपश्चात्प्रागितिपुनरुक्तमपिपूर्वे
णुपयुक्तयोः साहचर्येणचंद्रोदयास्तविमुक्त्यात्साहचर्येणचंद्रस्यपश्चिमास्तपूर्वोदयौवर्तेतेइतिकस्यचिभ्रमंदबुधेभ्रमस्य

255
1941

सू०टी० ७२

वारणावेतिध्येयं॥ १॥ ॥अथोदयास्तप्रसंगेनस्पष्टतया चंद्रनित्यास्तोदययोः साधनं विवक्षुः प्रथमं श्लोकत्रयेणेंदोर्नित्यास्तसाध
नमाह॥ रवींद्वोः षड्युतयोः प्राग्वल्लग्नांतरासवः॥ एकराशौ रवींद्वोश्च कार्या विवरलिप्तिकाः॥ २॥ ॥तन्नाडिकाहते भुक्ती रवीं
द्वोः षष्टिभाजिते॥ तत्फलान्वितयोर्भूयः कर्तव्या विवरासवः॥ ३॥ ॥एवं यावत्स्थिरीभूता रवींद्वोरंतरासवः॥ तैः प्राणैरस्त
मेतींदुः शुक्लेऽस्तमयात्परमिति॥ शुक्लकृष्णपक्षाभीष्टदिने सूर्यास्तकालेऽस्पष्टौ स्पष्टौ सूर्यचंद्रौ साध्यौ॥ चंद्रस्य दृक्कर्मद्वयं संस्कार्यं
तत्राक्षदृक्कर्म श्लोकपूर्वार्धोक्तमेव॥ तयोः सूर्यचंद्रयोः षड्राशियुक्तयोः॥ लग्नांतरासवः॥ अंतरकालासवः॥ प्राग्वत्॥ भोग्या
सूनूनकस्येत्यादिना साध्याः॥ तौ सषड्भार्कचंद्रावेकराशौ वा भिन्नराशौ वेत्यसत्सदा सषड्भौ तयोः सूर्यचंद्रयोः अंतरकलाः का
र्याः चकारो विषयव्यवस्थार्थकः॥ तयोः अक्षकलयोः घटिकाभिः असवः षष्ट्याधिकशतत्रयेण भाज्याः घटिकाः कालादु
दयास्तगणितादेकराशिकलाभिः कार्या असवस्तेषष्ट्याधिकशतत्रयेण भाज्याः घटिकाः आभिः सूर्येंद्वोर्गती कलात्मके गुण्ये
षष्टिभक्ते तत्फलान्वितयोः॥ स्वस्वफलयुक्तयोः सषड्भसूर्यचंद्रयोः॥ भूयः पुनः विवरासवः॥ अंतरप्राणाः॥ पूर्वरीत्या क
र्तव्याः एवं तद्घटिकाभिः सूर्यास्तकालिकौ सषड्भसूर्यदृक्कर्मसंस्कृतचंद्रौ प्रचाल्य तयोर्विवरासवः इति यावत्॥ स्थिरी
भूता आसन्नास्तावत्साध्याः॥ तैरभिन्नैरसुभिः सूर्यास्तादनंतरं चंद्रोऽस्तं प्राप्नोति॥ अत्रोपपत्तिः॥ सूर्यास्तकाले सषड्भार्को ल
ग्नं दृक्कर्मसंस्कृतश्चंद्रः षड्युतश्चंद्रास्तकालिकं न परंतु सूर्यास्तकालिकं न स्वास्तकालिकं॰ पश्चिमदृग्ग्रहः सूर्यास्तकालिक
इति तत्त्वं॰ तदंतरासवः॥ सावश्चंद्रस्य सूक्ष्मादिनत्रोपाः॥ परंतु परिभाषया नाक्षत्रज्ञानसंभवान्नाक्षत्राः साध्या इति॥ चंद्रस्ता
भिश्चाल्यः स्वास्तकालिसषड्भोलग्नं॰ अस्मात्सूर्यास्तकालिकसषड्भसूर्याच्चांद्रतरासवो नाक्षत्राः सूक्ष्मा अपि भगवते करीति प्र
दर्शनार्थं भिन्नकालिभ्यां सूर्यचंद्राभ्यां कथं सूक्ष्मसमयसिद्धिरिति मंदाशंकापनोदार्थं च सषड्भः सूर्योपि साधितश्चंद्रास्त
काले॰ ताभ्यामंतरासवो नाक्षत्रा अपि सूर्यास्तकालिकलग्नाग्रहादसूक्ष्माद्व्यसकृत्सूक्ष्माद्व्युक्तमुपपन्नं॥ वस्तुतस्तु
सावनाभ्युपगमे रवींद्वोः षड्युतयोः प्राग्वल्लग्नांतरासवः॥ तैः प्राणैरस्तमेतींदुः शुक्लेऽस्तमनात्परमित्येकएव सूर्यासिध्यां श्रीः ७३

257
1941

तेश्लोकः श्लोकमध्येपकराशौ वित्यादिरवींद्वोरंतरासवइत्यंतं श्लोकेन केचिन्मंदमतिना समयोसकृदेव साध्यादिति शिष्यधीवृध्यर्थं त्रो
क्तमुत्प्रेक्षंमन्येनायुक्तमपि युक्तियुक्तं मत्वा निक्षिप्तं॰ कथमन्यथा भगवतः सर्वज्ञस्य शुद्धिसावनघटीज्ञानानंतरमसकृत्साध
नोक्तिः संगच्छते॰ किं च एकराशौ॰ रवींद्वोश्च कार्या विवरलिप्तिका इत्यर्थस्यात्र प्रभाधिकारे भोग्यास्तूनकस्येत्यादिश्लोकाग्रे यं
क्षिप्तत्वेनात्रानपेक्षितत्वं॰ प्राग्वल्लग्नांतरासवइत्यनेनैवात्र तासिद्धेरिति॰ अथ नाक्षत्राभ्युपगमे तु चंद्रस्य सावनघटीभिश्चाल
नं स्वास्तकालिकसिध्यर्थमावश्यकं॰ न तु सूर्यस्य॰ प्रयोजनाभावात्॥ न हि चंद्रास्तकालसाधितसषड्भसूर्यः सूर्यास्तकालि
कलग्नं येन सूर्यचालनं युक्तं॰ अपि च॰ एकस्य चंद्रस्य चालनेन पुनरेकवारेणैव सूक्ष्मनाक्षत्रकालिकसिद्धौ द्वयोश्चालनोक्त्या
नाक्षत्रस्यासकृत्क्रियानयनमतत्त्वं गौरवं सर्वज्ञेन कथमुक्तं॰ असकृत्साधनेन सूक्ष्मनाक्षत्रसिद्धौ युक्त्याभावश्च॰ अतएव
ज्ञातुं यथाभिमतास्तग्रहस्य न कालखेटोदयलग्नलग्नं॰ साध्ये तयोरंतरनाडिकाया स्ता सावनास्युर्द्युगताग्रहस्येतिभा
स्कराचार्योक्तं संगच्छते इति तत्त्वं॥ २॥ ॥अथोदयास्तसाधनमाह॥ भगणार्धं रवेर्दत्वा कार्यास्ताद्विवरासवः॥ तैः प्राणैः कृ
ष्णपक्षे तु शीतांशुरुदयं व्रजेति॰ कृष्णपक्षे भगणार्धं षड्राशीन्॰ सूर्यस्य दत्वा॰ संयोज्य॰ तु कारात् चंद्रस्यादत्त्वेत्यर्थः॥ तद्वि
वरासवः तयोः॥ दृक्कर्मसंस्कृतचंद्रसषड्भसूर्ययोरंतरासवः प्रागुक्तप्रकारेण साध्याः॥ तैः साधितैरसुभिः॥ चंद्रः सूर्यास्तानंत
रं॰ उदयं गच्छेत्॥ अत्रोपपत्तिः सूर्यास्तकाले सषड्भार्कस्य लग्नत्वात्सूर्ये षड्राशियोजनं॰ उदयसाधनार्थं प्राग्ग्रहस्यापेक्षितत्वा
च्चंद्रो दृक्कर्मसंस्कृतो यथास्थितो न षड्राशियुक्तः॥ तद्विवरासुभिश्चंद्रस्य सूर्यास्तानंतरमुदयः सावनैः॥ तच्चालितचंद्रात्
सूर्यास्तकालिकषड्भार्काच्च विवरासवो नाक्षत्रा इति॰ शृंगोन्नतिसाधनार्थं दृश्यकाले सूर्यचंद्रौ साध्याविति ज्ञापनार्थं चंद्रस्य
नित्योदयास्तावुक्तावन्येषां ग्रहनक्षत्रादीनां प्रजनाभावादनुक्तौ चंद्रोपलक्षणादुक्तौ वा तत्र शुक्लकृष्णपक्षविवेको नेति ध्ये
यं॥ ३॥ ॥अथ प्रकृतं विवक्षुः प्रथमं तदुपयुक्तभुजकोटिकर्णात्मकं क्षेत्रं श्लोकत्रयेणाह॥ अर्केंद्वोः क्रांतिविश्लेषो दिक्साम्ये युतिरन्यथा॥ तज्ज्येंदुरर्काद्यत्रासौ विज्ञेया दक्षिणोत्तरा॥ ४॥ ॥मध्याह्नेंदुप्रभाकर्णसंगुणा यदि सोत्तरा॥ तदर्कघ्ना

भजीवायांशोध्यायोज्यावदक्षिणा ॥ ५ ॥ ॥ शेषंलंबज्ययाभक्तं लब्धौबाहुः स्वदिङ्मुखः ॥ कोटिः शंकुस्तयोर्वर्गयुतेर्मूलंश्रुति
र्भवेदिति · सूर्यचंद्रयोः स्पष्टक्रांत्योर्दिगैक्येंतरं · अन्यथा · दिग्भेदेयोगः ॥ अत्रक्रांतिशब्दः ॥ क्रांतिज्यापरोज्ञेयः ॥ उपपत्त्यवि
रोधेनां ॥ तज्ज्या · सावासौज्याच ॥ संस्कारसिध्यांकमिताज्येत्यर्थः ॥ अर्कात्चंद्रौ यत्रयस्यांदिशिनादृक्षादक्षिणोत्तरावासौज्या
ज्ञेया · एकरविक्रांतितश्चंद्रक्रांतेरधिकत्वेस्त्वांचंद्रस्य क्रांतिदिकत्वेनज्याक्रांतिदिक · ऊनत्वेर्कक्रांतिदिग्विपरीतादिकत्व
वेनक्रांतिभिन्नादिक ॥ भिन्नादिशिचंद्रक्रांतिदिग्ज्याज्ञेयेत्यर्थः ॥ साज्या · मध्याह्नेंदुप्रभाकर्णसंगुणा · यत्कालेचंद्रः शृंगो
न्नत्यर्थंसाधितस्तत्कालेमध्याह्नीयाकर्णवछायाकर्णचंद्रस्यसाध्यः ॥ सत्वक्षांशचंद्रस्पष्टक्रांत्योरुत्तरदिशिवि[illegible]योगोद
क्षिणदिशियोगस्तद्दूननवत्यंशज्ययाभक्ताद्वादशगुणितत्रिज्येति · उपपत्त्यनुरोधेनतुक्रांत्योरुत्तरदिशिवियोगोदक्षिण
दिशियोगस्तद्दूननवत्यंमध्याह्नःपर्दतत्कालपरं ॥ यत्कालेचंद्रस्तत्कालेचंद्रस्यद्युगतंदिनशेषंवाप्रसाध्यत्रिप्रश्नाधिका
रविधिनाशंकुप्रसाध्यछायाकर्णःसाध्यः ॥ अक्षः अहोरात्रस्यमध्यंसूर्यास्तात्कालिकश्चंद्रस्यछायाकर्णोवा ॥ अयमेव
भगवदभिप्रेतः ॥ कथमन्यथाचंद्रस्यशृंगोन्नतौदृक्कर्मद्वयसंस्कारःशृंगोन्नतौशशांकस्येतिप्रागुक्तःसंगछेत · दिनाध्यो
तिरिक्तछायासाधनार्थमेवदृक्कर्मणोरुपयोगादन्यत्रशृंगोन्नतिगणितेउपयोगाभावात् ॥ स्पष्टक्रांत्येवछायाकर्णसि
ध्येः ॥ अत्रापिस्लोकप्रवार्धोक्तमेवाक्षदृक्कर्मसंस्कार्यं · तेनछायाकर्णनगुणितेत्यार्थः साताद्दशाज्या · यद्युत्तरातदाद्द
दशगुणितायामक्षज्यायां · शोध्याः अंतरिता · तेनद्वादशगुणिताक्षज्याधिकातादृशीज्यातदापिविपरीतशोधनेन
क्षतिः यदिदक्षिणातदातस्यामेवयुक्ताकार्या · वोव्यवस्थार्थेकः ॥ शेषंसंस्कारजं · सदेशलंबज्ययाभक्तं · फलंभुजः प्रा
प्तः स्वदिङ्मुखः स्वशब्देनसंस्कारः ॥ तस्यदिक ॥ तस्यामुखअग्रंयस्यासौसंस्कारदिकइत्यर्थः ॥ भुजस्यकोटिकर्णसापेक्ष
त्वातावाहकोटिरिति · शंकुर्द्वादशांगुलाः कोटिः तयोर्भुजकोट्योर्वर्गयोर्योगात्पदंकर्णः स्यात् ॥ अत्रोपपत्तिः स्वाग्रा
स्तशंकुतलयोः समभिन्नदिक्त्वे · योगांतरंभवतिदोश्चंद्रोछोस्तुल्यांशयोविचरमन्यादिशोस्तुयोगः स्पष्टोभुजोभवति श्री॰
७४

259
1941

चंद्रभुजांशइंद्रोः श्रुत्थंभुजेरविभुजाद्विपरीतदिक्कइतिस्पष्टभुजसाधनंभास्कराचार्येणसिद्धांतशिरोमणावुक्तंतदुपपत्तिस्तुतट्टिकायांव्यक्ता
अनयोरीत्याभुजसाधनार्थंक्रांतिज्ययोरग्रेसाध्येलंबज्याकोटौत्रिज्याकर्णस्तदाक्रांतिज्याकोटौकः कर्णइत्यनुपातेनतत्स्वरूपंतत्प्रत्येकं
सूर्यचंद्रयोः ॥ सूर्यक्रांतिज्यात्रिज्यागुणालंबज्याभक्तासूर्यक्रांतिज्यात्रिज्या · चंद्रस्पष्टक्रांतिज्यात्रिज्यागुणालंबज्याभक्ता ॥ चं · क्रांतिज्या ·
त्रि · अनयोः स्वस्वशंकुतलसंस्कार्यं · तत्रशृंगोन्न (लं ·) यर्थंसूर्येणभगवतासूर्योदयास्तात्कालिकगणितस्यैवाभ्यु (ऊ॰) पगमात्
त्रसूर्यशंकोरभावात्शंकुतलाभावात्सूर्याग्रैवसूर्यभुजः सिद्धः ॥ चंद्रस्यतुतदाशंकोः सद्भावाच्छंकुतलमुत्पद्यतेतत्तुलंबज्याको
टावक्षज्याभुजस्तदाशंकुकोटौकोभुजइत्यनुपातेनतात्कालिकचंद्रोन्नतनतकालसाधितत्रिप्रश्नाधिकारोक्तचंद्रमहाशंकुगुणि
ताक्षज्यालंबज्याभक्तेतिदक्षिणमेवशंकुतलस्वरूपं (अक्षज्यां · चं · शं ·) इदंचंद्रदक्षिणाग्रायांयोज्यंचंद्रस्यदक्षिणोभुजः ॥ चं
द्रोत्तराग्रायांहीनंचंद्रस्योत्तरोभुजः ॥ चंद्रोत्तराग्रयाहीनमिदं (लं ·) चंद्रस्यदक्षिणोभुजः ॥ यथादक्षिणोभुजः (चक्रांज्या · त्रि · अक्षज्या ·
चं · शं · लं ·) (चाचक्रांज्या · त्रि · अक्षज्या · चं · शं · लं ·) उत्तरोभुजः चक्रांज्या · त्रि · अज्योक्षं · चं · शं · लं · अयंचंद्रभुजः सूर्याग्रयैकदि
श्यांतरितोभिन्नदिशियुक्तः स्पष्टः शृंगोन्नत्युपयुक्तोभुजः यथासूर्यस्य · दक्षिणगोले · सूक्रांज्या · त्रि · अक्षज्या · चं · शं · लं · सू
क्रांज्या · त्रि · चंक्रांज्य · त्रि १ अज्योक्षं · चंशं · इदंभुजद्वयंस्पष्टोभुजोभवति · चंद्रभुजांशइत्युक्तेदक्षिणं · सूर्यभु · ज्यस्यन्यूनत्वे
शोध्यत्वात् · सूर्यभुजस्याधिकेत्वेतु (सूक्रांज्या · त्रि · चक्रांज्या · त्रि ·) (अक्षज्या · चं · शं · लं ·) (सूक्रांज्या · त्रि · चक्रां · ज्या · त्रि · अक्षज्या · चं · शं · लं)
इदंभुजद्वयमुत्तरं · इंदोः श्रुत्थंभुजेरविभुजाद्विपरीतदिक्कइत्युक्तेः योगेतत्रैरोभुजः (सूक्रांज्या · त्रि · चक्रांज्या · त्रि · अक्षज्या · चं · शं · लं ·)
सूर्योत्तरगोलेपिसूक्रांज्या · त्रि · अक्षज्या · चं · शं · लं · सूक्रांज्या · त्रि · चक्रांज्या · (त्रि · अक्षज्या · चं · शं · लं ·) इदंभुजद्वयंदक्षिणं · अतेर
तसूर्यभुजस्यन्यूनत्वेउत्तरभुजः (सूक्रांज्या · त्रि · चक्रांज्या · त्रि · अक्षज्या · चं · शं · लं ·) सूर्यभुजस्याधिकत्वेतुसूक्रांज्या · त्रि · (त्रिचक्रां
ज्या त्रि · अक्षज्या · चं · शं · लं ·) दक्षिणोवंभुजः इंदोः श्रुत्थंभुजेइत्युक्तत्वात् · अत्रनवस्रूपक्षेपुप्रथमप्रक्षेसूर्यचंद्रक्रांतिज्ययोरेक
दिशियोरंतरंत्रिज्यागुणितं · तत्सूर्यक्रांतिसंबंधत्वेनोक्षज्यंदुशंकुघातोलंबज्याभक्तइति · चंद्रक्रांतिसंबंधत्वेनयुतस्तत्पा

सि०टी०
७५

वेनो बल्याभक इति॰ चंद्रक्रांतिसंबंधवेनेनयुतस्तनघातोत्यं बल्याभक इति सिद्धं॰ तत्राभांशानां दक्षिणत्वेनैकदिग्योगार्थं चंद्रयो
घ॥ दक्षिणत्वं स्पष्टचंद्रयोर्नत्वं भिन्नदिग्विवियोगार्थं कल्पितं॥ युक्तं चैतत्॰ सूर्यक्रांत्यधिकत्वे सत्यांशुद्वंद्वस्योत्तरत्वात्॥ शृंगोन्नतौ
चंद्रस्यैव प्राधान्याच्च॥ द्वितीयपक्षे क्रांतिज्ययोर्भिन्नदिशोर्योगेन नाडीगैनतद्गतमत्वं कृत्वा लंबज्याभक इत्यत्रापि योगस्या
ग्रेतरार्धमुत्तरादिकं चंद्रक्रांतेरुत्तरत्वेन दक्षिणत्वेन सूर्यचंद्रस्य समतराग्रमुत्तरत्वाच्च॥ तृतीयपक्षे क्रांतिज्ययोरेकदिशयोरंतरे सूर्यसं
बंधे एव नाडीगैनत्वद्वयं इति वियोगार्थमंतरस्योत्तरादित्वं॥ द्वयोर्दक्षिणगोलस्थत्वेप्याधिक सूर्यान्यन चंद्रस्योत्तरत्वात्॥ चतु
र्थपक्षे भिन्नदिशयोः क्रांतिज्ययोर्योगेनाडीगैनद्वयं इति वियोगार्थं योगस्योत्तरादिकत्वात्॥ पंचपक्षे तु चतुर्थपक्षोक्तं
तुल्यत्वात्॥ षष्ठपक्षे क्रांतिज्ययोर्भिन्नदिशोर्योगो दक्षिणस्तद्वधियोगार्थं॥ चंद्रस्य दक्षिणगोलस्थत्वात्॰ सप्तमपक्षे क्रां
तिज्ययोरेकदिशयोरंतरं स्पष्टसंबंधं तदानद्वयं ज्यामित्यंतरं दक्षिणद्वयोरुत्तरगोलस्थत्वेपि चंद्रस्यान्यूनत्वेनाकोर्दक्षिणस्थ
त्वात्॥ अधिकत्वे तत्तरं तद्वधे हीनमिति॥ अष्टपक्षे क्रांतिज्ययोरेकदिशयोरंतरे चंद्रसंबंधे तु तंत्र तद्वयं इनः॥ चंद्रस्याधि
कत्वेनोत्तरस्थत्वात्॥ अस्य पक्षे तु समदिशयोः क्रांतिज्ययोरंतरं स्पष्टसंबंधे तद्वधे ज्यामिति॥ दक्षिण चंद्रस्यान्यूनत्वेन दक्षिणस्था
दित्युपपन्नं॥ दक्षिणं स्वांकोक्तं अत्र केचित् क्रांतिग्रहणेन चापात्मक क्रांतिग्रहीत्वा तत्संस्कारः कृतस्तस्य ज्याकोर्येतित्याख्या
तं॥ तदुपपत्तिविरुद्धं॰ नहि भुजसाधनं चापात्मकक्रांतीप्रयोजकत्वेनोपपन्नं॰ येन व्याख्योक्ता युक्ता॥ नवा क्रांतिज्यायोगवि
योगाभ्यां चापात्मक क्रांतियोगवियोगयोर्ज्यतुल्यत्वेनोक्तं संगतं स्यात्॥ अन्यथा भांशक्रांत्यंशसंस्कारांशज्यां विनापि क्रांतिज्या
भज्ययोः संस्कारेण नतांशज्याया साधनापत्तेरिति दिक्॥ अथायं भुजस्त्रिज्यावृत्ते इत्यतो तिर्यग्वात्कालिकं चंद्रछायाकर्णमि
तवृत्ते स्वेष्टयासाधितास्त्रिज्यावृत्ते यं भुजस्तदा चंद्रछायाकर्णवृत्ते कइत्यनुपातेन क्रांतिज्ययोः संस्कारमितमाद्यखंडं चंद्र
छायाकर्णगुणमिति सिद्धं॥ त्रिज्याभिनप्रथमगुणस्येदानीं तन्त्रत्रिज्याभितहरस्य तुल्यत्वेन द्वयोर्नाशाच्च॰ अथापरखंडं चंद्रशं
कुस्त्र्याघातात्मकं चंद्रछायाकर्णगुणं त्रिज्याभक्तं कार्यं॥ तत्र त्रिज्याद्वादशघातस्य चंद्रशंकुभक्तस्य छायाकर्णत्वाच्छंकुत्रिज्या श्री:
७८

211
1949

मितयोर्गुणहरयोः प्रत्येकं नाशाद्भज्याद्वादशगुणत्वपरं खंडं सिद्धं॰ द्वयोः कदिशियोगो भिन्नदिक्त्वं तगमतिसंस्कालं बल्याभको भुजः
संस्कारादिक सिद्धं॥ शंकुः कोटिरिति॰ चंद्रछायाकर्णवृत्ते भुजसाधनात्तद्वृत्ते कोटिरपि साध्या सा तु नियता द्वादशनियत कोट्यर्थ
मेव भुजश्च चंद्रछायाकर्णवृत्ते साधितः सूर्योदयास्तयोः स्पष्टशंकोरभावात्स्पष्टशंकुसंस्काराभावः॥ तदितरकाले च क्रियया
ननिर्वाहः॥ कोटिभुजयोर्वर्गयोगान्मूलं कर्णइत्युपपन्नं माध्याक्रेत्यादिश्लोकद्वयोक्तं॥ ६॥ ॥ अथ शुक्लानयनमाह॥ सूर्योन
नीतिगोर्लिप्ताः शुक्लं नव शतीध्दृतं॥ चंद्रबिंबांगुलाभ्यस्तं हृतं द्वादशभिः स्फुटं मिति॰ सूर्योनितचंद्रस्य कलाः नवशतभक्ताः फलं शु
क्लं॰ तत्॰ चंद्रग्रहणाधिकारोक्तप्रकारावगतचंद्राबिंबांगुलैर्गुणितं द्वादशभिर्भक्तं फलं स्फुटं शुक्लं कुर्यात्॥ अत्रोपपत्तिः॥ दर्शांते
सूर्यचंद्रयोरंतराभावादस्मद्दृश्यार्धे चंद्रगोले सूर्यकिरणप्रतिफलत्वाभावाच्छुक्लाभावः॥ ततो यथा यथा कांत्रं चंद्रः पूर्वतोंतरित
स्तथा तथा चंद्रगोलास्मद्दृश्यार्धे चंद्रपश्चिमभागक्रमेणशुक्लोपचयः॥ एवं षड्भाग्यंतरेण पौर्णिमास्यंते चंद्रगोलास्मद्दृश्यार्धे संपूर्ण
शुक्लं भवति॰ अंतः षड्भाशिकलाभिः स्वरवाष्टदिग्भिर्द्वादशांगुलव्यासं बिंबं शुक्लं तदेष्टेन सूर्योनचंद्रकलागणेन किमित्यनुपाते
प्रमाणफलयोः फलापवर्तनेन प्रमाणस्थानेनवशतमतः सूर्योनितचंद्रस्यकलाः नवशतभक्ताः शुक्लाभिदं द्वादशांगुलव्यासप्रमा
णेन सिद्धमतो द्वादशांगुलप्रमाणेनेदं तदाभिमतचंद्रबिंबांगुलव्यासप्रमाणेन किमित्यनुपातेनोक्तमुपपन्नं॥ अनेन प्रकारेण
त्रिभांतरे चंद्रगोलास्मद्दृश्यार्धे शुक्लं भवतीति सिद्धं॰ भास्कराचार्यैस्तु कक्षाचतुर्थस्तरणेर्हि चंद्रः कर्णांतरातिर्यगिनो यतोस्मा
त्॥ पादोनषड्भाग्यलवांतरेणतो दलं न दृश्यं दलमस्य शुक्लमितिश्रृंगोन्नतिवासनायामुक्तं॥ श्रृंगोन्नत्यधिकारे च चंद्रस्य योज
नमयश्रवणेन विभोर्व्यकेंदुदोर्गुणघ्नश्रवणेन भक्ताः॥ तत्कार्मुकेन सहितः॥ खरुक्पक्षेकुक्षेमुनाविराहितः शशभृद्विधे
यइतितद्भिप्रेतस्वेतानयनोपयुक्तश्चंद्रोपि साधितइत्यलं॥ ७॥ ॥ अथ श्लोकचतुष्टयेन श्रृंगोन्नतिपरिलेखमाह॥ दत्वा
र्कसंज्ञितं बिंदुं ततो बाहुः स्वदिङ्मुखं॥ ततः पश्चान्मुखी कोटीं कर्णं कोट्यग्रमध्यगं॥ ८॥ ॥ कोटिकर्णयुताद्बिंदोर्बिंबं ता
त्कालिकं लिखेत्॥ कर्णसूत्रेण दिक्सिद्धिं प्रथमं परिकल्पयेत्॥ ९॥ ॥ शुक्लं कर्णेन तद्बिंबयोगादंतर्मुखं नयेत्॥ शु

कु॰टी॰
७५

कायमान्योनरयोर्मध्यमत्स्योत्पत्तमाधयेत् ॥ १० ॥ ॥ तन्मध्यमत्स्यसंयोगाद्बिंदुर्विस्पृष्टलिखितधनुः ॥ पार्श्वबंधाद्गच्छस्थानादन्यादिनेशस्य
वे ॥ समभ्रमाद्भवीस्पष्टतोदिक्साधनं वा स्वर्णपुरदाक्षिणोत्तरवंशरेखाकायां ॥ तत्रादिक्संपाते ॥ अर्कांमंडितं ॥ अर्कसंज्ञासंज्ञाता
यस्यां स्वेनाद्धमर्कसंज्ञं बिंदुं विद्धं कृत्वा कर्त्तव्यं ॥ ततः बिंदोः सकाशात् ॥ भुजं प्रकसाधितं ॥ स्वादिक्संमुखं ॥ स्वादिशा दक्षिणो
त्तरान्यतरा ॥ तदभिमुखं दत्त्वा भुजांगुलानि गणयित्वा विद्धं कृत्वा ततो भुजाग्रविद्धात् ॥ पश्चान्मुखी पश्चिमदिक्समस्तनाभि
मुखायां कोटिं द्वादशांगुलात्मिकां दत्त्वा कर्णं प्रवंसाधितं कोट्यग्रमध्यगं कोट्यग्रविद्धं मध्यं स्वर्णसंसंज्ञकविद्धं तयो
र्गसंस्पृष्टं ॥ तदंतरालं कर्णांगुलानि दृत्त्वे त्यर्थः ॥ कोटिकर्णरेखासंयोगे मध्यंगकल्पितात्कालिकसूर्यास्तोदयकालिकं चंद्रस्यसा
धितं मंडलं लिखेत् ॥ तत्कालिखितचंद्रबिंबे कर्णसूत्रेण कर्णरेखया प्रथममादौ दिक्साध्यं दिशां निष्पत्तिं परिकल्पयेत् कु
र्यात् चंद्रमंडलं कर्णरेखायांयत्र लग्नं तत्र चंद्रवृत्ते प्रथमं कर्णरेखां स्वमार्गेणाग्राते सा मेचंद्रवृत्तपरिधौ यत्र चंद्ररेखा परभा
गेलग्नातत्र पश्चिमा तन्मध्यास्यापरेखा दक्षिणोत्तरा चंद्रवृत्ते यत्र लग्ना तत्र दक्षिणोत्तरेति कल्पितार्थः ॥ शुक्लं प्रवंसाधितं कर्णतः
कर्णरेखामार्गेण तद्विंबयोगात् कर्णरेखा चंद्रमंडलपरिधौ संपादनीयात् ॥ अंतर्मुखं चंद्रवृत्तकेंद्राभिमुखं नयेत् शुक्ला
ग्रविद्धं कुर्यात् ॥ चंद्रवृत्तांतः कर्णरेखायां पश्चिमाविद्धात् शुक्लांगुलानि गणयित्वा विद्धं कुर्यादित्यर्थः ॥ तन्मध्यमत्स्ययोगात् ॥ शुक्ल्या
म्योत्तरयोः ॥ चंद्रवृत्तांतर्गतशुक्लाग्रविद्धं यत्र च चंद्रवृत्तपरिधौ दक्षिणोत्तरयोश्चिद्धं तयोरित्यर्थः ॥ मध्ये अंतराले मत्स्यो
त्पत्तिं साधयेत् शुक्लाग्रदक्षिणविद्धाभ्यां मत्स्यः शुक्लाग्रोत्तरविद्धाभ्यां मत्स्यश्चेति पूर्वोक्तरीत्या मत्स्यौ कुर्यादित्यर्थः ॥ तन्मध्य
मत्स्ययोगात् ॥ तयोर्मत्स्ययोर्मध्यमत्स्यमुखपुच्छस्पृग्गर्भसूत्रं प्रत्येकं तयोर्यत्र चंद्रमंडलांतस्तद्विदिक्केंद्रा शुक्लाग्रश्च पश्चिमत्वे
पूर्वभागे संयोगः ॥ पूर्वत्वे पश्चिमभागे संयोगः ॥ स्वस्वमार्गेण प्रसारितयोस्तयोः संपातस्तस्मात्कृतात् ॥ बिंदुविस्पृष्ट ॥ शुक्ला
ग्रबिंदुयाम्योत्तरयोश्चिद्धबिंदुरिति बिंदुत्रितयस्पर्शि धनुरेकदेशात्मकं लिखेत् ॥ सूत्रसंपातशुक्लाग्रबिंदुयाम्योत्तरयोर्बिं
ग दुत्रयांगुलव्यासाधिनसंपातस्थानाबिंदुत्रयस्पृक् वृत्तपरिध्येकदेशात्मकं चंद्रमंडलांतश्चापं कुर्यादित्यर्थः ॥ प्राक्पूर्वकपाले ॥ श्री:
७५

लिखितं चंद्रबिंबं यावदकः लिखितचापछेदेन यावद्भागं पश्चिमभागे भवति ॥ तादृशः एवकारस्तद्भिन्नानिरासार्थकः ॥ तस्मिन्दिने शृंगोन्न
तिगणितार्थं यो भवसंध्यासमये ॥ चंद्र आकाशस्थो भवति ॥ अत्रोपपत्तिः ॥ भुजस्तु सूर्याच्चंद्रो यावदंतरेण तद्रूपइति ॥ सर्वस्थानं प्रक
तस्माद्यथादिग्भुजो देयस्तस्माच्छुक्लपक्षे पश्चिमादिकस्तस्य चंद्रस्य शृंगोन्नतिर्भवति सर्वचंद्रयोरूर्ध्वांतरांतरं कोटिर्दत्ता ॥ सूर्यचं
द्रयोरंतरांतर्यत्कर्णइति कोट्यग्रस्यं विद्धं तत्र लेकर्णो दत्तः ॥ कर्णदानं कोटेः सरलत्वसिध्यर्थं तत्र कोटिकर्णयोगे चंद्रावस्थानाच्चंद्र
णं वृत्तं तन्मत्स्यवेनालिखितं तन्मार्गेण शुक्लदानां चंद्रबिंबे कर्णसूत्रानुरूपा पूर्वापरातदनुरूपादाक्षिणोत्तरा च शुक्लानि चंद्रपश्चिम
मार्गकाभिमुख्यत्वेन दीयत्वात्पश्चिमस्थाना कर्णरेखायां चंद्रवृत्तांतः श्वेतं दत्तं ॥ तत्र चंद्रमंडले याम्योत्तरविद्धावधिकं वेनैकदेश
रूपं धनुः शुक्लाग्रबिंदुस्पर्श चंद्राकृतिदर्शनार्थं कार्यं ॥ अतो बिंदुत्रयस्पृग्वृत्तस्य केंद्र ज्ञानार्थं प्राग्युक्तरीत्या बिंदुत्रयेष्योर्मत्स्यौ
प्रसाध्यतन्मत्स्ययुतिः केंद्रं तस्माच्चापं तथैव भवतीति चंद्राकृतिः प्रत्यक्षा ॥ ११ ॥ ॥ ननु यदर्थमयमुद्योगस्तस्याः शृंगोन्नते
र्ज्ञानं नीकमत आह ॥ कोट्यादिक्साधनात्तिर्यक्सूत्रांतेशृंगमुन्नतं ॥ दर्शयेदुत्तरां कोटिं कृत्वा चंद्रस्य साकृतिरिति ॥ कोट्याः
कोटिरेखायाः चंद्रवृत्ते कर्णरेखा वा दिक्साधनात्पश्चिमे शुक्लधनुषः कोटिमध्यभागात्मकामुन्नतामूर्ध्वां कृत्वा दृष्ट्वा तिर्यक्सूत्रां
ते दक्षिणोत्तररेखायाः ॥ अंते अवसाने ॥ उन्नतमूर्ध्वं शृंगं दर्शयेत् सा परिलेखसिध्या आकृतिः ॥ स्वरूपं चंद्रस्य आकाश
स्थचंद्रस्य भवति परिलेखसिद्धरूपमाकाशस्थचंद्रप्रत्यक्षमित्यर्थः ॥ अत्रोपपत्तिः ॥ अथा चंद्रवृत्ते कर्णरेखायाश्चंद्रादिशस्तथा को
टिरेखया चंद्रवृत्ते सर्वादिशस्तयोरंतरं भुजश्चंद्रवृत्तपरिणतः ॥ अथ चंद्रदक्षिणोत्तरयोर्धनुः कोट्योः सत्त्वत्वात्सर्वदक्षिणोत्त
राभ्यां कोटिरूपशृंगं नतोन्नतं भवतस्तत्र भुजदिक्शृंगं नतं तदितरदिक्शृंगमुन्नतं ॥ अथैतदेव भास्कराचार्यैरुक्तं स्यात्तुंगशृंगं वल
नात्पादिकरूपमिति ॥ १२ ॥ ॥ ननु सूर्येण चंद्रस्य षड्भाधिकत्वे उक्तप्रकारेण चंद्रबिंबाभ्याधिकं शुक्लमापातितत्कथमुक्तं व्या
घातादित्यतस्तदुत्तरं विशेषं वाह ॥ कृष्णपक्षे पुनस्त्वर्यं विद्धाध्यं दोस्तथा सितं ॥ दद्याद्वामं भुजं तत्र पश्चिमं मंडलं विधोरिति ॥ कृष्ण
पक्षे षड्भाशिभिः सहितमर्कं चंद्राद्विशोध्य तथा लिप्तान्त्रयात् भक्ताद्वितिपूर्वप्रकारेण असितं श्याममानेयं तथा च पूर्वोक्तंक

263
1941

सू०टी०
७७

कान्यनंतु कृष्णपक्ष एव चंद्रशृंगोन्नत्यभिज्ञानार्थं कृष्णपक्षे तु शृंगोन्नतिर्ह्रासान कृष्णतारंभे ॥ कृष्णानयनं युक्तं न शुक्लानयनमत एव दर्शांतमास
स्य शुक्लकलैवोपपद्यत इति भावः ॥ अथ कृष्णपरिलेखार्थं पूर्वोक्ते विशेषमाह ॥ इथादिति ॥ तत्र कृष्णपरिलेखविषये ॥ वामं विपरीतं भुजं
प्राग्युक्तं दद्यात् अर्कबिंबात्पूर्वं भुजं दक्षिणतो दक्षिणं भुजं उत्तरतो गणकोदद्यात् ॥ चंद्रस्य मंडलं पश्चिमं दर्शयेत् ॥ यथा शुक्लपक्षे चंद्रमं
डलस्य पश्चिमभागे शृंगोन्नतं तथा कृष्णे चंद्रमंडलस्य पश्चिमविभागे कलाभिर्दर्शयेदित्यर्थः ॥ अत्रोपपत्तिः ॥ कृष्णपक्षारंभे सूर्यचंद्रयोः
षड्राश्यंतरं ॥ ततः षड्राशिपर्यंतं कलाभिर्भ्रमति ॥ षड्राश्यंतरस्यैव वर्जितं चंद्रात्सर्वप्रकारेण कृष्णानयनं युक्तं ॥ अथ शुक्लशृंगं यत्र
नतं तत्र कृष्णशृंगमुन्नतं यत्र चोन्नतं ॥ तत्र नतमतः कृष्णपरिलेखार्थं भुजो विपरीतो देयः ॥ यद्यपि शुक्लं पश्चिमभागादेवाभिवर्धमतः कर्णरे
खायां चंद्रबिंबांतः पश्चिमस्थानादेयं ॥ ततः प्राग्वत् कृष्णशृंगोन्नतिरिति ॥ १२ ॥ ॥ अथाग्रिमग्रंथस्यासंगतित्वनिरासार्थमधि
कारसमाप्तिं फक्किकयाह ॥ शृंगोन्नत्यधिकार इति ॥ चंद्रोदयास्तयोः शृंगोन्नतिविषयत्वेनोक्तत्वादस्यामेवांतर्भावः ॥ नस्वतंत्राधि
कारत्वमन्यथा ग्रहोदयास्ताधिकारं तदुक्तत्वापत्तेः ॥ एतेन चंद्रोदयास्तपौर्णिमास्याधिकारत्वं पर्वतोक्तं निरस्तं ॥ न संज्ञानां प्रमाणा
भावादन्यथाभावास्याधिकारत्वस्यैव कवचनापत्तेरिति ध्येयं ॥ ॥ रंगनाथेन रचिते सूर्यसिद्धांतटिप्पणे ॥ शृंगोन्नत्यधिकारोयं
पूर्णो गूढप्रकाशके ॥ १० ॥ ॥ इति श्रीसकलगणकसार्वभौमबल्लालदैवज्ञात्मजरंगनाथगणकविरचिते गूढार्थप्रकाशके
शृंगोन्नत्यधिकारः पूर्णः ॥ ॥ अथ पाताध्यायो व्याख्यायते ॥ ॥ तत्र भेदद्वयात्मकपातस्य संभवं विवक्षुः प्रथमं वैधृतसंज्ञ
पातस्य संभवमाह ॥ एकायनगतौ स्यातां सूर्याचंद्रमसौ यदा ॥ तद्युतौ मंडले क्रांत्योस्तुल्यत्वे वैधृताभिध इति ॥ सूर्यचंद्रौ ॥ सू०
स्यादितिस्युक्तपर्यायः ॥ एकायनगतौ ॥ अभिन्नदक्षिणोत्तरान्यतरायनस्थौ भवतस्तत्र यदायस्मिन्काले ॥ तद्युतौ ॥ सूर्यचंद्रयोर्भाद्यो
योगः ॥ मंडले ॥ द्वादशराशिमिते सति तदा तयोः क्रांत्योः समत्वे ॥ महापातरूपवैधृतसंज्ञः ॥ पातो भवति ॥ १ ॥ ॥ अथ व्यतीपात
संज्ञपातस्य संभवमाह ॥ विपरीतायनगतौ चंद्रार्कौ क्रांतिलिप्तिकाः ॥ समास्तदा व्यतीपातो भगणार्धे तयोर्युताविति ॥ चंद्रार्कौ ॥ वि
परीतायनगतौ ॥ भिन्नायनस्थौ भवतस्तत्र यदा तयोः सूर्यचंद्रयोर्भाद्यो योगे ॥ भगणार्धे ॥ राशिषट्के सति ॥ तयोः क्रांतिकलास्तुल्याः श्री:
७७

भवंति ॥ तदा तस्मिन्काले व्यतीपातसंज्ञकः पातो भवति ॥ अत्रोपपत्तिः ॥ समक्रांतिकालो महापातकालः ॥ तत्र स्पष्टक्रांत्योरतिबिलक्षण्येणो
पचयापचययोर्नियमाभावात्समकालो दुर्लक्ष्य इति मध्यमक्रांत्योः समत्वकालात्पूर्वमपरत्र वा शरवशेन शरसंस्कृतक्रांतिसमत्वं
वर्ततीति निश्चित्य वस्तुभूततत्कालज्ञानार्थं प्रथमं तदासन्नकालस्य मध्यमक्रांतितुल्यस्य ज्ञानमावश्यकं ॥ तत्तु सूर्यचंद्रयोः क्रांतिसमत्वं
तत्तुल्यत्वे संभवति ॥ भुजोत्पन्नत्वात् ॥ भुजसमत्वं तु सूर्यचंद्रयोः षड्राशिमितयोगे द्वादशराशिमितयोगे वा षड्राशिमितांतरे तराभावे
वा कुत एवमिति चेच्छृणु तत्रांतराभावे तद्वयोस्तुल्यत्वेन भुजसाम्यविवादाभावः ॥ एवं षड्रांतरेपि तयोर्विषमपदस्थयोः समपदस्थयोर्वा क्र
मेणपरगतैष्ययोस्तुल्ययोर्भुजत्वमित्यविवादः ॥ षड्राशिद्वादशराशियोगे तु तयोर्विषमसमपदस्थत्वात्क्रमेण तुल्यगतैष्यत्वेन तुल्यभुज
त्वं ॥ भगोलायनसंधिस्थयोस्तु क्रांतिपरमाभावत्वेऽपि तत्रापि तदंतरयोगयोः षड्द्वादशराश्योर्यथायोग्यं सत्वात्क्रांतिसाम्यं जात
त्वं ॥ अत एकायनस्थयोर्भिन्नगोलस्थयोर्द्वादशराशियोगे एकगोलायनस्थयोरंतराभावे क्रांतिसाम्यं एवं भिन्नायनस्थयोरेकगोल
स्थयोः षड्राशियोगे गोलभेदस्थयोः षड्राश्यंतरे क्रांतिसाम्यमिति युतावित्युपलक्षणादंतरेऽप्यपि ज्ञेयं ॥ ननु तद्युतौ मंडले भगणार्धे
तयोर्युताविति युक्तेन ॥ क्रमेण गोलभेदैकयोरंतरनिरासार्थं क्वापि क्रांतिसाम्यत्वेनानिवार्यत्वात् ॥ अत्रैकायनगताविति
विपरीतायनगताविति च स्वरूपोक्तिरनावश्यकेति ध्येयं ॥ वस्तुतस्तु सूर्यचंद्रयोर्द्वादशमितयोगांतरे वा वैधृताख्यं क्रांतिसाम्यं ॥
षड्राशिमितेन तयोर्योगांतरे वा व्यतीपाताख्यं क्रांतिसाम्यमिति तात्पर्यं ॥ किरतः अग्रेभास्करेद्योरित्याद्युक्तं युक्तमिति तत्वं ॥ २ ॥
ननु क्रांत्योः साम्ये कथं पातो भवतीत्यत आह ॥ तुल्यांशुजालसंपर्कात्तयोस्तु प्रवहाहतः ॥ तद्दृक्क्रोधभवो वह्निर्लोकाभावाय जा
यते इति तयोः सूर्यचंद्रयोस्तु कारात्क्रांतिसाम्यकालिकयोः ॥ तुल्यांशुजालसंपर्कात् ॥ समकिरणानां जालं समूहः ॥ तस्यान्याभि
मुखयोः संपर्कात् ॥ एकीभावापन्नात् ॥ तद्दृक्क्रोधभवः सूर्यचंद्रयोरन्योन्याभिमुखयोः दृक्क्रोधः बिंबकेंद्रयोर्दृग्रूपयोः ॥ क्रो
धः परस्पराभिमुख्येन दीप्त्याधिक्यं तदुत्पन्नोग्निः ॥ प्रवहाहतः प्रवहो वायुः प्रज्वलितः ॥ लोकाभावाय जनानामशुभफलाय जाय
ते ॥ ३ ॥ ॥ अथायं वह्निर्व्यतीपाताख्यो वैधृताख्यो वेत्यत आह ॥ विनाशयति पातोस्मिंल्लोकानासकृद्यतः ॥ व्यतीपातः प्र

265
1941

सू०टी०
७८

सिधांयसंज्ञाभेदेनवैधृतिरिति॥अस्मिन्क्रांतिसाम्यकाले॰प्रसिधः।पूर्वश्लोकोक्तस्वरूपत:पातः॥वह्निरूपत:कारणात्॥असकृत॥
त्वसंभवेनवारंवारं॥लोकानांविनाशपाति॰नाशंकरोति॰अतः॰कारणात्मदैवह्निरूपतीपातसंज्ञः॥अयमेवाग्निः।संज्ञानेदेन॰नामांतरे
णवैधृतिसंज्ञः॥तथाचोभयत्रपातस्योवह्निरूपवर्तीतिभावः॥ ४ ॥ ॥अथतत्स्वरूपमाह॥सकृष्णोदारुणवपुर्लोहिताक्षोमहो
दरः॥सर्वानिष्टकरोरौद्रोभूयोभूयः प्रजायतेइति॰स॰।क्रांतिसाम्यकालोत्पन्नउभयसंज्ञकःपाताख्योग्निः पुरुषः।कृष्णः श्यामः
दारुणवपुः कठिनशरीरः।लोहिताक्षआरक्तनेत्रः।महोदरः स्थूलरः॥अतएवसर्वानिष्टकरः॥सर्वलोकानामशुभकारकः।रौद्रः
क्षयकारकः॰भूयोभूयः अनेकवारं॰प्रजायते॰प्रत्येकंक्रांतिसाम्यकालेउत्पन्नोभवतीत्यर्थः॥ ५ ॥ ॥अथस्पष्टपातकाल
ज्ञानंविवक्षुः प्रथमंतादृशयोः सायनांशयोः क्रांतिसाध्येइत्याह॥भास्करेंद्वोर्भचक्रांतश्चक्रार्धावधिसंस्थयोः॥दृक्तुल्यसाधि
तांशादियुक्तयोःस्वावपक्रमाविति॰सूर्यचंद्रयोः दृक्तुल्यसाधितांशादियुक्तयोः प्राक्तनकंचालितंहीनेछायाकालकारणागते
इत्यादिना दृग्गोचरीभूतंसाधितमंशादिकंतेनसंस्कृतयोरित्यर्थः॥एतेनपूर्वसाधारणोक्तिरपिस्पष्टीकृता॰कांत्यौ॰सायनो
सन्नत्वात्॰भचक्रांतः॰भचक्रंद्वादशराशयस्तन्मध्येसंस्थयोः स्थितयोः यथायोगोराशिषट्कवर्त्तिनोरित्यर्थः॥चक्रार्धावधिसं
स्थयोः॰चक्रार्धंराशिषट्कंतदवधितदंतःसंस्थितयोः यथायोगंराशिषट्कंतयोरित्यर्थः॥स्वौ॰स्वकीयौ॰अपक्रमौसाध्यौस्पष्टं
स्पष्टक्रांतिःसाध्या॰चंद्रस्यविक्षेपसंस्कृताक्रांतिःसाध्येत्यर्थः॥ ६ ॥ ॥अथसाधितक्रांतिभ्यांस्वकालात्स्पष्टपातक
लस्यगतैष्यत्वंविज्ञेयंश्लोकाभ्यामाह॥अथौजपदगस्येंदोःक्रांतिर्विक्षेपसंस्कृता॥यदिस्यादधिकाभानोःक्रांतेःपातोगतस्त
था॥ ७ ॥ ॥ऊनाचेत्स्यात्तदाभावीवामंयुग्मपदस्यच॥पदान्यत्वंविधोःक्रांतिविक्षेपाश्चेद्विशुध्यतीति॥अथसूर्यचंद्रयोः
क्रांतिसाधनानंतरं॥चंद्रस्यविषमपदस्थस्यविक्षेपसंस्कृताक्रांतिःस्पष्टक्रांतिरित्यर्थःयदि॰यदि॰सूर्यस्यविषमसमान्य
तरपदस्थस्यसाधितक्रांतेः सकाशादधिकास्यात्तदा॰तर्हि॰पातःस्पष्टक्रांतिसाम्यात्मकः॥गतसाधितक्रांतिकालात्पूर्वकाले श्रौ: ७८
जातइत्यर्थः॰यद्यहिंसूर्यक्रांतेविषमपदस्थचंद्रस्पष्टक्रांतिन्यूनाभवतितदातर्हि॰स्पष्टक्रांतिसाम्यरूपपातःभावी॰साधित

267
1941

क्रांतिकालादुत्तरकालेभवतीत्यर्थः॥ननुविषमपदचंद्रेनचतितदागतैष्यत्वज्ञानंकथंस्यादतआहवाममिति॰युग्मपदस्य॰समपदस्थ
चंद्रस्येत्यर्थः॰चकारात्स्पष्टक्रांतिःसूर्यक्रांतेःसकाशादधिकोनावास्यात्तर्हीत्यर्थः।।वामंउक्तगतैष्यक्रमेणवैपरीत्यं॰एवमेष्यगत
त्वंपातस्यभवतीत्यर्थः॥अथचंद्रस्यविशेषमाह॥पदान्यत्वमिति॰चंद्रस्यस्पष्टक्रांतौक्रियमाणायांचेद्यदि॰चंद्रस्यविक्षेपासंस्कृतकें
वलक्रांतिःविक्षिपाच्छिन्नादिक्कात्॥विशुध्यति॰हीनाभवति॥क्रांतिवर्जितविक्षेपरूपास्पष्टक्रांतिर्यदिस्यात्तदेत्यर्थः॥पदान्य
त्वं॰राश्यादिचंद्राधिष्ठितपदभिन्नपदस्थत्वंचंद्रस्यज्ञेयं॥सायनराश्यादिनासमपदस्थस्यचंद्रस्यविषमपदस्थत्वं॥राश्यादिना
विषमपदस्थस्यचंद्रस्यसमपदस्थत्वं॰तत्पदसंबंधात्स्पष्टाक्रांतिर्ज्ञेयेत्यर्थः॥अत्रोपपत्तिः॥विषमपदेक्रांतिरुपचितासमपदे
पचितातःसूर्यक्रांतिविषमपदस्थेंदुक्रांतिराधिक्यादंशकतरामधिकत्वाद्रविक्रांत्युपचयस्याल्पत्वाच्चन्यूनत्वाद्रविक्रांत्याचंद्रक्रां
तेःसमत्वमग्रिमकालेनभवत्यतःपूर्वकालेचंद्रक्रांतेर्न्यूनत्वाद्रविक्रांत्युपचयस्याल्पत्वाद्गतक्रांतिसाम्यंजातमित्यनुमितं॰एवंस
मपदस्थेंदुक्रांतिःसूर्यक्रांतेर्न्यूनातदाग्रेसुतरांन्यूनत्वात्साम्याभावःपूर्वंत्वधिकत्वात्समत्वंजातमितिज्ञातं॥यदातुसूर्य
क्रांतेर्विषमपदस्थेंदुक्रांतिरूनातदाग्रेऽधिकत्वेनतत्क्रांतिसाम्यंभवति॰पूर्वंतन्न्यूनत्वेनतदभावात्॥एवंसूर्यक्रांतेःसमपदस्थें
दुक्रांतिरधिकातदाग्रेन्यूनत्वेनतत्साम्यंभवतिअतएवतत्तुल्यत्वेवर्त्तमानइति॰अत्रचंद्रस्यविक्षेपवृत्तेविषुवद्वृत्तंविषुवद्वृत्ते
ऽस्मिंश्चतत्रस्पष्टक्रांतेरभावात्गोलसंधिः॥तस्माच्चभांतरविक्षेपवृत्तेयनसंधिः॥स्पष्टक्रांतिस्तदंतरालेउपचितापचितापच
संधिस्थक्रांत्यधिकाःयदाचंद्रक्रांतिमध्यमाशरभिन्नादिक्शराद्ल्पातदांतराच्छोधनेनस्पष्टक्रांतिमध्यमक्रांतिसंबंधपद
भिन्नपदसंबंधाभवति॥अतःपदान्यत्वंविधोःक्रांतिर्विक्षेपाच्चेद्विशुध्यतीतिसम्यगुक्तं॰भास्कराचार्योक्तं॰चक्रेचक्रार्धेवाप्ययनां
शार्कस्यगोलसंधिःस्यात्॥एवंविभेदेनवभेयनसंधिर्वायनभागैस्य॰अयनांशोनितपातादोःकोटिज्येलघुज्यकोछेद्यौ॥तेगुण
सर्वैरेभिर्गुणातेभक्तेरूनेःसूर्यैः॥अयनांशोनितपातेमृगकर्क्यादिस्थितेद्विषड्भैः॥कोटिफलयुताविहीनेवांकुफलंभक्तमापा
द्यैः॰मेषादिस्थगोलायनसंधीभास्करस्योनौ॰तौचंद्रस्यस्यातांतुलादिषड्भस्थितेतस्मिन्युक्तौ॰गोलायनसंध्यंतपदंविधोस्त्रभीमता

सू०टी०
७०

ज्ञेयं भूगोलवदस्पष्टास्पष्टक्रांतिः ॥ खगोलादिकग्रहज्ञानइतिपदज्ञानं ॥ अनेनैवप्रकारेणचंद्रस्यस्पष्टक्रांतिः पदज्ञेयं विक्षेपवत्तसं
बंधत्वात् ॥ नसाधारणपदज्ञानेनस्पष्टक्रांतिः क्रांतिवृत्तसंबंधाभावात् ॥ अन्यथापदज्ञानासंभवापत्तेः ॥ एतदंगीकारेपदान्यत्वमि
त्याद्यभंबयथंमपिभगवतातदुक्तेनेनादर्शपदज्ञापितिमन्यथानदनुक्त्यापत्तेरितिदिक् ॥ ८ ॥ ॥ अथगतैष्यकालानयनार्थं विवक्षुः
प्रथमंस्पष्टक्रांतिसाम्यानयनप्रकारंश्लोकत्रयेणाह ॥ क्रांत्योर्ज्यात्रिज्ययाभक्तेपरक्रांतिज्ययोधृते ॥ तच्चापांतरमर्धंवायोज्यंभावि
निशीतगौ ॥ ९ ॥ ॥ शोध्यंचंद्राद्गतेपातेतत्सूर्यगतिताडितं ॥ चंद्रभुक्त्याहृतंभानौलिप्ताद्यंशशिवत्फलं ॥ १० ॥ ॥
तद्वच्छशांकपातस्यफलंदेयंविपर्ययात् ॥ कर्मैतदसकृत्तावद्यावत्क्रांतिसमेनयोरिति ॥ सूर्यचंद्रयोः साधितक्रांतिज्येकार्येतेत्रि
ज्यया गुणिते ॥ परक्रांतिज्यमापरमापकमज्यातुमभक्तंभगुणंदवइतिपूर्वोक्तपरमक्रांतिज्ययेत्यर्थः भक्ते तयोः फलयोर्धनुषी का
र्ये चंद्रस्यपरमज्याधिकंफलंतदोक्तप्रकारेणधनुषासंभवात्त्रिज्यया नंवत्यंशास्तदेष्टज्याकेंद्रत्वनुपातेनधनुः कार्यमथवात्रि
ज्यातोयदधिकंतदुत्क्रमधनुषायुक्ताश्चतुःपंचाशत्कलाधनुः स्यादिति ॥ ध्येयंतयोरंतरं ॥ अर्धं अंतरार्धं वाविकल्पार्थकः
अथवाविषयव्यवस्थार्थकः ॥ सातुयदांतरमल्पंतदांतरंयदातुबहुतरंतदांतरार्धंग्राह्यमिति भाविनि भविष्यत्यातेः ॥
चंद्रेराश्यात्मके ॥ तत्कालात्मकंयुक्तंकार्यं गतेपातेसति चंद्राद्वामंकार्यं चंद्रः स्यात् ॥ सूर्यसाननमाहतद्वदिति ॥ चंद्रसंबंधि
संस्कृतफलं स्पष्टसूर्यगत्यागुणितं स्पष्टचंद्रगत्याभक्तं फलंकलादिकंचंद्रवत् ॥ चंद्रयुतहीनक्रमेणसूर्यंयुतहीनंकार्यं
सूर्यः स्यात् ॥ चंद्रपातसाधनमाह ॥ तद्वदितिचंद्रपातस्यफलं कलादिकं ॥ तद्वत् ॥ चंद्रफलंपातगत्यागुणितं ॥ स्पष्टचंद्रगत्या
भक्तं ॥ विपर्ययात् ॥ व्यत्यासात् ॥ देयंसंस्कार्यं ॥ चंद्रयुतहीनक्रमेणचंद्रपातेहीनयुतंकार्यंचंद्रपातः स्यात् ॥ उक्तंक्रियाति
देशमाहकर्मेति एतत् ॥ उक्तंकर्मगणितक्रियारूपं असकृत् अनेकवारंकार्यं साधितसूर्यात्सूर्यक्रांतिप्रसाध्यसाधित
चंद्रपाताभ्यांचंद्रस्पष्टक्रांतिः ॥ प्रसाध्यताभ्यांक्रांतिभ्यांक्रांत्योर्ज्येइत्यादिनाचापांतरंतदर्धंवातत्क्रांतिभ्यामवगतगतै
ष्यपातलक्षणवशादितिद्वियचंद्रेहीनयुतंतततीयचंद्रः स्यात् ॥ आद्यसूर्यचंद्रगतिभ्यामवगतसूर्यपातफलंद्वितीयसूर्य श्रीः

पातयोः यथोक्तसंस्कृततृतीयसूर्यपातौ एभ्यः सूर्यचंद्रपातेभ्यः सूर्यचंद्रक्रांतिभ्यांसाधिताभ्यांचापांतरंतदर्धंवात्तृतीयचंद्रेतत्क्रांत्यव
गतगैष्यपातवशात्संस्कृतंचतुर्थचंद्रः स्यात् ॥ आद्यसूर्यचंद्रगत्यगैवंतस्यफलसंस्कृतौतृतीयसूर्यपातौचतुर्थसूर्यपातौस्तः एवमे
भ्यः ॥ पंचमाश्चंद्रसूर्यपाताउक्तरीत्यासाध्याइत्युत्तरोत्तरंमुहुः साध्याइत्यर्थः ॥ अवधिमाहतावदिति ॥ यावत्यवधितयोः सूर्य
चंद्रयोः क्रांति स्पष्टक्रांतितुल्येस्तस्तावत्तवधिक्रियोकार्येत्यर्थः ॥ अत्रोपपत्तिः ॥ मध्येक्रांतिसाम्यरूपपातकालिकस्पष्टक्रां
तिभ्यांस्पष्टक्रांतिसाम्यरूपवस्तुभूतपातकालोगतैष्यत्वेनज्ञातोपिविशेषस्तत्कालज्ञानार्थंचंद्रसूर्ययोः क्रांतिसमेस्पष्टेउप
पन्नेकार्येतत्रमध्यपातकालाद्गतैष्यपातवशादभीष्टकालेचंद्रसूर्यपातान्प्रसाध्यतयोः क्रांतिसाध्ये एवंसाधितक्रांत्योर्यदैव
दैवात्तत्सत्वंतदैवस्पष्टपातः अथानियमात्सथमंपूर्वाग्निमकालेचंद्रसाधनार्थंचंद्रस्पष्टांशाः हीनायोज्याश्चेतिनियताभा
गाउक्तप्रकारानीताएवेष्टाः कल्पिताः तथाहि सूर्यक्रांतिज्यातः परमक्रांतिज्ययान्यूनयाचतुर्दशशतमितयात्रिज्यातुल्या
दोर्ज्यातदेष्टक्रांतिज्ययाकेत्यभीष्टदोर्ज्यायाश्चापंसायनसूर्यभुजएव एवंचंद्रस्पष्टक्रांतिज्यातश्चापंसायनसूर्यभुजान्न्यू
नमधिकंभवति ॥ क्रांतिसमत्वाभावात् ॥ यद्यपिन्यूनचतुर्दशशताधिकस्पष्टक्रांतिरुक्तरीत्याभुजज्यायास्त्रिज्याधिकत्वे
नचापातकारणमशक्यंतथापित्रिज्याधिकस्योत्क्रमचापलिप्ताः ॥ खरवाब्धिबाणाधनुरुत्क्रमात्स्यादितिसिद्धांतशिरोम
ण्युक्तवैपरीत्येनत्रिज्यातोयदधिकंतदुत्क्रमचापयुक्ताश्चाश्वतुः पंचाशत्कलाइत्यनेनचापोत्पत्तौनक्षतिः ॥ एतेनचापसं
भवचांक्यासार्धाष्टविंशत्यंशानांज्यापरमक्रांतिज्येतिस्वायनसंधिस्थस्पष्टक्रांतिज्याचेतिवानिरस्तं ग्रंथेतयोः परम
क्रांतिज्यात्वानुक्तेः ॥ स्पष्टक्रांतिसाम्यानंतरमुक्तरीत्या कर्मांतरनिवारणानुपपत्तेश्च ॥ क्रांत्योस्तुल्यत्वेपिहरभेदात्तच्चापांत
रसद्भावेनक्रियाकुंठनासंभवात् ॥ नह्यसकृत्क्रमाणस्वाभीष्टसिध्यनंतरंकर्मांतरंसंभवति ॥ अप्रसिद्धेः ॥ स्वरूपव्याघाता
च्च ॥ तत्रोत्रोपयोरंतरमिष्टांशाश्चंद्रस्यगतैष्यपातवशाद्धनमृताअभीष्टचंद्रोभवति तादृशांशानांबहुत्वेबहुधावर्त्तनैर
भीष्टसिध्यर्थंतदर्धमिष्टांशाइति अथैतेचंद्रस्पष्टांशाइत्येष्यचंद्रगतिप्रमाणेनैतेनदासूर्यपातगतिभ्यांकेइत्यनुपातेन

269
1941

स०टी० ८०

तयोश्चंद्रककालिकत्वाभ्यर्धमिश्रांशाः ॥ एतैस्सर्वस्यसंस्कृताश्चंद्रवदर्भाष्टतोभवति ॥ एवं च सूर्यचंद्रयोः स्पष्टक्रांतीसाध्येत
योरसमत्वेउक्तरीत्याचंद्रस्पष्टांशाएतत्साधितचंद्रेसंस्कार्याः ॥ नप्रथमचंद्रे तत्क्रांतिजत्वाभावात ॥ अन्यथासमक्रांत्यनंतरम
पितयोरिष्टांशाभावेप्रथमचंद्रस्सूर्यपातानांतत्संस्कृतेपविकारात क्रांत्योर्द्वितीयपरिवर्तेक्रांतिसमत्वेनकर्मांतरसंभवात्क्रि
याकुंठनत्वानुपपत्तेः ॥ अव्यवहितपूर्वग्रहयोस्तनैत्वेऽन्यकर्मणएवासिद्धेः ॥ कर्मांतरासंभवाच्च ॥ सूर्यपातयोरिष्टांशास्तुपूर्वचंद्रस
र्यस्पष्टगतिभ्यामेवस्वल्पांतरात्कार्या ॥ अव्यवहितपूर्वकालेस्पष्टगत्यज्ञानात ॥ एवमसकृत्करणेनक्रांत्योः साम्यमुत्तरोत्तरप
रिवर्तांतरंभवत्येवेत्युपपन्नंक्रांत्योर्यदीत्यादिश्लोकत्रयं ॥ ११ ॥ ॥ अथक्रांतिसाम्यंपातइतिस्पष्टंकथयंस्तत्कालज्ञाना
र्थंसाधितक्रांतिसाम्यसंबंधिचंद्रासन्नार्धरात्रात्पातकालस्यगतगम्यत्वमाह ॥ क्रांत्योः समत्वेपातोथप्रक्षिप्तांशोनितेवि
धौ ॥ हीनेर्धरात्रिकात्यातोभावीतात्कालिकेइतिचसूर्यचंद्रयोः स्पष्टक्रांत्योसाम्ये स्पष्टः पातः स्यात ॥ अथानंतरं ॥ स्पष्ट
पातसंबंधीसाधितचंद्रः पूर्वानुसंधाननापाततोयदिभवतितदासंधेनारात्रकालेस्पष्टचंद्रोमध्यस्पष्टाधिकारोक्तप्रका
रेणसाध्यः ॥ तस्मादर्धरात्रकालिकाच्चंद्रात ॥ प्रक्षिप्तांशोनिते क्रांतिचापांतरेणतर्धेदेनचायुतोनितेचंद्रेस्पष्टक्रांतिसाम्य
संबंधसाधितचंद्रेन्यूनेसति तदर्धरात्रकालात्पातकालोगतः ॥ तात्कालिके क्रांतिसाम्यकालिकसाधितचंद्रे अर्धरा
त्रकालिकचंद्रादधिकेसतितदर्धरात्रकालात्पातकालएष्यइत्यर्थः ॥ अत्रोपपत्तिः ॥ यद्यपिस्पष्टक्रांतिसाम्यसंबंधचंद्र
मध्यक्रांतिसाम्यकालिकचंद्राभ्यांवक्ष्यमाणप्रकारेणपातकालस्यमध्यक्रांतिसाम्यकालाद्गतैष्यघटिज्ञानंभवतीति
निकटार्धरात्रिकचंद्रात्साधनंपुनस्तद्गतैष्यकथनंचगौरवं ॥ अर्धरात्रिकस्पष्टचंद्रसाधनक्रियाधिक्यात्तथापि चंद्रगते
रतिमहत्वेनप्रदक्षिणगत्वेबद्धंतरेणान्यादृश्यत्वाद्बहुकालांतरेबहुकालांतरेनस्पष्टगत्यानीतघटात्मकस्यानिश्चल
त्वादासन्नकालेस्वल्पांतरात्त्वासन्नार्धरात्रिकः स्पष्टचंद्रोग्रंथांतरःसंस्पष्टगतिकांक्ष्यमपेक्षितोनस्तस्माच्चंद्रात्स्पष्ट
क्रांतिसाम्यसंबंधचंद्रस्यन्यूनाधिकत्वक्रमेणतदर्धरात्रात्स्पष्टातागतैष्यइतिसम्यगुक्तं अतएवसमीपातिथ्यंतस श्रीः ८०

मीपचालनंविधायतत्कालजंयंवयुत्पन्नंइतिभास्कराचार्योक्तंसंगच्छते ॥ १२ ॥ ॥ अथस्पष्टपातकालज्ञानमाह ॥ क्षिप्तिकृद्दूरात्रे
दैद्रयोर्विवरलिप्तिकाः ॥ षष्टिघ्नाश्चंद्रभुक्त्याप्ताः पातकालस्यनाडिकाइति क्षिप्तिकृतार्धरात्रेंदौः ॥ स्पष्टक्रांतिसाम्यसंबंधसाधि
तासकृत्क्रियानियतचंद्रः ॥ तदासन्नार्धरात्रिकस्पष्टचंद्रयोरुभयोः ॥ अत्रद्वयोरितिपूर्वपदार्थव्यक्तीकरणाय अन्यथैकवचनप्र
मदाद्याकुलतापत्तेः ॥ अंतरकलाः ष[illegible]ष्ट्यागुणिताः ॥ अर्धरात्रिकचंद्रस्पष्टकलात्मकगत्याभक्ताः फलं पातकालस्य अर्धरा
त्राद्गतैष्यस्पष्टक्रांतिसाम्यघटिकाः भवंति अर्धरात्राद्गतैष्यक्रमेणफलघटीभिः पूर्वमुत्तरत्रस्पष्टक्रांतिसाम्यरूपपातः स्यादि
त्यर्थः ॥ अत्रोपपत्तिः ॥ चंद्रस्पष्टगत्याषष्टिसावनघटिकास्तदास्वाभीष्टार्धरात्रकालिकक्रांतिसाम्यकालिकस्पष्टचंद्रयोरंतरकला
भिः काइत्यनुपातेनमुक्तं साधितसूर्यस्यप्रायमीकचंद्रगतिग्रहणेनस्थूलत्वादर्धरात्रिकस्पष्टसूर्याद्युक्तरीत्यायातकालानयनंसूक्ष्म
नोक्तमितिध्येयं ॥ १२ ॥ ॥ अथपातकालस्यस्थित्यर्धानयनमाह ॥ रवींदुमानयोगार्धंषष्ट्यासंगुण्यभाजयेत ॥ तयोर्भुक्त्यंतरे
णाप्तंस्थित्यर्धंनाडिकादितदिति सूर्यचंद्रयोश्चंद्रग्रहणाधिकारोक्तप्रकारेणयोबिंबमानकलेस्वस्वगतिकलोत्पन्नेतयोरैक्यस्यार्धं
षष्ट्यागुणयित्वा सूर्यचंद्रयोः कलात्मकस्पष्टगत्योरंतरेणभजेत ॥ यल्लब्धंतद्घटिकाधिकं स्थित्यर्धं पातकालात्पूर्वमपरत्रस्थित्य
र्धकालपर्यंतंपातस्यावस्थानमित्यर्थः ॥ अत्रोपपत्तिः ॥ सूर्यचंद्रबिंबकेंद्रयोरेकधुरात्ररचनस्थत्वे विषुवद्वृत्तादुभयतस्तुल्यांतरत्वेवा
पातमध्यं केंद्रक्रांतिसाम्यात् विषुवद्वृत्तात्क्रांति स्वस्वमंडलपरिधिप्रदेशोयआसन्नः सबिंबप्रांतः ॥ दूरस्थस्तुबिंबाग्र
प्रांतः ॥ याम्योत्तरगमनेनपातस्योक्तेः ॥ तत्रशीघ्रबिंबाग्रप्रांतमंदस्पष्टबिंबप्रांतयोस्तथात्वेपातारंभः ॥ सूर्यबिंबाग्रप्रांतचंद्रबि
बपश्चप्रांतयोस्तथात्वेपातांतोत आद्यंतकालाभ्यांक्रमेणपूर्वोत्तरकालयोश्चंद्रार्कबिंबांतर्गतप्रदेशानांकेषांचित्युक्तरूपस्थिति
त्वाभावेनसूर्यचंद्रयोस्तथात्वाभावात्पाताभावइत्यादिकलामारभ्यांतकालपर्यंतंसूर्यचंद्रयोस्तथात्वात्स्थितिः ॥ पातमध्यका
लेक्रांत्यंतराभावः ॥ पाताद्यंतकालयोर्मानैक्यार्धतुल्यंक्रांत्यंतरं तेनतत्तुल्यांतरस्यापचयकालउपचयकालश्चाद्यंतस्थित्यर्धे त
त्तत्कालानयनंसूर्यचंद्रगत्यंतरेणषष्टिघटिकास्तदामानैक्यखंडकलाभिः काइत्यनुपातेनोक्तमुपपन्नंयद्यपिप्रमाणक्योः

271/1941

ममक्रांतिसाम्याभावादतः पातोसंगतः। क्रांतेर्दक्षिणोत्तरांतरस्योपचयापचयाभ्यां सूर्यचंद्रगत्यंतरस्य वृद्धिपरांतरस्योपचयाभ्यामतिवि
लक्षणत्वात्॥ तथापि गणितलाघवार्थं भगवतास्वल्पांतरत्वेनानुपातालोकानुकंपयांगीकृतइत्यदोषः॥ भास्कराचार्यैस्तु मानैक्यार्धगु
णितं स्पष्टघटीभिर्भक्तं माद्यंतलब्धघटीभिर्मध्यादिः प्रागग्रतश्च पातांतइतिवृत्तमुक्तं॥ केचित्तु षोडश घटिकाभिर्ग्रहान्ग्रचाल्य
क्रांतिस्पष्टमाध्यायन्यैकं तयोरंतरयोगांवागत्यंतरभिन्निभास्कराभिमतमाहुः॥ १४॥ ॥ अथपातस्यादिमध्यांतकाला
नाह॥ पातकालः स्फुटोमध्यः सोपिस्थित्यर्धवर्जितः॥ तस्यसंभवकालस्यात्तेनयुक्तोन्त्यसंज्ञितइति॥ स्थिराकृतार्धरात्रेत्यादि
नास्पष्टः पातकालः अयक्रांतिसाम्यस्यकाल आनीतोमध्यसंज्ञोज्ञेयः॥ सः मध्यकालः आनीतस्थित्यर्धेनहीनः तस्य पातस्य
संभवकालः अपि समुच्चये तत्संयुक्तः॥ स्थित्यर्धयुक्तोमध्यकालः॥ अन्त्यसंज्ञितः पातोभवति पातस्यांतकालोभवतीत्यर्थः
अर्थापपत्तिश्चंद्रग्रहणस्पर्शमोक्षवत्स्पष्टास्वरूपंतु भाष्यकारैः कृतं॥ १५॥ ॥ अथैतज्ज्ञानस्य प्रयोजनं किमित्यत पातारि
त्रिकालोमंगलकृत्येनिषिद्धइत्याह॥ आद्यंतकालयोर्मध्यः कालोज्ञेयोतिदारुणः॥ प्रज्वलज्ज्वलनाकारः सर्वकर्मसुगर्हितइ
ति पातस्यारंभसमाप्तिसमययोरंतरगतवर्तीसमय॥ अत्यंतकठिनः सर्वेषु मंगलकृत्येषु निंदितः ज्ञेयः॥ अत्रहेतुगर्भविशेषणमा
ह॥ प्रज्वलज्ज्वलनाकारइति॥ देदीप्यमानाग्निस्वरूपः॥ तथा चतत्र कृतंमंगलकृत्यंभस्मावशेषंस्यादितिभावः॥ १६॥ ॥
ननु पातस्य क्रांतिसाम्यत्वेन सूक्ष्मकालरूपत्वादागतमध्यकाल एवसूक्ष्मः शुभकर्मस्फानिर्दिष्टोनपातस्थित्यात्मकस्थूलकालः॥
क्रांतिसाम्याभावादित्यतआह॥ एकायनगतंयावदर्केंद्वोर्मंडलांतरं॥ संभवस्तावदेवास्य सर्वकर्मविनाशकृदिति॥ सूर्यचंद्रयोः
मंडलांतरं॥ प्रत्येकं बिंबैकदेशरूपं यावत्कालपर्यंतं एकायनगतं तुल्यमार्गस्थितंभवति तावत्कालपर्यंतं॥ एवकारोन्य
नाधिकव्यवच्छेदार्थः॥ अस्यपातस्य सकलशुभकर्मसमावविनाशकारी संभवः॥ उत्पत्तिस्थितिरितियावत्॥ क्रांतिसा
म्यमात्रं स्थितिरलभ्यत्वात्॥ तथाचविषुवद्वृत्तादुभयतएकतोवाचंद्रार्कबिंबैकदेशयोः क्रांतिरपितुल्यांतरेणयावदवस्थानंके
द्रावस्थानाभावेपिबिंबसंबंधात्पातस्थितिः॥ अतएवातत्समत्वमेवक्रांत्योर्बिंबसंभवेद्यावत्॥ मानैक्यार्धाइतसाम्याद्बिंबैक

273
1941

देशात्क्रांत्योरितिभास्कराचार्योक्तं॥ युक्ततरमितिभावः॥ १७॥ ॥ नन्वयंकेवलंमंगलनाशकोनशुभकारकइत्यत आह॥ स्नानदा
नजपश्राद्धव्रतहोमादिकर्मभिः॥ प्राप्यतेसुमहच्छ्रेयस्तत्कालज्ञानतस्तथेति॥ व्रतंस्वाभिमतदेवताराधनं आदिपदार्थमांतरं इत्यादि
पुण्यक्रियाभिस्तत्कालकृताभिः॥ सुतरांसुनत्कृष्टंकल्याणं मनुष्यैः लभ्यते तस्य पातस्य स्थित्यादिकालज्ञानात्॥ तथासमुच्चये
तेनमहच्छ्रेयः प्राप्यतेइत्यर्थः॥ १८॥ ॥ अथपातविशेषमाह॥ रवींद्वोस्तुल्यताक्रांत्योर्विषुवत्संनिधौयदा॥ द्विर्भवेद्धिस्तदा
पातः स्यादभावोविपर्ययादिति॥ यदायस्मिन्काले विषुवत्निकटे॥ क्रांत्यभावासन्ने अत्रचंद्रस्यस्पष्टक्रांत्यभावासन्नत्वंध्येयं
सूर्यचंद्रयोः॥ क्रांत्योः समताभवति तदा तस्मिंस्तदासन्नकालेस्थूलरूपेक्रांत्यभावादुभयत्र द्विः॥ वैधृतव्यतीपातभेद
द्वयात्मकः॥ पातः द्विः प्रत्येकं द्विधा वारद्वयंभवेत्॥ विपर्ययादुक्तव्यत्यासात्॥ चंद्रायणसंधिनिकटे तयोः क्रांत्योतुल्यत्वेद्व
यथं॥ अत्रातुल्यत्वंसूर्यक्रांतितश्चंद्रस्पष्टक्रांतेर्न्यूनत्वमेवनाधिकत्वमितिध्येयं अभावः क्रांतिसाम्यरूपपातस्यतस्मिन्
स्थूलकालेकिंचिदपितदुत्पत्तिः स्यात्॥ एतेनस्वाध्यायनसंधाविधौ क्रांतिसत्कालभास्करकांते॥ ननुतायावतावत्क्रांत्योः
साम्यंतयोर्नास्तीतिभास्कराचार्योक्तंसंगच्छते॥ तत्साधनंतुप्रथमागतपातांतरादिस्पष्टांशाश्चंद्रयुताहीनाइतिप्रत्येकमसकृत्
क्रियमाद्दिधापातात्कालस्यज्ञेयं अत्रोपपत्तिः॥ व्यतीपातेविषुवद्वृत्तादुभयतस्तुल्यांतरेणसूर्यचंद्रयोरवस्थितिकालेपिता
तत्वं क्रांतिसाम्यादेववैधृतेप्येकाहोरात्रवृत्तस्थत्वकालेपातत्वं॥ एवमेवविषयोगव्यतीपातवैधृतयोरप्येकाहोरात्रवृत्तस्थत्वेवि
षुवद्वृत्तादक्षिणोत्तरंगमनंभवत्यस्मादग्रेपक्षेवाविक्षेपवृत्तेभ्रमतश्चंद्रस्यक्रांतिर्न्यूनैवसंभवत्यतः सायनसंधिस्थचंद्रका
लिकसूर्यक्रांतिः सायनसंधिस्थचंद्रस्पष्टक्रांतेरधिकातदेवचंद्रक्रांतेर्न्यूनत्वेनाधिकसूर्यस्पष्टक्रांत्यासमत्वानुत्पत्तिः सूर्यस्य
चंद्राल्पगमनत्वात्क्रांत्यपचयस्यापिचंद्रक्रांत्यपचयाल्पत्वसंभवात्॥ सूर्यक्रांत्युपचयेतुस्फुटतरांतदसंभवः॥ एवंतत्रत्य
सूर्यक्रांतिन्यूनत्वादपचयाधिक्याच्चंद्रस्पष्टक्रांतिसमत्वंतादुत्तरपूर्वकालेसंभवति सूर्यक्रांत्युपचयेतुस्फुटतरां तथाचद्वि
तीयपरविगोलसंध्यासन्नेचंद्रपातंसायनसंध्यासन्नेसूर्येचतदसंभवः॥ कियंतिचिह्नानीतियावतावदुक्तमन्यत्रतत्संभ

सू०टी०
८२

वत्नाभवतीतिगोलयुक्त्याफलितं॥ अथासंभवलक्षणेपि क्रांत्यंतरस्यामानैक्यखंडादल्पत्वेपि काष्टगतंयावदेकं द्वौमंडलांतरमि
तिपूर्वोक्तेनपातसंभवः॥तत्रापातमध्यंतस्मिन्नेवकाले॰ स्थित्यर्धंतुरविंदुमानयोगार्धमितिस्थाने क्रांत्यरमानैक्यखंडयोरंत
रंयद्वीक्षासाध्यमितिध्येयं॥ १९ ॥ ॥ अथशुभकार्यमाह॥ पातस्यानिषिद्धत्वोक्तिप्रसंगात्पंचांगांतर्गतव्यतीपातस्यै
वज्ञानमाह॥ शशांकार्कयुतेर्लिप्ताभभोगेनविभाजिता॥ लब्धंसप्तदशांतोन्योव्यतीपातस्तृतीयकमिति॰ अयनांशसंस्कृत
योश्चंद्रसूर्ययोर्योगस्यराश्यादिः सकलाअष्टशतेनभक्ताः॥फलंसप्तदशांतः॥सप्तदशमध्ये॰ षोडशानंतरंसप्तदशपर्यंतमि
त्यर्थः॥तदापि॰ व्यतीपातः अन्यः एतदधिकारपूर्वोक्तात्भिन्नः॥तृतीयःवक्ष्यमाणकः॥ सूर्यचंद्रयोगांतराभ्यांव्यतीपातद्वैवि
ध्यात॥ एवमुपलक्षणादुक्तरीत्याफलंषड्विंशत्यनंतरंसप्तविंशतिस्तदातृतीयोवैधृतिः॥तत्संज्ञ।पातस्यापियोगांतराभ्यांद्वैवि
ध्यादिति॰ अत्रोपपत्तिः॥विष्कंभाद्व्यतीपातःसप्तदशोयोगइति॰॥ २० ॥ ॥ अथप्रसंगादेततुल्यानिषिद्धगंडांतभ
संधीविवक्षुस्तयोः स्वरूपज्ञानमाह॥ सार्पेंद्रपौष्ण्यधिष्ण्यानामंत्याः पादाभसंधयः॥ तदग्रभेषाद्यपादागंडांतन्नामकीर्तितं
इति॰ आश्लेषाज्येष्ठारेवतीनक्षत्राणां॥ अंत्याश्चतुर्थाश्चरणाः नक्षत्रसंधयोभवंति॰ तदग्रभेषु॰ तेषां॰ आश्लेषाज्येष्ठारेवतीनक्ष
त्राणां॰ अग्रिमनक्षत्रेषु॰ मघामूलाश्विनीनक्षत्रेष्वित्यर्थः॥प्रथमचरणोगंडांतनामप्रसिद्धमुच्यते॰ यद्यप्याश्लेषाज्येष्ठारेव
तीनक्षत्राणामंतिघटिकार्धं॥मघामूलाश्विनीनक्षत्राणामादिमंघटिकाद्वयमितिचत्वारोंतरघटिकाः गंडांतं॰ एतदतिरिक्तानक्ष
त्रसंधिः पूर्वनक्षत्रांतघटिकोत्तरनक्षत्रादिमघटिकेत्यंतरालघटिकाद्वयचंद्रमंडलसंबंधेन घटिकाः सार्धद्वयमितिसहिता
विरुद्धंतथापिसर्वोक्तस्यस्वतः प्रामाण्यान्नक्षतिः॥ अथवैकवाक्यतार्थंपादशब्दः करनेत्रादिवद्द्विसंख्यावाचकः॥ घटिका
इत्यध्याहारश्च॰ तथा चद्विसंख्यामिता अत्यंतघटिकाः॥नक्षत्रसंधयः॥प्रथमाद्विघटिकामितः कालोगंडांतमित्यर्थः
अत्रापिगंडांतत्वाद्संधिकथनमयुक्तंगंडांतस्यतदंतरालरूपत्वात्तथापितत्कालस्यनिषिद्धत्वोक्तिनात्पर्याद्विभागवचनी श्रीः
काववितदंतरालिकालेउत्तरोत्तरकालस्यातिनिषिद्धत्वसत्वनान्नभ्रांतिः॥ २१॥ ॥ अथैतदधिकारोक्तानांतुल्यनि ८२

षिद्धत्वमाह॥ व्यतीपातत्रयंघोरंगंडांतंत्रितयंतथा॥ तद्भसंधित्रितयंसर्वकर्मसुवर्जयेदिति॥व्यतीपातानांत्रयं॰ योगात्मकौक्रांति
साम्यरूपौद्वौव्यतीपातौ॰ विषुवत्सान्निध्योक्रांतिसाम्यांतरेणव्यतीपातौतयोरेवभेदः नत्पृथक॰ पंचांगांतर्गतयोगांतर्गतव्यतीपातश्चे
तित्रयंस्पष्टं॥ उपलक्षणाद्वैधृतित्रयमपि॰ योगवियोगात्मकौक्रांतिसाम्यरूपौद्वौ॰ वैधृतिसंज्ञौ॰ विषुवत्सान्निध्योक्रांतिसाम्यांत
रेणवैधृतिसंज्ञस्तुतयोरंतर्गतः॥नत्पृथक॰ पंचांगांतर्गतयोगांतर्गतवैधृतियोगश्चेतिस्पष्टंत्रयं॥ केचित्तुव्यतीपातवैधृतिसंज्ञं
व्यतीपातद्वयं॰ संज्ञाभेदेनवैधृतिरितिपूर्वमुक्तेः॥पंचांगांतर्गतयोगांतर्गतव्यतीपातश्चेतिव्यतीपातत्रयमितियथाश्रुतमाहुः
॥घोरं॰ दुष्टं॰ गंडांतत्रयं॰ यथा॰ घोरं॰ नक्षत्रसंधित्रयं॰ एवतत्पूर्वोक्तं॰ घोरं॰ अंतःकरणात्सर्वमांगल्यकर्मसुशुभेच्छुरेतदुष्टंज
ह्यादित्यर्थः॥ २२ ॥ ॥अथाकाशपुरुषः शिष्टावशिष्टंस्ववाक्यमुपसंहरति॥इत्येतत्परमंपुण्यंज्योतिषांचरितंहितं॥
रहस्यंमहदाख्यातंकिमन्यच्छ्रोतुमिच्छसीति॥ हेमयःतुभ्यं॰ इति॰ एवं॰ एतत्॰ शृणुष्वैकमनाइत्यादिसर्वंकर्मसुवर्जयेदित्यंतं॰
ज्योतिषां॰ ग्रहनक्षत्रादीनां॰ चरितं॰ माहात्म्यं॰ गणितादिज्ञानमितियावत्॥ हितं॰ इहलोकेकीर्तिकरं॰ परमंपुण्यं॰ परत्रलोके
उत्कृष्टंधर्म्यं॰ अतएवमहद्रहस्यं॰ अतिगोप्यं॰ आख्यातं॰ मया॰ कथितं॰ अथस्वोक्तयुक्त्यप्रतिपादितमेतस्यमनसिनिश्चिता
र्थंनागतमितितदधरोष्ठस्फुरणदर्शनादनुमितंचास्मैमत्संकोचेनस्वाशंकोद्घाटनाशक्तायैतत्स्वप्रश्नप्रतीक्षावसानेमयायुक्त्या
पिवक्तव्यमित्याशयेनाह॥ किमिति॰ अतःपरं॰ त्वं॰ अन्यतः उक्तातिरिक्तं॰ किं॰ कर्तृ॰ श्रोतुं॰ ज्ञातुं॰ इच्छसि॰ तथाचमयाय
दुक्तंपूर्वंयुक्तं तत्रयत्रतवसंशयस्तत्रतत्त्वमत्संकोचमुपेक्ष्यमांप्रतिप्रश्नस्त्वयाकार्यस्तवसमाधानंकरिष्यामीतिभावः॥ २३॥
अथास्मिन्ग्रंथस्यप्रतिपादिताधिकारासंगतित्वपरिहारायारब्धाधिकारसमाप्तिंफक्किकयाहइति॥सूर्यसिद्धांतेपाता
धिकारइति॰ स्पष्टं॰ दशभेदग्रहगणितमितिदशाधिकारात्मकग्रंथपूर्वार्धेपाताधिकारसमाप्त्यासमाप्तमितितुपाताधि
कारांतश्लोकेनैवेत्यतत्परमंपुण्यमित्यादिश्लोकेनैवसूचितं॥ ॥ रंगनाथेनरचितेसूर्यसिद्धांतटिप्पणे॥ पाताधिकारःपूर्णोयं
नद्गूढार्थप्रकाशके॥ १०॥ ॥ सूर्यसिद्धांतगूढार्थप्रकाशकमिदंदलं॥ रंगनाथकृतंदद्यात्भक्तानांगणकैरचितैर्गूढार्थ
प्रकाशके

275
1941

प्रकाशकेश्वरखंडं परिसमाप्तिगमत्॥ ॥ग्रंथसंख्या पंचसहस्र॥ ॥ श्रीगजाननार्पणमस्तु॥ श्रीः छः श्रीः छः श्रीः

277/1941
LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

इतिगूढार्थप्रकाशिकापूर्वखंडंसमाप्तोयम् संख्या ४२५०

279/941

श्री ॥ अथगूढार्थप्रकाशिकाउत्तरखंडप्रारंभः संख्या १२५० प०२५

स०टी०उ०
१

श्रीगणेशायनमः॥ श्रीलक्ष्मीनृसिंहायनमः॥ ॥महादेवंवक्रतुंडंवाणींसूर्यंप्रणम्यच॥कुलंगुरुंरंगनाथोव्याख्यानुत्त
रखंडकं॥ १॥ ॥अथमुनीन्प्रतिमुनिः सूर्यांशपुरुषवचनमनंतरंमयासुरेणसूर्यांशपुरुषः पृष्ट इत्याह॥ ॥अथार्कांशसमु
द्भूतंप्रणिपत्यकृतांजलिः॥भक्त्यापरमयाभ्यर्च्यपप्रच्छेदंमयासुरइति॥अथसूर्यांशपुरुषवचनश्रवणानंतरंमयासुरः मयना
माथोनादैत्यः कृतांजलिः रचितहस्ताग्रांजलिपुटः॥अर्कांशसमुद्भूतंसूर्यांशोत्पन्नंपुरुषंसाध्यापकंगुरुंपरमयाउत्कृष्टयाभ
क्त्याआराध्यत्वेनज्ञानरूपयाअभ्यर्च्यसंपूज्यप्रणिपत्यनमस्कृत्यसमुच्चयार्थश्चकारोनुसंधेयः॥इदंवक्ष्यमाणंपप्रच्छप्रष्टवा
न्॥ १ ॥ ॥अथकिंपप्रच्छेत्यतस्तत्प्रश्नानुवादेप्रथमंतत्कृतंभूप्रश्नमाह॥ भगवन्किंप्रमाणाभूः किमाकाराकिमाश्रया॥किंवि
भागाकथंचात्रसप्तपातालभूमयइति॥हेभगवन्भूर्भूमिः किंप्रमाणाकियत्प्रमाणंयस्याःसा॥ किमाकाराकथमाकारः स्वरू
पंयस्याःसा॥किमाश्रयाकः आश्रयोयस्याःसा॥किंविभागाकथंविभागाविभक्तांशायस्याःसा॥ अत्रभूम्यांपातालभूमयः॥
पातालविभागरूपाआश्रयाः सप्तसंख्याकाः कथंतिष्ठंतिच॥ समुच्चयार्थः॥ किमाकारेत्यादौप्रत्येकमन्वेति॥ अयमभिप्रायः
योजनानिशतान्यष्टावित्यादिनावगतभूमानंपंचाशत्कोटिविस्तीर्णेतिसर्वजनावगतभूमानाभिन्नमितित्वदुक्तेभूमानेसंशया
त्॥किंप्रमाणेतिप्रश्नः॥अन्यथापूर्वंभूमानकथनात्प्रश्नवैयर्थ्यापत्तेः॥उक्तश्रुतत्वापत्तेश्च॥एवंलङ्काप्रागित्यादिनास्पष्ट
श्यंतरसंभवात्सर्वजनावगतादर्शाकारतायांभूमौतदसंभवेनभवदभिमततदाकारस्तदतिरिक्तइतिकिमाकारेतिप्रश्नः॥
एवंतेनदेशांतराभ्यसेत्यादिनाग्रहाणांभूम्याभितोभ्रमणस्यवचनादाधारशेषादौतेषामभितोभ्रमणासंभवेनाधारसत्त्वा
यात्॥किमाश्रयेतिप्रश्नः॥निराधारायाअवस्थानासंभवात्॥ एतेनसर्वजनावगतभूस्वरूपातिरिक्तभूस्वरूपेणोत्तरार्धप्र
श्नावपिप्रसंगात्॥ इत्युक्तौसंगताविति॥ २ ॥ ॥अथकिमाश्रयेतिप्रश्नकारणेभूम्यभितोग्रहभ्रमणेसूर्यस्योपलक्षणत्वे
नप्रश्नावाह॥ अहोरात्रव्यवस्थांचविदधातिकथंरविः॥कथंपर्येतिवसुधांभुवनानिविभावयन्निति॥सूर्यः अहोरात्रव्यव
स्थांदिनरात्र्योर्विवेकंकथंकेनप्रकारेणविदधातिकरोति॥ अयंभावः आदर्शाकारभूम्यांमध्येमेरुस्तदभितोभूम्योपरिप्र श्रीः १

दक्षिणतयासूर्यभ्रमणेनस्वदृश्यविभागेसर्वेषांदिनं॥स्वादृश्यविभागेरात्रिरितिसर्वजनावगतात्भवदभिप्रेतंसूर्यभ्रमणंभिन्नंनाहिनम
तेसूर्योदिनंरात्रिंव्यवस्थापकाव्यवधायकौविनाकथंकरोति॥अन्येग्रहाअपिकथंस्वादिनंरात्रिंचकुर्वंतिसूर्योपलक्षणत्वादिति॥
अथभूम्यभितोभ्रमणांगीकारेभवद्व्यवधायकेसहोरात्रव्यवस्थापुक्तैवेत्यतः प्रश्नांतरमाह॥कथमिति॥सूर्यः भुवनानि
वक्ष्यमाणस्वरूपाणिविभावयन्प्रकाशयन्सन्वसुधांपृथ्वींकथंकेनप्रकारेणपर्येतिप्रदक्षिणतयाभ्रमति॥भूमेर्निराधारा
वस्थानासंभवेनसाधारणत्वेनभूम्यभितोग्रहभ्रमणमाधारेवा धितमितिभावः॥ ३॥ ॥अथदिव्यंतदहरुच्यतेत्यत्रसु
रासुराणामन्योन्यमहोरात्रंविपर्ययादित्युक्तौक्रमेणप्रश्नावाह॥ ॥देवासुराणामन्योन्यमहोरात्रंविपर्ययात्॥किमर्थंतत्क
थंवास्याद्भानोर्भगणपूरणात्इति॥ पूर्वार्धंव्याख्यातं॥ किमर्थंकोभिप्रायोयस्यतादित्यहोरात्रविशेषणं॥देवासुरयोर्दिनंरा
त्रिश्चाभिन्नाकथंनोक्ताव्यत्यासेनियामकाभावादितिभावः॥तद्देवासुरयोरहोरात्रंसूर्यस्यद्वादशराशिभोगादित्यर्थः॥क
थंकुतः वाकारः समुच्चयेभवति॥उभयत्रनियामकाभावादुभयत्रप्रमसंदेहः॥दिनरात्र्योः सूर्यदर्शनादर्शननियामकत्वाद्य
त्रसूर्यंषण्मासावधिदेवाः पश्यंतिनत्रासुराः नपश्यंति॥यत्रदेवाः षण्मासावधिनपश्यंतितत्रासुराः पश्यंतीत्यहंभगवता
नुक्तं॥नदेवकिलसर्वत्रनभवेत्केनहेतुनेति॥ पितॄणामिदमहोरात्रंमासेनदर्शावधिकचांद्रमासेनकेनहेतुनेत्यस्यप्रत्येकंस
मन्वयात्॥केनप्रकारेणनभवतीत्यर्थः॥ननुयथादिव्यंतदहरुच्यतेइत्युक्तं॥तथापूर्वोक्तेपित्र्यमानुषाहोरात्रयोरनुक्तेः
तत्त्वाभिधेः ननुतथापिप्रत्यक्षसिद्धमानुषाहोरात्रेप्रश्नोनुपपन्नएवेत्यतस्तत्सर्वप्रश्नमाह॥तदेवेति॥तन्मानुषाहोरात्रं
एवकारस्तदन्यनिरासार्थकः॥ सर्वत्रसर्वलोकेकिलनिश्चयेनकेनप्रकारेणननस्यात्॥पितृदेवदैत्यानांप्रत्यक्षमहोरात्रंक
थमंगीकृतं॥कथंचमानुषाहोरात्रंप्रत्यक्षसिद्धंतेषामपिनोक्तमित्यर्थः॥अथाहर्गणादवगतदिनमासवर्षेश्वरेषुतत्सं

281
1941

स०टी०उ०
२

गाध्येतिध्यंप्रश्नं ॥ पश्चाद्दुर्जनोतिलवादिव्यत्र प्रश्नद्वयंचाह ॥ दिनाब्दमासहोराणामधिपानसमाः कुतः ॥ कथंपर्येतिभगणः सग्रहोयंकि
माश्रयइति ॥ दिनवर्षमासहोराणां ॥ स्वामिनः स्वामिन्नाः कुतः कस्मान्नभवति ॥ यथादिनाधिपत्यंसूर्यादीनांक्रमेण तथा प्रथमादिन
मासवर्षक्रमेणसूर्यादीनां क्रमेणमासवर्षाधिपत्यंयुक्तं आनयनेयुक्त्यपनिपातनादिति भावः ॥ यद्यपिपूर्वंहोरेश्वरानयनंनोक्तमि
तिनसूर्यांसंगतस्तथापिलोकेप्रसिद्धत्वात्होरेश्वरस्वरूपाकिमर्थंनोक्तइतिताववत्प्रश्नतावत्सर्वोमतिध्येयंभगणः नक्षत्रसमूहः सग्र
हः ग्रहसहितः कथंकेनप्रकारेणपर्येतिभ्रमतितिनक्षत्राणिग्रहाश्चकेनप्रयुक्ताः संतोभ्रन्याभितोभ्रमतीत्यर्थः ॥ अथैषामनंतरिक्ष
वस्थानंतदपिप्रश्नमाह ॥ अयमिति ॥ सग्रहोभगणोदृश्यमाणः किमाश्रयः क आधारोयस्येतिविनाधारंतोरिक्षावस्थानंभवतीत्य
र्थः ॥ ६ ॥ ॥ ननुकक्षाप्रश्नप्रधोभोगः पूर्वंतत्रैवस्वमार्गगाइत्युक्तेरित्यतः कक्षाणां प्रश्नचतुष्टयमाह ॥ भूमेरुपर्यपर्यधो
किमुत्सेधाः किमंतराः ॥ ग्रहर्क्षकक्षाः किंमात्राः स्थिताः केनक्रमेणताइति ॥ भूमेः सकाशादूर्ध्वंउच्चा ग्रहर्क्षकक्षाः ग्रहनक्षत्रा
णामाकाशेमार्गाः किमुत्सेधाः कियानुत्सेधउच्चतायासांताः भूमेः सकाशात्ग्रहनक्षत्रमार्गकक्षाः कियदंतरेणसंतीत्यर्थः ॥ किं
मात्राः किमात्मकाः किंस्वरूपाः किंप्रमाणावाताः ग्रहनक्षत्रकक्षाः केनक्रमेणाधिष्ठिताः संतिपूर्वंकल्पद्रुनकेर ॥ इत्यादिक्रमेणज्ञा
नइत्यर्थः ॥ ७ ॥ ॥ अथानुतवप्रश्नंतत्संगात्सूर्यकिरणप्रचारप्रश्नंचप्रवीक्षमानांप्रश्नद्वयंचाह ॥ ग्रीष्मेतीव्रकरोभानुर्महे
मंतेनतथाविधः ॥ कियतीतत्करप्राप्तिर्यानानिकातिकिंचनेरिति ॥ ग्रीष्मर्तौसूर्योयथातीक्ष्णकिरणः उष्णकिरणः तथाशिशिराः
नादृशोहेमंतर्तौनभवतीतिकिं ॥ सर्वकिरणानांप्राप्तिः गगनप्रभृतिः कियतीकियत्प्रमाणामानानिनाक्षत्रसावनचांद्रसौरादी
निप्रवीक्षानिकतिकियंति ॥ उपक्रमएवसंक्षेपेणनामान्युक्तानीति ॥ ततत्वंसम्यग्ज्ञानमित्यर्थः ॥ तैः मानैः किंप्रयोजनंच
मनुष्ययार्थः ॥ प्रत्येकमन्वेति ॥ ८ ॥ ॥ अथस्वप्रश्नमुपसंहरति ॥ एतंमेसंशयंछिंधिभगवन्भूतभावन ॥ भन्योनवा
मनेच्छेत्ताविद्यतेसर्वदर्शिनामिति ॥ हेभगवन्षड्गुणैश्वर्यसंपन्नसर्वबोधकेतितात्पर्यार्थः ॥ भूतभावनभूतस्य अतीतकाल
स्यभावनाविचारोयस्यभूतस्योपलक्षणावर्तमानभविष्ययोरपिकालत्रयेतिमिश्रार्थः ॥ त्वंममएतंउक्तंसंशयंछिंध्यभिप्राय

श्री:
२

णंकवचनंतेनमत्कृतान्प्रश्नानित्यर्थः ॥ छिंधि छेदयानन्यदहमिह ॥ नीतिमिदमुक्तैवचकुंनशक्तोभ्यन्यस्मात्त्वसंशयात्दूरिकु
र्वंत्यनभाह ॥ अन्यइति ॥ त्वामृतेविना अन्यः सर्वदर्शिनान्तसर्वज्ञशासर्वज्ञइत्यर्थः ॥ छेत्तासंशयापनोदकः ॥ नविद्यतेना
स्ति ॥ तथाचितावत्कालपर्यंतंयथोक्तंतथान्यदपिकृपयावक्तव्यमितिभावः ॥ ९ ॥ ॥ अथमुनीन्प्रतिमुनिर्मयास्करोक्तप्र
श्नानुवादंकृत्वासूर्यांशपुरुषोमयास्करंप्रतिपुनर्वदतिस्मेत्याह ॥ इतिभक्त्योदितंश्रुत्वामयोक्तंवाक्यमेवहि ॥ रहस्यंपरमं
ध्यायंस्ततः प्राहपुनः सतमिति ॥ सः सूर्यांशपुरुषः इतिपूर्वोक्तंभक्त्या आराध्यज्ञानेनउदितंउत्पन्नं ॥ मयैनकथितंवचनंश्रु
त्वाआकर्ण्यपुनर्हिवर्जनीयारं ॥ ततः पूर्वाध्यायत्तयनंतरंमयसुरमपरंद्वितीयंअध्यायंअध्यायग्रंथंयस्योत्तरखंडमित्यर्थः ॥
अस्यग्रंथस्वंखंडस्याहिनिश्चयेनरहस्यंगोप्यत्वेनतत्त्वभूतंप्राहपरंपर्येणावददित्यर्थः ॥ १० ॥ ॥ अथसूर्यांशपुरुषव
चनानुवादंसूर्यांशपुरुषोमयास्करंप्रतिमदुक्तंसावधानतयाश्रोतव्यमित्याह ॥ शृणुष्वैकमनाभूत्वागुह्यमध्यात्मसंज्ञितं ॥ प्र
वक्ष्याम्यतिभक्तानांनादेयंविद्यतेममेति ॥ यतः कारणात् अतिभक्तानां अत्यंतमद्भजनकारणोकोभवादृशांममसूर्यांशपुरु
षस्यआदानयंवस्तुनविद्यते ॥ अतः कारणात् अहंत्वांप्रतिगुह्यंगोप्यंअध्यात्मसंज्ञितंअज्ञात्मज्ञानसंज्ञयस्तत्ववक्ष्यामिकथ
यिष्यामितत्त्वंएकमनाः एकस्मिन्मदुक्तेमनोविद्यतेयस्यासोभूत्वाशृणुष्वश्रोत्रद्वारात्ममनः संयोगेनप्रत्यक्षंकुर्वित्यर्थः
॥ ११ ॥ ॥ गुह्यंवक्ष्यामियदुक्तंतदाह ॥ वासुदेवः परंब्रह्मतन्मूर्तिः पुरुषः परः ॥ अव्यक्तोनिर्गुणः शांतः पंचविंशात
परोव्ययइति ॥ वसत्यस्मिन् जगत्समस्तमसौवाजगतिसमस्तेवसतीति ॥ वसतेरुणि वासः देवनाद्द्योतनाद्देवः वा
सुश्चासौदेवश्चेतिवासुदेवः ॥ तथोक्तंसर्वत्रासौसमस्तंचवसत्यत्रेतिवैयतः अतोसौवासुदेवास्त्योविद्वद्भिः परिगीयते
इति ॥ ननुवासुदेवस्यापत्यमिति ॥ विग्रहस्तस्यजगत्कारणतानिरूपणावसरे अनुपयोगात् ॥ अस्मत्पक्षेपुनरुपादानेका
र्यस्याधारतयाकार्येवाउपादानस्यानुस्यूततयावासउपयुक्तएव ॥ तथाचोक्तंश्रुतौईशावास्यमिदंसर्वमित्यादि ॥ न
गवतेच ॥ अजाभिवयन्मयंतदविमुच्यानियंतभवंहीति ॥ जीवानामपिब्रह्मात्मकत्वमातदारणायपरमितिसर्वोत्तममभि

283
1941

स०टी०पु० ॥ न्यर्थकं॥ यस्मात्परमतीर्नोहमक्षराटपि चोत्तरः ॥ अतोस्मिल्लोकेवेदे च प्रथितः पुरुषोत्तमम भिसूरते ॥ तन्मूर्तिः तस्य वासुदे
२ विशेषण वस्य मूर्तिरंशः इदं वक्ष्यमाणस्य संकर्षणस्य विशेषणं मूर्तिरितिपाठस्तु प्रमादिकः ॥ वासुदेवः संकर्षण इत्यस्माद्वासुदेवात्तस्मं
कर्षण इत्यर्थस्यास्याविवक्षितत्वात्प्रतीतेः ॥ अव्यक्त इत्यतींद्रियइत्यर्थः ॥ तथा च श्रुतिः ॥ नतं विदाथ य इमा जजानान्यद्युष्मा
कमंतरं बभूव॥ नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरंति ॥ न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनमि
ति॥ अव्यक्तत्वे हेतुर्निर्गुण इति॥ शांतिः षडूर्मिरहितत्वात्॥ पंचविंशात्परः षोडशविकृतयः सप्त प्रकृतिविकृतयो मूलप्र
कृतिश्चेति चतुर्विंशतितत्त्वानि पंचविंशः स्फुजीवस्तस्मात्पर इत्यर्थः ॥ पंचविंशात्मक इति पाठे जगदात्मक इति॥ १२॥ ॥
शुद्धस्य ब्रह्मणो जगत्कारणत्वासंभवादाह॥ प्रकृत्यंतर्गतो देवो बहिरंतश्च सर्वशः ॥ संकर्षणोपः सृष्ट्वादौ तासु बीजमवा
सृजत्॥ जगदुपादानत्वादेतानि सर्वाणि विशेषणानि संकर्षणस्य वासुदेवांशस्यापि वासुदेवात्मकतयाध्यवसानेन बोध्या
नि॥ वासुदेवांशात्मकः संकर्षणः प्रथमं जलानि निर्माय तासु अप्सु बीजं शक्तिविशेषं अवसृजत् विक्षेप॥ १३॥ ॥
ततः किमत आह॥ तदंडमभवद्धैमं सर्वत्र तमसावृतं ॥ तत्रानिरुद्धः प्रथमं व्यक्तीभूतः सनातन इति॥ तत्तद्वी मिलितं जल
हैमं स्वर्णगोलाकारं सर्वत्र बहिरंतश्चांधकारेणावृतं ॥ अभवत्॥ अंधकारसहिताकारं स्वर्णांडमजनीत्यर्थः ॥ तत्र सु
वर्णांडे आदौ अनिरुद्धः सनातनः नित्यः वासुदेवांशसंकर्षणांशरूपत्वात् व्यक्तीभूतः अभिव्यक्तः न तूत्पन्नः सत्कार्यवा
दाभ्युपगमात्॥ यथा तिलेभ्यस्तैलमभिव्यक्तं न तूत्पन्नं॥ १४॥ ॥ अथाभिधानांतराणि लोकसुज्ञानार्थमाह॥ हिरण्यगर्भो भ
गवानेष छंदसि पठ्यते॥ आदित्यो ह्यादिभूतत्वात्प्रसूत्या सूर्य उच्यते इति॥ एषः संकर्षणांशोऽनिरुद्धः एवं देवस्य हिरण्यगर्भ इ
ति प्रसिद्धमभिधानांतरमित्यर्थः ॥ हीति निश्चयेन आदित्यः प्रथममभिव्यक्तत्वादुच्यते प्रसूत्या अस्मा जगतो भिव्यक्ततया
यमनिरुद्धः॥ सूर्य उच्यते॥ हिरण्य०सीदिति श्रुतिः॥ १५॥ ॥ अस्य स्वरूपं सांख्यतिं चाह॥ परं ज्योतिस्तमः पारे सूर्योयं
सवितेति च॥ पर्येति भुवनान्येष भावयन्भूतभावन इति॥ अयमनिरुद्धः सूर्यनामकः सवितेति नाम्ना च समुच्चयं प्रसिद्धः॥ श्री: २

285/194

तमः पारे अंधकारस्य परस्मिन्परमुत्कृष्टं ज्योतिः तेजोरूपं अंधकारनाशकमिति तात्पर्यार्थः ॥ आदि० पारे इति श्रुतिः ॥ एषः
सविता भूतभावनः प्राण्युत्पत्तिस्थितिसंहारकारकः भुवनानि वक्ष्यमाणानि भावयन्प्रकाशयन्पर्येति सुवर्णांडमध्ये सदा
भ्रमति॥ १६॥ ॥ अथ परं ज्योतिरिति पादं विवृण्वन् अन्यदप्येतत्स्वरूपं श्लोकाभ्यामाह॥ प्रकाशात्मा तमोहंता महानि
त्येव विश्रुतः ॥ ऋचोस्य मंडलं सामान्युस्रा मूर्तिर्यजूंषि च॥ १७॥ ॥ त्रयीमयोयं भगवान्कालात्मा कालकृद्विभुः ॥ स
र्वात्मा सर्वगः सूक्ष्मः सर्वमस्मिन्प्रतिष्ठितमिति ॥ प्रकाशरूपोंधकारनाशकत्वात् एवरूपः॥ अनिरुद्धाख्यः सूर्यो महान्महत्
तत्वमिति एवं विश्रुतः ॥ वेदपुराणादौ निरूढः ॥ अस्यानिरुद्धस्य सूर्यस्य ऋच ॥ ऋग्वेदमंत्राः ॥ मंडलं सामानि सामवेदमंत्राः
उस्राः किरणाः यजूंषि यजुर्वेदमंत्राः मूर्तिः स्वरूपं समुच्चये॥ अत एवायमनिरुद्धो भगवान्षड्गुणैश्वर्यसंपन्नः त्रयीमयः
वेदत्रयात्मकः ॥ कालरूपः कालस्य कारणं ॥ विभुः जगदुत्पत्तिस्थितिनाशे समर्थः अत एव सर्वात्मा जगत्स्वरूपः सर्वगः
सर्वत्र स्थितः व्यापकः सूक्ष्मः अव्यापकमपि निर्धारी अस्मिन्ननिरुद्धे सर्वं जगत्प्रतिष्ठितं॥ एतेन व्यापकाव्यापकत्वयोरे
वाविरोधः ॥ १८ ॥ ॥ अथ पर्येति भुवनान्येषेत्याद्यर्धं विवृणोति॥ रथे विश्वमये चक्रं कृत्वा संवत्सरात्मकं ॥ छंदांस्य
श्वाः सप्त युक्ताः पर्यटत्येष सर्वदा॥ वर्षचक्रं नियोज्यं सप्त छंदांसि ॥ गायत्र्युष्णिगनुष्टुब्बृहती पंक्तिः त्रिष्टुप्जगत्यः ॥ अ
श्वाः युक्ताः ॥ संयोजिताः कृताः ॥ छंदांस्यश्वास्तत्र युक्ता इति पाठे सप्ताश्वान् रथे नियोज्येत्यर्थः ॥ सर्वदा नित्य एषोनिरुद्ध
नामा पर्यटति भ्रमति॥ १९॥ ॥ अथास्य स्वरूपं ब्रह्मण उत्पत्तिं चाह॥ त्रिपादमृतं गुह्यं पादोयं प्रकटो भवेत्॥
सोहंकारं जगत्सृष्ट्यै ब्रह्माणमसृजद्विभुरिति॥ अस्य परात्मनः त्रिपादं चरणत्रयं अमृतं दिविज्ञेयं ॥ अत एव गुह्यमग
म्यमिदं॥ पादश्चतुर्थचरणः ॥ अयं स्थावरजंगमात्मकजगद्रूपः प्रकटः प्रत्यक्षोयं भवेत्॥ त्रिपादूर्ध्व इति॥ कतिरपि क
यत्रानिरुद्धनामा प्रभुः उत्पत्तिसमर्थः ॥ अहंकारं अहंकारतत्त्वरूपं ब्रह्माणं पुरुषं जगत्सृष्ट्यै जगत्सर्जननिमित्तं असृज
उत्पादयामास॥ २० ॥ ॥ अथोत्पादितब्रह्मपुरुषं जगत्सर्जनार्थं नियुज्य स्वयं भ्रमन्नवतिष्ठते इह हेत्वो ॥ तस्मै वेद

सू०टी०उ०
४

नरान्दवासर्वलोकपितामहं ॥ प्रतिष्ठाप्यांडमध्येपस्वयंपर्यंतिभावयन्निति ॥ अथब्रह्मोत्पादनानंतरंस्वयमनुरुध्यनामानंसेंभूउत्पा
दितअत्मपुरुषायवरानुकृष्टानवेदान्दत्वावेदोक्तमार्गेणसृष्टिसर्जनार्थंसर्वलोकानांपितामहरूपंतंब्रह्माणंसुवर्णांडमध्येप्र
तिष्ठाप्यनिधायचात्रानुसंधेय ॥ भावयन् ॥ प्रकाशयन्सन्पर्यंतिभ्रमति ॥ २१ ॥ ॥ अथजातस्यशीघ्रंब्रह्मायंचंद्रंस
र्वायंस्मात्स्यक्षोंउत्पादयामासेत्याह ॥ अथस्यष्टामनश्चक्रेब्रणहंकारमूर्तिर्भृत ॥ मनसश्चंद्रमाजज्ञेसूर्योक्ष्णोस्तेजसांनि
धिशिति ॥ २२ ॥ ॥ अथअधिकारमाप्यनंतरं अहंकारतत्वमूर्तिधारक ःब्रह्मासस्यामन ः अंतकरणंचक्रेकरोतिस्म ॥ अ
न्यणोहंसृष्टिंकरोमीतिब्रह्माजातेत्यर्थः ॥ अनंतरंतस्यमनस ः सकाशात्चंद्रमाजज्ञेइत्यर्थः ॥ चंद्रोभवतीतिमनसाचंद्रोजात
इत्यर्थः ॥ अक्ष्णोः नेत्राभ्यांतेजसांनिधिराकाशभूत ः सूर्य ः उत्पन्न ः चक्षुरिंद्रियस्यतेजसत्वात् ॥ २२ ॥ ॥ अथमहाभ
तोत्पत्तिमाह ॥ मनसः खंततोवायुरग्निरापोधराक्रमात् ॥ गुणैकवृध्यापंचैवमहाभूतानिजज्ञिरेइति ॥ नव्यआकाशंभ
वतुइतीछयामनसः खंआकाशंतत आकाशात्क्रमात्यथोत्तरंवायुरग्निर्जलंपृथिवी आकाशाद्वायुर्वायोरग्निरग्ने
रापोद्भ्यः पृथिवीतिगुणैकवृध्यागुणस्यैकोपचयेनमहाभूतानिपंचसंख्याकानिएवकारान्न्यूनाधिकव्यवछेदः ॥ जज्ञि
रेउत्पन्नानि ॥ शब्दगुणसहितमाकाशंशब्दस्पर्शगुणद्वयसहितोवायुः शब्दस्पर्शरूपात्मकगुणत्रयसमेतोग्निः ॥ श
ब्दस्पर्शरूपरसात्मकगुणचतुष्टयसमवेतंजलं शब्दस्पर्शरूपरसगंधात्मकगुणपंचकसमवेतापृथ्वीतिस्फुटार्थः ॥
॥ २२ ॥ ॥ अथसूर्यचंद्रयोः स्वरूपंवदन्पंचतारोणामुत्पत्तिमाह ॥ अग्नीषोमौभास्करेंदुततस्त्वंगारकादयः ॥ तेजोभू
खांबुवातेभ्यः क्रमशः पंचजज्ञिरेइति ॥ सूर्यचंद्रौप्राग्उदितोत्पत्ति ॥ अग्नीषोमौ ॥ सूर्योग्निस्वरूपस्तेजोगोलकत्वाक्ष
षत्वात् ॥ चंद्रस्तुसोमः स्वरूपः मनसः सोमवाच्यत्वात् ॥ जलगोलरूप ः अग्नीषोमाविति प्रयोगः ॥ छांदसिक ः ततोनं
तरंअंगारकाद्योभौमादयः पंचताराग्रहाः तेजोभूखांबुवातेभ्यः क्रमादुत्पन्नाः ॥ तुकारात्उक्तभूतस्यभागाधिक्य श्रीः
मन्यभूतानांभागसाम्यमित्यर्थः ॥ मंगलस्तेजसउत्पन्नः अतएवायमंगारकेइत्युक्ते बुधोभूमितः बृहस्पतिराकाशात्श ४

कोजलात् ॥ शनिर्वायोः ॥ २४ ॥ ॥ अथराशीन्नक्षत्राणिचाह ॥ पुनर्द्वादशधात्मानंविभजेराशिसंज्ञकं ॥ नक्षत्ररूपिणंभूयः
सप्तविंशात्मकंवशीति ॥ पुनरनंतरं आत्मानंद्वादशधाद्वादशस्थानेषुराशिसंज्ञकंविभजत्मनः कल्पितंतनेदेवतत्तंसप्तविंशभागं
चाकरोदित्यर्थः ॥ ननुन्यूनाधिकविभागाकथंनकृताः ॥ उक्तसंख्यायांनियामकाभावादित्यतआह ॥ वशीति ॥ इच्छाविषयवशं
यस्यतिवशीस्वतंत्रेछस्यनियोगानर्हत्वात् ॥ स्वेछयातत्संख्याकाः विभागाः कृताइतिभावः ॥ सप्तविंशतिविभागव्यंजकानि
नक्षत्राणिताराात्मकानिनिर्मितानीत्यर्थसिध्दं ॥ २५ ॥ ॥ अथचराचरंजगत्करोदित्याह ॥ ततश्चराचरंविश्वंनिर्ममेदेव
पूर्वकं ॥ ऊर्ध्वमध्याधरेभ्योथस्रोतोभ्यः प्रकृतीसृजन्इति ॥ ततः सचक्रंग्रहसर्जनानंतरंऊर्ध्वमध्याधरेभ्यः श्रेष्ठमध्याधमेभ्यः
स्रोभ्येतोभ्यकोभ्यः प्रकृतीसत्वरजस्तमोविभेदात्मकप्रकृतीः ॥ सृजन्विश्वसृजनदेवपूर्वकंदेवमनुष्यासुरादिकंविश्व
जगच्चराचरंचेतनाचेतनात्मकंनिर्ममेकृतवान् ॥ २६ ॥ ॥ अथरचितपदार्थानामवस्थानंकृतवानित्याह ॥ गुणकर्मवि
भागेनसृष्ट्वाप्राग्वदनुक्रमात् ॥ विभागंकल्पयामासयथास्वंवेददर्शनादिति ॥ गुणाः सत्वरजस्तमोरूपाः कर्मपूर्वजन्मार्जि
तंसदसत्कर्मं अनयोर्विभागेनएकीकरणात्मकेनप्राग्वत् ॥ चंद्रसूर्यादिप्रागुक्तसृष्टिरीत्या अनुक्रमात्सृष्ट्वादेवमनुष्या
सुरभूमिपर्वतादिकचराचरसर्जनंब्रह्मावेददर्शनात् ॥ वेदोक्तप्रकारात्यथास्वंयथादेशंयथाकालंविभागमवस्थानंविभा
गंकल्पयामासकृतवान् ॥ २७ ॥ ॥ केषामित्यतआह ॥ ग्रहनक्षत्रताराणांभूमेर्विश्वस्यवाविभुः ॥ देवासुरमनुष्या
णांसिध्दानांचयथाक्रममिति ॥ विभुर्नियोजनसमर्थोब्रह्माग्रहनक्षत्रोत्तरविराणांपृथिव्यास्त्रैलोक्यस्यवाकारः समु
च्चये ॥ आकाशेअवस्थानंकृतवान् ॥ तत्रग्रहनक्षत्राणांयथाकालमनियमावस्थानंपृथिव्यास्तुनियतावस्थानंपृथिव्यांतु
त्रैलोक्यस्ययथादेशमवस्थानंयथाक्रमंयथायोग्यंदेवासुरमनुष्याणांसिध्दानांचसमुच्चये अवस्थानंयथादेशंकृतवान्
॥ २८ ॥ ॥ ननुसर्वत्राकाशस्यसत्वात्ब्रह्मांडमध्यस्थेनब्रह्मणाग्रहनक्षत्राणांभूमेश्चावस्थानंब्रह्मांडबहिराकाशेकृ
तमथवाब्रह्मांडांतराकाशेकृतमित्यतआह ॥ ब्रह्मांडमेतत्सुषिरंतत्रेदंभूर्भुवादिकं ॥ कटाहद्वितयस्येवसंपुटंगोलका

287
194

सू०टी०उ० ५

कृतीति॥ एतस्यागुरुकं ब्रह्मणाधिष्ठितं सुवर्णांडस्कांधिरं॥ अवकाशात्मकं तत्रावकाशांडं जगत् भूर्भुवादिकं भूर्भुवःस्वर्गात्मकं भ
वस्थितं नवाहिः नत्वंडस्य गोलकारत्वेनांतरावकाशात्मकमसंभवतीत्यत आह॥ कटाहद्वितयस्येति कटाहोर्धगोलाकारं
सावकाशपात्रं तस्य द्वितयद्वयं समंतस्य एकाकारांतस्तनाधिकृत्यवर्तद्वकार्थकं॥ संपुटं आभिमुख्येन मिलनं गोलकाकृति
गोलाकारः स्यात्॥ तथा च नक्षत्रि॥ २०॥ ॥ अथ ब्रह्मांडांतः परिधिं वदंस्तदंतर्भ्रमद्ग्रहादिकं आकाशे यथा स्थानं परि
भ्रमतीति श्लोकाभ्यामाह॥ ब्रह्मांडमध्ये परिधिर्व्योमकक्षाभिधीयते॥ तन्मध्ये भ्रमणं भानामधोधः क्रमशस्तथेति॥ मं
दामरेज्यभूपुत्रसूर्यशुक्रेंदुजेंदवः परिभ्रमंत्यधोधस्थाः सिद्धविद्याधरा घनाइति॥ ब्रह्मांडांतः परिधिः तुल्यवृत्तमानं व्यो
मकक्षा वक्ष्यमाणाकाशकक्षा उच्यते॥ तन्मध्ये ब्रह्मांडमध्ये आकाशे भानां नक्षत्राणां सर्वेषां सर्वतस्तुल्ये॥ ऊर्ध्वांतरितानां
भ्रमणं भवति॥ अथातुल्याधोंतरेण अधः नक्षत्रेभ्यः शनिबृहस्पतिभौमार्कशुक्रबुधचंद्राः अधस्तात्परिभ्रमंति॥ सि
द्धाविद्याधरामेघाश्च अधस्थाः चंद्रादधः स्थिताः अधःअधः क्रमेणाकाशे स्थिताः एषां प्रवहवायावस्थानाभावाद्भ्र
द्धवत्परिभ्रमः॥ २१॥ ॥अथ तत्स्थं वस्थानमाह॥ मध्ये समंतादंडस्य भूगोलो व्योम्नि तिष्ठति॥ बिभ्राणः परमां शक्तिं
ब्रह्मणो धारणात्मिकामिति॥ २२॥ ॥ अंडस्य ब्रह्मांडस्य समंतात्सर्वप्रदेशान्मध्ये मध्यस्थाने केंद्ररूपे आकाशे
भूगोलस्तिष्ठति॥ नन्वाकाशे निराधारवस्तुनोवस्थानासंभवात्कथमवस्थितो भूमिगोल इत्यतो भूगोलविशेषमाह॥ बिभ्रा
णा इति॥ ब्रह्मणः परमां शक्तिं धारणात्मिकां निराधारावस्थानरूपां बिभ्राणः धारयन् तथा च नक्षत्रि॥ एतेन मेरुः किमा
काराः किमाश्रयेति प्रश्नद्वयमुत्तरितं॥ २२॥ ॥अथ कथं चात्र समपातालभूमय इति प्रश्नस्योत्तरमाह॥ तदंतर
पुटाः सप्त नागासुरसमाश्रयाः॥ दिव्यौषधिरसोपेता रम्याः पातालभूमय इति॥ तस्य भूगोलस्य अंतरपुटाः मध्यस्थपुटाः
गुहारूपाः सप्त अतलवितलसुतलादिकाः पातालभूमयः पातालप्रदेशाः रम्याः मनोहराः संति॥ ननु भूगोलमनुष्यादि
कृतस्थित भातनकेसंतीत्यत स्तद्विशेषणमाह॥ नागासुरसमाश्रया इति वासुकीप्रमुखा दैत्याः सर्पाः दैत्याः अनयोराश्रय श्रीः

नता नतु तत्र सूर्यप्रकाशाभावात्तमोमयत्वेन तत्र स्थितलोकानां व्यवहारः कथं भवतीत्यतो द्वितीयं विशेषणमाह॥ दिव्यौषधिरसो
पेता इति॥ दिव्याभौषधयः स्वप्रकाशात्ताः रसैः संयुक्ताः॥ तथा च तासां प्रकाशेन व्यवहारो भवति तद्रसेन तल्लोकानां जीवनं च भव
तीति भावः॥ २३॥ ॥ अथ भूगोलमुख्यादक्षिणोत्तरभूव्यासाधिकप्रमाणं मेरोः स्वरूपमाह॥ अनेकरत्ननिचयो जांबूनद
मयो गिरिः॥ भूगोलमध्यगो मेरुरुभयत्र विनिर्गत इति॥ भूगोलमध्यगतः पर्वतो मेर्वाख्यः अनेकरत्ननिचयः अनेकानि नाना
विधानि माणिक्यवज्रादीनि तेषां निचयः समूहो यस्मिन्सः जांबूनदमयः॥ जांबूनदं जंबूफलामलगलद्रसतः प्रवृत्ता जांबूनदी
समनुनामद् नत्कृवर्णं जांबूनदाहृतटः सुरा सिद्धसंघाः यत्र स्थितिं वंत्यमृतपानपराः सुखवस्तु इति भास्कराचार्योक्तेश्च॥ सुवर्णं
तन्मयः सुवर्णघटितः उभयत्र व्यासांतगतभूपृष्ठप्रदेशाभ्यां विनिर्गतः बहिः स्थितदंडाकार स्वर्गाद्रिमध्ये भूगोलप्रोतोस्ति अत
एव भूदीनधर्मज्ञ इति नात्ययार्थः॥ २४॥ ॥ अथ मेरूर्ध्वाधःप्रदेशयोः देवादयोसुराश्च वसंतीत्याह॥ उपरिष्टात्स्थिता
स्तस्य सेंद्रा देवा महर्षयः॥ अधस्तादसुरास्तद्वद्विषंतोन्योन्यमाश्रिता इति॥ तस्य प्रवीतकमेरोः उपरिष्टात् ऊर्ध्वभागे सेंद्राः इंद्र
सहिता देवाः इंद्रादयः देवाः महर्षयः समुच्चयार्थानुसंधेयः॥ स्थिताः अधस्तान्मेरोः॥ अधः प्रदेशे असुराः दैत्यास्तद्वदर्ध्व
भागे देवास्तद्वदित्यर्थः॥ आश्रिताः आस्थिताः ननु देवा असुराश्चैकत्र कथं नास्थिता इत्यत आह॥ द्विषंत इति अन्योन्यं
परस्परं द्वेषसंभावादेकदेशावस्थानासंभवे नो तस्माद्देवास्तदूर्ध्वभागे स्थिता महर्षयश्च तदधः दैत्यास्तत्रैव स्थितास्तदधोभागेत
न्निकृष्टदैत्याः स्थिता इति भावः॥ २५॥ ॥ अथ भूगोले समुद्रावस्थानमाह॥ ततः समंतात्परिधिः क्रमेणायं महार्णवः॥
मेखलेव स्थितो धात्र्या देवासुरविभागकृदिति॥ दंडाकारमेरोः सकाशाद्दभितः अयं प्रत्यक्षः महार्णवः महासमुद्रः क्रमेण
निरंतरात्मकक्रमेण परिधिरूपः भूम्याः मेखलेव कांचीरूपः देवासुरविभागकृत्॥ देवदैत्ययोर्भूमिगोले विभागयोः परिधिरेखा
रूप इत्यर्थः॥ स्थितः तेन समुद्रादुत्तरं भूगोलस्यार्धं जंबूद्वीपं देवानां समुद्राद्दक्षिणं समुद्रातिरिक्तं भूमिगोलस्यार्धं षड्द्वीपषड्
समुद्रोभयात्मकं दैत्यानामिति सिद्धं मेरुदंडानुरूपभूगोलमध्ये परिधिरूपो लवणसमुद्रोस्ति॥ उत्तरगोलार्धं दक्षिणभूगोले

289
1941

सू॰टी॰ ६ नगतिसमुद्रस्यप्रांतपरिधिस्पर्शमिति॥मेखलाया: कक्ष्या: स्थितत्वेनतात्पर्यार्थ:॥ ३६ ॥ ॥अथसमुद्रोत्तरतटेपरिधि
रूपेजंबूद्वीपारंभेचतुर्षुभागेषुचत्वारिनगराणिसंतीत्याह॥ समंतान्मेरुमध्यात्तुल्यभागेषुतोयधे:॥द्वीपेषुदिक्षुपूर्वादि
नगर्योदेवनिर्मिताइति॥मेरुमध्यात्दंडाकारमेरोर्मध्यप्रदेशात्भूगोलगर्भाकाराद्दित्यर्थ:॥समंतात्अभित:भूगोलपृष्ठे
तोयधे:परिधिरूपसमुद्रस्यतुल्यभागेषुसमविभागेषुद्वीपेषुजंबूद्वीपारंभेषुदिक्षुचतुर्विभागेषुचतुर्दिक्षुपूर्वादिनगर्य:
मेरो:पूर्वदक्षिणपश्चिमोत्तरादिक्रमेणचतु:पर्य:देवनिर्मिता:देवै:कृता:संतीतिशेष:॥समुद्रोत्तरतटेजंबूद्वीपस्यादिभाग
रूपेतुल्यांतरेणचत्वारिनगराणिभूगोलस्यकल्पितपूर्वादिदिशासुसंतीतितात्पर्यार्थ:॥ ३७॥ ॥अथासांनामानिद्वी
पोद्धितस्यजंबूद्वीपादिभागस्थितस्यर्याख्यपारिभाषिकविभागांश्चेत्यर्थंचश्लोकत्रयेणविशदयति॥भूवृत्तपादेपूर्वस्यां
यमकोटीतिविश्रुता॥भद्राश्ववर्षेनगरीस्वर्णप्राकारतोरणा॥ ३८ ॥ ॥याम्यायांभारतेवर्षेलंकातद्वन्महापुरी॥पश्चि
मेकेतुमालाख्येरोमकाख्याप्रकीर्तिता॥ ३९ ॥ ॥सिद्धातस्यांमहात्मानोनिवसंतिगतव्यथा॥उदक्सिद्धपुरीना
मकुरुवर्षेप्रकीर्तिता॥ ४०॥ ॥भूगोलेउभयत्रदंडाकारोमेरुर्यत्रनिर्गतस्तत्स्थानाभ्यांतरनाकारस्तत्रेणोर्ध्वाधरेणभूगो
लस्यखंडद्वयंपूर्वापरंतन्निर्गमघनाकारसूत्रेणोर्ध्वाधोभूमे:खंडद्वयंतेनभूगोलेचतुर्भाकाराश्चत्वारोभूस्यंत्रास्तत्रोर्ध्वस्य
पूर्वभूम्याय:समुद्रपरिधिस्तस्यचतुर्थांशंभद्राश्वसंज्ञकवर्षपूर्वस्मिन्नूर्ध्वाध:शाकलसंधौसुवर्णघटिता:प्राकारा:
तोरणानिचयस्यांसतादृशीपुरीयमकोटीतिसंज्ञयाविश्रुताविख्याता॥याम्यायांमूर्ध्वाध:कलशद्वयसंधौमेरुतसास्य
दक्षिणत्वात्भारतसंज्ञकवर्षेलंकासंज्ञामहानगरीतद्वत्स्वर्णप्रकारतोरणाविश्रुतेत्यर्थ:॥पश्चिमेपश्चिमशकलाधरस्थ
शकलसंधौकेतुमालसंज्ञेवर्षेरोमकसंज्ञानगरीउक्ता॥उदक्अध:शकलद्वयसंधौकुरुसंज्ञकवर्षेसिद्धपुरीनामन
गरीप्रोक्ता॥अस्या:पुर्या:सिद्धपुरीत्वमन्वर्थमित्याह॥तस्यामिति॥तस्यांसिद्धपुर्यांसिद्धा:योगाभ्यासका:अस्मदादि
भ्योमहांत:॥उत्कृष्टा:आत्मीयंवितेगतव्यथा:दु:खरहितानिरंतरावसंति॥४०॥ ॥अथैतासांचतुर्णांपुरीणांपरस्पर श्री: ५

291
1941

मंतरालमव्यवहितंमेरोश्चसमंतरंचाह॥भूवृत्तपादविवरास्ताश्चान्योन्यंप्रतिष्ठिता:॥ताभ्यश्चोत्तरगोमेरुस्तावानेवसुराश्रयइति॥ता:
उक्तनगर्य:अन्योन्यंपरस्परंभूवृत्तपादविवरा:भूगोलवृत्तपरिधिचतुर्थांशांतरेस्थिता:मेरु:सर्वोक्त:सुराश्रय:देवैरधिष्ठि
त:तावान्भूपरिधिचतुर्थांशांतरेणस्थित:एवकारोन्यूनाधिकव्यवच्छेदार्थ:॥चकार:श्लोकपूर्वार्धेनसमुच्चयार्थ:॥४१॥ ॥
अथतासांपुरीणांनिरक्षत्वमस्तीत्याह॥तासामुपरिगोयातिविषुवस्थोदिवाकर:॥नतासुविषुवच्छायानाक्षस्योन्नतिरिष्यतइति॥
तासांनगरीणांविषुवस्थ:॥यद्दिनेमेरोर्मध्येदिवनादिनेयन्मार्गेणभ्रमति॥विषुवद्वृत्तेतत्रस्थइत्यर्थ:॥सूर्य:उपरिग:सन्याति
भ्रमतिअत:कारणात्तास्नगरीषुविषुवच्छायाअक्षभानभवति॥तन्नगरीणांविषुवद्वृत्ताभिन्नपूर्वापरवृत्तसद्भावात्॥अत्रस्थ
सूर्यमध्याह्नछायाभावोपलंभात्॥अतएवतेषुनगरेषुअक्षध्रुवस्यउन्नतिरुच्चता अक्षांशरूपानेष्यतेनांगीक्रियते॥अक्षां
शाभावान्निरक्षदेशत्वंतेषांसिद्धमितिभाव:॥ ४२ ॥ ॥अथमेरौउक्तनगरीषुचक्रमेणलंबांशाक्षांशाभावानुपपत्त्या
पिपादयिषु:प्रथमंध्रुवस्थितिमाह॥मेरोरुभयतोमध्येध्रुवतारेनभ:स्थिते॥निरक्षदेशसंस्थानामुभयेक्षितिजाश्रये
इति॥मेरोरुभयत:दक्षिणोत्तरयो:आकाशस्थितेध्रुवतारेदक्षिणोत्तरक्रमेणमध्येआकाशमध्येभवत:॥निरक्षदेशसं
स्थानांप्रागुक्तनगरस्थितमनुष्याणांउभयदक्षिणोत्तरेध्रुवतारेक्षितिजाश्रयेतद्गर्भक्षितिजवृत्तस्थेभवतइत्यर्थ:॥ ४३ ॥
अथानयैवंनिरक्षांशाभावलंबांशपरममाह॥अतोनाक्षोच्छ्रयस्तासुध्रुवयो:क्षितिजस्थयो:॥नवतिर्लंबकांशास्तुमेरावक्षां
शकास्तथा॥तासुउक्तनगरीषु अत:उभयोक्षितिजाश्रयेइतिकारणात्॥अक्षोच्छ्रय:ध्रुवोच्चत्वं॥तथाचक्षितिजाध्रुवोच्च
मक्षांशाइतितदभावात्तदभावइतिभाव:॥तुकारात्तन्नगरीषुध्रुवयो:क्षितिजस्थयो:सतो:लंबांशा:नवति:भान्याक्षांशा:
नवतेर्लंबांशत्वात्॥खमध्यात्ध्रुवांतरस्यलंबांशस्वरूपत्वात्॥मेरौअक्षांशा:तथानवति:ध्रुवस्यपरमोच्चत्वात्॥यथा
निरक्षदेशेक्षांशाभावाल्लंबांशा:परमास्तथैवमेरावक्षांशपरमत्वाल्लंबांशाभावइत्यर्थसिद्धं॥एतेनपुरांतरंचोदिदमुत्तरस्या
नरक्षविश्लेषलवैस्तदाद्धि॥चक्रांशकैरित्यनुपातयुक्तयायुक्तमिरुक्तपरिधे:प्रमाणमितिभास्कराचार्योक्तं·प्रथमप्रश्न

सू० टी०
९

नर्गतसमुद्रस्यप्रांतपरिधिस्पर्शमिति॥मंरवलाया: कक्ष्या: स्थितत्वेनतात्पर्यार्थ:॥ ३६ ॥ ॥अथसमुद्रोत्तरतटेपरिधि
रूपेजंबूद्वीपारंभेचतुर्षुभागेषुचत्वारिनगराणिसंतीत्याह॥ समंतान्मेरुमध्यात्तुल्यभागेषुतोयधे:॥द्वीपेषुदिक्षुपूर्वादि
नगर्योदेवनिर्मिताइति॥मेरुमध्यात्दंडाकारमेरोर्मध्यप्रदेशात्भूगोलगर्भाकारादित्यर्थ:॥समंतात् अभित: भूगोलपृष्ठे
तोयधे: परिधिरूपसमुद्रस्यतुल्यभागेषुसमविभागेषुद्वीपेषुजंबूद्वीपारंभेषुदिक्षुचतुर्विभागेषुचतुर्दिक्षुपूर्वादिनगर्य:
मेरो: पूर्वदक्षिणपश्चिमोत्तरदिक्क्रमेणचतु: पर्य: देवनिर्मिता: देवै: कृता: संतीतिशेष:॥समुद्रोत्तरतटेजंबूद्वीपस्यादिभाग
रूपेतुल्यांतरेणचत्वारिनगराणिभूगोलस्यकल्पितपूर्वादिदिशासुसंतीतितात्पर्यार्थ:॥ ३७॥ ॥अथासांनामानिद्वी
पोक्तिस्यजंबूद्वीपादिभागस्थितस्यपर्यायंपारिभाषिकविभागांश्चेत्यर्थंचश्लोकत्रयेणविशदयति॥भूवृत्तपादेपूर्वस्यां
यमकोटीतिविश्रुता॥भद्राश्ववर्षेनगरीस्वर्णप्राकारतोरणा॥ ३८ ॥ ॥याम्यायांभारतेवर्षेलंकातद्वन्महापुरी॥पश्चि
मेकेतुमालाख्येरोमकाख्याप्रकीर्तिता॥ ३९ ॥ ॥सिद्धास्तस्यांमहात्मानोनिवसंतिगतव्यथा॥उदक्सिद्धपुरीना
मकुरुवर्षेप्रकीर्तिता॥ ४०॥ ॥भूगोलेउभयत्रदंडाकारोमेरुर्यत्रनिर्गतस्तत्स्थानाभ्यांरेखाकारस्तत्रेणोर्ध्वाधरेणभूगो
लस्यखंडद्वयंपूर्वापरगतानिर्यग्घनाकारसूत्रेणोर्ध्वाधोभूमे: खंडद्वयंतेनभूगोलेचत्वाराकाराश्चत्वारोभूस्यंत्राशास्तत्रोर्ध्वस्य
पूर्वचतुर्भूभ्यां: समुद्रपरिधिस्तस्यचतुर्थांशंभद्राश्वसंज्ञकवर्षेपूर्वस्मिन्नूर्ध्वाध: शाकलसंधौसुवर्णघटिता: प्राकारा:
तोरणानिचयस्यांसातादृशीपुरीयमकोटीतिसंज्ञयाविश्रुताविख्याता॥ याम्यायांमूर्ध्वाध:कलशद्वयसंधौमेरुतस्तस्या
दक्षिणत्वात्भारतसंज्ञकवर्षेलंकासंज्ञामहानगरीतद्वत्स्वर्णप्रकारतोरणाविश्रुतेत्यर्थ:॥ पश्चिमेपश्चिमशकलाधरू
शकलसंधौकेतुमालसंज्ञेवर्षेरोमकसंज्ञानगरीउक्ता॥उदक्अध: शकलद्वयसंधौकुरुसंज्ञकवर्षेसिद्धपुरीनामन
गरीप्रोक्ता॥ अस्या: पुर्या: सिद्धपुरीत्वमन्वर्थमित्याह॥तस्यामिति॥तस्यांसिद्धपुर्यांसिद्धा: योगाभ्यासका: अस्मदादि
भ्यांमहांत:॥उत्कृष्टा: आत्मीयांचितेगतव्यथा: दु:खरहितानिरंतरावसंति॥४०॥ ॥अथोक्तानांचतुर्णांपुरीणांपरस्पर श्रीः ९

291
(94)

मंतरालमव्यवहितंमेरोरासमंतरंचाह॥भूवृत्तपादविवरास्ताश्चान्योन्यंप्रतिष्ठिता:॥ताभ्यश्चोत्तरगोमेरुस्तावानेवसुराश्रय इति॥ता:
उक्तनगर्य: अन्योन्यंपरस्परंभूवृत्तपादविवरा: भूगोलवृत्तपरिधिचतुर्थांशांतरदिक्स्था: मेरु:सर्वोक्त:सुराश्रय: देवैरधिष्ठि
त: तावान्भूपरिधिचतुर्थांशांतरेणस्थित: एवकारोन्यूनाधिकव्यवच्छेदार्थ:॥चकार: श्लोकपूर्वार्धेनसमुच्चयार्थ:॥ ४१॥ ॥
अथतासांपुरीणांनिरक्षत्वमस्तीत्याह॥तासामुपरिगोयातिविषुवस्थोदिवाकर:॥नतासुविषुवच्छायानाक्षस्योन्नतिरिष्यतइति॥
तासांनगरीणांविषुवस्थ:॥यद्दिनेसूर्योमेषादिबिन्दौदिनेयन्मार्गेणभ्रमति॥विषुवद्वृत्तंतत्रस्थइत्यर्थ:॥सूर्य: उपरिग: सन्याति
भ्रमतिअत: कारणात्तासुनगरीषुविषुवच्छाया अक्षभानभवति॥तन्नगरीणांविषुवद्वृत्ताभिन्नपूर्वापरवृत्तसद्भावात्॥अत्रस्थ
स्यैवंमध्याह्नच्छायाभावोपलंभात्॥अतएवतेषुनगरेषु अक्षध्रुवस्यउन्नतिरुच्चता अक्षांशरूपानेष्यतेनांगीक्रियते॥अक्षां
शाभावान्निरक्षदेशत्वंतेषांसिद्धमितिभाव:॥ ४२ ॥ ॥अथमेरौउक्तनगरीषुचक्रमेणलंबांशाक्षांशाभावानुपपत्त्या
पिपादयिषया: प्रथमंध्रुवस्थितिमाह॥मेरावुभयतोमध्येध्रुवतारेनभ:स्थिते॥निरक्षदेशसंस्थानामुभयेक्षितिजाश्रये
इति॥ मेरावुभयत: दक्षिणोत्तरायतयो: आकाशस्थितेध्रुवतारे दक्षिणोत्तरक्रमेणमध्येआकाशमध्येभवत:॥निरक्षदेशस
स्थानांप्रागुक्तनगरस्थितमनुष्याणांउभयदक्षिणोत्तरेध्रुवतारेक्षितिजाश्रयेतद्गर्भक्षितिजवृत्तस्थेभवतइत्यर्थ:॥ ४३ ॥
अथातएवतेष्वक्षांशाभावलंबांशपरममाह॥अतोनाक्षोच्छ्रयस्तासुध्रुवयो: क्षितिजस्थयो:॥नवतिर्लंबकांशास्तुमेरावक्षां
शकास्तथा॥तासुउक्तनगरीषु अत: उभयेक्षितिजाश्रयेइतिकारणात्॥ अक्षोच्छ्रय: ध्रुवोच्चत्वं॥तथाचक्षितिजाध्रुवोच्च
मक्षांशाइतितदभावात्तदभावइतिभाव:॥तुकारात्तन्नगरीषुध्रुवयो: क्षितिजस्थयो:सतो: लंबांशा: नवति: भन्याशांशा:
नत्वतिलंबांशत्वात्॥एवमध्यात्ध्रुवांतरस्यलंबांशस्वरूपत्वात्॥मेरौअक्षांशा: नवतिदिति: ध्रुवस्यपरमोच्चत्वात्॥यथा
निरक्षदेशेसांशाभावाल्लंबांशा: परमास्तथैवमेरावक्षांशापरमत्वाल्लंबांशाभावइत्यर्थसिद्धं॥एतेनपुरांतरंचोदिदमुत्तरंस्या
नरक्षविश्लेषलवैस्तदाद्यैः॥चक्रांशकैरित्यनुपातयुक्त्यायुक्तंनिरुक्तंपरिधे: प्रमाणमितिभास्कराचार्योक्तं: प्रथमप्रश्न

स्योत्तरं स्यात्तदसौ विश्वंभरत्वेस्ततादिं ॥ चक्राशंकेत्यनुपातयुक्त्या युक्तं निरुक्तं स्फुटभानुः स्पष्टपरिधिसाधनं चक्रलिप्तैकम
ध्यरूपानुरोधेनापचीयमानमेरावभावात्मकं नानुपपन्नमितिविस्तृतवित्॥ ४४ ॥ ॥ अथहोरात्रव्यवस्थांचेत्यादिप्रश्नो
त्तरं विवक्षुर्देवासुरयोर्दिनारंभंप्रथममाह॥ मेषादौदेवभागस्थोदेवानांयातिदर्शनं॥ असुराणांतुलादौतुसूर्यस्तद्भागसंच
रइति॥ जंबूद्वीपवलयसमुद्रसंधौभूपरिधिवृत्तंभूगोलमध्यंतत्समसूत्रेणाकाशेवृत्तंविषुवद्वृत्तंतत्क्रांतिवृत्तंयद्वृत्तांतरेण
स्थानद्वयेलग्नंतन्मेषतुलास्थानं भवहवायुर्विषुवद्वृत्तमार्गेभ्रमतिमेषस्थानात्कर्कादिस्थानंविषुवद्वृत्ताच्चतुर्विंशत्यंशांतरेउ
त्तरतः मकरादिस्थानंविषुवद्वृत्ताच्चतुर्विंशत्यंशांतरेणदक्षिणतः तत्स्वस्थानंभवहवायुनाभ्रमत्येवंक्रांतिवृत्तप्रदेशाः स्वस्व
स्थानभवहवायुनाभ्रमंति॥ ततमेषादौदेवभागस्थः जंबूद्वीपदेवासुरविभागंहृदितिपूर्वोक्तं ॥ तत्संबंधाः मेषादिकन्यां
तराश्यः उत्तरगोलः तत्रस्थः सूर्यः मेषादौमेषादिप्रदेशेदेवानांमेरावुत्तराग्रवर्तिनांदर्शनंचदर्शनानंतरंप्रथमदर्शनंयाति
गच्छतिप्राप्नोतीत्यर्थः ॥ विषुवद्वृत्तस्यतत्क्षितिजत्वात्॥ एवंदैत्यानांमेरोर्दक्षिणाग्रवर्तिनांमित्यसुराणामित्युक्तेनैवोक्तं
तद्भागसंचरः दैत्यभागेसव्यप्रादिदक्षिणविभागस्थातुलादिमीनांताराश्यर्थादक्षिणगोलस्तत्रसंचरः॥ गमनंयस्यएताद
शः सूर्यः तुलादिप्रदेशेतुकारादिदर्शनानंतरंप्रथमंदर्शनंप्राप्नोतीत्यर्थः॥ तेषामपिविषुवद्वृत्तक्षितिजत्वात्॥ ४५ ॥
अथप्रसंगात्ग्रीष्मेतीव्रकरइत्याद्यर्धोक्तप्रश्नस्योत्तरमाह॥ अत्यासन्नतयाग्रीष्मेतेनतीक्ष्णाः करारवेः॥ देवभागेसुरा
णांतुहेमंतेमंदतान्यथेति॥ तेनउत्तरदक्षिणगोलयोः सूर्यस्योत्तरदक्षिणसंचाररूपकारणेनेत्यर्थः॥ देवभागेजंबूद्वीप
अत्यासन्नतयासूर्यस्यात्यंतनिकटस्थत्वेनग्रीष्मेग्रीष्मर्तौ॥ सूर्यस्यतेजोगोलकस्यकिरणास्तीक्ष्णाः अत्युष्णाः असुरा
णांदेवभागेदूरत्वस्यसमन्यथादैत्यानांभागेसमुद्रादिदक्षिणप्रदेशेहेमंतेहेमंतर्तौतुकारात्सूर्यस्यात्युष्णांगताः किरणाः
सूर्यस्यात्यासन्नत्वात्॥ अन्यथासूर्यस्यदूरस्थत्वेनमंदताकिरणानांउष्णताभावः॥ देवभागेहेमंतर्तौकराणांमंदताअत
एवतत्रशीताधिक्यंदैत्यभागेग्रीष्मेकराणांमंदताशीताधिक्यंच॥ तथाचदेवभागेदक्षिणगोलेसूर्यस्यदूरस्थत्वाउत्त श्रीः

रगोलेनिकटस्थत्वंमत्कैष्योनतांशानांक्रमेणाधिकाल्पत्वादितिभावः॥ ४६ ॥ ॥ अथमेषादौदेवभागस्थइत्युक्तंदेवासुराहो
रात्रिकथनव्याजेननिदर्शयति॥ देवासुराविषुवतिक्षितिजस्थंदिवाकरं॥ पश्यत्यन्योन्यमेतेषांमपसव्येदिनक्षयेइति॥ विषुवतिकाले
देवदैत्याः सूर्यंक्षितिजस्थंपश्यंति॥ विषुवद्वृत्तस्यतयोः स्वस्थानात्भूगोलमध्यस्थत्वेनक्षितिजत्वात्॥ एतेषांदेवदैत्यानांअन्यो
न्यंपरस्परंवामसव्येअपसव्यसव्यंतेनक्रमेणदिनक्षयेदिवसरात्रीभवतः॥ अयंभावः देवानांमेरुमेउत्तरभागः स्वकीयत्वात्
एवंदैत्यानांवामसव्यभागावुत्तरदक्षिणगोलौ॥ देवानांक्रमेणदिनरात्रीदेवानांवासव्यभागौदक्षिणोत्तरगोलौदैत्यानां
दिनरात्री॥ अन्यथान्योन्यंवामसव्येइत्यनयोः संगतार्थानुपपत्तेः अतएवपूर्वंमेषादावित्याद्युक्तमिति॥ ४७॥ ॥
अथपूर्वश्लोकोक्तार्धस्यसंक्षिप्तस्यशंकयादिनपूर्वापरार्धकथनछलेनतदर्थंश्लोकाभ्यांविशदयति॥ मेषादावुदितः सूर्यः
स्त्रीन्राशीनुदगुत्तरं॥ संचरन्प्रागहर्मध्यंपूरयेन्मेरुवासिनां॥ ४८॥ ॥ कर्कादीन्संचरंस्तद्वदह्नः पश्चार्धमेवसः॥ तुला
दींस्त्रीन्मृगादींश्चतद्वदेवसुरद्विषामिति॥ ४९॥ ॥ मेषादौविषुवद्वृत्तस्यक्रांतिवृत्तभागेरवत्यासन्नेउदितः दर्शनतां
प्राप्तः सूर्यः उत्तरस्यथोत्तरंक्रमेणेतियावत् त्रीन्राशीन्उदक्उत्तरभागस्थानमेषवृषमिथुनानिसंचरन्गच्छन्मेरुस्था
नांदेवानांप्रागहर्मध्यंप्रथमंदिनस्यार्धंपूरयेत्पूर्णंकरोतीत्यर्थः॥ मिथुनांतेसूर्यंमेरुस्थानांमध्याह्नंस्यादितिफलितार्थः॥
अथदैत्यानामाह॥ तुलादीन्सुरद्विषां॥ कर्कादीन्त्रीन्राशीन्कर्कसिंहकन्याः तद्वत्क्रमेणेत्यर्थः अतिक्रामन्सन्सः सूर्यः
दिवसस्यपश्चार्धमपरार्धंहि॥ एवकारोन्ययोगव्यवच्छेदार्थः॥ पूरयेत्कन्यांतेमेरुस्थानांसूर्यास्तोभवतीतिफलितार्थः॥ अ
थदैत्यानामाह॥ तुलादीन्सुरद्विषांमेरोर्दक्षिणभागवर्तिनांदैत्यानांतुलादीन्त्रीन्राशीन्तुलावृश्चिकधनुराख्यान्
मृगादींस्त्रीन्राशीन्मकरकुंभमीनान्तद्वत्क्रमेणातिक्रामन्सूर्यः चकारस्तुलान्मृगादिक्रमेणपूर्वापरार्धमित्यर्थकः॥
एवकारः उक्तातिरिक्तव्यवच्छेदार्थः दिनंपूरयतीत्यर्थः॥ धनुरंतेसूर्येदैत्यानांमध्याह्नं॥ मीनांतेसूर्येसूर्यास्तोभवती
तिफलितार्थः॥ ४९ ॥ ॥ अथातोदेवासुराणामितिप्रश्नस्योत्तरंश्लोकमित्याह॥ अतोदिनक्षपेतेषामन्योन्यंहिविप

र्ययात्॥ अहोरात्रप्रमाणं च भानोर्भगणपूरणात्॥ अत उक्तप्रकारणादेषां देवदैत्यानां अन्योन्यं परस्परं हीतिनिश्चयेन विपर्ययात्
व्यत्यासात्॥ दिनरात्रौ स्त इति फलितं॥ एतत्फलितार्थं स्तु पूर्वं बहुधोक्तः॥ अथ तत्कथं वा स्यात् भानोर्भगणपूरणादिति प्रश्नस्यापुत
रं फलितमित्याह॥ अहोरात्रप्रमाणमिति सूर्यस्य मेषादादशद्वादशराशिभोगात् देवदैत्यानामहोरात्रमानं भवति॥ चकारः पृ
र्वार्धेन समुच्चयार्थः॥ तेन द्वयोः पुरोक्तमेकैकं कारणमिति स्पष्टं॥ ५०॥ ॥ अथ मेषादावुदित इत्यादि श्लोकद्वयस्य पू
र्वार्धं तदुपपत्तिं चाह॥ दिनक्षपार्धमेतेषामयनांते विपर्ययात्॥ उपर्यात्मानमन्योन्यं कल्पयंत्यसुरासुरा इति॥ एतेषां देवदै
त्यानां अयनांते अयनसंधौ विपर्ययात् व्यत्यासात् दिनक्षपार्धं दिनार्धं रात्र्यर्धं च भवति॥ यत्र देवानां मध्याह्नं रात्र्यर्धं तत्र दैत्यानां
क्रमेण रात्र्यर्धं मध्याह्नं च॥ यत्र दैत्यानां मध्याह्नं रात्र्यर्धं तत्र देवानां क्रमेण रात्र्यर्धं मध्याह्न इति फलितार्थः॥ अत्र हेतुमाह
उपरीति॥ देवदैत्याः मेरोरुत्तरदक्षिणाग्रवर्तिनः अन्योन्यं आत्मानं स्वं उपरिभागे कल्पयंति॥ अंगीकुर्वंति॥ वस्तुतो भूमेर्गो
लत्वेन सर्वत्र तुल्यत्वान्निरपेक्षोर्ध्वाधोभागयोरनुपपत्तेः॥ तथा च देवदैत्यापेक्षयोर्ध्वस्थे दैत्यान् अधःस्थानं अंगीकुर्वंति॥
दैत्याश्च देवस्थानापेक्षयोर्ध्वस्थं मन्यमानाः देवानधः कुर्वंतीति तात्पर्यार्थः॥ एवं च देवदैत्ययोर्विपरीतावस्थानाद्दिनरा
त्र्योर्वैपरीत्यं युक्तमेवेति भावः॥ ५१॥ ॥ अथ देवदैत्ययोरूर्ध्वाधोरीतिमन्यत्रापि तद्दृष्टांतमतिदिशति॥ अन्येपि
समसूत्रस्था मन्यंतेधः परस्परं॥ भद्राश्वकेतुमालस्था लंकासिद्धपुरस्थिता इति॥ अन्ये देवदैत्यभिन्नाः भूगोलस्थाः अ
पिशब्दो दैत्यः॥ समुच्चयार्थकः॥ समसूत्रस्था इति॥ अत्र भद्राश्वकेतुमालशब्दौ स्वांतर्गतयमकोटिरोमकनगरविशे
षविधायकौ॥ स्पष्टं व्यासांतरस्थत्वांगीकारे तु यथाश्रुतं परस्परमधो मन्यंते॥ तुर्यं चरणस्तु व्यक्त एव॥ ५१॥ ॥
यथोक्तं काल्पनिकमेवेति द्रढयन्नाह॥ सर्वत्रैवमहागोले स्वस्थानमुपरिस्थितं॥ मन्यंते खे यतो गोलस्तस्य क्वोर्ध्वं क्व वाप
धइति॥ भूगोलः सर्वत्रैव प्रदेशे तु मध्ये स्वस्थानं निजाधिष्ठितस्थानं उर्ध्वस्थितं॥ तदधिष्ठिता मनुष्याः स्वाभिमानेनांगी
कुर्युः॥ अतः कारणात् भूगोले सर्वे एवोर्ध्वस्थाः अधस्थास्तु न च भवंत्येव॥ समे क्षेत्रे योर्ध्वाधस्त्वं न वस्तुत इति तदनंतरं॥ श्रोः

अन्यथाधस्त्वेन पतनशंकया भूगोले मनुष्याद्यवस्थानानुपपत्तेः॥ अत्र कारणमाह॥ ख इति यतः कारणात् ब्रह्मांडाकाशमध्यभागे भू
गोलोस्ति॥ तथा च ब्रह्मांडस्य भूगोलात् अभितस्तुल्यत्वाद्भूगोलस्य तत्र ऊर्ध्वाधोभागादिरसंभव इति भावः स्वाभिप्रायं स्पष्टयति॥ तस्य
भूगोलस्याकाशमध्यस्थस्य मे तादृशाकारस्य कस्मिन्भागे वा समुच्चये अधोधस्त्वं अपि तूर्ध्वत्वं न समुच्चयार्थकः॥ तथा च समंता
दाकाशस्य तुल्यत्वेन भूमेरूर्ध्वाधोभागौ निर्वचनीकर्तुमशक्यौ याभ्यामूर्ध्वाधोलोकानियताः स्युरिति॥ भूमेरूर्ध्वाधोभागसंभव
इति भावः॥ ५२॥ ॥ नन्वियं भूः समादर्शाकारा प्रत्यक्षा कथं गोलाकारेत्यत आह॥ अल्पकायतया लोकाः स्वस्थानात्सर्व
तोमुखं॥ पश्यंति वृत्तामप्येतां चक्राकारां वसुंधरामिति॥ जनाः स्वाधिष्ठितप्रदेशात्सर्वतः सर्वदिक्षु अभिमुखं वृत्तां गोलाकारं
एतां प्रत्यक्षां पृथ्वीं चक्राकारां मंडलाकारां समां पश्यंति॥ एवकारार्थे अपिशब्दः॥ तेन भूमेर्वस्तुतो गोलाकारत्वे पि तदाकारेणादर्शनं
मुकुराकारतया दर्शनं च न विरुद्धं॥ अत्र हेतुमाह॥ अल्पकायतयेति स्वशरीरस्याल्पत्वेनेत्यर्थः॥ तथा च महती भूस्तत्रस्थस्य मनु
ष्यस्यातिस्वल्पस्य दृष्टिप्रचारा गोलाकारतया न भासते किंतु सममंडलतया भासते॥ गोलवृत्तशतांशस्य समत्वेन भाना
त् अन्यथा प्रथमज्यायाश्चापसमत्वानुपपत्तेरिति भावः॥ ५३॥ ॥ अथ निरक्षादिदेशेषु मेरुव्यतिरिक्तान्यदेशेषु दिनरा
त्र्योर्मानं विवक्षुर्मेरोरग्रभागयोर्निरक्षदेशे च भचक्रभ्रमणमाह॥ सव्यं भ्रमति देवानामपसव्यं सुरद्विषां॥ उपरिष्टाद्भगोलोयं व्यक्षे
पश्चान्मुखः सदा॥ अयं प्रत्यक्षो भगोलः नक्षत्राधिष्ठितमूर्तगोलः देवानां मेरोरुत्तराग्रवर्तिनां सव्यं पूर्वादिग्भ्रमणेन दक्षिणक्रम
गेण पूर्वोत्तरपश्चिमदक्षिणक्रमेणेत्यर्थः॥ नक्षत्राधिष्ठितगोलो भ्रमति॥ निरक्षदेशेषु जात्यभिप्रायेणैकवचनं॥ उप
रिष्टात् मस्तकोर्ध्वमध्ये भगोलः पश्चान्मुखः पश्चिमादिगभिमुखः सदा नित्यं परिभ्रमति॥ भगोलस्य ध्रुवमध्यस्थत्वेन भ्रम
णात् लयांस्तत्र क्षितिजवृत्तस्थत्वाच्च॥ ५४॥ ॥ अथ निरक्षे दिनरात्र्योर्मानं कथयन्नन्यत्रापि ततो न्यूनाधिकमानं भ
वतीत्याह॥ अतस्तत्र दिनं त्रिंशन्नाडिकं शर्वरी तथा॥ हानिवृद्धी सदा वामं सुरासुरविभागयोरिति॥ अतः निरक्षे मस्तकोर्ध्वे
भगोलो भ्रमतीति कारणात्॥ तत्र निरक्षदेशे त्रिंशन्नाडिकं त्रिंशद्घटीमितं दिनं स्यात्॥ शर्वरी रात्रिः तथा त्रिंशद्घटीपरिमिता

295
1941

सू०टी०
७

स्यात्॥ तत्र क्षितिजवृत्तस्य ध्रुवद्वयसंलग्नत्वाद्गोलमध्यस्थत्वाद्दिनरात्र्योस्तुल्यत्वं युक्तमेवेति भावः॥ सुरासुरविभागयोः जंबूद्वी
पसमुद्राद्दक्षिणदेशयोः सदा विषुवद्दिनातिरिक्तकाले क्षयवृद्धी दिनरात्र्योः प्रत्येकं वामं व्यस्तं यथा स्यात्तथा ज्ञेयं॥ एतदुक्तं भव
ति॥ जंबूद्वीपे दिनह्रासे रात्रिवृद्धिः तदा दक्षिणदेशे दिनरात्र्योः क्रमेण वृद्धिह्रासौ जंबूद्वीपे दिनवृद्धौ रात्रिह्रासे तदा दक्षिण
देशे दिनरात्र्योः क्रमेण हानिवृद्धी एवं दक्षिणदेशे हानिवृद्धी जंबूद्वीपे वृद्धिहानी दिनरात्र्योर्वा यथायोग्यमिति॥ अत्रोपपत्तिः॥ क्षि
तिजवृत्तस्य ध्रुवसंबंधाभावेन गोलमध्यस्थत्वाभावाद्दिनरात्र्योः सदा विषुवद्दिनव्यतिरिक्ते न तुल्यत्वं किंतु न्यूनाधिकत्वमहोरात्र
स्य षष्टिघटिकात्मकत्वादिति॥ ५५॥ ॥ अथैनद्श्लोकोक्तार्थं श्लोकाभ्यां विशदयति॥ मेषादौ तु सदा वृद्धिरुदगु
त्तरतोऽधिका॥ देवांशे च क्षपाह्रासो विपरीतं तथासुरे॥ ५६॥ ॥ तुलादौ द्युनिशोर्वामं क्षयवृद्धी तयोरुभे॥ देशक्रांति
वशान्नित्यं तद्विज्ञानं पुरोदितमिति॥ मेषादौ षड्कृदुदक् उत्तरगोले सूर्ये सति उत्तरतो यथोत्तरं सदा यावदुत्तरगोलं देवां
शे जंबूद्वीपे अधिका यथोत्तरं नाडी एकाद्यवृद्धिर्निरक्षदेशीयादिनं॥ तु कारात् यथोत्तरं सर्वस्यां तरगमनेयथोत्तरं दिनवृद्धिः
परमांतरगमनात् रात्रिवत्तेने यथोत्तरं न्यूनात् वृद्धिरित्यर्थः॥ क्षपाह्रासिः रात्रेरपचयः चसमुच्चये॥ असुरे समुद्रादक्षि
णभागे तथा दिनरात्र्योः क्षयवृद्धि विपरीतं व्यस्तं हीनं ह्रानिः रात्रौ वृद्धिरित्यर्थः॥ तुलादिषड्के दक्षिणगोले सूर्ये सति तयोः
जंबूद्वीपसमुद्राद्दक्षिणभागयोः दिनरात्र्योः उभे क्षयवृद्धी उपचयापचयौ वामं व्यस्तं॥ अयमर्थः जंबूद्वीपे दिनरात्र्यो
रुत्तरगोलवद्वृद्धिक्षयक्रमेण क्षयवृद्धी स्तः॥ समुद्राद्दक्षिणभागे दिनरात्र्योर्वृद्धिक्षयौ स्त इति ननु क्षयवृद्ध्योः किम
स्मिंस्तत्त्वमित्यत आह देशक्रांतिवशादिति॥ तद्विज्ञानं तयोः क्षयवृद्ध्योः ज्ञानं क्षयवृद्ध्योः ज्ञानं संख्यामानं नि
त्यं प्रत्यहं देशक्रांतिवशात् देशः पलभाक्रांतिः सूर्यक्रांतिः एतदुभयानुरोधात्॥ पूर्वखंडस्पष्टाधिकारे क्रांतिज्या विषुव
द्भाघ्नी क्षितिज्या द्वादशोद्धृता त्रिज्यागुणाहोरात्रार्धकर्णाप्ताश्चरजासवः॥ तत्कार्मुकमित्यनेन दिनरात्र्योरर्धं उक्तमिति द्वि
गुणे दिनरात्र्योर्मानमित्यर्थसिद्धं॥ अत्रोपपत्तिः॥ निरक्षदेशे ध्रुवद्वयसंलग्नं क्षितिजवृत्तं ततः उत्तरभागे स्वस्थानक्षितिजं श्रीः

297
1941

खगोलमध्यस्थमुत्तरध्रुवादधो मुत्तरध्रुवादधो दक्षिणध्रुवादूर्ध्वमित्यत उत्तरगोले निरक्षक्षितिजादधो दक्षिणगोले ऊर्ध्वमिति
पंचदशघटिका निरक्षदेशदिनार्धं॥ क्षितिजांतरेऽपवरेण गोलक्रमेण युतहीना दिनार्धं रात्र्यर्धं च विपरीतं॥ एवं दक्षिणभागे
भीष्टदेशक्षितिजमुत्तरध्रुवादुन्नतं दक्षिणध्रुवान्नतमिति॥ निरक्षक्षितिजादभीष्टक्षितिजं गोलक्रमेणोर्ध्वमधइत्युत्तरभागा
द्व्यस्तमिति॥ ५७॥ ॥ अथोक्तस्यावधिदेशं विवक्षुः प्रथमं तदुपयुक्तान् क्रांत्यंशयोजनान्याह॥ भूवृत्तक्रांतिभा
गघ्ने भगणांशविभाजिते॥ अवाप्तयोजनैरर्कोव्यक्षाद्यात्युपरि स्थितइति॥ भूवृत्तं भूपरिधियोजनमानं प्रागुक्तं अभीष्ट
क्रांत्यंशैर्गुणितं द्वादशराशिभागैः षष्ट्यधिकशतत्रयमितैर्भक्तं लब्धयोजनैः कृत्वा सूर्यः उपरि आकाशे स्थितो वर्त्तमा
नो दक्षिण उत्तरतो वा याति गच्छति क्रांत्यभावे तु निरक्षदेशयोपर्येव परिभ्रमति॥ अत्रोपपत्तिः॥ निरक्षदेशान्मेरोरुत्तरदक्षि
णाग्राभिमुखं सूर्यः क्रांत्यंशैर्गच्छति॥ तद्योजनज्ञानं तु भगणांशैर्मेरुद्वयनिरक्षद्वयस्पष्टभूपरिधियोजनानि तदा क्रां
त्यंशैः कानीत्यनुपातेनेत्युपपन्नं॥ ५८॥ ॥ अथ दिनमानायनं गणितस्यावधिदेशज्ञानं श्लोकाभ्यामाह॥ परमा
पक्रमादेवं योजनानि विशोधयेत्॥ भूवृत्तपादाच्छेषाणि यानि स्युर्योजनानि तैः॥ ५९॥ ॥ अयनांते विलोमेन देवा
सुरविभागयोः॥ नाडीषष्ट्या सकृदहर्निशाप्यस्मिन् सकृत्तथेति॥ परमक्रांतिभागाच्चतुर्विंशतिमितान्॥ एवं पूर्वोक्तरीत्या
योजनानि भूपरिधेः पूर्वोक्तस्य चतुर्थांशात् परिवर्जयेत्॥ अवशिष्टानि यानि यत्संख्यामितानि योजनानि भवंति तैर्यो
जनैर्देवासुरविभागयोः निरक्षदेशादुत्तरदक्षिणप्रदेशयोर्यौ देशौ तयोरित्यर्थः॥ अयातीते अयने उत्तरदक्षिणाय
नसंधौ कर्कादिस्थे सूर्ये दक्षिणोत्तरायनसंधौ मकरादिस्थे सूर्ये विलोमेन व्यत्यासेन सकृदेकवारं नाडीषष्ट्या घटिषष्ट्या
अहः दिनमानं भवति अस्मिन्नेतादृशे देशे तस्मिन्नेवायनसंध्यासन्नं सकृदेकवारं तथा षष्टिघटिमिता विलोमेन रा
त्रिर्भवति॥ अपिशब्दोऽहनेन समुच्चयार्थः॥ एतदुक्तं भवति॥ कर्कादिस्थे सूर्ये निरक्षदेशादुत्तरयोजनांतरितदेशे॥ षष्टिघ
टीमितं दिनं भवति॥ निरक्षदेशाद्दक्षिणयोजनांतरितदेशे षष्टिघटीमिता रात्रिर्मकरादिस्थे सूर्ये तादृशोत्तरभागे षष्टिघ

सि॰टी॰
१०

टीमितागति॥ दक्षिणभागेतादृशोषष्टिमितंदिनमिति॥ अत्रोपपत्तिः॥ परमक्रांतियोजनानिभूवृत्तचतुर्थांशयोजनेभ्यःहीनानि निरक्षदेशान्भिन्नयोजनांतरितोदक्षिणोत्तरदेशास्तस्मान्मेरोर्दक्षिणोत्तरायंक्रमेणपरमक्रांतियोजनांतरितं॥ अतस्तत्रलं बांशाश्चतुर्विंशतिः पलांशाश्चषट्षष्टिरिति॥ तद्देशेक्रांतिवृत्तानुकारंक्षितिजमित्ययनांतेपंचदशघटीमितमहोरात्रवृ त्तचतुर्भागखंडंनिरक्षतद्देशक्षितिजयोरंतरालरूपंचरमतउक्तरीत्यादिनार्धंरात्र्यर्धंचोक्तरीत्यायथायोग्यंत्रिंशत्तद्द्विगु णंषष्टिघटीमिततन्मानंगणितरीत्योपपन्नं॥ ॥युक्तंचैतत अयनांताहोरात्रवृत्तस्यैकस्ययत्क्षितिज प्रदेशएकत्रैवसलग्नत्वात॥ द्विधासंलग्नत्वाभावात्सवहभ्रमितसूर्यपरिवर्तेषुनिः षष्टिघटीभिर्दर्शनमादर्शनंचयथायोग्यंतद्गोलस्थित्या प्रत्यक्षमेवसिद्धं॥ ६०॥ ॥अथोक्तदिनरात्रिमानगणितंतदवधिदेशपर्यंतंदक्षिणोत्तरभागयोर्नात्रेत्याह॥ तदं तरेतिषस्तेक्षयवृद्धीअहर्निशोः॥ परतोविपरीतोयंभगोलः परिकीर्तितइति॥ तदंतरंनिरक्षदेशोक्तदेशयोरंतराल दक्षिणोत्तरविभागदेशेषस्वनेषष्टिघटीमध्येक्षयवृद्धीअपचयोपचयावुक्तरीत्यादिनरात्र्योर्यथायोग्यंभवतः परतः अवधिदेशात्परिमदेशोदक्षिणोत्तरंचस्यदेवस्थाननिकटेअयंप्रत्यक्षः भगोलः नक्षत्राद्याधिष्ठितोभूतोगोलः विपरीतः ॥अवधिदेशांतर्गतदेशसंबंधिगणितविरुद्धः परिवर्तेभ्रमतितत्रोक्तरीत्यादिनरात्र्योर्दधिसपोनभवनद्वृत्यर्थः त्रिज्याधिकच[illegible]रानयनानुपपत्तेश्चरस्वरूपासंभवाच्च॥ ६१॥ ॥अथविपरीतगोलस्थितिंश्लोकाभ्यांप्रदर्शय ति॥ ऊनेभवृत्तपादेतुद्विज्यापक्रमयोजनैः॥ धनुर्मृगः सविनादेवभागेनदृश्यते॥ तथाचासुरभागेतुमिथुनेकर्कटे स्थितः॥ नष्टछायामहीवृत्तपादेदर्शनमादिति॥ द्विराशिज्यापायेक्रांत्यंशास्तेषांयोजनैः ऊर्ध्वगतैः परिधिच तुर्थांशेहीनेकृतेसतितुकारान्निरक्षदेशात्तद्योजनांतरितेदेशेदेवभागेउत्तरभागेधनुर्मकरराशिस्थोर्कस्तद्देशवासि भिर्नदृश्यते॥ धनुर्मकरस्थेर्केतेषांरात्रिः सदास्यामित्यर्थः॥ असुरभागेनिरक्षदेशाद्दक्षिणदेशेचसमुच्चयार्थः॥ तु कारात्तद्योजनांतरितप्रदेशेमिथुनकर्ककन्याराशौस्थितोर्कः॥ तत्रस्थातद्देशदेशवासिभिर्नदृश्यते॥ नष्टछायामहीवृ
श्री॰
१०

299
1941

त्तपादेभभावंत्रामायामच्छायायत्रतादृशेभूपरिधिचतुर्थांशस्सर्वस्यदर्शनंसदाकथयंतयत्रभूछायात्मिकारात्रिर्नास्तितत्रदिन मित्यर्थः॥ तथाचनिरक्षदेशात्तद्योजनांतरितोत्तरप्रदेशेकर्कमिथुनस्थोर्कोदृश्यते॥ तद्योजनांतरितदक्षिणप्रदेशेधनुर्मक रस्थोर्कोदृश्यतेइतिफलितार्थः॥ अतएवत्र्यंशयुङ्नवरसाः पलांशकायत्रतत्रविषयेकदाचन॥ दृश्यतेनमकरोनकार्मुकंकिं चकर्कमिथुनौसदोदिताविति भास्कराचार्योक्तंसंगच्छते॥ ६२॥ ॥अथान्यत्रापिविपरीतस्थितिंश्लोकाभ्यांदर्शयति॥ एकज्यापक्रमानीतैर्योजनैःपरिवर्जिते॥ भूमिकक्षाचतुर्थांशेव्यक्षाच्छेषैस्तुयोजनैः॥ ६४॥ ॥धनुर्मृगालिकुंभेषुसंस्थि तोर्कोनदृश्यते॥ देवभागेसुराणांतुदृश्यायेभचतुष्टयेइति॥ ॥एकराशिज्यायाः क्रांत्यंशयोजनैर्भूपरिधिचतुर्थांशेहीनेकृतेसति निरक्षदेशावशिष्टयोजनैः तुकारोदंतरितेदेशेदेवभागेउत्तरभागेधनुर्मकरवृश्चिककुंभराशिषुस्थितः सूर्यस्तद्देशवासिभिर्नदृ श्यते॥ असुराणांदैत्यानांनिरक्षदेशात्तद्योजनांतरितदक्षिणभागेवृषादिकराशिचतुष्टयेस्थितोर्कस्तद्देशवासिभिर्नदृश्यते॥ तुकाराद्उत्तरकारेवृषादिचतुष्टयस्थितोर्कस्तद्देशवासिभिर्नदृश्यते॥ वृश्चिकादिचतुष्टयस्थितोर्कोदक्षिणभागेतद्देशवासिभि र्नदृश्यतेइत्यर्थः॥ अतएवयत्रसाध्रिगजवाजिसंमितास्तत्रवृश्चिकचतुष्टयंनचदृश्यतेचवृषभाद्यचतुष्टयंसर्वदासमुदितंचल क्ष्यते॥ इतिभास्कराचार्योक्तंचसंगच्छते॥ ६५॥ ॥अथभूम्यराशिक्रांत्यानीतयोजनेभ्योवगलमेवग्रभागयोरपिस्थि तिवैलक्षण्यमाह॥ मेरौमेषादिचक्रार्धेदेवाः पश्यंतिभास्करं॥ सकृदेवोदितंतद्वदसुराश्चतुलादिगमिति॥ ॥मेरावुत्तर भागस्थितादेवाः मेषादिचक्रार्धेमेषादिराशिषट्केअवस्थितमर्कंसकृदेकवारंचकारादनेकवारंनिरासनिश्चयः॥ उदितंअ दर्शनानंतरंप्रथमदर्शनविषयकंनिरंतरंपश्यंति॥ असुराः मेरुदक्षिणाग्रस्थदैत्याः चदेवैः समुच्चयार्थः॥ तुलादिराशिषट्क रविंतद्वत्सकृदुदितंनिरंतरंपश्यंति॥ ६६॥ ॥अथनिरक्षदेशाद्दयनसंधौकियद्भिर्योजनैरूर्ध्वमर्कोभवतितदाह॥ भूमंड लात्पंचदशेभागेदेवेतथासुरे॥ उपरिष्टाद्व्रजत्यर्कः सौम्याथाम्यायनांगतइति॥ देवेउत्तरभागेअथवाआसुरेदक्षिणभागेनिर क्षदेशात्भूपरिधेः पंचदशभागेतत्कलयोजनांतरितेदेशेक्रमेणसौम्ययाम्यायनांगतः उत्तरायणांतदक्षिणायनांतस्थितोर्कः

उपरिष्टादूर्ध्वंव्रजतिपश्चिमाति॥यथागोलसंधौनिरक्षदेशेतथाक्रमाद्गृहयेदितिफलितार्थः॥अत्रोपपत्तिः॥भवनांतरलेकें
परमक्रांतिश्चतुर्विंशत्यंशास्तद्योजनानि॥भवृत्तंक्रांतिभागघ्नंभगणांशविभाजितमिति॥अत्रचतुर्विंशतिमितगुणभगणां
शमितहरोगुणेनापवर्त्यहरस्थानेपंचदशेति॥इंदोर्मंडलतश्चोर्ध्वस्थितास्तोपितरोरविं॥उदितंकृष्णपक्षार्धेपश्यंत्यस्तंसि
तार्धके॥भमंडलात्पंचदशेभागेइत्युक्तमुपपन्नं॥अथनिरक्षदेशाद्भूपरिधिपंचदशभागपर्यंतंसूर्यस्यदक्षिणोत्तरतोगम
नमुत्क्रान्तछायागमनंप्रतिपादयति॥तदंतरालयोश्छायायाम्योदकसंभवित्यपि॥मेरोरभिमुखंयातिपरतःस्वविभागयो
रिति॥निरक्षदेशात्पंचदशभागमध्यस्थितदक्षिणोत्तरदेशयोः छायाद्वादशांगुलशंकोर्मध्याह्नछाया अभीष्टकालिक
छायाग्रंवादक्षिणाग्रमुत्तराग्रंवासंभवति॥ एतदुक्तंभवति॥निरक्षदेशात्पंचदशांतरालस्थितदक्षिणदेशेसूर्यस्योत्तरत्वेछा
याग्रंदक्षिणं॥दक्षिणत्वेछायाग्रमुत्तरमिति॥परतः पंचदशभागांतरालदेशेस्वविभागयोः मेरोः अभिमुखमेवाग्र
योः संमुखंक्रमेणदक्षिणाग्रमुत्तराग्रंयथास्यात्तथेत्यर्थः॥छायायातिगच्छतीभवतीत्यर्थः॥अपिशब्देनपूर्वार्धार्थेनस
मुच्चयार्थः॥ ६८ ॥ ॥अथकथंपर्येतिभुवनाभिविभावयन्नितिप्रश्नोत्तरंश्लोकाभ्यामाह॥भद्राश्वोपरिगःकुर्यात्भार
तेतदयंरविः॥रात्र्यर्धंकेतुमालेतुकुरावस्तमनंतदा॥ ६९ ॥ ॥भारतादिषुवर्षेषुतद्वदेवपरिभ्रमन्॥मध्योदयार्धरा
त्र्यस्तकालान्कुर्यात्प्रदक्षिणमिति॥ ७० ॥ ॥भद्राश्ववर्षोपरिगतः सूर्यः भारतवर्षेउदयंकुर्यात्॥तत्कालात्भद्राश्व
वर्षमध्याह्नंकुर्यात्॥तदातस्मिन्कालेकेतुमालवर्षेअर्धरात्रंकुरौकुरुवर्षेअस्तमनंस्वास्तंकुर्यात्॥तत्कालादुक्तवर्षयोरंत
रालेदिनस्यगतंरात्रिशेषंवारात्रेश्चतद्यथायोग्यंकुर्यात्॥अतिस्थूलदेशग्रहणेयथाश्रुतमिदंभाव्यंकिंचित्सूक्ष्मदेशग्रहणे
तुयमकोटिलंकारोमकसिद्धपुराणितदंतर्गतानितच्छब्दवाच्यानिज्ञेयानि॥लंकापुरेर्कस्ययदोदयःस्यात्तदादिनार्धं
यमकोटिपुर्यां अधस्तनःसिद्धपुरेस्तकालःस्याद्रोमकेरात्रिदलंतदेवेतिभास्कराचार्योक्तं॥भगोलेउक्तनगराणांभूप श्रीः
रिधिचतुर्थांशांतरत्वात्संगच्छते॥अथभारतादिषुत्रिषुवर्षसंज्ञेषुभारतकेतुमालकुरुवर्षेषुतद्वत्भद्राश्ववर्षेणरंगवत् ११

301/1941

एककारात्तत्प्रत्यनाधिकव्यवच्छेदः॥परिभ्रमन्परिभ्रमेणस्वस्वाभिमतस्थानोपरिस्थितिंकुर्वन्सन्सूर्यः प्रदक्षिणंयथास्यात्तथा
सव्यक्रमेणस्वस्थानादिक्रमेणेतियावत्॥उक्तचतुर्वर्षेषुमध्योदयार्धरात्र्यस्तकालान्मध्याह्नोदयार्धरात्र्यस्तसंज्ञान्
कालान्कुर्यात्॥एतदुक्तंभवति॥भारतवर्षादिपरिगतेर्केभारतकेतुमालकुरुभद्राश्ववर्षेषुक्रमेणमध्याह्नसूर्योदयार्धरा
त्रास्ताः स्युः॥केतुमालवर्षोपरिगतेर्केकेतुमालकुरुभद्राश्वभारतवर्षेषुक्रमेणमध्याह्नसूर्योदयार्धरात्रास्ताः॥कुरुवर्षो
परिगतेर्केकुरुभद्राश्वभारतकेतुमालवर्षेषुक्रमेणमध्याह्नसूर्योदयार्धरात्रास्ताः भवंतीति॥ननुग्रहाणांगतिसद्भावात्
प्रतिदेशंयाम्योत्तरयोर्ग्रहगमनंप्रतिक्षणंचविलक्षणंचभासतांपरंतुनक्षत्राणांगत्यभावात्प्रतिक्षणंभ्रमेनैकत्रावस्थिता
भावेपिप्रतिदेशमेकरूपावस्थानंकुतोनएवंध्रुवयोःपरिभ्रमस्याप्यभावात्सदासर्वत्रएकरूपावस्थानदर्शनान्नतिश्चेत्त
त्राह॥ ॥ध्रुवोन्नतिर्भचक्रस्यनतिर्मेरुंप्रयास्यतः॥निरक्षाभिमुखंयातुर्विपरीतेनतोन्नतेइति॥मेरुंमेरोरुत्तरप्र
दक्षिणाग्रंवातदभिमुखंप्रयास्यतःगच्छतःपुरुषस्यध्रुवोन्नतिःक्रमेणोत्तरदक्षिणयोर्ध्रुवयोरौच्च्यंभवति॥भचक्रस्यक्रांत
वृत्ताधिष्ठितगोलमध्यभागवृत्तस्यनतिःक्रमेणदक्षिणोत्तरयोर्नतत्वंभवति॥निरक्षदेशाभिमुखंगच्छतःपुरुषस्यनतो
न्नतेपूर्वोक्तेव्यस्तेभवतः उत्तरभागस्थपुरुषस्यनिरक्षाभिमुखंगच्छतःपूर्वस्थानापेक्षयोत्तरध्रुवस्यनतत्वंपूर्वस्थानापेक्ष
यादक्षिणध्रुवस्यनतत्वंभचक्रस्योन्नतत्वमिति॥ ७१ ॥ ॥ अथकुतएवमित्यर्थःकथंपर्येतिभगणःसग्रहोयं
किमाश्रयेतिप्रश्नस्योत्तरंभचक्रभ्रमणवस्तुस्थितिमाह॥भचक्रंध्रुवयोर्बद्धमाक्षिप्तंप्रवहानिलैः॥पर्येत्यजस्रंतन्न
द्धाग्रहकक्षायथाक्रममिति॥ ॥भचक्रंनक्षत्राधिष्ठितमूर्तगोलरूपंध्रुवयोर्दक्षिणोत्तरयोःबद्धंग्रस्तंनिबद्धं
नियुतवायुगतिनागोलाकारेणप्रतिबद्धंप्रवहानिलैःप्रवहवाय्वंशैःस्वस्वस्थानस्थैःआक्षिप्तंस्वस्वस्थानेभिघातं
प्राप्तंसत्अजस्रंनिरंतरंपर्येतिपश्चिमाभिमुखंभ्रमतीत्यर्थः॥ननुनक्षत्रचक्रंवायुनाभ्रमतिग्रहास्त्वधोधःस्थः
संबंधाभावात्कथंभ्रमंतीत्यतआह॥तन्नबद्धाइतिग्रहाःशन्यादीनांकक्षाःमार्गाःवाय्वंशवृत्तरूपाःभचक्रांतर्गता

सू०टी०
१२
काशस्थः यथाक्रमंभपोध: तत्स्था: महाप्रवहवायुगोलस्थापितभचक्रे वायुसूत्रेणबद्धा: अतोभचक्रेणभ्रमंति॥ तत्रस्थः ग्रहा
अपिभ्रमंतीतिरिक्तं॥ तथाचप्रवहवायुगोलमध्यस्थविषुवद्गतपूर्वापरनिरक्षदेशेध्रुवयोः क्षितिजस्थत्वात्॥ भचक्रस्यमस्तकोप
रिभ्रमणात्समंवक्राभिमुखंभ्रयात् ध्रुवोच्चंभवति॥ ततआसन्नत्वात्भचक्रंनतंभवतिनोदूरत्वादितिनतोदूरत्वादितिसर्वयुक्तं
॥ ७२ ॥ ॥ अथपित्र्यंमासेनभवतीतिप्रश्नयोरुत्तरमाह॥ सकृदुद्गतमब्दार्धपश्यंत्यर्कसुरासुराः॥ पितरः शशिगाः
पक्षंस्वदिनंचनराभुवीति॥ यथांदेवदैत्याः एकवारमुदितंसूर्यंसौरवर्षार्धपर्यंतंपश्यंतिनराः भूमौस्वदिनपर्यंतमर्कंपश्यंति॥
पित्र्यमासेनभवतिनाडीषष्ठ्यात्मानुषमितिसर्वयुक्तं॥ अतएवविधूर्ध्वभागेपितरोवसंतः स्वाधसुधादीधितिमामनंति
॥पश्यंतितेर्कंनिजमस्तकोर्ध्वेदर्शंयतोस्मात्द्युदलंतदेषां॥ भाधांतरत्वाद्यविधोरधस्थंतस्मान्निशीथः खलुपौर्णमास्यां
कृष्णेरविः पक्षदलेभ्युदेतिशुक्लेस्तमेत्यर्थतएवसिद्धमिति॥ भास्कराचार्येणविस्तीर्योक्तंगच्छति॥ ७३ ॥ ॥ अथप्रसंगा
दूर्ध्वस्थस्याल्पभगणात् अरूर्ध्वाधिकभगणान्युक्त्याप्रतिपादनार्थंप्रथमंकक्षायाः ऊर्ध्वाधः क्रमेणमहदल्पत्वंतत्रस्थभागानां
महत्वाल्पत्वप्रदेशात्वंचाह॥ उपरिस्थस्यमहतीकक्षाल्पाधः स्थितस्यच॥ महत्याकक्षयाभागामहांतोल्पास्तथाल्पयेति॥
ऊर्ध्वस्थग्रहस्यकक्षावायुवृत्तमार्गरूपामहतीमहत्परिधिप्रमाणा अधस्थस्यग्रहस्यकक्षा अल्पपरिधिप्रमाणाचनिश्चयार्थः
लघुकक्षाणांमहत्कक्षांतर्गतत्वेनमहत्कक्षाणांचांतर्गतलघुकक्षात्वेनोर्ध्वाधः स्थयोर्महदल्पपरिधिकेकक्षे अन्यथोक्तस्वरूपा
नुपपत्तेः॥ एवंमहतीवृत्तपरिधौद्वादशराशिभागानांसमत्वेनांकनेभागाः एकैकभागप्रदेशाः महत्याकक्षयाकृतामहांतः
बहुस्थलात्मिकाः लघुनिवृत्तेतदंकनेतथाभागाः अल्पयाकक्षयाकृताअल्पाः अल्पस्थलात्मकाः क्रमेणैकैकभागप्रमा
णमधिकाल्पंनसमंचक्रांशरूर्ध्वन्युपपत्तेरितितात्पर्यार्थः॥ ७४ ॥ ॥ अथार्ध्वाधः क्रमेणग्रहभगणभोगकालयोः
महदल्पत्वमाह॥ कालेनाल्पेनभगणंभुंक्तेल्पभ्रमणाश्रितः॥ ग्रहःकालेनमहतामंडलेमहतिभ्रमन्इति॥ अल्पभगणाश्रितः कौ:
अल्पभ्रमणंपरिधिमानंयस्यासाल्पभ्रमणा॥ अधस्थकक्षास्थोग्रहः अल्पेनसमयेनभगणंद्वादशराशिभोगंभुंक्तेभतिक्रमते॥ १२

303
1941

महतिमंडलेऊर्ध्वस्थकक्षायामित्यर्थः॥ भ्रमवशात्गच्छन्महताबहुनासमयेनद्वादशराशीन्भुंक्तेवक्ष्यमाणयोजनगतेरभिमत
त्वात्॥ ७५ ॥ ॥ अथातएवोर्ध्वाधः क्रमेणग्रहयोर्भगणातुल्यकालेल्पाबहवोभवंतीतिसोदाहरमाह॥ स्वल्पयातुबहून्भुं
क्तेभगणान्शीतदीधितिः॥ महत्याकक्षयागच्छंततः स्वल्पंशनैश्चरः॥ स्वल्पप्रमाणयाकक्षयातुकारादितिकामंचंद्रः बहुप्र
माणान्भगणान्बहुवारंद्वादशराशीनित्यर्थः॥ भुनक्ति॥ महत्प्रमाणयाकक्षयागच्छन्शनिः ततश्चंद्रात्स्वल्पंभगणंअल्पप्र
माणान्भगणान्जात्यत्यभिप्रायेणैकवचनं॥ अल्पवारंद्वादशराशीन्भुंक्ते॥ अतएवशनैश्चरइति॥ ७६ ॥ ॥ अथदिना
द्वमासहोराणामधिपाःनसमाःकुतइतिप्रश्नोत्तरंश्लोकाभ्यामाह॥ मंदादधः क्रमेणस्युश्चतुर्थादिवसाधिपाः॥ वर्षाधिप
स्तथातद्वत्तृतीयाश्चप्रकीर्तिताः॥ ७७ ॥ ॥ ऊर्ध्वक्रमेणशशिनोमासानामधिपाः स्मृताः॥ होरेशाः सूर्यतनयादधोधः
क्रमशस्तथेति॥ शनेः आकाशादधःकक्षाक्रमेणचतुर्थसंख्याकाः ग्रहाः दिनाधिपतयोवारेश्वराःभवंति॥ यथाशनिरविभौ
चंद्रभौमबुधगुरुशुक्राइतिक्रमः॥ वर्षस्यषष्ट्यधिकशतत्रयदिनात्मकस्यस्वामिनः तद्वन्मंदाधःक्रमेणतृतीयसंख्याकाः
ग्राहाः उक्ताः चसमुच्चयार्थः तत्क्रमश्चयथाशनिभौमरविशुक्रचंद्रगुरुसूर्यबुधाइति॥ चंद्रात्मकाशादूर्ध्वकक्षाक्रमेणग्रहाः
मासानांत्रिंशद्दिनात्मकानांस्वामिनः कथिताः तत्क्रमश्चंद्रबुधशुक्ररविभौमगुरुशनयइति॥ शनेः सकाशादधः क्रमशः
अधःक्रमेणहोरेशाः होतिरिलग्नंभवनस्यचार्धमितिपंचदशभागात्मकहोराणाद्विद्वादशरात्रेचतुर्विंशतिहोराणा
मित्यन्येस्वामिनः तथामासेश्वरवदव्यवहिताः कथिताः यथातत्क्रमः॥ शनिगुरुभौमरविशुक्रबुधचंद्राइतिमत्रशनेः
सर्वोर्ध्वस्थत्वात्॥ चंद्रस्यसर्वाधस्थत्वात्ताभ्यामधःऊर्ध्वक्रमः क्रमेणोक्तः अन्यग्रहस्यचाधित्वाभ्युपगमेविनिगमाविरहाप
त्तेः॥ ननुशनेराद्यावधित्वेनसर्वस्यादौदिनवर्षहोराणांस्वामित्वंनवाचंद्रस्याद्यावधित्वेनसर्वमासादौमासेशत्वंपूर्वखंडोक्ता
नीतानर्हशोर्विशधापत्तेः॥ अत्रोपपत्तिः॥ होरारूपलग्नानांक्रांतिवृत्तेधःक्रमेणमेषादीनांसंभवादूर्ध्वकक्षातोधःक्रमेण
होरेशात्वंयुक्तं॥ एवमहोरात्रेचतुर्विंशतिहोराःसमतदस्तत्रयोहोरेशाःगताःचतुर्थोहोरेशोद्वितीयदिनप्रारंभेएवप्रथमे

सू०टी०उ० ९२

होरेशावारदितीयदिनेशः एवमुत्तरत्रापि॥एवमेतदारक्रमेणमासवर्षक्रमेणवारादतिसूर्यवर्षेशादन्निमवर्षेशोध: कक्षाक्रमेणत
नीयउत्तरोत्तरएवंसावनमासेद्वावारेवारक्रमेणमासेश्वरस्याधिकात्वेनिकक्षोर्ध्वक्रमेणवारक्रमेणेकांतरितत्वात्कक्षोर्ध्वक्रमेण
मासेश्वरउत्तरोत्तरइत्युपपन्नंमंदादित्यादिश्लोकद्वयं॥ ७८ ॥ ॥अथग्रहस्यकक्षाकिंमानाइतिप्रश्नस्योत्तरंविवक्षु: प्रथमं
नक्षत्राणांकक्षामानमाह॥भवेद्भकक्षातीक्ष्णांशोर्भ्रमणंषष्टिताडितं॥सर्वोपरिष्टाद्भ्रमतियोजनैस्तैर्भमंडलमिति॥सर्वस्य
भ्रमणंकक्षापरिधिमानंयोजनात्मकंस्वरवार्थेकसुराणंवाइतिवक्ष्यमाणंषष्ट्यागुणितंसत्नक्षत्राणांकक्षानक्षत्राधिष्ठितगोल
स्यमध्यवृत्तंस्यात्॥तेननक्षत्रकक्षामितैर्योजनै:भमंडलंनक्षत्राधिष्ठितगोलमध्यवृत्तंसर्वोपरिष्टात्॥चंद्रादिसप्तग्रहेभ्यो
उपरिदूरंभ्रमतिभगोलादर्भित:परिभ्रमति॥अत्रोपपत्ति:॥नक्षत्राणांगत्यभावेनैरथ्यत्स्यर्धनक्षत्रमंडलंतत्रस्थंगत्यासर्व
कक्षांतरान्नक्षत्रमध्यभावेत्यंककत्मतिकल्पनयानयानान्यथानुपपत्तिनवाकल्प्यांहरोरूपमहारराशेरितिकल्केनौछाद्रांसे
फलवृष्ट्यपेक्षितत्वाद्भस्तानुपातोलाघवात्सूर्यगति: षष्टिकलामितांभगवताकृतामनक्षत्रगतेरतेभावाच्चेतिषष्टिताडि
तमित्युपपन्नं॥ ७९ ॥ ॥अथग्रहकक्षाणांमानज्ञानार्थंआकाशकक्षामानंकियतीत्कस्याप्तिरितिप्रश्नस्योत्तरमाह॥
कल्पोक्तचंद्रभगणागुणिता:शशिकक्षया॥आकाशकक्षासाज्ञेयाकरव्याप्तिस्तथारवेरिति॥कल्पोक्तचंद्रभगणा एतेनस
हस्रगुणिता:कल्पेसूर्यभगणादयइत्युक्तायुगचंद्रभगणा:सहस्रगुणिता:कल्पचंद्रभगणाइत्यर्थ:॥चंद्रकक्षयास्वत्रया
ब्धिद्विदहनाइतिवक्ष्यमाणगुणिता:सानभिताआकाशकक्षापरिधिरूपाज्ञेयाधीमंतमिश्नंप॥नन्वित्याकाशस्यकथंप
रिधिस्तत आह॥करव्याप्तिरितिसूर्यस्यकिरणप्रचारस्तथाआकाशकक्षापरिमितइत्यर्थ:॥तथाचयद्देशावच्छेदेनसर्व
किरणप्रचारस्तद्देशावछिन्नाकाशगोलस्यब्रह्मांडकग्रहांतर्गतस्यपरिधिमानंसंभवत्येवेतिभाव:॥अत्रोपपत्ति:समनंत
रमेवयद्गणभक्तारवककक्षातस्यकक्षास्यादित्युक्तेभगणकक्षाघात:स्वकक्षामितोअत:चंद्रभगणकक्षयो:काल्प
योर्घात:खकक्षातुल्यएवेतिदिक्॥ ८० ॥ ॥अथग्रहाणांकक्षानयनंयोजनगत्यानयनंचाह॥सैवयत्कल्पभगणे श्री: ९३

र्नकानतभ्रमणंभवेत॥कुवासरैर्विभाज्याद्रू:सर्वेषांप्रागगति:स्मृतेति॥ सार्ककरव्याप्तिरूपा आकाशकक्षायत्कल्पभगणै:यस्यक
ल्पभगणै:भक्ताफलंतस्यकक्षाभवेत॥ स्वकारौनिश्चयार्थेत्वकक्षाकल्पादिसावनैर्भक्ताप्राप्तफलंसर्वेषांउक्तभगणसंबंधिनी
ग्रहादीनांभइ:दिवसस्यादिनसंबंधिनीत्यर्थ:॥प्रागतिरेव॥कल्पेस्वकक्षामितयोजनानिग्रह:क्रामतीति॥कल्परविसावन
दिनैराकाशकक्षामितयोजनानितदैकरविसावनदिनेनकानीत्यनुपातेनस्वगतिर्योजनात्मिकाप्रत्यहंतुल्यैवोपपन्नं॥अथ
योजनात्मकगते:कलात्मकगतिंसाधनमाह॥भुक्तियोजनजासंख्यासेंदोर्भ्रमणसंगुणा॥स्वकक्षाप्तातुसातस्यतिथ्याप्ताग
तिलिप्तिकाइति॥ ॥गतियोजनोत्पन्नायासंख्यासासंख्याचंद्रस्यभ्रमणसंगुणाकक्षयागुणिता:स्वकक्षायाप्ता:अभि
मतग्रहस्यगतिकला:भवंति॥अत्रोपपत्ति:॥कक्षायोजनैश्चक्रकलास्तदागतियोजनै:काइत्यनुपातेनगतिकला:तत्रापि
चंद्रकक्षापंचदशभक्ताचक्रकलाइतिचक्रकलास्वरूपंध्रुतमित्युपपन्नं॥ ८२ ॥ ॥अथकिमुत्तेधाइतिप्रश्नस्योत्तर
माह॥कक्षास्कर्णगुणितामहीमंडलभाजिता॥तत्कर्णाभूमिकर्णोनाग्रहोच्चंस्वदलीकृताइति॥ग्रहाणांयोजनात्मिकाक
क्षास्वाणनयोजनानिशतान्यष्टौभूकर्णोद्विगुणानितिउक्तभूव्यासेनषोडशशतेनगुणिताभूपरिधिनातद्वगतेनभक्ताफलं
तस्या:कक्षाया:कर्णा:व्यासाभवंति॥एतेभूव्यासेनहीना अर्धिता:संत:संग्रहीतव्याससंबंधिग्रहोच्चंग्रहस्योच्चनाम्भसं:
सकाशाद्भवति॥अत्रोपपत्ति:॥भूपरिधिनाभूव्यासस्तदाकक्षयोजनै:कइत्यनुपातेनकक्षाव्यासास्तेअर्धिता:कक्षाव्या
सार्धंभूगर्भपरिधिप्रदेशांतरालस्वरूपंस्पष्टात्तदंतरज्ञानार्थंभूव्यासार्धेनहीनंभूपृष्ठात्कक्षोच्चतत्रकक्षाव्यासा:स्व्या
संत:अर्धिता:कृता:उभयथासमत्वात॥कक्षोच्चमेवग्रहोच्चंग्रहस्यतत्राधिष्ठितत्वादिति॥एतेनास्मिन्ग्रहोच्चेभ्य:परस्परां
तरज्ञानंसुगममिति॥किमंतराइतिप्रश्नस्योत्तरंस्वत:सिद्धमेवेतिदिक्॥ ८४ ॥ ॥अथोर्ध्वक्रमेणास्थिता:कक्षा:वि
वक्षु:प्रथमंचंद्रस्यकक्षांबुधज्ञाप्रोक्तकक्षांचाह॥स्वत्रयाब्धिद्विदहना ३२४००० कक्षातुहिनदीधिते:॥ज्ञशीघ्रस्यां
करवाद्रितिकृतभ्रून्येंदवस्ततइति॥चंद्रस्यकक्षासहस्रगुणितासिद्धरामा: ३२४००० तुकाराद्रागमप्रामाण्येनांगीकार्या:

305/1941

सू॰टी॰ १४

अन्यथा अन्योन्याश्रयापत्तेः तत्रार्धं चंद्रादर्धं बुधशीघ्रोच्चस्य कक्षा नवखटंतवदोदशाः १०४३२०९ यद्यपि बुधशीघ्रोच्चं आकाशेत्य
त्यसंनेतित्कक्षा कि रखुक्ता ॥ तथा च बुधशीघ्रोच्चभगणानीतकक्षायां गत्यनुरोधेन चंद्रार्धगायां बुधो भ्रमतीत्युर्वस्त्वंशकं कुर्ने
दवदृति कक्षांके अन्यथा भगणैक्यादेककक्षायां रविबुधशुक्राणामवस्थितौ मंडलभंगापत्तेरितस्वनार्थता ॥ ८४ ॥ ॥
अथ शुक्रशीघ्रोच्चस्य कक्षां सूर्यबुधशुक्राणामभिन्नां कक्षां चाह ॥ शुक्रशीघ्रस्य सप्ताग्निरसाग्निरसषट्यमाः ।२७६४६३०
ततोर्कबुधशुक्राणां खखाथैकसुराणवइति ४३३२५०० ॥ ॥ तदर्धं शुक्रशीघ्रोच्चकक्षा द्विव्यंगवेदषट्संपक्षाः ॥ २७६४
३० शुक्रवस्तन स्वनार्थमुक्ताः ततस्तदर्धं सूर्यबुधशुक्राणां भगणैक्यादभिन्ना कक्षा खखपंचभदेवाब्धयः ॥ ४३३२
५०० यद्यपि बुधशुक्रयोः सूर्याधः स्थत्वा केवलं स्वयं कक्षैव वक्तुमुचिता तथापि कक्षयोः कोभगणस्तदाकल्परविसाव
नदिनैः स्वकक्षामितयोजनानि तदाहर्गणेन कानीत्यनुपातेन तद्योजनैः कदत्यनुपातेन सर्वबुधशुक्राणामभिन्नत्वसि
ध्यर्थं बुधशुक्रयोरप्युक्ता अन्यथा समत्वानुपपत्तेरिति ॥ ८५ ॥ ॥ अथ भौमस्य कक्षां चंद्रमंदोच्चस्य कक्षां चाह ॥
कुजस्याप्यंकशून्यांकषड्देकभुजंगमाः ॥ चंद्रोच्चस्य कृताष्टाब्धिवस्वद्रिव्यष्टवह्नयइति ॥ भौमस्य अपिशब्दात्सूर्याद्धर्ध
कक्षा अंकशून्यांषड्देकभुजंगाः ८१४६९०९ चंद्रमंदोच्चज्ञानार्थोक्ता ८६ ॥ अथ गुरुराह्वोः कक्षे आह ॥ कृतर्तुमु
निपंचाद्रिगुणं दुविषयाः गुरोः स्वभानोर्वेदनखाष्टद्वयैलार्थरवकुंजराइति ॥ बृहस्पतेर्भौमचंद्रोच्चादर्धं कक्षा वेदांगमुनि
पंचस्वररामदंद्रशराः ५१३७५७६४ राहोः कक्षा वेदांगाष्टयमसप्तपंचाशीतिः ८०५७२८६४ इयमदृश्यापिरा
हौर्गतयोजनैर्ज्ञानार्थमुक्ता ॥ अत्रापि पातस्य वक्रशुध्यमध्यध्येयं ॥ ८७ ॥ ॥ अथ शनेः कक्षां नक्षत्राधिष्ठित
नंगोलमध्यकक्षां चाह ॥ पंचबाणाक्षिनागर्तुरसाद्र्यर्काः शनेस्ततः ॥ भानां रविखशून्यांकवस्वरंध्रशराश्विनइति ॥ ततः
बृहस्पतेः राहोर्वार्धं शनेः कक्षा पंचपंचद्व्यष्टषट्समार्काः १२७६८२५५ ॥ नक्षत्राणां गोलमध्यकक्षा शनेरू श्रीः
र्धं द्वादशनवशताष्टनवतत्वानि ॥ २५९८९००१२ यद्वा भचक्रकक्षा तीक्ष्णांशोर्भ्रमणं षष्टिनाडितमित्यनेन भकक्षायाद्धा १४

307/1941

दशांशांतरित्वादयुक्तं ॥ तथापि सैव यत्कल्पभगणैरित्यनेन सूर्यकक्षावा उक्ता या द्वादशधोयवस्थानिबंधने योरगोपिकक्षार्थं
भगवता गृहीतत्वाददोषः ॥ एतेनाधोव्यवस्थार्थं न्यूनत्वेन त्यागो द्वाभ्यधिकत्वेनोर्ध्वमेकाधिग्रहणं कक्षानिबंधनेकृतमिति
सूचितं ॥ ८८ ॥ ॥ ननु चंद्रकक्षा आगमप्रामाण्येनांगीकारे सर्वकक्षाणामागमप्रामाण्यापत्त्या सैव यत्कल्पभगणैर्भक्तात
द्भ्रमणं भवेदिति कक्षानयनं व्यर्थं ॥ अन्यथाकाशकक्षाज्ञानासंभवापत्तेरिति खव्योमखत्रयखसागरषट्कनागव्योमा
ष्टशून्ययमरूपनगाष्टचंद्राः ॥ ब्रह्मांडसंपुटपरिभ्रमणं समंतादभ्यंतरे दिनकरस्य करप्रसारइति ॥ वेदांगाष्टाशीतिनख
खसमध्वतयः प्रयुतामिताः योजनानि पूर्वार्धोक्तानि ब्रह्मांडसंपुटपरिभ्रमणं ब्रह्मांडगोलस्य परिधिः कल्पभगणकक्षा
हतित्वयाकाशकक्षायाः पूर्वस्वरूपोक्तेरिति न पौनरुक्त्यं ॥ अभ्यंतरे ब्रह्मगोलांतः सूर्यस्य अभितः किरणानां प्रचारः ॥
सूर्यकिरणप्रचारदेशस्य परिधिस्तुल्यः एतेन ब्रह्मांडगोलांतः परिधिर्न बाह्य इति सूचितं ॥ ८९ ॥ ॥ अथाग्रिम
ग्रंथस्यासंगतित्वपरिहारार्थमध्यायसमाप्तिं फक्किकयाह ॥ इतिसूर्यसिद्धांते भूगोलाध्याय इति भिन्नछंदसात्रारब्ध
प्रसंगः समाप्त इत्यर्थः ॥ पूर्वखंडे ग्रंथैकदेशस्याधिकारसंज्ञा कृता उत्तरखंडे ग्रंथैकदेशस्याध्यायसंज्ञा भिन्नप्रसं
गवशात्कृतेति ध्येयं ॥ रंगनाथेन रचिते सूर्यसिद्धांतटिप्पणे उत्तरार्धसमाप्तोयं भूगोलाध्यायसंज्ञकः ॥ १ ॥ ॥
इतिश्रीसकलगणकसार्वभौमबल्लालदैवज्ञात्मजरंगनाथगणकविरचिते गूढार्थप्रकाशके उत्तरखंडे भूगोलाध्या
यः संपूर्णः ॥ ॥ अथ मुनिर्मुनीन्प्रतिश्लोकाभ्यामाह ॥ अथगुप्ते शुचौ देशे स्नातः शुचिरलंकृतः ॥ संपूज्य
भास्करं [illegible] भक्त्या ग्रहान्भाज्यथ गुह्यकान् ॥ पारंपर्योपदेशेन यथाज्ञातं गुरोर्मुखात् ॥ आचार्यः शिष्यबोधार्थं
सर्वं प्रत्यक्षदर्शिवानिति ॥ ॥ अथशब्दो मंगलार्थः द्वितीयोथशब्दः पूर्वोक्तानंतर्यार्थकः ॥ गुप्ते रहसि शुचौ देशे प
वित्रदेशस्थाने आचार्यः सूर्यांशपुरुषो मयासुराध्यापकः स्नातः कृतस्नानः शुचिः शुद्धमनाः अलंकृतः हस्तकर्णकंठा
दिभूषणभूषितः निश्चिंतत्वद्योतकमिदं विशेषणं अन्यथा गृहादिव्यवहारादिव्याकुलतया मनःस्थैर्यानुपपत्तेः भास्क

म०टी०उ०
१५

रंभीस्सर्वस्वोपजीव्यंभक्त्या आराध्यत्वेनज्ञानरूपेणसंप्रत्यनमस्कारस्तुतिविषयंकृत्वा ग्रहान् चंद्रादिग्रहान्सर्वस्य प्रत्यगुरोश
ग्रधानाज्ञानार्थं॥ भानिनक्षत्राणिराशीश्वग्रह्यकानयक्षादीन्स्फुरद्देवतान्संप्रत्यसमन्वयाकथोत्रानुसंधेयः॥ गुरोः स
र्यस्यमुखात्वदनारविंदात्पारंपर्योपदेशेनसूर्येणमुनीन्प्रत्युक्तं॥ मुनिभिः सूर्यांशपुरुषंप्रत्युक्तमितिपरंपरयाक
थनेन॥ वस्तुतस्तुशिष्यस्याग्रहोत्सादनार्थंज्ञानातिगोप्यत्वसूचनमेनदुक्तप्राकृतं॥ कथमन्यथास्मत्पाचीश्वापुरुषाम
यासुरंप्रत्यवदद्दूरस्थमुनीन्प्रतिकथनेऽप्यनोर्कः॥ स्वांशपुरुषंप्रतिकथनेन्नूद्यतः कुतः कारणाभावाच्च॥ यथास्वशक्त्या
यादृशंज्ञातंस्वौक्रमवगतंशिष्यबोधार्थंमयास्फुरस्यभ्रमज्ञानोत्सादनार्थंसर्वभागध्यायोक्तंमत्यक्षंदर्शिवान्दृ
त्यक्षंदर्शितवानित्यर्थः॥ २ ॥ ॥ कथंदर्शितवानितिमयासुरंप्रत्युक्तंसूर्यांशपुरुषवचनस्यानुवादंसूर्यांशपुरुषो
मयास्फुरंप्रतिगोलबंधोद्देशांतदुपक्रमंवश्लोकाभ्यामाह॥ ॥ भूमिगोलस्यरचनांकुर्यादाश्चर्यकारिणं॥ अभीष्टंप्र
थिवीगोलंकारयित्वातुदारवं॥ दंडंतन्मध्यगंमेरोरुभयत्रविनिर्गतं॥ आधारकक्षाद्वितयंकक्षावैषुवतीतथा॥ भू
भगोलस्यभूगोलादभिन्नः साक्षिनस्यनक्षत्राधिष्ठितगोलस्यप्राग्ध्यायोक्तार्थंस्यरचनांस्थितिज्ञानार्थंदृष्टांतात्म
कगोलस्यनिर्मितंसुधीर्गणकोगोलशिल्पज्ञः कुर्यात्॥ ननुत्वदुक्तेनसर्वज्ञानंभवतीतिदृष्टांतगोलनिबंधनंव्यर्थमे
वेत्यतआह॥ आश्चर्यकारिणमिति उक्तप्रतीत्यद्भुताद्भुतबुद्धिजनयित्री॥ तथाचोक्तेनसाधारणसर्वगभागयोर्लो
कावस्थानस्यतद्भागस्थभगोलप्रदेशस्यचभूमेर्निराधारादेश्चज्ञानंमनसिसप्रतीतिकंनभवत्यतोदृष्टांतगोलस्थिति
यसंभवात्तन्निबंधनमत्यावश्यकमितिभावः॥ कथंरचनांकुर्यादित्यतआह॥ अभीष्टमिति॥ भूर्वागोलंभूगोलंअ
भीष्टंस्वेच्छाकल्पितपरिधिप्रमाणंदारवंकाष्ठघटितंसच्छिद्रंकारयित्वाकाष्ठशिल्पज्ञद्वाराकृतंत्वेत्यर्थः मेरोरनु
कूलरूपंदंडकाष्ठंतन्मध्यगंतस्यकाष्ठघटितभूगोलस्यमध्यच्छिद्रमध्येप्रथितंतथास्थितंउभयत्रभूगोलस्थ
व्यासप्रमाणच्छिद्रस्याग्राभ्यांबहिरित्यर्थः॥ विनिर्गतंएकाग्रादन्यतराग्रावशिष्टदंडप्रदेशतुल्यंनिस्सृतंउभया श्लो: १५

309
1941

ग्राभ्यांतुल्यौदंडप्रदेशौयथास्यातांतथाकुर्यादित्यर्थः॥ भगोलनिबंधनार्थंआधारवृत्तद्वयमाह॥ आधारकक्षाद्वितयमितिभगो
लनिबंधनार्थंमादावाश्रयार्थंवृत्तयोर्वृत्तयोर्द्वितयंऊर्ध्वाधःस्थितंकस्वस्तिकनेणैकमेकमेवंद्वयमित्यर्थः॥ भूगोलादुभयतस्तुल्यांतरे
णदंडप्रदेशयोः प्रोतमेकंवृत्तंकुर्यात्तुल्यंवृत्तमपरंतदूर्ध्वच्छेदेनदंडप्रोतंकुर्यादितिसिद्धोर्थः॥ एतद्वृत्तद्वयव्यतिरेकेणभूगो
लाद्दभितोगोलानिबंधनानुपपत्तेः॥ भगोलनिबंधनारंभमाह॥ कक्षेतिवैषुवतीविषुवत्संबंधिनीवृत्तपरिधिः॥ विषुवद्वृत्तमि
त्यर्थः॥ तथा आधारवृत्तद्वयस्यार्धच्छेदेनभगोलमध्यवृत्तानुकल्पेनगणकेनानिबंधमित्यर्थः॥ ४॥ ॥ अथमेषादिद्वादश
राशीनामहोरात्रवृत्तनिबंधनमन्यदपिश्लोकपंचकेनाह॥ भगणांशांगुलैः कार्यादलितैस्तिस्रएवताः॥ स्वाहोरात्रार्धकर्णै
श्चतत्प्रमाणानुमानतः॥ ५ ॥ ॥ क्रांतिविक्षेपभागैश्चदलितैर्दक्षिणोत्तरैः॥ स्वैस्वैरपक्रमैस्तिस्रोमेषादीनामपक्रमात्॥
॥ ६॥ ॥ कक्षाः प्रकल्पयेत्ताश्चकर्कटादीनांविपर्ययात्॥ तद्वत्तिस्रस्तुलादीनांमृगादीनांविलोमतः॥ ७॥ ॥ याम्यगो
लाश्रिताः कार्याः कक्षाधारद्वयोरपि॥ याम्योदग्गोलसंस्थानांभानामभिजितस्तथा॥ ८॥ ॥ सप्तर्षीणामगस्त्यस्य
ब्रह्मादीनांप्रकल्पयेत्॥ मध्येवैषुवतीकक्षासर्वासामेवसंस्थितेति॥ भगणांशांगुलैः द्वादशराशिभागैः षष्ट्यधिक
शतत्रयैः परिमितांगुलैः दलितैः समविभागेनखंडितैअंकितैरित्यर्थः॥ ताः कक्षाः वंशशलाकावृत्तात्मकाः तिस्रः त्रि
संख्याकाः एवकारादंकनेवृत्तेचन्यूनाधिकव्यवच्छेदः॥ शिल्पज्ञेनगोलगणितज्ञेनकार्याः॥ एताः पूर्ववृत्तप्रमाणेननका
र्याः॥ इत्यभिप्रायेणाह॥ स्वाहोरात्रार्धकर्णैरिति॥ स्वशब्देनमेषादित्रिकंतस्यप्रतिराशौअहोरात्रवृत्तस्यार्धकर्णः॥ व्या
सार्धंद्युज्यानाभिरित्यर्थः॥ चकारात्कार्यास्वस्वद्युज्याभितेनव्यासार्धेनमेषादित्रयाणांवृत्तत्रयंकुर्यादित्यर्थः॥ न
नुस्पष्टाधिकारोक्ताहोरात्रार्धकर्णानयनेयुक्त्याभावात्तैर्वृत्तनिर्माणंकुतः कार्यमित्यतआह॥ तत्प्रमाणानुमानतइति॥
विषुवतीकक्षाप्रमाणानुमानाद्वृत्तत्रयंकार्यंयतः॥ विषुवद्वृत्तंपूर्ववृत्तसमंतथातदनुरोधेनमेषांतवृत्तमल्पंतदनुरोधेन
वृषांतवृत्तमल्पंतदनुरोधेनमिथुनांतवृत्तमध्यमित्युत्तरोत्तरमल्पव्यासार्धंवृत्तंस्वाहोरात्रवृत्तमिति॥ द्युज्याव्यासार्धेन

वृत्तनिर्माणयुक्तियुक्तं ॥ क्रांतिज्यावर्गोनात् त्रिज्यावर्गान्मूलस्याहोरात्रवृत्तव्यासार्धत्वादिति भावः ॥ वृत्तत्रयांसि भंक्तत्वाद् दृष्टांत
गोलनिबध्नाति ॥ क्रांतिविक्षेपभागेरिति ॥ क्रांतिस्तस्य विषुवद्वृत्तप्रदेशाद् दक्षिणप्रदेशापेक्षया ॥ चकाराद् आधारवृत्तखंडैः दक्षि
तेः ॥ समविभागेनखंडितैरंकितैः दक्षिणोत्तरैर्विषुवद्वृत्तप्रदेशयोर्दक्षिणोत्तरात्मके उक्तलक्षणैः स्वकीयैः स्वकीयैः स्व
स्वराशिसंबंधैः व्यपक्रमैः स्पष्टाधिकारानीतकांत्यंशैः मेषादीनां मेषराशित्रयांतानां मेषांतवृषांतमिथुनांतानामि
त्यर्थः ॥ तिस्रः त्रिसंख्याकाः आद्रिर्मिताद्यन्तरूपाः कक्षाः अपक्रमात् अपशब्दस्योपसर्गत्वात् ॥ क्रमादित्यर्थः ॥ प्रकल्पये
त्विशाल्यज्ञगणकोविषुवद्वृत्तानुरोधेनाधारवृत्तद्वये उत्तरतोनिबध्नीयादित्यर्थः ॥ कर्कादीनामाह ॥ तादृतिमेषादिकक्षाः नि
बध्वाः कर्कादीनां कर्कसिंहकन्यानामादिप्रदेशानां विपर्ययात् व्यत्यासात् चकारः समुच्चयात् तेनप्रकल्पयेदित्यर्थः ॥ मिथु
नांताद्वृत्तं कर्कादेः वृषांतवृत्तं सिंहादेः मेषांतवृत्तं कन्यादेरितिफलितं ॥ तुलादीनामाह ॥ तद्वदितितुलादीनां तुलावृश्चिक
धनुषां तिस्रः अन्यास्त्रिसंख्याकाः कक्षाः तद्वत् एकद्वित्रिराशिक्रांत्यंशैः तुलांतवृश्चिकांतधनुरंतानां याम्यगोलाधि
ताः विषुवद्वृत्ताद् दक्षिणभागे आधारवृत्तद्वये निबध्वाः कार्याः गणकेनेति शेषः ॥ मकरादीनामाह ॥ मृगादीनामिति वि
लोमतः क्रमात् तुलादिसंबध्वाः कक्षाः मकरादीनां भवंति ॥ धनुरंतवृत्तं मकरादेः वृश्चिकांतवृत्तं कुंभादेः तुलांतवृत्तं मीना
देरितिफलितं ॥ ताराणां कक्षानिबंधनमाह ॥ कक्षाधारा इति ॥ भानाम् अश्विन्यादीनां सप्तविंशतिनक्षत्रबिंबानां याम्यो
त्तरगोलसंख्यानां विषुवद्वृत्ताद् दक्षिणोत्तरभागयोर्यथायोग्यमवस्थितानां यन्नाक्षत्रध्रुववासस्पष्टक्रांतिरुत्तरा तन्नक्षत्रा
णामुत्तरभागावस्थितानां ॥ येषां स्पष्टक्रांतिर्दक्षिणा तेषां दक्षिणभागावस्थितानामित्यर्थः ॥ द्वयोर्दक्षिणोत्तरभागयोः
अपिशब्दो याम्योत्तरनक्षत्रक्रमेण व्यवस्थार्थकः ॥ कक्षाधारात् कक्षाणाम् आधारवृत्तद्वयात् तयोरित्यर्थः सप्तम्यर्थे पं
चमी कक्षाः स्वस्वस्पष्टक्रांतिज्योत्पन्नद्युज्याव्यासार्धेन प्रमाणेन वृत्ताकाराः प्रकल्पयेत् ॥ शिल्पज्ञो निबंधयेत् ॥ अन्ये
षामप्याह ॥ अभिजिदिति अभिजिन्नक्षत्रस्य सप्तर्षिबिंबानाम् अगस्त्यनक्षत्रबिंबस्य ब्रह्मसंज्ञकतारायुक्त लुब्धकापवत्सा श्री: १९

311/1941

दिनक्षत्रबिंबानां चकारोऽनुसंधेयः तथा कक्षा यथायोग्यं प्रकल्पयेदित्यर्थः ॥ निबंधनप्रकारमुपसंहरति ॥ मध्ये इति सर्वासामुक्तक
क्षाणां मध्ये तुल्यभागेनाधारवृत्तमध्यप्रदेशे ॥ एवकारादन्ययोगव्यवच्छेदः ॥ वैषुवती कक्षा विषुवसंबंधिनी वृत्तमासन्ना अवस्थि
ता भवति तथा शिल्पकः कक्षां निबंधयेत्यर्थः ॥ विषुवद्वृत्तात् स्वस्पष्टक्रांत्यंतरेण स्वद्युज्याव्यासार्धप्रमाणेनाहोरात्रवृत्तमाधा
रवृत्तयोः निबंधयेदिति निष्कृष्टार्थः ॥ ९ ॥ ॥ अथ गोले मेषादिराशिसन्निवेशं सार्धश्लोकेनाह ॥ तदाधारयुते रूर्ध्वमयनेवि
षुवद्द्वयं ॥ विषुवत्स्थानतो भागैः स्फुटैर्भगणसंश्रितात् ॥ १० ॥ ॥ क्षेत्राण्येवमजादीनां तिर्यग्ज्याभिः प्रकल्पयेत् ॥ तदाधारयुते
तत् विषुवद्वृत्तं आधारम् आधारवृत्तं तयायुतेः तत्संपातात् ऊर्ध्वमुपरि अंतिमाधारवृत्तयोः संपाते अयने दक्षिणोत्तरायनसंधि
स्थानोत्तरदक्षिणायनसंधिस्थाने भवतः ॥ अत्रोर्ध्वपदसंचाराद् आधारवृत्तमध्योधरयोराधारंतिर्यग्मंडलाकारं तेनैनयुतं विषु
वद्वृत्तस्योर्ध्वाधराधारवृत्ते ऊर्ध्वमध्यसंपातः तत्रोर्ध्वसंपातात्मकराधस्त्रैराशिवृत्तं चतुर्विंशत्यंशैस्तदाधारवृत्ते उत्तरतो मकरल
ग्नं तत्रोत्तरस्यं दक्षिणायनसंधिस्थानमिति ॥ अयनाद् विषुवस्य विपरीतस्थितित्वाद् ऊर्ध्वशब्दोद्योतितविपरीताधःशब्दसंब
धाद् विषुवद्द्वयं भवति ॥ तात्पर्यार्थस्तु तिर्यग्मंडलाकाराधारवृत्तविषुवद्वृत्तसंपातौ पूर्वापरौ क्रमेण मेषादितुलादिस्थे वि
षुवस्थाने भवत इति ॥ अथ राशीनां सन्निवेशमाह ॥ विषुवत्स्थानत इति ॥ विषुवत्प्रदेशात् स्फुटैः राशिसंबंधिभिस्त्रिंशद्भि
स्तैरंशैः भगणसंचरात् राशिसाकल्यसन्निवेशात् तिर्यग्ज्याभिः उक्तवृत्तानुकारातिरिक्तानुकारस्थप्रदेशैः अजा
दीनां मेषादीनाम् एवम् अयनविषुवत्कल्पनरीत्यातरंतराल क्षेत्राणि स्थानानि सुधीर्गणकः प्रकल्पयेद् अंकयेत् ॥ तद्यथा पूर्वदिक
स्थविषुवत्स्थानात् गोलवृत्तद्वादशांशखंडप्रदेशेन मेषांताहोरात्रवृत्ते पूर्वभागे यत्र स्थानं तत्र मेषावस्थानं तस्मात् तदंतरेण वृ
षांताहोरात्रवृत्ते यत्प्रदेशं वृषांतस्थानं अस्मादयनसंधिस्थानं तत्प्रदेशांतरेण मिथुनांतस्थानं अस्मात् पश्चिमभागे कर्का
होरात्रवृत्तेन तदंतरेण कर्कांतस्थानं अस्मादपि सिंहांताहोरात्रवृत्तेन तदंतरेण तुलांतस्थानं अस्मादपि वृश्चिकांताहोरात्रवृत्ते
तदंतरेण वृश्चिकांतस्थानं अस्मादपि तदंतरेणायनसंधिस्थानं धनुरंतस्थानं अस्मात् कुंभाद्यहोरात्रवृत्तेन तदंतरेण मकरांतस्थानं

सू०टी०उ० ९७ अस्मादपि मीनाद्यहोरात्रवृत्तांतरं तेन कुंभांतस्थानं मीनादिस्थानं च अस्मादपि पूर्वं विषुवे मीनांतस्थानं मेषादिस्थानं च तदं
तरेणाभिव्यक्तं ॥ ननु गोले वृत्ते द्वादशराशीनां सत्वदन्यथा चक्रकल्पनानुपपत्तेरित्यत्रैकत्वनाभावात्कथं राश्यंकनं ॥ राशिविभा
गानुपपत्तिश्च अंतरालभागस्याकाशात्मकत्वादित्युक्तो वृत्तकथनफलेन पूर्वोक्तं स्पष्टयन्सूर्यस्तद्वृत्ते भगणभोगं करोती
त्यत आह ॥ अयनादयनं चैव कक्षा तिर्यक्तथापरा ॥ क्रांतिसंज्ञा तया सूर्यः सदा पर्येति भास्वर्यन्निति ॥ ११ ॥ ॥ अयनस्था
नमारभ्य पश्चिमे तेन तदयनस्थानपर्यंतं चकार आरंभसमाप्त्योर्भिन्नायनस्थाननिरासार्थकः अपरगोले आधारवृत्तरूपा
कक्षांतथा राश्यंकमार्गेण एवकारोऽन्यमार्गव्यवच्छेदार्थकः ॥ तिर्यग्युक्तवृत्तानुकारि विलक्षणानुकारात्क्रांतिसंज्ञा क्रमणं क्रांति
ग्रहगमनभोगज्ञानार्थं तन्नांतसंज्ञमुपकल्पितं अयनविषुवद्द्वयसंसक्तक्रांतिवृत्तं द्वादशराश्यंकितगोले निबंधयेदिति
सर्वार्थः ॥ भासयन्भुवनानि प्रकाशयन्सन्सस्सूर्यः एतेन चंद्रादीनां निरासः सदा निरंतरं तया क्रांतिसंज्ञया कक्षया प
र्येति स्वशक्त्या गच्छन्भगणपरिपूर्तिभोगं करोति सूर्यगत्यनुरोधेन नियतं क्रांतिवृत्तं कल्पितमिति भावः ॥ ननु चंद्राद्याः
क्रांतिवृत्ते कुतो न गच्छंति कुत्र च गच्छंतीत्यत आह ॥ चंद्राद्याश्च स्वकैः पातैरपमंडलमाश्रिते ॥ ततोपकृष्टा दृश्यंते विक्षेपांते
ष्वपक्रमादिति ॥ चंद्रादयोऽर्कव्यतिरिक्ताः ग्रहाः स्वकैः स्वीयैः पातैः पाताख्यैर्देवतैः अपमंडलं क्रांतिवृत्तमाश्रिते स्वस्व
भोगस्थानेऽधिष्ठिते सत ः क्रांतिवृत्तांतर्गतग्रहभोगस्थानादित्यर्थः ॥ दक्षिणत उत्तरतो वा विक्षेपांते पुगणितागतविक्षेपक
लाग्रस्थाने पुरुषपुजैर्दृश्यंते ॥ तथा च क्रांतिवृत्तं यथा विषुवन्मंडले वस्थितं तथा क्रांतिवृत्तेः पमस्थाने तलसूत्रांतस्थाने वलय
मुक्तं परमविक्षेपकलाभिस्तात्रिभांतरस्थानादूर्ध्वाधः क्रमेण दक्षिणोत्तरतो लग्नं च वर्तविक्षेपवृत्तं चंद्रादिगत्यनुरोधेन स्वं
स्वं भिन्नं कल्पितं तत्र गच्छंतीति भावः ॥ १२ ॥ ॥ अथ त्रिप्रश्नाधिकारोक्तलग्नमध्यलग्नयोः स्वरूपमाह ॥ उदयक्षितिजे
लग्नमस्तंगच्छत्तद्वशात् ॥ लंकोदयैर्यथासिद्धं खमध्योपरि मध्यममिति ॥ ॥ उदयक्षितिजे क्षितिजवृत्तस्य पूर्वदि
क्प्रदेशे इत्यर्थः ॥ लग्नं क्रांतिवृत्तं यत्तत्प्रदेशेन प्रवहवायुना संसक्तं तत्प्रदेशो मेषाद्यवधिभोगात्तेनोदयलग्नमुच्यत इ श्रीः ९७

त्यर्थः ॥ प्रसंगादस्तलग्नस्वरूपमाह ॥ अस्तमिति तद्वशात् उदयलग्नानुरोधवदस्तं अस्तक्षितिजं क्षितिजवृत्तस्य पश्चिमदिक्प्रदे
मित्यर्थः ॥ क्रांतिवृत्तं गच्छन्यत्प्रदेशेन प्रवहवायुनास्तलग्नं तत्प्रदेशो मेषाद्यवधिभोगेनास्तलग्नमुच्यत इत्यर्थः ॥ तथा च भि
तिजोर्ध्वसदा क्रांतिवृत्तसद्भावादुदयास्तलग्नयोः षड्राश्यंतरं सिद्धं ॥ लंकोदयैः निरक्षदेशीयराश्युदयासुभिः यथा त्रिप्रश्नाधि
कारोक्तप्रकारेण यत्संख्यामितं सिद्धं निष्पन्नं मध्यमं मध्यलग्नं तत्खमध्योपरि खस्यदृश्याकाशविभागस्य मध्यं मध्यगत
दक्षिणोत्तरसूत्रवृत्ताकारप्रदेशरूपं तत्र खमध्यं भास्कराचार्याभिमतं ॥ स्वस्वस्तिकतल्लग्नस्य कदाचित्कत्वेन सदानुत्पन्नः ॥
तस्योपरिस्थितं क्रांतिवृत्तं याम्योत्तरवृत्ते यत्प्रदेशेन लग्नं तत्प्रदेशो नमेषाद्यवधिभोगेन मध्यलग्नमुच्यत इति तात्पर्यार्थः ॥
॥ १३ ॥ ॥ अथ त्रिप्रश्नाधिकारोक्तांत्यायाः स्वरूपं स्पष्टाधिकारोक्तचरज्यायाः स्वरूपं चाह ॥ मध्यक्षितिजयोर्मध्ये या
ज्या सांत्याभिधीयते ॥ ज्ञेया चरदलज्या च विषुवक्षितिजांतरमिति ॥ ॥ या उत्तरगोले त्रिज्या चरज्यायुति रूपा दक्षिणगो
ले चरज्योनत्रिज्यारूपा त्रिप्रश्नाधिकारोक्ता अंत्या सा मध्ये याम्योत्तरवृत्तजं स्वाभिमतदेशं क्षितिजवृत्तं तयोर्मध्ये अंतरा
ले अहोरात्रवृत्तस्यैकदेशे प्रदेशे या ज्या उदयास्तसूत्रयाम्योत्तरसूत्रसंपातादहोरात्रयाम्योत्तरवृत्तसंपातावधिसूत्ररूपा
व्यासत्त्वानुकारात्तु ज्या अहोरात्रक्षितिजवृत्तसंपातद्वयबद्धोदयास्तसूत्रस्याहोरात्रवृत्तव्याससूत्रत्वाभावात् ॥ अतए
वोत्तरगोले त्रिज्याधिकं संगच्छते ॥ अभिधीयते गोलज्ञैः कथ्यते ॥ नन्वंत्योपजीव्यचरज्यैव किंस्वरूपा यया तत्सिद्धिरि
त्यत आह ॥ ज्ञेयेति ॥ विषुवन्मंडलं परिकीर्तितं तदिति त्रिप्रश्नाधिकारोक्तेन द्वयोः शब्दयोरेकार्थवाचकत्वान्निर्यगाधारवृ
त्तानुकारं निरक्षक्षितिजवृत्तं मुन्मंडलं क्षितिजं स्वाभिमतदेशक्षितिजवृत्तं अनयोरंतरं चकारो विशेषार्थकः ॥ तुकारपरसं
नन्दंतरालस्थिताहोरात्रवृत्तैकदेशस्यार्धज्यारूपं कुसूत्रमंतरं विशेषात्मकं तथा च स्वनिरक्षदेशोस्वदेशयोरुदयास्तसू
त्रयोरंतरमूर्ध्वाधरमिति फलितार्थः ॥ चरदलज्या दलरालस्थिताहोरात्रवृत्तैकदेशरूपचराख्यखंडकस्य न तु दलमर्ध
स्यान्वयेऽज्येत्यर्थः गोलज्ञैर्ज्ञातव्या ॥ १४ ॥ ॥ ननु पूर्वश्लोकद्वयोक्तं क्षितिजस्याज्ञानादुर्बोधमित्यतः श्लोकार्धेन क्षितिजस्व

313/1941

स०टी०ऽ० १८

रूपमाह॥ कृत्वोपरिवस्त्रकंठानंमध्येक्षितिजमंडलमितिभूगोलस्यकक्षीयंस्थानंभवटेडोकदेवारूपंडपरिसर्वप्रदेशोभ्यर्द्धकृत्वाभव
स्यमध्यनाटडाभगोलार्द्धोधः खंडसंधौयद्वर्तलक्षितिजत्संतटनुरोधेनदृष्टांतगोलक्षितिवर्त्तक्षिरसंसक्तकार्यमितिभाव:
॥ १५ ॥ ॥अथैनंदृष्टांतगोलंस्थिरंकृत्वास्यस्वतएवपश्चिमभ्रमोयथाभवतितथाप्रकारमाह॥ वस्त्रेछन्नंबहिश्चापिले
कालोकेवेष्टितं॥ अमृतस्रावयोगेनकालभ्रमणसाधनमिति॥ बहि: गोलोपरीत्यर्थ:॥गोलाकारेणवस्त्रेणछन्नंछादितंदृ
ष्टांतगोलंचकारादृस्योपरितनवृत्तानामंकनकार्यं॥लोकालोकेनवेष्टितंदृश्यादृश्यसंधिस्थवृत्तेनक्षितिजाख्येनसंसक्तमपि
समुच्चयं॥एतेनक्षितिजवस्त्रछन्नंनकार्यंकिंतुवस्त्रोपरिक्षितिजंगोलसंसक्तंकेनापिप्रकारेणस्थिरंयथाभवतितथाकार्य
मितितात्पर्यार्थ:॥अमृतस्रावयोगेनएतादृशंगोलंकृत्वाजलप्रवाहाधोघातेनकालभ्रमणसाधनंषष्टिनाक्षत्रघटीभि
र्दृष्टांतगोलस्यभ्रमणंयथाभवतितथासाधनंकारणंकार्यंस्वयंवहगोलयंत्रंकार्यमित्यर्थ:॥एतदुक्तंभवति॥दृष्टांतगो
लंवस्त्राछन्नंकृत्वातदाधारयष्ट्यग्रेदक्षिणोत्तरभागेक्षिप्तनलिकयो: क्षेप्यंयथायष्ट्यग्रंध्रुवाभिमुखंस्यात्॥तथाय
ष्ट्यग्रतुमार्गगजलप्रवाहेणपूर्वाभिमुखेनतस्याध: पश्चाद्भागेघातोभिघातस्यात्तथा अस्यादर्शनार्थंमेववस्त्रछन्नमुक्तं
अन्यथागोलवृत्तांतरवकाशमार्गेणजलघातदर्शनभ्रमेणचमत्कारानुत्पत्ते:॥आकाशाकारतासंपादनार्थंमेववस्त्रछ
न्नमुक्तं॥इदंवस्त्रमार्द्रंयथानभवतितथाचिक्कणवस्तुनामदनादिनालिप्तकार्यंक्षितिजरचनाकारेणाधोगोलोदृश्योयथास्या
त्तथापरिस्वारूपाभित्ति: कार्यापरंतुदक्षिणयष्टिभागस्तत्रशिथिलोयथाभवति अन्यथाभ्रमणानुपपत्ते:॥पूर्वदिक्स्थ
परिवाविभागाद्बहिर्गोलप्रवाहोदृश्य: कार्यइत्यादिस्वबुध्यैवज्ञेयमिति॥ १६ ॥ ॥ अथयदिजलप्रवाहस्तत्रन
संभवतितदाकथंस्वयंवहंदृष्टांतगोलोभवतीत्यतस्तत्स्वयंवहार्थमुक्तंवगोप्यकार्यमित्याह॥ तुंगबीजसमायुक्तंगोल
यंत्रंप्रसाधयेत्॥गोप्यमेतत्प्रकाशोक्तंसर्वगम्यंभवेदिह॥ ॥दृष्टांतगोलरूपयंत्रंतुंगबीजसमायुक्तंतुंगोमहादेवस्त
बीजंबीजंपारदइत्यर्थ: तेनयोजितंसत्तत्साधयेत्गणक: शिल्पज्ञ: प्रकर्षेणयथानक्षत्रपष्टिघटीभिर्गोलभ्रमस्तथा श्रीः १८

पारदप्रयोगेणसिद्धंकुर्यादित्यर्थ:॥एतदुक्तंभवतिनिरुद्धगोलबहिर्भूतपष्टिभागयोर्यष्ट्योःस्थानद्वयोस्थानत्रयमेवानेमिपरिधिरूपांउ
त्कीर्यतांताम्रपत्रादिनाचिक्कणवस्तुलेपनाद्बाधतत्रछिद्रंकुर्वान्मार्गेणपारदोर्धपरिधौपूर्णोदियद्वतरार्धपरिधौजलंचदेयंततोमुद्रितो
छिद्रंकृत्वायष्ट्यग्रेभित्तिस्थनलिकयो: क्षेप्यंयथागोलोलरिक्षोभवतितत: पारद: जलाकर्षितपष्टि: स्वयंभ्रमतिलक्षाश्रितोगोलश्चएतत्व
त्तेषेवस्त्रछन्नमाकाशाकारतासंपादनार्थमेवनोक्तिकान्दइति॥नान्वियंस्वयंवहक्रियातिव्यक्तानोक्तेत्यतआहगोप्यमिति॥ एतत्स्वयंवह
कारणंगोप्यमप्रकाश्यंकुतइत्यतआहप्रकाशोक्तमिति॥अतिव्यक्ततयोक्तंस्वयंवहकरणंइहभूलोकेसर्वगम्यसर्वजनगम्यंभवेत्तथाच
सर्वत्रैवस्तुनिचमत्कारानुत्पत्तेश्च॥मत्कृत्यर्थंसर्वत्रनप्रकाश्यमित्याशयेनतत्करणंव्यक्तंनोक्तमितिभाव:॥ १७ ॥ ॥नुत्वेयागोप्य
त्वेनोक्तंमयाकथमवगंतव्यंमादृशैरन्यैश्चकथमवगंतव्यमित्यत: सार्धश्लोकेनाह॥तस्मात्गुरूपदेशेनरचयेद्गोलमुत्तमं॥युगेयुगेस
मुच्छिन्नारचनेयंविवस्वत:॥ १८ ॥ ॥प्रसादात्कस्यचिद्भूय: प्रादुर्भवतिकामतइति॥तस्मात्स्वयंवहकरणगोप्यत्वात्गुरूपदेशेनपरंपरा
प्राप्तगुरोर्निर्व्याजकथनेनगोलंदृष्टांतगोलंउत्तमंस्वयंवहात्मकंगणक: कुर्यात्॥तथाचमयातुभ्यमुक्ताग्रंथेगोप्यत्वेनातिव्यक्तानोक्ते
तिभाव:॥अन्ये: कथंज्ञेयमिदमित्यतआह॥युगेइत्यादिविवस्वत: सूर्यमंडलाधिष्ठातु: जीवविशेषस्यस्वयंरूपरचनाक्रियायुगेयुगे
बहुकालेइत्यर्थ:॥समुच्छिन्नालोकेलुप्ताकस्यचिद्भाग्यवशात्प्रसादनुग्रहात्भूय: वारंवारंइच्छयाप्रादुर्भवतिव्यक्ताभवतीत्यर्थ:॥त
थाचयथामत्तस्त्वयावगतंतथान्यस्मात्मादृशाद्न्यैरवगंतव्यं॥कालस्यानिरवधित्वात्सृष्टेरनादित्वाच्चेतिभाव:॥अथोक्तस्वयंवहाति
यारीत्यास्वयंग्रहगोलातिरिक्तान्यपिस्वयंवहयंत्राणिकालज्ञानार्थंसाध्यानितत्साधनंरहसिकार्यमितिवाह॥ ॥कालस्वसा
धनार्थायतत्त्वायंत्राणिसाधयेत्॥एकाकीयोजयेद्बीजंयंत्रेविस्मयकारिणीति॥ ॥तथायथास्वयंवहगोलयंत्रंसाधितंतदृदि
त्यर्थ:॥कालस्वसाधनार्थायतत्त्वायंत्राणिसाधयेत्॥ एकाकीयोजयेद्बीजंयंत्रेविस्मयकारिणीति॥ कालस्यदिनरात्र्यादे: सूक्ष्म
ज्ञाननिमित्तंयंत्राणिस्वयंगोलातिरिक्तानिस्वयंवहयंत्राणिसाधयेत्॥ गणक: शिल्पादिस्वकौशल्येनकारयेत्॥ यंत्रेकालसा
धकेविस्मयकारिणिस्वयंवहरूपतयालोकानामुत्पन्नाश्चर्यस्यकारिणिस्तेबीजंस्वयंवहतासंपादकंकारणंएकाकीएकस्यनि

315/1941

स०टी०
१०

कोद्वितीयः संप्रयोजयेत् शिल्पज्ञतया स्वयमेव निष्पादयेदित्यर्थः॥ अन्यथाद्वितीयस्यज्ञानेन तन्मुख्यत्वकल्पनाहार्दस्य लोकचमणगोच
रतायां करोति स्वसंभावितायां विस्मयानुपपत्तेः॥ १९॥ ॥अथैषां स्वयंवहयंत्राणां दुर्घटत्वात् शंक्वादियंत्रैः कालज्ञानं ज्ञेयमित्यत आ
ह॥ शंकुयष्टिधनुश्चक्रैश्छायायंत्रैरनेकधा॥ गुरूपदेशाद्विज्ञेयं कालज्ञानमतंद्रितैः॥ ॥छायासाधकयंत्रैः अनेकधानानाविधगणि
तप्रकारैः स्वगुरूपदेशात् स्वाध्यापकस्य निर्व्याजकथनात्॥ अतंद्रितैः अभ्रमैः पुरुषैः कालज्ञानं॥ दिनगतादिज्ञानं विज्ञेयं सस्थमत्वेना
वगम्यं॥ एतत्सर्वं सिद्धांतशिरोमणौ भास्कराचार्यैः स्पष्टीकृतं॥ तत्र शंकुस्वरूपं समतलमस्तकपरिधिभ्रमसिद्धो दंतिदंतज शंकुः॥ त
च्छायातः श्रीकं ज्ञानं दिग्देशकालानामिति यष्टियंत्रं च॥ त्रिज्याविष्कंभार्धवृत्तकलादिगंकितं तत्र॥ दत्वाग्रां प्राक्पश्चात् द्युज्यारतं च त
न्मध्ये तत्परिधौ च संकं यष्टिर्निश्चयुनिक्षितः केंद्रे॥ त्रिज्यांगुलाभिधेयाच स्याग्रायान्तरं यावत्॥ तावत्यां मौर्व्यां यत् द्विति वक्त्रे धनुर्भवेत
त्रदिनगतशेषनाड्यः प्राक्पश्चात्स्युः क्रमेण वमितिचक्रयंत्रं तु चक्रं चक्रांशांकितं परिधौ च लयच्छंखलाविकाधारं॥ धात्रीत्रिभआधा
रा कल्प्याभार्धं च रवार्धं च तन्मध्ये सूक्ष्माक्षसिद्धा वा कौभिमुखने मिकंधार्यं॥ भूमेरुन्नतभागास्तत्राक्षछायया भुक्ता॥ नतवार्धं तत्र
नताउन्नतलवसंगुणं द्युदलं॥ द्युदलोन्नतांशभक्तं नाड्यः स्फुटाः परैः प्रोक्ता इति धनुर्यंत्रं तु दलाकृतंचक्रमुशंति चापमिति॥ अत्रयंत्र
विलसभ्यमत्रेषां निरूपण विस्तारो विगणितादि विचारश्चापेक्षित इति मंतव्यं॥ २०॥ ॥ अथ घटियंत्रादिभिश्च मत्कारियंत्रैर्वो
सर्वोपजीव्यं कालं सूक्ष्मं साधयेदिति कालसाधनमुपसंहरति॥ तोययंत्रं कपालाख्यं जलयंत्रं वक्ष्यमाणं तदाद्यत्रयमन्येषां ते यंत्रे
र्वालुकायंत्रप्रभृतिभिः सापेक्षघटीयंत्रैः मयूरनरवाहनैः मयूराख्यं स्वयंवहयंत्रानिरपेक्षं नरयत्रं शाकाख्यं छायायंत्रं स्वादिष्टं
वानरयंत्रं स्वयंवहं निरपेक्षं एते समसूत्ररेणुगर्भैः सूत्रसहितारेणवो धूलयो गर्भे मध्ये येषां तैः सूत्रप्रोताः पक्षिसंख्याकाः मदु
ष्टिकामयूरोदरस्थमुखात् घटिकांतरेण स्वत एव भ्रमः सरंतीति॥ लोकप्रसिद्ध्यातात् द्रोणयंत्रे इत्यर्थः॥ तोययंत्रैः कपालाद्यैः म
यूरनरवाहनैः ससूत्ररेणुगर्भैश्च सम्यक् कालं प्रसाधयेत्॥ यद्वा सूत्राकारेण रेणवः सिकतांशाः गर्भे उदरे यस्य तादृशं यंत्रं वा
लुकायंत्रं प्रसिद्धं तेन सहितैर्मयूरादियंत्रैर्मयूराद्युक्तयंत्रैर्वालुकायंत्रेण वेति सिद्धार्थः॥ चकारस्तोययंत्रकपालाद्यैरित्यनेन श्रीः १०

317/1941

समुच्चयार्थः॥ जानीयादित्यर्थः॥ २१॥ ॥ननु मयूरादिस्वयंवहयंत्राणि कथं साध्यानीत्यतस्तत्साधनप्रकारा बहवो दुर्गमाश्च सं
तीत्याह॥ पारदाराम्बुसूत्राणि शुल्बतैलजलानि च॥ बीजानि पांसवस्तेषां प्रयोगास्तेपि दुर्लभाः इति॥ तेषु मयूरादिस्वयंवहार्थं एते प्र
योगाः प्रकर्षेण योज्याः प्रकर्षस्तु यावदभिमत सिद्धिः एते के इत्यत आह॥ पारदाराम्बुसूत्राणि पारदयुक्ताः आराः यथा च सिद्धां
तशिरोमणौ॥ लघुकाष्ठजसमचक्रे समसुषिराः समांतरा नेम्यां॥ किंचिद्वक्रा योज्याः सुषिरस्यार्धं पृथक् तासां॥ रसपूर्णेन च चक्रं
ह्याधाराक्षस्थितं स्वयं भ्रमतीति॥ अंबु जलस्य प्रयोगः सूत्राणि सूत्रसाधनप्रयोगः शुल्बं शिल्पनैपुण्यं तैलजलानि तैलयुक्त
जलस्य प्रयोगः चकारात्तयोः पृथक् प्रयोगोपि तथा च सिद्धांतशिरोमणौ॥ उत्कीर्य नेमिमथवा परितो मदनेन संलग्नं तदुपरि ताल
दलाद्यं कृत्वा सुषिरं रसं क्षिप्त्वा छिद्रेणैनावत्तावद्रसैकपार्श्वे क्षिप्त जलं नान्यतो याति पिहितछिद्रं ततश्चक्रं भ्रमति स्वयं जलाकृष्टं ता
म्रमयस्यांकुशरूपनलस्य अंबुपूर्णस्य एकं कुंडगजलांतः द्वितीयमग्रं त्वधोमुखं च बहिः युगपन्मुक्तं चेत्तत्केन कुंडाद्बहिः पतितं
नेम्यां बद्धघटिकाचक्रं जलयंत्रवत्तथाधार्यं॥ जलकप्रच्युतसलिलं पतति यथा तत् घटीमध्ये॥ भ्रमति तत्सातितं पूर्णघटीभिः
समाकृष्टं॥ चक्रच्युतं सपुनरुदककुंडं याति प्रणालिकया इति॥ बीजानि केषलं तुंगबीजप्रयोगः पांसवः धूलिप्रयोगाः ते उक्ताः प्र
योगाः अपिशब्दात् प्रयोगेषु सुगमतरा इत्यर्थः॥ दुर्लभाः साधारणत्वेन मनुष्यैः कर्तुमशक्या इत्यर्थः॥ अन्यथा प्रतिक्षणं स्वयं
वहानां प्राचुर्यापत्तेः॥ इयं स्वयंवहविद्या समुद्रांतार्णिवासिजनैः किरंग्याख्यैः सम्यगभ्यस्तेति॥ कुहकविद्यात्वादत्र विस्तरानु
पयोग इति संक्षेपः॥ २२॥ ॥अथ कपालाख्यं जलयंत्रमाह॥ ताम्रपात्रमधश्छिद्रं न्यस्तं कुंडेमलांभसि॥ षष्टिमज्जत्यहोरा
त्रे स्फुटं यंत्रं कपालकमिति॥ यत्ताम्रघटितं पात्र अधश्छिद्रं अधोभागे छिद्रं यस्य तत् अमलांभसि निर्मलजलं विद्यते यस्मिन्
तादृशे कुंडे वृद्धांडे न्यस्तं धारितं सत् अहोरात्रे नाक्षत्राहोरात्रे षष्टिः षष्टिवारमेव नन्यूनाधिकं मज्जति अधश्छिद्रमार्गेण जला
गमनेन जलपूर्णतया निमग्नं भवति तत्कपालकं कपालमिव कपालकं घटखंडानां कपालपदवाच्यत्वात्॥ घटार्धसंधिना धाकारं
यंत्रं घटीयंत्रं स्फुटं सूक्ष्मं तत् घटनं तु शुल्बस्याष्टभिः पलैः विहितं यत् षडंगुलोच्चं द्विगुणायतास्यं तद्भसा षष्टिपलैः प्रपूर्यं पात्रं

स॰टी॰उ॰
५०

घटार्धप्रमितं घटीस्यात्॥ सत्यं शंखमापत्रयनिर्मितायाहस्तः शलाकाचतुरंगुलास्यात्॥ विश्वंतथा प्राक्तनमत्रपात्रं शर्यंतेनाडिकयां बुभिरुद्दिति व्यक्तं भगवतातुसूक्ष्ममुक्तं॥ २३॥ ॥ अथशंकुयंत्रं दिवैकालनानार्थना प्यदिस्याद॥ नरयंत्रं तथा साधुदिवावावि मलेरवौ॥ छायासंसाधनैः प्रोक्तं कालसाधनमुत्तममिति॥ विमलं मेघादिव्यवधानरूपमलेनरहिते सूर्येएत द्रूपेदिनेचकारएव कारार्थस्तेनसाभ्रदिने व्यवच्छेदः नरयंत्रं द्वादशांगुलशंकुयंत्रं तथा घटीयंत्रवत् कालसाधकसाधुसूक्ष्मं अभ्रोनेत्यर्थसिद्धं॥ न नुशंकोः छायासाधकं नकालसाधकत्वं तेनतस्यकथंयत्रत्वं कालसाधकवस्तुनोयंत्रत्वप्रतिपादनादित्यतआह॥ छायासंसाध नैरिति इदं शंकुरूपनरयंत्रं छायायाः सम्यक्सूक्ष्मत्वेनसाधनैः अपगमैः कृत्वाकालसाधनं दिनगतादिकालस्यकारणं उत्तमं॥ अन्ययंत्रे भौस्तान्निरंतस्तयाविश्लेषात्तथाच्छायासाधकत्वेनैवछायाधारशंकोः कालसाधकत्वमितिनयंत्रत्वव्याघातः अ तएवसाभ्रदिनेरात्रौचउपयुक्तः नरस्यछायायंत्रोपलक्षणत्वात् यष्टिधनुश्चक्राण्यपतथेतिध्येयं॥ अथादितएतदंतग्रंथतात्प र्यकफलकथनेनाभिक्रामपिखंडद्वयं क्रोडयति॥ ग्रहनक्षत्रचरितंज्ञात्वागोलंचतत्वतः॥ ग्रहलोकमवाप्नोतिपर्यायेणात्मवा नरइति॥ ग्रहनक्षत्राणां चरितंगणितविषयकज्ञानंग्रंथप्रवेखंडरूपंगोलंभूगोलभगोलस्वरूपप्रतिपादकं ग्रंथं ग्रंथोत्तरार्ध तर्गतं चकारः समुच्चये तत्वतः यस्तुस्थितिसद्भावेनसार्वविभक्तिकस्तालिप्तेकेज्ञात्वा अवगम्यनरः पुरुषः ग्रहलोकं चंद्रादिग्र हाणांलोकंतल्लोकाधिष्ठितस्थानमपिधेयंप्राप्नोति॥ ननुग्रहलोकप्राप्त्याकः पुरुषार्थः इत्यर्थतोमोक्षरूपपुरुषार्थफलमाह॥ पर्यायेणेति॥ जन्मांतरेणपुरुषः आत्मवान् आत्मज्ञानीभवति॥ तथाचात्मज्ञानान्मोक्षप्राप्तिरेवेतिभावः॥ २५॥ ॥ अथाग्रिमग्रंथस्यासंगतिपरिहारायारब्धाध्यायसमाप्तिफक्किकयाह॥ इतिज्योतिषोपनिषदध्यायइति॥ यथावेदे आत्म स्वरूपादिनिरूपणान्नारायणोपनिषदुच्यते॥ तथाज्योतिः शास्त्रेप्रतिपादितानांग्रहनक्षत्राणांमेतद्ग्रंथैकदेशोस्वरूपादि निरूपणाज्ज्योतिः शास्त्रसारंज्योतिषोपनिषदुच्यते॥ तत्संज्ञोध्यायोग्रंथैकदेशः संपूर्णइत्यर्थः॥ ॥ रंगनाथेनरचिते श्रीः
सूर्यसिद्धांतटिप्पणे॥ ज्योतिषोपनिषत्संज्ञोध्यायः पूर्णोत्तरार्धके॥ २५॥ ॥ इतिसकलगणकसार्वभौमबल्ला २०

319
1941

लदैवज्ञात्मजरंगनाथगणकविरचितेगूढार्थप्रकाशकेउत्तरखंडेज्योतिषोपनिषदध्यायः पूर्णः॥ २॥ ॥ अथमानानिकतिकिं तेरवंशिष्टप्रश्नोत्तरभूतआरब्धमानाध्यायोव्याख्यायते॥ तत्रप्रथमंमानानिकतीतिप्रथमप्रश्नस्योत्तरमाह॥ ब्राह्मंदिव्यंतथापि त्र्यंप्राजापत्यंगुरोस्तथा॥ सौरंचसावनंचांद्रमार्क्षंमानानिवैनवेति॥ वैनिश्चयेननवसंख्याकानिकालमानानि॥ तत्रप्रथमंब्राह्मंमा नंकल्पोब्रह्ममाहः॥ प्रोक्तमित्यादिपरमायुः शतंतस्यतयाहोरात्रसंख्ययेत्यंतंमध्यमाधिकारेप्रतिपादितंद्वितीयंदिवंदेवमानं दिव्यंतदहउच्यते॥ इत्यादितत्पष्टिः षड्गुणादिव्यंवर्षमित्यंतंतत्रैवप्रतिपादितंतथात्ततीयमानंपित्र्यंपितॄणांमानंवक्ष्यमाणंप्रा जापत्यंमानंचवक्ष्यमाणंचतुर्थं॥ बृहस्पतेस्तथामानंवक्ष्यमाणंपंचमंसौरंचकारात्षष्ठंमानंसावनंसप्तमंमानंचांद्रमानमष्टमं नाक्षत्रंमानंनवमंएतान्यपितत्रैवोक्तानि॥ अथकिंवर्ततेरितिद्वितीयप्रश्नस्योत्तरंविवक्षुः प्रथमंव्यवहारोपयुक्तमानानिदर्श यति॥ ॥ चतुर्भिर्व्यवहारोत्रसौरचांद्रर्क्षसावनैः॥ बार्हस्पत्येनषष्ट्यब्दंज्ञेयंनान्यैस्तुनित्यशइति॥ अत्रमनुष्यलोकेसौरचांद्र नाक्षत्रसावनैश्चतुर्भिर्मानैर्व्यवहारः कर्मघटना॥ षष्ट्यब्दंप्रभवादिषष्टिवर्षजात्यभिप्रायेणैकवचनं॥ बार्हस्पत्येनबृहस्पति मानेनबृहस्पतिमध्यमराशिभोगात्मककालेनप्रत्येकंज्ञेयं॥ अन्यैरपिशिष्टैः ब्राह्मादिव्यपित्र्यप्राजापत्यैः नित्यशः सदे त्यर्थः॥ व्यवहारोनास्तितुकारात्कदाचित्कत्वेनतैर्व्यवहारः॥ २॥ ॥ अथसौरेणव्यवहारप्रदर्शयति॥ सौरेणद्युनिशोर्मा नंषडशीतिमुखानिच॥ अयनंविषुवंचैवसंक्रांतेःपुण्यकालता॥ अहोरात्र्योर्मानंसौरेणज्ञेयं॥ प्रत्यहिकस्पष्टगतिभोगा दहोरात्रंभवतीत्यर्थः॥ षडशीतिमुखानिवक्ष्यमाणानिचसमुच्चयेतेनसौरमानानिज्ञेयानि॥ अयनंविषुवत्॥ चसमुच्चये संक्रांतेपुण्यकालताः सूर्यबिंबकलासंबंधासौरमानेन॥ ३॥ ॥ अथषडशीतिमुखमाह॥ तुलादिषडशीत्यह्नांषड शीतिमुखंक्रमात्॥ तच्चतुष्टयमेवंस्याद्द्विस्वभावेषुराशिषु॥ तुलारंभाषडशीतिदिवसानांसौराणांषडशीतिमुखंभव ति॥ तच्चतुष्टयंषडशीतिमुखस्यचतुःसंख्यादिः स्वाभावेषुराशिषुचतुर्षुक्रमात्एवंवक्ष्यमाणाभवति॥ ४॥ ॥त देवाह॥ षड्विंशेधनुषोभागेद्वाविंशेनिमिषस्यच॥ मिथुनाष्टादशेभागेकन्यायास्तुचतुर्दशेइति॥ धनूराशेः षड्विंशतिमेअंशे

षडशीतिमुखंमीनराशौद्वाविंशतिमंशेषडशीतिमुखंचकारःसमुच्चयार्थकः प्रत्येकमन्वेतिमिथुनराशेरष्टादशेंशेषडशीतिमुखं
न्यायाश्चतुर्दशेभागेषडशीमुखंअतएवतुलादिलःषडशीत्यंशेगणनयायेराशिषुभवतितेराशयोद्विस्वभावाःषडशीतिमु
खसंज्ञाः॥संक्रांतिप्रकरणेसांह्रितिकैरुक्ताः॥ ५॥ ॥अथषडशीत्यंशगणनयाचत्वारिषडशीतिमुखानिउक्ताभगणांशपू
र्त्यर्थंअवशिष्टांशाःषोडशादिपुण्याइत्याह॥ततःशेषाणिकन्यायाःयहानितुषोडश॥क्रतुभिस्तानितुल्यानिपितॄणांदत्तमक्ष
यमिति॥ततःकन्यादिचतुर्दशभागानंतरंशेषाणिभगणभागेवशिष्टानिकन्यायाःउंशानिअह्वानिसोभागसमानिषोडशता
नितुकालपूर्वाह्निसमानिक्रतुभिर्यज्ञैःसमानिअतिपुण्यानीत्यर्थः॥तत्रपितॄणांदत्तंश्राद्धादिकृतंअक्षय्यमनंतफलदंभव
ति॥ ६॥ ॥अथराश्यधिष्ठितक्रांतिवृत्तेचत्वारिस्थनानिपदसंधिस्थानेविषुवायनाभ्यांप्रसिद्धानीत्याह॥भचक्रनाभौवि
षुवद्वितयंसमसूत्रगं॥अयनद्वितयंचैवचतस्रःप्रथितास्तुताइति॥भचक्रनाभौभगोलस्यध्रुवद्वयाभ्यांतुल्यांतरेणमध्यभा
गेविषुवद्वितयंविषुवद्वयंसमसूत्रगंपरस्परंव्याससूत्रांतरितं॥ध्रुवमध्यांविषुवद्वृत्तावस्थनात्तद्वृत्तेक्रांतिवृत्तभागेयोलग्नौ
क्रमेणपूर्वापरौविषुवसंज्ञौमेषतुलाख्यौचेत्यर्थः॥अयनाद्वितयंअयनद्वयंकर्कमकरादिरूपंचसमुच्चयेतेनसमसूत्रगाताःवि
षुवायनस्थाःक्रांतिवृत्तप्रदेशरूपाःभूमयःचतस्रःचतुःसंख्याकाःप्रथिताःगणितादौपदादित्वेनप्रसिद्धाः॥एवकाराद
न्यराशीनांनिरासः॥तुकारात्तासांसमसूत्रत्वेपिविषुवायनत्वाभावात्पदादित्वेनाप्रसिद्धिरित्यर्थः॥ ७॥ ॥अथाव
शिष्टराशीनामादिस्वरूपमन्यदप्याह॥तदंतरेषुसंक्रांतिद्वितयंद्वितयंपुनः॥नैरंतर्यात्तुसंक्रांतेर्ज्ञेयंविष्णुपदीद्वयमिति॥तदंत
रेषुविषुवायनांतरालेषुअंत्रालरालानांचतुष्ट्वनेसद्भावात्बहुवचनंसंक्रांतिद्वितयंद्वितयंपुनःराश्यादिभागेग्रहाणामाक्र
मणंवारद्वयंभवति॥तदंतरालेराश्यादिभागौद्वौभवतइत्यर्थः॥यथाहिमेषाख्यविषुवकर्काख्यायनयोरंतरालेवृषमिथुनयो
रादी॥कर्कतुलयोरंतरालेसिंहकन्ययोरादी॥तुलामकरयोरंतरालेवृश्चिकधनुषोरादीमकरमेषयोरंतरालेकुंभमीनयोरादी
इति॥एवंविषुवानंतरंसंक्रमणद्वयमनंतरमयनमयतेरंसंक्रांतिद्वयंतदनंतरंविषुवमनंतरंसंक्रांतिद्वयमनंतरमयनंइत्यादि

321/1974

नैरंतर्येणज्ञेयमित्यर्थः॥संक्रांतिद्वयमध्येप्रथमसंक्रांतौविशेषमाह नैरंतर्यादितिनिरंतरत्वासंभवात्वाःसंक्रांतेःसकाशात्तद्विष्णु
पदीद्वयंतदंतरालेइतीत्यर्थः॥अवगम्यंप्रथमसंक्रांतिविष्णुपदसंज्ञातयोर्द्वयंतदभ्यंतरेप्रत्येकंभवतीतितात्पर्यार्थः॥षडशीतिसं
ज्ञंद्वितीयसंक्रमणंपूर्वोक्तवितंतयोरपिद्वयंतदंतरालेभवतीतिध्येयं॥ ८॥ ॥अथायनद्वयमाह॥भानोर्मकरसंक्रांतेःषण्मा
साउत्तरायणं॥कर्कादेस्तुतथैवस्यात्षण्मासादक्षिणायनमिति॥सूर्यस्यमकरसंक्रांतेःसकाशात्षट्सौरमासाउत्तरायणंभ
वति॥कर्कादेकर्कसंक्रांतेःसकाशात्तथास्यर्भोगात्एवकाराद्न्यग्रहानिरासःषण्मासाःतुकारात्सौराःदक्षिणायनंभवति
॥ १०॥ ॥अथर्तुमासवर्षाण्याह॥द्विराशिनाथादृतवस्ततोपिशिशिरादयः॥मेषादयोद्वादशैतेमासास्तैरेववत्सरइति॥
ततोमकरसंक्रांतेःसकाशादपिशब्दःउत्तरायणावधिनासमुच्चयार्थकः॥द्विराशिनाथाःराशिद्वयनामिकाः॥राशिद्वयार्कभोग
त्मकाइत्यर्थः॥शिशिरादयःशिशिरवसंतग्रीष्मवर्षाशरद्धेमंताःऋतवःकालविभागविशेषःभवंति॥एतेसूर्यभोगविशेषेनि
ष्पन्नकाःमेषादयोराशयोद्वादशमासाःतैर्द्वादशभिर्मासैःएवकारान्न्यूनाधिकव्यवच्छेदः॥वत्सरःसौरंवर्षंभवति॥ १०॥ ॥
अथसंक्रांतौपुण्यकालानयनमाह॥अर्कमानकलाःषष्ट्यागुणिताःषष्टिभाजिताः॥तदर्धेनाड्यःसंक्रांतेरर्वाक्पुण्यंतथा
परमिति॥सूर्यस्यबिंबप्रमाणकलाःषष्ट्यागुणिताःसूर्यगत्याभक्ताःतस्यफलस्यार्धंतत्संख्याकाघटिकाइत्यर्थः संक्रांते
सूर्यराशिप्रवेशकालादित्यर्थः॥अर्वाक्पूर्वपुण्यंस्नानादिधर्मकृत्येपूर्वघटिकाःपुण्यधिकारकाःअपरेक्रांत्युत्तरकालेत
थास्नानादिधर्मकृत्येपूर्वक्षयपात्तिः॥सूर्यबिंबकेंद्रस्यराश्यादौसंचरणकालःसंक्रमणकालस्तस्यसूक्ष्मत्वेनदुर्ज्ञेयत्वात्
स्थूलंकालःकोप्यभ्युपेयः॥सतुराश्यादौबिंबसंचरणरूपांगीकृत्यबिंबसंबंधात्॥अतःसूर्यगत्याषष्टिसावनघटिकास्तद
सूर्यबिंबकलाभिःकाइत्यनुपातानीताःबिंबघटिकाःसंक्रांतिकालःस्थूलःप्राङ्नेमिसंधरणकालात्पश्चिमनेमिसंचरण
कालपर्यंतंतदर्धघटिकाःयासार्धघटिकाइतिसंक्रांतिकालात्ताभिःपूर्वमपरत्रकाले प्रागपरनेम्योःक्रमेणसंचरणात्
पूर्वोत्तरकालेस्युरिति॥ ११॥ ॥अथसौरकालमुक्त्वाक्रमप्राप्तचांद्रमानमाह॥अर्कादिनिःसृतःप्राचीयद्यात्यहरहः

स०टी०
२२

शशी॥ तत्रचांद्रमानमंशैर्मुनिमितैर्द्वादशभिस्तिथिरिति सूर्यात्समागमंत्यक्त्वा विनिर्गतः पृथग्भूतः सन् चंद्रः अहरहः प्रतिदिनं य
दवतसंख्यामितंभागांपूर्वस्यांदिशिगच्छति तन्तस्यातिदिनेचांद्रमानंतुतेनगत्यंतरांशामितं॥ १२॥ ॥ननुसौरादिनंसर्वांशेनयथाभवति
तथापितद्वैभागे क्रियादिः पूर्णचांद्रदिनंभवतीत्यत आह॥ अंशैरिति भागैः तुकारात्सूर्यचंद्रांतरांशैः तस्यतद्रूपत्वात्॥
द्वादशसंख्यांकैस्तिथिर्द्विमा॥ एकंचांद्रदिनंभवति एतदुक्तंभवति॥ सूर्यचंद्रयोगाच्चांद्रदिनंप्रवृत्तेः पुनर्योगेमाससमाप्तिर्भगणां
तरेणचांद्रोमासस्त्रिंशच्चांद्रदिनात्मकः॥ अतस्त्रिंशद्भिर्भगणांशांतरं तदेकेनकिमितिद्वादशभागैरेकंचांद्रदिनं॥ दर्शःसू
र्येंदुसंगमइत्यभिधानादशांवधिकमासस्यत्रिंशत्तिथ्यात्मकत्वात्तिथिचांद्रदिनरूपेति॥ १२॥ ॥अथचांद्रव्यवहारमाह॥
तिथिः करणमुद्वाहक्षौरसर्वक्रियास्तथा॥ व्रतोपवासयात्राणां क्रियाचांद्रेणगृह्यतइति॥ तिथिः प्रतिपदाद्याकरणंबवादिकं
उद्वाहोविवाहः क्षौरंचौलकर्मएतदाद्याः सर्वाःक्रियाः व्रतबंधाद्युत्सवरूपाः व्रतोपवासयात्राणांनियमोपवासगमनानां
क्रियाकरणंतथासमुच्चयार्थकः॥ चांद्रमानेनगृह्यते अंगीक्रियंते॥ १३॥ ॥अथचांद्रमासंगात्पित्र्यमानंचाह॥ त्रिंश
तातिथिभिर्मासश्चांद्रः पित्र्यमहःस्मृतं॥ निशाचमासपक्षांतौतयोर्मध्येविभागतइति॥ त्रिंशतातिथिभिः त्रिंशन्मितैस्ति
थिभिश्चांद्रोमासः पित्र्यंपितृसंबंधि अहोदिनंनिशारात्रिः पितृसंबंधाचकारः व्यवस्थार्थकः॥ तेनोभयत्रैकप्रत्येकंभि
नुमिलितंस्मृतमितिलिंगानुरोधेनोभयत्रान्वेति॥ तथाचचांद्रोमासः पित्र्याहोरात्रमित्यर्थः प्रफलितः मासपक्षांतौमा
सांतोदर्शांतः पक्षांतः पूर्णिमांतः एतावित्यर्थः विभागतः क्रमेणेत्यर्थः॥ अर्थात्कृष्णाष्टम्यर्धेदिनांतइतिसिद्धं॥ १४॥
अथकमप्राप्तंनाक्षत्रमानंप्रसंगान्माससंज्ञांचाह॥ भचक्रभ्रमणंनित्यंनाक्षत्रंदिनमुच्यते॥ नक्षत्रनाम्नामासास्तुज्ञे
याःपर्वांतयोगतइति॥ नित्यंप्रत्यहंभचक्रभ्रमणंनक्षत्रसमूहवायुकृतपरिभ्रमः नाक्षत्रंनक्षत्रसंबंधिदिनंमानज्ञैःक
थ्यते॥ नित्यमित्यनेनचंद्रभोगनक्षत्रभोगोनाक्षत्रंदिनमित्यस्यनिरासः भचक्रभ्रमणानुपपत्तेः माससंज्ञामाह॥ न
क्षत्रनाम्नेतिपर्वांतयोगतः पर्वांतः पूर्णिमांतः तस्ययोगोतत्संबंधात्नक्षत्रसंज्ञयामासाः तुकाराच्चांद्राः अवगम्याः पूर्णि श्रीः
२२

मांतस्थितचंद्रनक्षत्रसंज्ञोमासोज्ञेयइतितात्पर्यार्थः॥ यथाहयद्दर्शांतावधिकश्चांद्रोमासस्तदभ्यंतरस्थितपूर्णिमांतस्थितचंद्रनक्षत्रसंज्ञः
चित्रासंबंधाच्चैत्रः विशाखासंबंधाद्वैशाखः ज्येष्ठासंबंधाज्ज्येष्ठः आषाढसंबंधादाषाढः श्रवणाच्छ्रावणः भाद्रपदासंबंधाद्भाद्रपदः
अश्विनीसंबंधादाश्विनः कृत्तिकासंबंधात्कार्तिकः मृगशीर्षसंबंधान्मार्गशीर्षः॥ पुष्यसंबंधात्पौषः मघासंबंधान्माघः फल्गुनी
संबंधात्फाल्गुनइति॥ १५॥ ॥ननुपूर्णिमान्तेतन्नक्षत्राभावेकथंतत्संज्ञामासानामुचितेत्यत आह॥ कार्तिक्यादिषुसंयोगे
कृत्तिकादिद्वयंद्वयं॥ अंत्योपांत्यौपंचमश्चत्रिर्भमासत्रयंस्मृतामिति॥ नक्षत्रसंयोगार्थमितिनिमित्तसप्तमी॥ कार्तिक्यासुका
र्तिकमासादीनांपूर्णमासीष्वित्यर्थः॥ कृत्तिकादिद्वयंनक्षत्रंकथितंकृत्तिकारोहिणीभ्यांकार्तिकः॥ मृगार्द्राभ्यांमार्गशीर्षः॥
पुनर्वसुपुष्याभ्यांपौषः॥ आश्लेषामघाभ्यांमाघः॥ चित्रास्वातीभ्यांचैत्रः॥ विशाखानुराधाभ्यांवैशाखः॥ ज्येष्ठामूलाभ्यांज्ये
ष्ठः॥ पूर्वोत्तराषाढाभ्यांआषाढः॥ श्रवणधनिष्ठाभ्यांश्रावणइतिफलितं॥ अवशिष्टमासानामाह॥ अंत्योपांत्याविति॥ अ
त्रकार्तिकस्यादित्वेनग्रहादंत्यः आश्विनः उपांत्योभाद्रपदः॥ एतौमासौपंचमः फाल्गुनः॥ चकारात्समुच्चयइतिमासत्रयंत्रिधा
॥अनत्रयंउक्तंरेवत्यश्विनीभरणीतिनक्षत्रंयत्रसंबंधादाश्विनः॥ शततारकापूर्वोत्तराभाद्रपदेतिनक्षत्रयत्रसंबंधाद्भाद्रपदः
पूर्वोत्तराफल्गुनीहस्तेतिनक्षत्रयत्रसंबंधात्फाल्गुनइतिसिद्धं॥ १६॥ ॥अथप्रसंगात्कार्तिकादिषुबृहस्पतिवर्षाण्या
ह॥ वैशाखादिषुकृष्णेचयोगःपंचदशेतिथौ॥ कार्तिकादीनिवर्षाणिगुरोरस्तोदयात्तथेति॥ ॥यथापौर्णमास्यांनक्षत्रसं
बंधेनतत्संज्ञोमासोभवति॥ तथेतिसमुच्चयार्थकं॥ बृहस्पतेः सूर्यसान्निध्यदूरत्वाभ्यामस्तादुदयाद्वावैशाखादिषुद्वाद
शमासेषुकृष्णपक्षेपंचदशेतिथौ अमायामित्यर्थः॥ चकारः पौर्णमासीसंबंधात्समुच्चयार्थकः॥ योगः दिननक्षत्रसंबं
धः कार्तिकादीनिद्वादशवर्षाणिभवंति॥ वैशाखकृष्णपक्षपंचदश्यांअमारूपायांबृहस्पतेरस्तउदयेवाजातेसतिनदादि
बृहस्पतिवर्षकृत्तिकादिनक्षत्रसंबंधात्कार्तिकसंज्ञं॥ एवंज्येष्ठाषाढश्रावणभाद्रपदाश्विनकार्तिकमार्गशीर्षपौषमाघफा
ल्गुनचैत्रमासेषुपुष्यमघापूर्वाफा० चित्राविशाखाज्येष्ठापूर्वाषाश्रवणपूर्वाभाश्विनीदिननक्षत्रसंबंधान्मार्गशीर्षादीनिभवंति॥

323
1941

सू०टी०उ०
२२

भ त्रापिप्रोक्तनक्षत्रद्वयत्रसंधिः योगत्वेनबोध्यः अनेनतुपलक्षणत्वेनयाद्दिनेवृहस्पतेरुदयोस्तोवातद्दिनेयचंद्राधिष्ठितनक्षत्रंत
त्संज्ञंवार्हस्पत्यंवर्षंभवतीतितात्पर्यं॥संहितायंथेसोदयवशाद्वर्षोक्तिः परमिदानींमुदयवर्षंव्यवहारेगणकैर्गण्यते येनोदितेवा
शात्मुक्तेरिति॥ १७ ॥ ॥अथक्रमप्राप्तंसावनमाह॥ उदयादुदयंभानोःसावनंतत्प्रकीर्तितं॥सावनानिस्युरेतेनयज्ञकालविधि
स्तुतेइति॥सूर्यस्योदयात्उदयकालमारभ्याव्यवहितोदयकालपर्यंतंयत्कालात्मकंतत्सावनंमानंज्ञेरुक्तं एतेनोदयद्वयांतरात्म
ककालस्यगणनयासावनानिवक्ष्यमाणाहरूपेण्यादीनिमध्यमाधिकारोक्तानिभवंति॥तद्व्यवहारमाह॥यज्ञकालविधिरिति
यज्ञेप्रथमःकालस्तस्यगणनातैः सावनैः तुकारोन्यमानानिरासार्थकैवकारपरः॥ १८ ॥ ॥अथव्यवहारांतरमाह॥सूतका
दिपरिच्छेदोदिनमासाब्दपास्तथा॥मध्यमाग्रहभुक्तिश्चसावनेनैवगृह्यतेइति॥सूतकंजन्ममरणसंबंधि॥आदिपदग्राह्यंराश
त्रितचांद्रायणादितस्यपरिच्छेदनिर्णयः॥दिनाधिपमासेश्वरवर्षेश्वराः॥तथाचसमुच्चयेग्रहणांगतिर्मध्यमातुकात्स्पष्ट
तेतुरासःतस्याःक्षणंवैलक्ष्याद्दिनसंबंधस्याभावात्॥एतेनस्पष्टगत्यास्पष्टग्रहस्यचालनंनिरस्तंस्थूलत्वादितिसर्वेतंसावन
मानेनएवकारादन्यमानानिरासः॥गृह्यतेसुधीभिरंगीक्रियते॥अत्रबहुवचनानुरोधेनगृह्यतेइत्यत्रबहुवचनंज्ञेयं॥१९॥
अथदिव्यमानमाह॥सुरासुराणामन्योन्यमहोरात्रंविपर्ययात्॥यत्प्रोक्तंतद्भवेद्दिव्यंभानोर्भगणपूरणादिति॥पूर्वार्धंपूर्वंव्या
ख्यातं॥यदहोरात्रंपूर्वार्धोक्तंसूर्यस्यभगणभोगपूर्तेप्रोक्तंपूर्वमनेकधानिर्णीतंतदहोरात्रंदिव्यमानंस्यात्॥ २०॥ ॥
अथावशिष्टंप्राजापत्यब्राह्ममानेआह॥मन्वंतरव्यवस्थाचप्राजापत्यमुदाहृतं॥नतत्रद्युनिशोर्भेदोब्राह्मंक ल्पःप्रकी
र्तितमिति॥मन्वंतरव्यवस्थामन्वंतरावस्थितिः युगानांसप्ततिः सैकेत्यादिनमध्याधिकारोक्तेतिवार्थः॥प्राजापत्यंमानंना
नज्ञेरुदाहृतमुक्तं॥मनूनांप्रजापतिपुत्रत्वात्॥ननुदेवपितृमानयोः दिनरात्रिभेदोयथोक्तस्तथास्मिन्मानेदिनरात्रिभे
दप्रतिपादनंकथंनोक्तमित्यतआह॥नेतितत्रप्राजापत्यमानेद्युनिशोः दिनरात्र्योर्भेदः विवेकःगुरुसौरचांद्रमानवन्ना
स्तिब्राह्ममानमाह॥ब्राह्ममितिकल्पःयुगसहस्रात्मकःप्रागुक्तःब्राह्ममानंमानज्ञेरुक्तंयद्यपिपूर्वंपित्र्यवार्हस्पत्यमानयो श्री:
२३

325
1941

रनुक्तेरनतयोरेवनिरूपणंयुक्तमन्येषांनिरूपणंतुश्लोकत्वापुनरुक्तं॥तथापिपूर्वंगणितादुपजीव्यपरिभाषाकथनावश्यकत्वाग
णितप्रस्तावत्वेनैषांमानानांत्वेननिरूपणादत्रतुविशेषकथनार्थंमानत्वेनपुनस्तेषांनिरूपणंप्रश्नोत्तरत्वेनाक्षतिकरमन्यथाप्रश्ना
नुपपत्तेरितिदिक्॥ २१ ॥ ॥अस्योक्तमुपसंहरति॥एतत्तेपरमाख्यातंरहस्यंपरमद्भुतं॥ब्रह्मैतत्परमंपुण्यंसर्वपापप्रणाशन
मिति॥हेपरमदैत्यश्रेष्ठसूर्यभक्तत्वात्तेतुभ्यंएतदधुनोक्तंपरंद्वितीयकथनंआख्यातंनिराकांक्षतयासंपूर्णंकथितं॥पूर्वंसा
वनत्रोपमुक्तंस्थितमिति॥त्वयाप्रश्नाःकृतास्तदुत्तररूपंद्वितीयकथनमिदंनिःसंदिग्धमस्तीति॥तवसंशयानोद्भवंतीति
भावः॥ननुमयास्यार्थंक्रियापूर्वमेवंदंकथनोक्तमित्यतआह॥रहस्यमितिकुतइत्यतआह॥अद्भुतमिति॥आकाशस्थग्रहन
क्षत्रादिस्थितिज्ञानसंपादकत्वादाश्चर्यकरमित्यर्थः॥तथाचमत्पूर्वोक्तंयेनसावधानतयाश्रुतंतेनैवत्वदुक्ताःप्रश्नाःकर्तुं
शक्यास्तदुत्तरत्वेनाद्वितीयंमदुक्तमितित्वांपरीक्षत्वांप्रत्युक्तंरहस्यमितिभावः॥नन्वन्यत्रशास्त्राणांज्ञानात्ब्रह्मानंदावा
प्तिरस्मात्नेत्यतआह॥ब्रह्मेतिएतन्मदुक्तंब्रह्मपरं॥तथाचान्यत्रशास्त्राणांब्रह्मसमत्वाभावेपितद्ज्ञानात्ब्रह्मानंदावाप्ति
रस्मात्ब्रह्मस्वरूपात्ब्रह्मानंदावाप्तौकिंचित्रमितिभावः॥कुतइदंब्रह्मसममित्यतआह॥परममितिउत्कृष्टंअत्रहेतुभूतं
विशेषणद्वयमाह॥पुण्यंसर्वपापप्रणाशनमिति॥पुण्यजनकंसर्वपापप्रणाशकं॥ २२ ॥ ॥ननुस्माद्ब्रह्मानंदवाप्तिरुक्ता
पूर्वंग्रहश्लोकंप्राप्तिश्चोक्ता॥तत्रानयोःकिंफलंभवंतीत्यतआह॥दिव्यंचार्क्षंग्रहाणांचदर्शितंज्ञानमुत्तमं॥विज्ञायार्कादि
लोकेषुस्थानंप्राप्नोतिशाश्वतमिति॥आर्क्षंनक्षत्रसंबंधिज्ञानंग्रहाणांज्ञानंचसमुच्चये॥उत्तमंसर्वशास्त्रेभ्यउत्कृष्टं॥अत्र
हेतुभूतंविशेषणंदिव्यंस्वर्गलोकोत्पन्नंदर्शितंमयातुभ्यमुपदिष्टंविज्ञायज्ञात्वाअर्कादिलोकेषुसूर्यादिग्रहलोकेषुस्थानं
अधिष्ठानंप्राप्नोतिशाश्वतंनित्यंब्रह्मसायुज्यरूपंस्थानंपूर्वार्धस्थद्वितीयचकारःसमुच्चयार्थकःकात्रान्वेतितथाचोभय
फलंक्रमेणभवतीतिभावः॥यत्रैतत्तेपरममाख्यातमित्यादिश्लोकःकचित्पुस्तकेअस्माद्ब्लोकात्पूर्वंनास्ति॥किंतुमानाति
रूपणांतस्यदिव्यंचार्क्षमित्यादिश्लोकांतंमानाध्यायसमाप्तिंकृत्वाग्रे॥यथाशिखामयूराणांनागानांमणयोयथा॥तद्वदे

गद्गाख्याणांगणितंमयानिखितं॥ १ ॥ नदेयंसत्कृतध्नायवेदविन्नबकायच॥ अर्थलुब्धायमूर्खायसाहंकारायपापिने॥ २॥ एवंविधा
यपुत्रायापदेयंसहजायच॥ दत्तेनवेदमार्गस्यसमुच्छेदः कृतोभवेत्॥ ३॥ ग्रजेतामंधताभिस्तंगुरुद्रोहायोतुदारुणं॥ तनः शांतायशु
चयेब्राह्मणायैवदापयेत्॥ ४॥ चक्रानुपातजोमध्योमध्यस्तांशजस्फुटः॥ कालेनदृक्समानस्यात्ततोबीजक्रियोच्यते॥ ५॥ रम्या
दिरिंदुरंकघ्नोभक्तोनक्षत्रकक्ष्मा॥ शेषंनक्षत्रकक्षायास्त्यजेछेषकयोस्त्वयोः॥ ६॥ यदल्पंतद्गजेंद्रानांकक्ष्यातिथिनिघ्नया॥ बी
जंभागादिकंतत्स्यात्कारयेत्तधनंरवौ॥ ७॥ त्रिगुणंशोधयेदिंदौतिनघ्नंभूमिजेक्षिपेत्॥ दृग्यसमस्नणंज्ञोच्चेरखरामघ्नंगुरावृणं
॥ ८॥ कृणंव्योमनवघ्नंस्याद्दानवेध्यबलोच्चके॥ धनंसमाहृतंमंदेपरिधीनामथोच्यते॥ ९॥ कुम्भातोक्तापरिधयएतेनित्यंपरिस्फुटाः
ओजांतोक्तास्तुतेज्ञेयाः परिवीजेनसंस्कृताः॥ १०॥ वचाभिवीजकानोजपदांतेरत्नभागकान्॥ सूर्येदूभिनवोदंताध्ततितत्त्वकलोनिताः
॥ ११॥ बाणतर्कामहीजस्यसौम्यस्याचलवाहवः॥ वाक्यतेरष्टनेत्राणिव्योमशीतांशवोभृगोः॥ १२॥ श्रन्यत्तेवार्कपुत्रस्यबीजमेतधुका
येत्॥ बीजंरवाग्मुख्तंशोध्यंपरिध्यंशोधुभास्वतः॥ १३॥ इनाप्तंयोजयेदिंदोःकुजस्याश्वहतंक्षिपेत्॥ विश्वघ्नंद्वंद्वहतंयोज्यंस्वरहतंधनं॥
॥ १४॥ धनभृगोर्भुवानिघ्नंरविघ्नंशोधयेत्छनेः॥ एवंमांदाःपरिध्यंशाःस्फुटास्युर्वामशीघ्रकान्॥ १५॥ भौमस्याग्रगुणाक्षीणिबुध
स्याद्विगुणंदवः॥ बाणाक्षादेवप्रजस्यभार्गवस्येंदुषड्यमाः॥ १६॥ शनिश्चंद्राब्धयःशीघ्राओजांतेबीजवर्जिताः॥ द्विघ्नंस्वंकुजभागे
बुबीजाद्विघ्नमृणंविदः॥ १७॥ अत्यष्टिघ्नंधनंस्वरेरिंदुघ्नंशोधयेत्कवेः॥ चंद्रघ्नमृणमर्कस्यस्वुरेभिर्दृक्समाजहाः॥ १८॥ एतद्वी
जंमयाख्यातंप्रीत्यापरमयातव॥ गोपनीयमिदंनित्यंनापदेश्यंपतस्तमाः॥ १९॥ परीक्षितायशिष्यायगुरुभक्तायसावधं॥
देयंविप्रायनान्यस्मैप्रतिकंचुककारिणे॥ २०॥ बीजंनिःशेषसिद्धांतरहस्यंपरमंस्फुटं॥ यात्रापाणिग्रहादीनांकार्याणांशुभसिद्धये
॥ २१॥ इत्यस्यकस्मिंश्चित्पुस्तकेलिखितस्यवाजोपनयनाध्यायस्यांतेलिखितोदृश्यते॥ नत्तुनसमंजसं॥ उत्तरखंडेग्रहगणि
तनिरूपणाभावात्तन्निरूपणप्रसंगनिरूपणीयस्याध्यायस्यलिखनानौचित्यात्॥ स्पष्टाधिकारेयदंतेवास्यालिखनस्यकु
कत्वाच्च॥ किंचमानानिकृतिकिंचतोरितिप्रश्नाग्रेप्रश्नानामभावात् प्रश्नोत्तरभूतोत्तरखंडेअस्यलिखनमसंगतं अपिचउपदेशकालेवी श्री २४

327/1941

जाभावादग्रेंतरदर्शनमनियतंकथमुपदिष्टमन्यथांतर्भूतत्वेनैवोक्तंस्यादित्यादिविचारेणकेनापिद्वष्टेनबीजस्यार्षमूलकत्वज्ञापनार्था
तेनबीजोपनयनाध्यायः॥ प्रक्षिप्तइत्यवगम्यतव्याख्यातइतिमंतव्यं॥ २३॥ ॥अथमुनिर्मुनीन्प्रतिकथितसंवादस्योपसंहा
रमाह॥ इत्युक्त्वामयमामंत्र्यसम्यक्तेनाभिपूजितः॥ दिवमाचक्रमेर्कांशः प्रविवेशःस्वमंडलमिति॥ सूर्यांशपुरुषोमयासुर
मामंत्र्यसम्यकत्वतोयदादिचरितमुपदिश्यइति॥ एतन्नेइत्यादिश्लोकद्वयमुक्त्वाकथमिति॥ समुच्चयार्थकश्चोनुसंधेय
दिवंस्वर्गमाचक्रमंआक्रमणविषयांचक्रे॥ ननुसूर्यांशपुरुषस्यतस्योपदेशकोवापुरुषार्थइत्यतआह॥ तेनेतिमयासुरेण
भिपूजितः॥ गंधपुष्पधूपदीपनैवेद्यवस्त्रालंकरणादिभिः॥ पूजांविषईकृतमयद्वारामर्त्यलोकेप्राप्तधर्मस्सूर्यतुल्यत्वेनप्राप्त
इतिभावः॥ ननुस्वर्गेपिकिंस्थानंगतइत्यतआह॥ प्रविवेशेतिस्वमंडलंसूर्यमंडलंप्रविवेशेति॥ स्मअधिष्ठितवान्॥ अत्रापिस
मुच्चयार्थोनुसंधेयश्चकारः॥ २४॥ ॥अथमयासुरावस्थांतात्कालिकीमाह॥ मयोथदिव्यंतज्ज्ञानंज्ञात्वासाक्षाद्विवस्वतः
कृतकृत्यमिवात्मानंमेनेनिर्धूतकल्मषमिति॥ अथसूर्यांशपुरुषांतर्धानानंतरंमयासुरः॥ तज्ज्ञानंग्रहर्क्षस्थित्यादिज्ञानंदृष्टो
कोदिव्यंस्वर्गस्थंसूर्यात्साक्षात्अनन्यद्वारेत्यर्थः॥ उत्तरार्धस्थेवपदमात्रान्वितेतेनसूर्यांशपुरुषस्यसूर्याभिन्नत्वंतदुक्तत्वात्त
एवभेदेपिसाक्षादुक्तंयुक्तंज्ञात्वाआत्मानंस्वंनिर्धूतकल्मषंनिवारितपापंकृतकृत्यंसंपादितकार्यमेनेमन्यतेस्म॥ २५॥ ॥अथ
त्वमिदंज्ञानंकथंप्राप्तवानिदृतिश्रोतृमुनिभिःपृष्टोमुनिस्तान्प्रतितत्रतत्याः॥ अस्मत्प्रभृतयक्रमेणमयंप्रतिएतज्ज्ञानंप्र
वृत्तइत्याह॥ ज्ञात्वातमृषयश्चाथसूर्यलब्धवरंमयं॥ परिवव्रुरुपेत्यौपैसोज्ञानंपप्रच्छुरादरादिति॥ ॥अथमयासुरस्यज्ञा
नप्राप्त्यनंतरंकृषयःसूर्यांशपुरुषमयासंवाश्रितभूमिप्रदेशासन्नभूमिप्रदेशस्थअस्मत्प्रभृतयोमुनयःतंकृतकृत्यंम
यासुरंसूर्यलब्धवरंसूर्यात्प्राप्तःवरःज्ञानप्रसादोयेनेतादृशंज्ञात्वाउपसमीपेएत्यआगत्यचःसमुच्चयेपरिवव्रुः॥
वेष्टितवंतःअथोअनंतरंआदरादत्यंतंसाभिलाषतयातज्ज्ञानंग्रहादिचरितंपप्रच्छुःपृष्टवंतः॥ २६ ॥ ॥अथमयासु
रःस्वज्ञानंतत्प्रकारकानस्मत्प्रभृतीन्मुनिन्प्रतिकथयामासेत्याह॥ ॥सतेभ्यःप्रददौप्रीतोग्रहाणांचरितंमहत्॥ अत्यद्

सू॰टी॰उ॰
२५

ततमंलोकेरहस्यंब्रह्मसंमितमिति सः मयासकः संतुष्टः सन्नेतेभ्यः अस्मत्तोनिर्गतेभ्यः ऋषिभ्यः ग्रहाणांस्थित्यादिज्ञानंमहदपरिमेयं भ
तएवब्रह्मसंमितंब्रह्मतुल्यंलोकेभूर्लोके अत्यद्भुततमं अत्यंतमाश्चर्यकारकं श्रेष्ठं अतएव भवद्दौ प्रकर्षेणनिर्व्याजतयादत्तवानक
थयामासेत्यर्थः ॥ अथमानाध्यायसमाप्त्या सूर्यसिद्धांतसमाप्तिं कस्यचित्प्रक्षिप्ताध्यायस्यानिवारिकांपद्धिकयाह ॥ इतिसूर्य
सिद्धांतेमानाध्यायः ॥ समाप्तश्चसूर्यसिद्धांतइतिस्पष्टं ॥ १ ॥ ॥ रंगनाथेनरचितेसूर्यसिद्धांतटिप्पणे ॥ मानाध्यायोत्तरद
लेपूर्णेगूढप्रकाशके ॥ १ ॥ ॥ भागीरथीतीरस्थसंस्थेशंभोर्वाराणसीपुरे ॥ बल्लालगणकोरुद्रजपासक्तोभवद्बुधः ॥ तस्यात्म
जाः पंचगुणाभिरामाज्येष्ठः सुरामः सकलागमज्ञः ॥ वर्नोपपतिः स्वधियानितांतंप्रकाशितानंतसुधारसस्य ॥ २ ॥ ॥
ततः सद्दकोजहंगीरसार्वभौमस्यसेवाधिगतप्रतिष्ठः ॥ श्रीभास्करीयांविवृतिंतुयेनबीजंतथाश्रीपतिपद्धतिः सा ॥ ३ ॥ ॥
गोविंदसंज्ञस्तुततस्तृतीयस्तस्यानुजोहंगुरुलब्धविद्यः ॥ विश्वेशपल्यमनिविष्टचित्तः काशीनिवासीसकलाभिमान्यः
॥ ४ ॥ ॥ श्रीरंगनाथोर्कसुरोक्तशास्त्रेगूढप्रकाशाभिधटिप्पणं सः ॥ कृत्वामहादेवबुधाग्रजोथविश्वेश्वरायार्पितवा
न्सुदृष्ट्यै ॥ ५ ॥ ॥ शाकेतत्वतिथ्यु १५२५ मितेचैत्रमासेसितेशंभुतिथ्योबुधेर्कोदयात्के ॥ दलाद्याद्विरानाव ५
२० नाडीषुजातोमुनीशार्कसिद्धांतगूढप्रकाशः ॥ ६ ॥ ॥ गूढप्रकाशकंदृष्ट्वारंगनाथभवंविभु ॥ मुनीश्वरस्यस
द्वंजंलभंतांगणकाः सुखं ॥ ७ ॥ ॥ इतिश्रीसकलगणकसार्वभौमबल्लालदैवज्ञात्मजरंगनाथगणकविरचि
तः सूर्यसिद्धांतगूढार्थप्रकाशकः संपूर्णः ॥ ॥ श्रीशके १७४७ पार्थिवाब्देज्ये॰ शु॰ २ गुरौइदंपुस्तकंसमाप्तं ॥

श्रीः
२५

329/194

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

इतिगूढार्थप्रकाशिकाउत्तरखंडंसमाप्तं ॥श्रीः॥१२५०